# प्रबोधचन्द्रोदयस्य दार्शनिकं मनोवैज्ञानिकञ्चाध्ययनम्

[ PHILOSOPHICAL AND PSYCHOLOGICAL STUDY
ON PRABODHCHANDRODAYA ]

पञ्जाबविश्वविद्यालयस्य पी.एच.डी. इत्युपाधये प्रस्तुतः

## शोध-प्रबन्धः

अनुसन्धाता—
देवराजशर्मा

विश्वेश्वरानन्द-विश्वबन्धु-संस्कृत-भारतभारती-अनुशीलन-संस्थानम्
पञ्जाब-विश्वविद्यालयः
होशियारपुरम्

मई, १९९०

# "प्राक्कथनम्"

को न वेत्ति माहात्म्यं दृश्यकाव्यस्य ? काव्यस्येयं सर्वातिशायिनी विधा । संस्कृत वाङ्मये तु विशिष्टमस्याःस्थानम् । सुप्राचीनैषा नाट्यपरम्परा । प्रथितो हि ऋग्वेदो विश्वसाहित्यस्यादिमो ग्रन्थः । सुतरामुपचीयमाना दृश्यते तत्रापि नाटकस्य परिकल्पना । प्रथन्ते तत्र सम्वाद-सूक्तानि पुरूरवा-उर्वशी, यम-यमी, इन्द्र-इन्द्राणी-वृषाकपि:, नदी-विश्वामित्रमित्यादय: सम्वादप्रसंगा इमामेव परिपाटीं परिपोषयन्ति । वैदिकसाहित्ये अङ्कुरिता नाट्यपरम्परेयं लौकिकसंस्कृतसाहित्ये पूर्णरूपेण पल्लविता पुष्पिता च इत्यत्र नैव संशय: ।

संस्कृतकाव्यक्षेत्रे लोकसामान्यानुरञ्जनान्नाटकं रम्यतरं गण्यते "काव्येषु नाटकं रम्यम्" इत्यभियुक्तोक्त्या । अत एव लौकिकसंस्कृतसाहित्ये नाटकानां प्राचुर्यमवलोक्यते । कालिदास-भास-भवभूति-राजशेखर-विशाखदत्त-प्रभृतयो विद्वांसो नाटकाश्रयेणापूर्वां ख्यातिं लेभिरे । एतेषां नाट्यकृतयश्चा-धापि लोकसामान्यमनुरञ्जयन्ति ।

अस्यामेव नाट्यपरम्परायां श्रीकृष्णमिश्रमहाभागेन एकादशशताब्द्यामेका नवीना विधा सृष्टा । संस्कृतनाट्यपरम्परायां भगवद्विचारधाराया: प्रवेश:, शान्तरसस्याभिव्यक्ति:, पारलौकिकविषयावतारणं विधाय रूपकसर्जनं नाटक-साहित्ये नूतन एवायास आसीत् । भरतोक्तनाट्यविधाभिर्नवास्या विधाया: संयोग आसीत् ।

अतिक्लिष्टो दुर्ज्ञेयो हि दर्शनविषय: । केचन एव तत्त्वविदो विद्वांसो दर्शनरहस्यं वेत्तुं क्षमन्ते । परं यदा नाट्यरूपेण परिकल्प्य पात्रमिषेण क्लिष्टा इमे दर्शनसिद्धान्ता: पुरतोऽवस्थाप्यन्ते तदानायासेनाल्पधियो-ऽपि तद्रहस्यं बोद्धुं क्षमन्ते ।

श्रीकृष्णमिश्रेण शैलीयमेवाङ्गीकृता तत्र स्वकीये "प्रबोधचन्द्रोदये"।

या च प्रतीकात्मका-रूपकात्मका वा शैली कथ्यते । अस्याः शैल्याः प्रचलनं यद्यपि वेदेष्वपि दृश्यते, तत्रापि प्रतीकपात्रयोजना रूपकात्मकं वा साहित्यमस्ति, परं लौकिक संस्कृत साहित्ये विहाय द्वित्रस्थलेषु नैव कुत्रापि प्रतीकपात्र-परिकल्पनं प्राप्यते । भासस्य बालचरिते अश्वघोषस्य च शारीपुत्रप्रकरणे अंशरूपेण शैलीयमवलोक्यते परं द्वयोरेकाऽपि कृतिर्न प्रतीकात्मकाऽस्ति । - प्रबोधचन्द्रोदय एव अस्याः शैल्याः प्रतिष्ठापक इति स्वीक्रियते आलोचकैरद्यत्वे ।

निसर्गविरुद्धमनोवृत्तीनां पात्रत्वेन परिकल्पनं, दर्शनसिद्धान्तानां च कथावस्तुत्वेन समायोजनं कवेरस्य प्रज्ञाकौशलं प्रौढकवित्वशक्तिं च दर्शयति । श्री कृष्णमिश्र अद्वैतवेदान्तस्य विष्णुभक्त्याश्च समन्वयं विधाय नाटकमिदं प्रणीतवान्, यत्र न केवलमद्वैतवेदान्तस्य एव प्रतिपादनमपि तु तन्मिषेण लोकायत-बौद्ध-जैन-मीमांसादीनां दर्शनसिद्धान्तानामपि विवेचनं विश्लेषणं चास्ति । नाटकोक्तदर्शनसिद्धान्तानामध्ययनेन दुर्बोधा अपि इमे सिद्धान्ताः सरलतया बुद्धिपथमवतरन्ति । अनेन मनोनुरञ्जनपूर्वकं दर्शनरहस्यज्ञानमनायासेन जायते । नाट्यशास्त्रोक्तदिशा अपि नाटकमिदं पूर्णतामवगाहते । निर्व्यूढा-स्तत्र नाटकीयगुणा यथोक्तदिशा । शान्तरसस्याङ्गित्वेऽपि अन्य रसानामपि पूर्णः परिपाको भवति ।

एवं कृतिरियं नाट्यशास्त्रदृशा, दार्शनिकदृशा मनोवैज्ञानिकाध्यात्मक-दृशा च नितरामुपयोगिनीति मत्वा पंजाबविश्वविद्यालयस्य विश्वेश्वरानन्द-वैदिकशोधसंस्थाने अध्यापनकार्यनिरतैस्तत्रभवद्भिः विद्वद्वरेण्यैः डॉ॰ श्री धर्मानन्दशर्म महाभागैः सुप्रेरितोऽहं "प्रबोधचन्द्रोदयस्य दार्शनिकं मनोवैज्ञानिकं च शोधकार्यार्थम् ।

शोधप्रबन्धोऽयमध्यायेषु नवधा विभज्यते यथा -

प्रथमाध्याये - श्रीकृष्णमिश्रस्य व्यक्तित्वं कृतित्वं चेति प्राधान्येन विविच्यते । अत्र हि श्रीकृष्णमिश्रस्य सामान्यपरिचयानन्तरं तस्य स्थितिकालः, स्थिति-कालस्य आभ्यन्तरबाह्यप्रमाणाभ्यां पुष्टिः, तस्य कीर्तिवर्मणा सह सम्बन्धः,

श्रीकृष्णमिश्रस्य जन्मस्थानम्, तस्य कृतित्वं चेति विषयाः समीक्षिताः ।

द्वितीयेऽध्याये - "संस्कृतवाङ्मयस्यनाटकसाहित्ये प्रबोधचन्द्रोदयस्यस्थानम्" विषयोऽयं विचारितः । तत्र हि पूर्वं प्रबोधचन्द्रोदयः रूपकं, नाटकं, प्रतीकं वेति निर्धारितम् । पुनः प्रबोधचन्द्रोदयस्य नाट्यशास्त्रीयदृष्ट्यासमीक्षणं, पूर्ववर्ति प्रतीकनाटकपरम्परा, नाटकसाहित्येप्रबोधचन्द्रोदयस्य स्थानं, परवर्ति प्रतीकनाटकपरम्परा चेत्येतावन्तो विषयाः समीक्षिताः ।

तृतीयेऽध्याये - प्रबोधचन्द्रोदयस्य दार्शनिकी दृष्टिस्तत्र च दर्शनस्य नाटकेषु स्थानम्, प्रबोधचन्द्रोदये प्रतिपादिता दर्शनसिद्धान्ताः, आलोच्यधर्मदर्शनं, स्वाभिमतधर्मदर्शनं चेत्येतावन्तो विषया विवेचिताः ।

चतुर्थेऽध्याये - प्रबोधचन्द्रोदये प्रतिपादितदार्शनिकसिद्धान्तानां मूलदार्शनिकसिद्धान्तैः सह साम्यं वैषम्यं च प्रदर्शितम् । तत्रैव दर्शनस्य प्रतिपाद्यविषयाः, आस्तिकनास्तिकदर्शनयोश्चोद्देश्यमित्यपि पर्यालोचितम् ।

पंचमेऽध्याये - प्रबोधचन्द्रोदयस्य मनोवैज्ञानिकी दृष्टिः पर्यालोचिता । अत्र प्रथमं मनोविज्ञानस्य लक्षणं, प्रयोजनं, मनःस्वरूपं, ज्ञानात्मक-भावात्मक-प्रयत्नात्मकमनोवृत्तीनां च विश्लेषणं विधाय, अन्ते प्रबोधचन्द्रोदयस्य मनोवैज्ञानिकः पक्षो निर्दिष्टः ।

षष्ठेऽध्याये - मनोभावानां प्रतीकपात्राणां चित्रणं कृतम् । भावानां काव्यशास्त्रीयाध्ययनं प्रतीकात्मकनाट्यपरम्परायां मनोभावानां स्थानं, नाटके च तेषां महत्त्वम्, रूपक-प्ररूप-सामान्यपात्राणां च चरित्रचित्रणम्, प्रतीकपात्राणां मनोवैज्ञानिकी दार्शनिकी चोपयोगिता इत्येतावन्तो विषया अध्यायेऽस्मिन् यथामति पर्यालोचिताः ।

सप्तमेऽध्याये - मनः, मुक्तिः, भक्तिश्च विवेच्यविषया अत्र । दर्शनसाहित्ये मनः, मोक्षस्वरूपं, नाट्यक्षेत्रेमोक्षस्वरूपं, भक्तेः स्वरूपं, महत्त्वं, काव्यक्षेत्रे तस्याः स्वरूपं महत्त्वं चेत्यादयो विषयाः प्राधान्येन विवेचिताः ।

अष्टमेऽध्याये - ब्रह्मानन्दस्य काव्यानन्दस्य च स्वरूपम्, रससिद्धान्तः,

रससूत्र-व्याख्या, रसस्यमनोवैज्ञानिकता प्रबोधचन्द्रोदये च रसविवेचनमित्यादय मुख्या विषया: सन्ति ।

नवमेऽध्याये - प्रबोधचन्द्रोदयस्य वैशिष्ट्यं प्रदर्श्य उपसंहृता वाक् ।

अस्यशोधकार्यस्यसर्वाधिकं श्रेयो मदीयनिर्देशकान् तत्रभवत: डा॰ श्री धर्मानन्दशर्ममहाभागान् प्रति गच्छति, येषां निर्व्याजस्नेहेनेदं कार्यं सम्पन्नम् । पदे-पदे येषां सुनिर्देशै: ममोत्साहो वर्धित: । स्वाध्ययनाध्यापन-कार्येषु संलग्नैरपि तै: समये समये कार्यमिदं निरीक्षितम् । तेषां प्रतिस्वकीयां कृतज्ञतां प्रकटीकृत्यापि न सन्तुष्यामि ।

सम्प्रति संचालकपदविभूषितानां प्रो॰ ब्रजविहारी चौबे महाभागानां भृशमुपकृतोऽस्मि शोधकार्येऽत्रदृष्टिदानाय सहायतादानाय च ।

डा॰ वीरेन्द्रमहाभागानाम्, श्री मुनीश्वरदेवमहाभागानाम्, पं॰ इन्द्रदत्तउन्यालमहाभागानाम्, डा॰ शिवप्रसादमहाभागानाम्, डा॰ घनश्याम नौटियालमहाभागानाम्, डा॰ सेमवालमहाभागानाम्, श्रीराधाकृष्णमहाभागानाम् महदुपकृतोऽस्मि, येषां गुरुवराणां सदुपदेशै: मार्गनिर्देशैश्चाथ कार्यमिदं निर्व्यूढम् । पुस्तकालयाध्यक्ष डा॰ श्यामलालडोगरा महाभागानां नितरां कृतज्ञोऽस्मि । यै: काले काले सुनिर्देशै: मम मार्ग: प्रशस्त: ।

श्री रघुवीरसिंह-डा॰ प्रभात सिंह-श्रीयशपालसिंह-श्री इन्द्रपाल - श्री सुरेन्द्रदत्त आचार्य महाभागानां कृतं साहाय्यमपि न विस्मरामि ।

श्री प्रवीणराणामहाभागान् प्रति समादरं यच्छन् नाहं सन्तोष-मनुभवामि यैर्नितरां मम मार्ग: प्रशस्त: ममोत्साहश्च वर्धित: ।

श्री सतीशरिहाणी महाभागेन पुस्तकालयात् पुस्तकोपलब्धौ शोध कार्ये च स्वनिर्देशै: कृतं साहाय्यमप्यत्राविस्मरणीयम् । अन्येऽपि आश्रमस्यकार्यालयस्य कर्मकरा: पुस्तकालयस्य कर्मचारिणश्च धन्यवादानर्हन्ति ।

सुहृदवरस्य श्री अशोकमहाभागस्य कृतं साहाय्यं सदैव स्मरणीयम् । सोऽपि नितरां धन्यवादानर्हति ।

कुशल: टङ्कणकारस्तत्रभवान् श्री श्रीकान्तमहाभागोऽपि धन्यवादानर्हति ।

एवं विद्वद्वरै: सुनिर्दिष्टाअप्यत्र ये ये दोषास्ते सर्वे मम बुद्धिमान्द्यजा इत्युपेक्षणीया एव तत्रभवद्भिस्तदारवारितैर्विपश्चित्प्रवरै: । य: कश्चन् गुणश्चेत् स तु विदुषां कृपाप्रसाद एव ।

विदुषां वशंवद:,

दिनाङ्क: ..7/5/1990....

देवराज शर्मा

(देवराज शर्मा)

- - - - - -

## विषयानुक्रम:


| | | | |
|---|---|---|---|
| प्राक्कथनम् | | | क-ङ. |
| प्रथमोऽध्याय: - | प्रबोधचन्द्रोदयस्य रचयिता व्यक्तित्वं कृतित्वं च | | 1-9 |
| | श्रीकृष्णमिश्रस्य सामान्यपरिचय: - | 1 | |
| | श्रीकृष्णमिश्रस्य काल: | 2 | |
| | आभ्यन्तरप्रमाणानि | 2 | |
| | बाह्यप्रमाणानि | 3 | |
| | श्रीकृष्णमिश्रस्यनिवासस्थानम् | 7 | |
| | श्रीकृष्णमिश्रस्य कृतित्वम् | 8 | |
| द्वितीयोऽध्याय: - | संस्कृतवाङ्मयस्य नाट्यसाहित्ये प्रबोधचन्द्रो-दयस्य स्थानम् | | 10-37 |
| | प्रबोधचन्द्रोदयम् - नाटकं, रूपकं, प्रतीकं वा | 10 | |
| | प्रबोधचन्द्रोदयात्पूर्ववर्ति संस्कृतप्रतीक-नाटकपरम्परा - | 16 | |
| | नाट्यशास्त्रीयदृशाप्रबोधचन्द्रोदयस्य-समीक्षणम् | 19 | |
| | प्रबोधचन्द्रोदयस्य कथावस्तुन: नाट्य-शास्त्रीया समीक्षा | 21 | |
| | प्रबोधचन्द्रोदयस्य नायक: | 27 | |
| | प्रबोधचन्द्रोदये रस: | 28 | |
| | प्रबोधचन्द्रोदयस्योपादेयत्वम् | 30 | |
| | प्रबोधचन्द्रोदयस्योत्तरवर्ति संस्कृतनाटक-परम्परा | 33 | |
| तृतीयोऽध्याय: - | प्रबोधचन्द्रोदयस्य दार्शनिकीदृष्टि: | | 38-67 |
| | संक्षिप्तदर्शनसाहित्यं | 38 | |
| | नाट्यपरम्परायां दर्शनस्यस्थानम् | 46 | |
| | प्रबोधचन्द्रोदयस्यदार्शनिकसिद्धान्ता: | 50 | |
| | आलोच्यधर्मदर्शनम् | 50 | |

| | | | |
|---|---|---|---|
| | लोकायतम् | 50 | |
| | बुद्धागम: | 52 | |
| | जैनमतम् | 53 | |
| | सौमसिद्धान्त: | 53 | |
| | यज्ञविद्या | 55 | |
| | मीमांसा | 56 | |
| | तर्कविद्या | 56 | |
| | स्वाभिमतधर्मदर्शनम् | 58 | |
| | अद्वैतदर्शनम् | 58 | |
| | विष्णुभक्ति: | 64 | |
| | वैयासिकी सरस्वती | 64 | |
| | उपनिषद् | 65 | |
| चतुर्थोऽध्याय: - | प्रतिपादित-दार्शनिक सिद्धान्तानां मूलदार्शनिक सिद्धान्तानां तुलनात्मकाध्ययनम् | | 68-92 |
| | दार्शनिकसिद्धान्तानां मूलपरम्परा क्रमिकविकासश्च | | |
| | श्रौतदर्शनम् | 68 | |
| | ब्राह्मणदर्शनम् | 69 | |
| | आरण्यकदर्शनम् | 69 | |
| | उपनिषद्दर्शनम् | 69 | |
| | प्रतिपाद्यविषया: | 71 | |
| | ब्रह्म-आत्मा च | 71 | |
| | जीव: | 76 | |
| | जगत् अथवा सृष्टि: | 77 | |
| | मोक्षस्वरूपम् | 78 | |
| | आस्तिक-नास्तिकदर्शनयो स्वद्देश्यम् | 80 | |
| | प्रबोधचन्द्रोदयोक्तदार्शनिकसिद्धान्तां पर्यालोचनम् | 82 | |
| पञ्चमोऽध्याय: - | प्रबोधचन्द्रोदयस्य मनोवैज्ञानिक दृष्टि: | | 93-127 |
| | मनोविज्ञानम् | 93 | |
| | मनोविज्ञानस्यलक्षणम् | 93 | |
| | मनोविज्ञानस्यप्रयोजनम् | 94 | |

मनोविज्ञानस्य विकासक्रम: 96
मनोविज्ञानस्य शाखा: 100
मन:स्वरूपम्, मन:-शरीरयो: सम्बन्ध: 104
ज्ञानात्मकमनोवृत्तय: 107
ज्ञानसामान्यनिरूपणम् 107
ज्ञानस्य प्रकारा: 108
भावात्मकमनोवृत्तय: 113
संवेगा: 114
भावना 115
प्रयत्नात्मकमनोवृत्तय: 116
सहजाप्रतिक्रिया 116
उद्वेगात्मकाप्रतिक्रिया 117
हेतुपूर्विका प्रतिक्रिया 117
मूलप्रवृत्त्यात्मका: क्रिया: 118
मनोविज्ञानं दर्शनं च 121
प्रबोधचन्द्रोदयस्य मनोवैज्ञानिकता 123

षष्ठोऽध्याय: - मनोभावा: प्रतीकपात्राणि च 128-196

भावनिरूपणम् 128
भावानां काव्यशास्त्रीया समीक्षा 130
विभाव: 131
अनुभाव: 132
व्यभिचारिभावा: 135
स्थायीभावा: 139
प्रतीकनाट्यपरम्परायां मनोभावानां स्थानं
प्रबोधचन्द्रोदये च तेषां महत्त्वम् 141
प्रबोधचन्द्रोदयस्य पात्राणां भेदा:,
चरित्रचित्रणम् वैशिष्ट्यं च 149
रूपक पात्राणि 150
प्रमुख पात्राणि 183
सामान्यपात्राणि 188
मानसिकपात्रभेद: 191
प्रतीकपात्राणां मनोवैज्ञानिकीदार्शनिकी च
दृष्टि: 192

| | | | |
|---|---|---|---|
| सप्तमोऽध्याय: - | मन:, मुक्ति:, भक्तिश्च | | 197-248 |
| | मन: | 197 | |
| | दर्शनसाहित्ये मन: स्वरूपम् | 198 | |
| | मुक्ति: | 211 | |
| | नाट्यपरम्परायां मुक्ति: | 223 | |
| | प्रतीकात्मक नाट्यक्षेत्रे मुक्ति: | 225 | |
| | भक्ति: - भक्ते: स्वरूपं महत्त्वं च | 228 | |
| | भक्तेर्भेदा: | 237 | |
| | भक्तिदर्शनयो: समन्वय: | 241 | |
| | भक्तिज्ञानयो: समन्वय: | 243 | |
| | काव्यक्षेत्रे भक्ति: | 246 | |
| अष्टमोऽध्याय: - | ब्रह्मानन्द: काव्यानन्दश्च | | 249-286 |
| | ~~ब्रह्मानन्द: काव्यानन्दश्च~~ | | |
| | आनन्दस्वरूपम्, रसस्यमनोवैज्ञानिकता च | 249 | |
| | रसस्योद्गम: | 253 | |
| | रससिद्धान्त: | 254 | |
| | रससम्प्रदाय: | 258 | |
| | भरत: | 258 | |
| | भामह:, दण्डी | 259 | |
| | उद्भट्ट: | 260 | |
| | वामन:, रुद्रट: | 261 | |
| | रुद्रभट्ट:, आनन्दवर्धन: | 262 | |
| | अभिनवगुप्त: | 263 | |
| | कुन्तक: | 264 | |
| | धनिकधनञ्जयौ | 265 | |
| | महिमभट्ट:, भोजराज: | 266 | |
| | क्षेमेन्द्र:, मम्मट: | 267 | |
| | विश्वनाथ:, शारदातनय: | 268 | |
| | भानुदत्त:, रूपगोस्वामी, अग्निपुराणम् | 269 | |
| | पण्डितराजजगन्नाथ: | 270 | |
| | रससूत्रव्याख्या अथवा रसनिष्पत्ति: | 271 | |
| | भट्टलोल्लट: | 272 | |
| | श्रीशंकुक: | 274 | |

| | | |
|---|---|---|
| | भट्टनायक: | 275 |
| | अभिनवगुप्त: | 276 |
| | प्रबोधचन्द्रोदयस्य रसविवेचनम् | 278 |
| नवमोऽध्याय: | उपसंहार: | 287-289 |

= = = = = =

# प्रथमोऽध्यायः

## प्रबोधचन्द्रोदयस्यरचयिता - व्यक्तित्वं कृतित्वं च

क) श्रीकृष्णमिश्रस्य सामान्यपरिचयः

ख) श्रीकृष्णमिश्रस्यकालः -

1) आभ्यन्तरप्रमाणानि

2) बाह्यप्रमाणानि

शिलालेखाः

ग) श्रीकृष्णमिश्रस्य निवासस्थानम्

घ) श्रीकृष्णमिश्रस्य कृतित्वम्

= = = = = =

क) श्रीकृष्णमिश्रस्य सामान्य-परिचयः -

संस्कृतवाङ्मयस्य महत्त्वं विदितचरमेव विदितवेदितव्यानां शमेषीजुषाम् । अस्मिन्नेव प्रतिबिम्बितं दर्पणमिवास्माकमतीतम् । साहित्यमिदं विविधासु शैलीषु वैचित्र्यमादधानं दृश्यते । यथा मानवस्य भौतिकवृत्तमितिहासः स्फुटीकरोति, तथैव विशकलयति साहित्यं समेषां प्राणभृतां मानसान् व्यापारान् । साहित्यं रम्यतमं मनोवृत्तीरूपस्थापयति । तत्रापि रूपकं नाटकमिति यावत् सर्वाधिकं रमणीयं भवति । लोके यत्किमपि दृश्यतेऽनुभूयते वा सर्वं तत्सामाजिकानां प्रत्यक्षमापद्यते इति कथं न भवेत्तेन परितोषः ?

वेदमूलका हि आर्यसंस्कृतिः । सर्वा अपि प्रेरणाः साहित्यकृद्भिस्तत एव गृह्यन्ते । अतः नाट्यमपि तत एवोद्भूतमिति प्रतिपादितं मुनिना भरतेन ।[1] नाट्यसाहित्यगगने भरतमुनेर्नाट्यशास्त्रं चन्द्रवदवभासते यत्र प्रपितामहेन भरतेन नाट्यस्य नाट्यविधानां च साङ्गोपाङ्गं वर्णनं विहितम् । अस्यैव प्रेरणा-लोके मनीषिभिः प्रवर्तितं स्वकीयं काव्यशास्त्रम् ।

कटुप्रायो भवत्यनुभवो जीवनस्य । दैनिके व्यवहारे बहुधा वयं खेदं भजामः । अभिलषति हि मानवः शाश्वतीं शान्तिम्, शास्त्रे च तत्प्राप्त्यर्थं विविधा उपाया उपकीर्त्यन्ते, न पुनस्ते सर्वजनसेव्या भवन्ति । त एव यदा पात्रमिषेण वस्तुसंघटनव्याजेन सामाजिकानां सम्मुखमुपस्थाप्यन्ते नूनं ते निरायासेनैव सामाजिकैरवधार्यन्ते । प्रवर्तितोऽयं प्रकारोऽपि प्रज्ञावद्भिः नाटककृद्भिः येन केनाप्यंशेन । प्रतीकप्रयोगोऽयं सुश्लाघ्यो भवति वस्तुतत्त्वनिरूपणे। सन्ति तादृशान्यपि नाटकानि यान्यविकलरूपेणैव प्रतीकप्रयोगमनुश्रयन्ते । अन्यतमं हि तेषु "प्रबोधचन्द्रोदयम्" । प्राक्तनाटकेषु प्रथममिदं नाटकं यत्रेयं शैली सुतरामुपचीयते । दार्शनिकमत्र तथ्यं निरूप्यते सिद्धान्ता भावा विषयाश्चात्र पात्र-

---

1. जग्राह पाठ्यमृग्वेदात् सामतो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ।। - 1.17

विषयत्वेनावतार्यन्ते रुचिरेण च संवादेन संयोज्यन्ते । नूनमस्य नाटकस्य कर्ता कृष्णमिश्रः साफल्यमधिगच्छतीति समीक्षकानां मतिः ।

ख) **श्रीकृष्णमिश्रस्य कालः -**

सुविदितमेतत्तथ्यं यत्प्राचीना कवयः आचार्या वा स्वपरिचयविषये मौनमेवाकलयन्ति, भवतु तत्र किमपि कारणम्, दुष्करं नामअद्य तस्य कालादि-निर्धारणम् । प्रयतन्ते ह्यालोचका अद्य तेषां पुण्यश्लोकानां विदुषां कालादिकं विनिश्चेतुम् । अस्ति तेषु सुकृतिषु श्रीकृष्णमिश्रोऽप्यन्यतमः । नाासावपि स्वविषये किमपि तथा परिकीर्तयति येन निश्चितः स्यात्तस्य संस्तवः । परवर्तिषु साहित्यरचनास्वपि नैव तत्सम्बन्धे किमपि वर्णनादिकमुपलभ्यते । अवस्थायामस्यामुपलब्धशिलालेखैरैतिहासिकविवरणसमीक्षणैश्च तस्य जन्मकालस्थानादिकं निर्धारयितुं शक्यते । उपलभ्यमानानि तावद्द्विविधमस्ति -

1) आभ्यान्तर प्रमाणानि ।

2) बाह्यप्रमाणानि ।

1) **आभ्यन्तर प्रमाणानि -** रचनाकारस्य रचनायां स्वविषयक-संकेतास्तथा च स्वपूर्ववर्तिनां समकालिकानां च संकेता आभ्यन्तर प्रमाणाना-माधारतां भवन्ति । श्रीकृष्णमिश्रकृत प्रबोधचन्द्रोदयाख्यरचनया प्राप्तसंकेतैः कवेरस्य कालादिकं निश्चीयते । प्रथमं तु नाटकस्यास्य प्रस्तावनया ज्ञायते यन्नाटकमिदं कीर्तिवर्मनृपतेः सभायामभिनीतं, तत्रैव कीर्तिवर्मणा सह तस्य सुहृदो गोपालस्य शत्रोश्चेदिनरेशस्य कर्णस्य चाप्युल्लेखोऽस्ति । यथा - "आदिष्टोऽस्मि सकल-सामन्तचक्रचूडामणि मरीचिमञ्जरीनीराजितचरणकमलेन·······श्रीमतागोपालेन । यथा खल्वस्य सहजसुहृदो राज्ञः कीर्तिवर्मदेवस्य दिग्विजयव्यापारान्तरित···· विविधविषयरसास्वादद्दूषिता इवातिवाहिता दिवसाः । तदयं शान्तरसप्रयोगा-भिनयेनात्मानं विनोदयितुमिच्छामः । ततो यत्पूर्वमस्मद्गुरुभिस्तत्र भवद्भिः श्रीकृष्णमिश्रैः "प्रबोधचन्द्रोदयम्" नाम नाटकं निर्माय भवतः समर्पितमासीत् तदद्य राज्ञः श्री कीर्तिवर्मणः पुरस्तादभिनेतव्यं भवता ।"[1]

---

1. प्रबोधचन्द्रोदयः प्रथम अंक; पृ॰5

प्रस्तावनयाऽनया ज्ञायते यत्कर्णेनापहृतकीर्तिवर्मण: राज्यं गोपालेन निजबाहुबलेन विजित्य कीर्तिवर्मा पुन: नृपत्वेनाभिषिक्त: । "येनभूयोऽभ्यषेचि"[1] इत्यत्र 'भूय:' पदेन कीर्तिवर्मणो भूयोऽभिषेकस्य "अभ्यषेचि" इत्यत्र च भूतकालाववोधक-क्रियया नाटकनिर्माणात् प्रागेवाभिषेको जात:, इति ज्ञायते । 'तस्याभिषेकोपलक्षे एव गोपालाज्ञया नाटकाभिमञ्चनमभूत्' इति लक्ष्यते ।

पुनश्च नाटककारेण कीर्तिवर्मण: पूर्वजा: "चन्द्रान्वयभूषणानाम्" इति पदेन कर्णश्च "चेदिपतिना" इति पदेनोल्लिखिता: । अनेन कीर्तिवर्मा चन्देल-वंशीय: कर्णश्च चेदिनरेश इति ज्ञायते । अत: श्रीकृष्णमिश्रस्य कालानुसन्धानार्थं कीर्तिवर्मण: कर्णस्य च कालो विनिश्चेतव्य: ।

2§ <u>बाह्यप्रमाणानि</u> - प्रबोधचन्द्रोदयस्य प्रस्तावनायां नृपते: कीर्तिवर्मण: स्पष्ट उल्लेखोऽवलोक्यते यस्य राजसभायामेव नाटकस्याभिमञ्चनमभूत् इति निश्चप्रचम् । कीर्तिवर्मण: कर्णस्य च सम्बन्धे शिलालेखै: दानपत्रैश्च प्राप्तं ज्ञानमधस्तान्निरूप्यते ।

<u>शिलालेखा: -</u>

§क§ सर्वप्रथमं तु कीर्तिवर्मण उल्लेख: 1090 ई॰ वर्षस्य शिलालेखे प्राप्यते यश्च कालिंजरस्य नीलकण्ठ देवालये उत्कीर्णोऽस्ति । यत्रोत्कीर्णेषु सप्तपंक्तिषु स्पष्टरूपेण कीर्तिवर्मण: उपशासनमस्ति ।[2]

§ख§ सम्बन्धेऽस्मिन् द्वितीय: शिलालेख: 1098 ईस्वीयो देवगढस्थानात् प्राप्यते यत्रैकस्मिन् श्लोके कीर्तिवर्मा चन्देलवंशीय विद्याधरस्य पौत्रो विजयपालस्य च पुत्र: कथित: ।[3]

§ग§ 1261 ईस्वीय: शिलालेखो वीरवर्मणो महाभागस्य अजयगढस्थानात्प्राप्यते ।[4] यत्र कीर्तिवर्मणो विजयोल्लेखोऽस्ति ।

---

1. प्रबोधचन्द्रोदय:, 1.4
2. Annual Report of the Archaeological Survey of India, p.93.
3. Indian Antiquary Vol. XVIII, p.238.
4. Epigraphica Indica, Vol.I, p.327-29.

उपर्युक्तशिलालेखानां प्रमाणैः कीर्तिवर्मणः कालः 1090 ईशव्याः पूर्वं निश्चेतुं शक्यते ।

पुनश्च कर्णसम्बन्धीदानपत्रद्वयमपि प्राप्यते । यत्र प्रथमे दानपत्रे "कर्णेन स्वपितुः श्राद्धकाले त्रिवेणी स्थानानन्तरं काश्याः भूमि दानस्वरूपेण दत्ता" इति सकीतितः" दानपत्रं चेदं 1042 ईश्वीयमस्ति ।[1]

द्वितीयं दानपत्रं कर्णपुत्रस्य यशः कर्णस्य 1072-73 ईश्वीयमस्ति । यत्रापिस्वजनकवत् यशः कर्णस्यापिदानोल्लेखोऽस्ति ।[2]

पुनश्च "एपिग्राफिका इण्डिका" इत्यनुसारेण वंगदेशीयेन विग्रहपालेन (1055-81ई॰) कर्णः परास्तः । अपि च नागपुर प्रशस्त्याधारेण भोजस्योत्तराधिकारिणा (1059-87 ई॰) उदयादित्य परमारेण कर्णः पराभूतस्तथा च वैयाकरण-हेमचन्द्रोऽपि निर्दिशति यद् भीमदेवचालुक्यः (1021-64 ई॰) कर्णं पराजितवान् इति ।[3] अनेन कर्णस्य पराजयकालः 1060-1064 ईस्वींयावत् स्वीकर्तुं शक्यते । मतमिदमेव एन॰एस॰ बोस महाभागेनापि स्वीकृतम् ।[4]

इतिहासज्ञस्यमजूमदारमहाभागस्यमते तत्कालः 1073 ईश्वीतः प्रागेव इत्यनुमातुं शक्यते ।[5]

डा॰ कीथमहोदयेन च कीर्तिवर्मणः राज्यकालः 1068 ई॰ निर्धारितः ।[6]

श्री केशवमिश्रः स्वीकीये "चन्देल और उनका राजत्वकाल" इत्याख्येग्रन्थे कीर्तिवर्मणः राज्यकालं 1060 ईश्वीतः 1100 ईश्वीं यावत् स्वीकरोति ।[7]

"The Oxford History of India" - इत्यनुसारेण कीर्तिवर्मा

---

1. Epigraphica Indica, Vol.XII, p.205.
2. Inscription of Kalachuris of Triputi, p.289.
3. Epigraphica Indica, Vol.II, p.185, 303.
4. History of Chandalla, N.S. Bose, p.78.
5. The struggle of Empire, R.C. Majumdar, Vol.V, p.58.
6. Sanskrit Drama, A.B. Keith, p.251.
7. [illegible], p.106.

1065 ईश्वीतमे वर्षे विजयोत्सवं समायोजितवान्, यस्मिन् च प्रबोधचन्द्रोदयस्य मञ्चनमभवत् ।[1]

'The Chambridge History of India' इत्यनुसारेण च चन्देलवंशीयकीर्तिवर्मण: राज्यकाल: 1049 ईश्वीत: आरभ्य 1100 ईश्वीं यावदासीदिति सुनिश्चितम् ।[2]

श्री नगेन्द्रवसुमहोदयानुसारं श्रीकीर्तिवर्मणा 1050 ईश्वीत: 1089 ईश्वीं यावत् राज्यं कृतम् ।[3]

डा॰ बलदेव उपाध्यायमहाभागश्च स्वकीये संस्कृतसाहित्येतिहासे प्रतिपादयति यत् कीर्तिवर्मा सेनानायकगोपालसाहाय्येन कर्णं पराजिवान् । तस्य विजयोपलक्ष्ये नाटकस्यास्य कीर्तिवर्मण: सभायां मञ्चनमभवत् । कर्णश्च 1042 ईशव्यां जीवित आसीत् ।[4]

संस्कृतसाहित्येतिहासे वाचस्पतिगैरोलामहोदयेनोक्तं यत् कीर्तिवर्म- (1050 ई॰) आश्रितेन कविना श्रीकृष्णमिश्रेण रूपकात्मकशैल्यामद्वितीयं प्रबोध-चन्द्रोदयाख्यं नाटकं लिखितम् । अनेन स: कीर्तिवर्मण: कालं 1050 ई॰ इति स्वीकरोति । तदाश्रयत्वाच्च श्रीकृष्णमिश्रस्यापि काल: एकादशशताब्द्या मध्यकालो निश्चीयते ।[5]

रामजी-उपाध्यायमहाभागेन "मध्यकालिक: संस्कृतनाटकालोके" श्रीकृष्णमिश्रचन्देल नरेशस्य कीर्तिवर्मण आश्रित: स्वीकृत्य कीर्तिवर्मण: कालं एकादशशताब्द्या उत्तरार्धे प्रतिपादितम् ।[6]

डा॰ जयदेवेन स्वकीये शोधप्रबन्धे अस्यकाल एकादशशताब्द्या उत्तरार्धे 1080 तमे वर्षं यावत् स्वीकृतम् ।[7]

---

1. The Oxford History of India, Ed.III, p.203.
2. The Chambridge History of India, Vol.III, p.510.
3. हिन्दी विश्वकोष - श्रीनगेन्द्रवसु, पृ॰761.
4. संस्कृत साहित्य का इतिहास, बलदेव उपाध्याय, पृ॰556.
5. संस्कृत साहित्येतिहास: प्रथमसंस्करण, पृ॰812.
6. मध्यकालिक: संस्कृत नाटकालोक:, पृ॰44
7. डा॰ जयदेव: शोध प्रबन्ध, पृ॰203.

एवं विविधालोचकानां गवेषकाणां च मतानां सम्यङ्निरीक्षणेन श्रीकृष्णमिश्रस्य स्थितिकाल: 1050 ईश्वीत: 1100 ईश्वीपर्यन्तमुतवा एकादशशताब्द्या उत्तरार्धे स्वीकर्तुं शक्यते । भवतु नाम तत्र तिथिविशेष निर्धारणे वैमत्यं परं प्रमाणत: पूर्वोक्तकाल: {1050-1100} एवोचित: ।

सन्त्यत्रान्यान्यपि मतानि प्रबोधचन्द्रोदयस्यानुवादकानां कालनिर्धारणे संक्षिप्ततस्तान्यप्यत्र प्रस्तूयन्ते -

प्रबोधचन्द्रोदयस्य हिन्दी-अनुवादकेन महेशचन्द्रप्रसादेन मैक्डोनलमतमनुसृत्यकवे: काल: कीर्तिवर्मण: काले स्वीकृत्य[1] कीर्तिवर्मण: राज्यकाल: 1050 ईश्वीत: 1116 ईशवी पर्यन्तं स्वीकृत: ।

विजयानन्दत्रिपाठीस्वकीयानुवादस्य भूमिकायामलिखत्‌यत् कीर्तिवर्मा कालिंजराधिपते: विजयपालस्य सुपुत्र[2] आसीत् । कीर्तिवर्मण: राज्यकालश्च 1050 ईश्वीत: प्रारभते इति ।

आङ्गलानुवादक: जे॰ टेलरमहोदय: कीर्तिवर्माणं मगधाधीशत्वेन स्वीकृत्य तस्यकालं 648 ई॰ इति स्वीकरोति ।[3] परं मतमस्य नैव समीचीनं प्रतिभाति ।

आङ्गलानुवादकेन डा॰ सीताकृष्णाम्बियार महोदयेन प्रतिपादितं यत्कीर्तिवर्मा 1098 तमे[4] वर्षे राज्याधिरूढ आसीत् । कर्णश्च 1042 तमे वर्षे जीवित आसीत् ।

एवं मतमतान्तराणां समीक्षणेन स्पष्टीभवति यन्नृप: कीर्तिवर्मा प्रथमं 1050 तमे वर्षे राज्याधिरूढोऽभूत् पुनश्च 1055 ई॰ तमे वर्षे कर्णस्तं पराजितवान्,परं 1060 ई॰ तमे वर्षे पुन: सगोपालसाहाय्येन युद्धं विधाय कर्णं विजित्य च 1064 ईश्वयां पुन: राज्याभिषिक्त: । तस्य विजयोपलक्ष्ये च शान्तरसप्रधानमिदं नाटकं कीर्तिवर्मण: सभायामभिनीतम् । अत: कीर्तिवर्मण:

---

1. हिन्दी अनुवाद भूमिका, पृ॰2
2. हिन्दी अनुवाद भूमिका, पृ॰11
3. जे॰ टेलर अनुवाद भूमिका पृ॰1
4. डा॰ नाम्बियार अनुवाद भूमिका, पृ॰2॰

राज्यकालः (1050-1100 ई॰) एव युक्तियुक्तं प्रतीयते । आलोचकानां मतमन्येन चात्रेदमेव निर्णीतं यत्कृष्णमिश्र एकादशशताब्द्या उत्तरार्धे एव जनिमलभत् ।

ग) श्रीकृष्णमिश्रस्य निवासस्थानम् -

श्रीकृष्णमिश्रः स्वजन्मना कं भू-भागमलङ्कृतवान् इदन्तु इदानीं यावत् सन्देहास्पदमेव । टीकाकर्तृणामनुवादकानां च मतान्यपि पुष्टप्रमाणाभावात् प्रान्तादिपक्षपाततत्वाच्च नैव प्रमाणत्वेन स्वीकर्तुं शक्यन्ते । केचन कृष्ण मिश्रं दाक्षिणात्यम्, अन्ये च मागधम्, अपरे च विहारवासिनम् उत वा गौडीयं मन्यन्ते। परं मतेष्वेषु कल्पनायाः प्राबल्यात् तेषामुल्लेखो नैव युक्तियुक्तं प्रतीयते । अतः प्रबोधचन्द्रोदयस्यान्तः साक्ष्यसाहाय्येन निवासस्थानं निश्चेतुं प्रयत्यते । सर्वविदितमेतत्तथ्यं यत् कवेः कृतिः तात्कालिकसमाजस्य प्रतिबिम्बं भवति । तस्य सामाजिक-भौगोलिकमर्यादानां च परिपेक्ष्ये प्रान्तं स्थानविशेषेण वा तस्य सम्बन्धः स्थिरीकर्तुं शक्यते । कविना येन केनापि प्रकारेण स्वकृतौ निजजन्मकाल-स्थानादि विषये किमपि लिख्यत एव परोक्षापरोक्षरूपेण । अतः अत्रापि प्रबोधचन्द्रोदयस्यान्तः साक्ष्येणैव स्थानादिकं निश्चीयते ।

क) प्रथमं तावत् नाटके कविना गौड-काशी-राढा-उत्कल-चक्रतीर्थमन्दार-शालिग्रामादयः स्थलाः सविशेषमुल्लिखिताः ।

---

1. गौडएवं राढा - यथा - अहंकारः - गौडं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढापुरी-प्रबोधचन्द्रोदय-द्वितीयअंक-श्लोक 7.

काशी-दम्भः-विद्याप्रबोधोदयजन्मभूमिर्वाराणसी ब्रह्मपुरी निरत्यया" ।
अंक 2, श्लोक 12.

उत्कल-पुरुषः - अहमुत्कलदेशादागतोऽस्मि - पृ॰87

चक्रतीर्थ -....श्रद्धा...तत्र भागीरथी परिसरालंकारभूते चक्रतीर्थे मीमांसयानुगतया । पृ॰160

मन्दार....श्रद्धा...यथा मन्दाराभिधाने शैले विष्णोरायतने देव्यां गीतायां तर्कविद्याभयादनुप्रविष्टेति । पृ॰247.

शालिग्राम - श्रद्धा (विचिन्त्य) आदिष्टाऽस्मि देव्या विष्णुभक्त्या-वत्से श्रद्धे अहमत्र हिंसाप्राय समरदर्शन पराङ्मुखी, तेनवाराणसीमुत्सृज्य शालिग्रामाभिधाने भगवतः क्षेत्रे कंचित्कालमतिवाहयामि । पृ॰196.

पूर्वोक्तेषु स्थलेषु राढागौडौ इदानीं वङ्गप्रदेशे स्त:, काशी उत्तरप्रदेशे उत्कलं च "उडीसा" इति प्रान्तस्यैव नामापरं, चक्रतीर्थमन्दारौ च विहारराज्येस्त: । अत: कविना एष्वेव स्थलेषु कस्मिंश्चित्स्थले भाव्यमिति निश्चितम् । कविरयं कीर्तिवर्मण: राजाश्रित: आसीत् इति पूर्वमेवोक्तं, कीर्तिवर्मण: राज्यं च उत्तरभारते वुन्देलखण्ड इत्याख्ये स्थले आसीत् । अनेन कविरयं उत्तर भारतस्यैव कमपि प्रदेशं स्वजन्मना भूषितवानेति निश्चप्रचम् । पुनश्च गौडराढयो: प्रान्तयो: वर्णने कवेरस्य हेय भावना शालिग्रामचक्रतीर्थयोश्च प्रेय भावनाऽपि तमुत्तर खण्ड वासिनं साधयति ।

नाटकस्यानुवादक: रामचन्द्रमिश्रमहाभागोऽपि निजानुवादस्यभूमिकायां तं विहारवासिनं स्वीचकार ।[1]

अत: अन्त: प्रमाणै: कविरयं शालिग्रामक्षेत्रस्य (इदानीं मिथिलान्तर्गतगण्डकीतटम्) विमलाङ्गनं स्वजन्मना भूषितवान् इति निश्चयेन वक्तुं शक्यते ।

ब) श्रीकृष्णमिश्रस्य कृतित्वम् -

प्रबोधचन्द्रोदयाख्या अद्वितीया नाट्यकृति: श्रीकृष्णमिश्रस्य इति निर्विवादम् । केषुचित् स्थलेषु श्रीकृष्णमिश्रस्यान्येषामपि रचनानां कर्तृत्वेनोल्लेख: प्राप्यते । परं नैव प्रमाणाभावात् निश्चयेन स्वीकर्तुं शक्यन्ते तानि मतानि । हिन्दीविश्वकोषे नगेन्द्रवसुना सम्पादिते कवेरस्य कृतिपञ्चकस्योत्कीर्तनमधिगम्यते। तच्च "प्रायश्चितमनोहरम्" "वीरविजयेहामृगं" सर्वतोभद्रचक्रावली (ज्योतिग्रन्थ:) चिन्तामणि: (न्यायग्रन्थ:) च ।[2] न पुनस्तत्रेदं निर्णीतं यत् कृष्णमिश्रो हि स प्रबोधचन्द्रोदयस्य कर्ता एवान्यो वा कश्चिदिति।

मतमिदमेव प्रबोधचन्द्रोदयस्यानुवादकेन विजयानन्दत्रिपाठिनापि स्वीकृतमनुवादस्य भूमिकायाम् ।[3]

---

1. अनुवाद, रामचन्द्रमिश्र भूमिका, पृ.6
2. हिन्दी विश्वकोश:, सम्पा. डा. नगेन्द्रवसु, पृ.30।
3. प्र.च. अनुवादक विजयानन्दत्रिपाठी, पृ.7

रामजी उपाध्यायो "मध्यकालिकः संस्कृतनाटकालोकः" इत्याख्ये[1] ग्रन्थे वीरविजयाख्यस्येहामृगस्य कर्तारं श्रीकृष्णमिश्रं प्रतिपादयति ।

उपर्युक्त कथनेषु यासां रचनानामुल्लेखोऽस्ति न तेषां कर्तृत्वेन श्रीकृष्णमिश्रस्य प्रामाण्यं प्रतीयते । न केनाप्यालोचकेन तासां कर्तृत्वेन कवेः किमपि प्रबलं प्रमाणं प्रदत्तं । श्रीकृष्ण मिश्रनामधेयः कश्चिदन्योऽपि भवितुं शक्यते । अपरतः प्रबोधचन्द्रोदयस्य कर्ता श्रीकृष्णमिश्रो निश्चयेन प्रकाण्डो विद्वान् आसीत् ।

अन्या अपि कृतयः रचनाधर्मिणोऽस्य कवेः सम्भवयन्त्येव परं तत्र प्रमाणाभावात् नैव तासां कृतीनां कर्तृत्वेन श्री कृष्णमिश्रः स्वीकर्तुं शक्यते । प्रबोधचन्द्रोदयस्य कर्तृत्वेन तस्य ख्यातिरसंदिग्धैव अतः वयं तस्य अद्वितीयायाः कृतेः कर्तृत्वेन तस्य स्तवनं कुर्मः । इति ।

= = = = = =

१- मध्यकालिक संस्कृतनाटकालोक - पृ. 117

# द्वितीयोऽध्यायः

## संस्कृतवाङ्मयस्य नाट्यसाहित्ये प्रबोधचन्द्रोदयस्य स्थानम्


कख प्रबोधचन्द्रोदयः - नाटकं, रूपकं, प्रतीकं वा

खख प्रबोधचन्द्रोदयात्पूर्ववर्ति संस्कृतप्रतीकनाटक-परम्परा

गख नाट्यशास्त्रोक्तदिशा प्रबोधचन्द्रोदयस्य समीक्षणम्

घख प्रबोधचन्द्रोदयस्य कथावस्तुनः नाट्यशास्त्रीया समीक्षा

ङ• ख प्रबोधचन्द्रोदयोत्तरवर्ति संस्कृतनाटकपरम्परा


= = = = = = = = = =

## संस्कृतवाङ्मयस्य नाट्यसाहित्ये प्रबोधचन्द्रोदयस्य स्थानम्

क) प्रबोधचन्द्रोदयः -

नाटकं, रूपकं, प्रतीकं वेति—

पूर्वं तावन्निर्धार्यते प्रबोधचन्द्रोदयस्यरूपाङ्कनम् । रूपकं तदिति निश्चप्रचम् । कीदृशं च तदिति विचारणीयम्, उपस्थाप्यन्ते ह्यत्र पात्राणि प्रतीकरूपेण । प्रयोगश्चायं नाभिनवस्तथापि न तथोपस्थापितः यथा श्रीकृष्णमिश्रेणेति । नाटकसाहित्यस्य पर्यवेक्षणेन ज्ञायते यत्पाश्चात्त्यालोचकैरेतादृशानां नाटकानां कृते "एलीगरी" (Allegory) इति आङ्गलशब्दः पौर्वात्यैश्च केश्चित् "प्रतीकः" इति, अन्यैश्च "रूपकम्" इति शब्दः प्रयुक्तः । ए.बी. कीथ,[1] मैक्डानल,[2] जे. टैलर,[3] लुडविक,[4] गुरुनाथशास्त्री,[5] डा. सीताकृष्णनाम्बियारादिभिर्नाटकगणनाप्रसंगे "एलीगरीकल ड्रामा" (Allegorical Drama) इति ख्यातमस्याभिधानम् ।

डा. बलदेव उपाध्यायेन[7] डा. दशरथ ओझा महोदयेन[8] च नाटकमिदं प्रतीकनाटकमिति कथितम् ।

---

1. Sanskrit Drama : A.B. Keith, p.251.
2. संस्कृतसाहित्य का इतिहास - मैक्डानल हिन्दी अनुवाद, पृ.367.
3. प्रबोधचन्द्रोदय के अनुवाद की भूमिका, जे.टैलर, पृ.1
4. A Descriptive Catalogue of poets quoted is sanskrit Authologies and Inscrition Vol.I, pp.223-24.
5. A concise History of classical Skt.Lit., p.114.
6. प्रबोधचन्द्रोदय के अनुवाद की भूमिका - नाम्बियार, पृ.2
7. संस्कृतसाहित्य का इतिहास, पृ.617
8. हिन्दी नाटक का उद्भव और विकास पृ.222-23

श्री हंसराज अग्रवाल:[1] पं॰ चन्द्रशेखर पाण्डेयश्च[2] नाटकस्यास्य गणनां रूपकनाटकेषु कृतवन्तौ ।

डा॰ सोमनाथगुप्त:[3] स्वीकरोति यत् प्रबोधचन्द्रोदय: सांकेतिक-अथवा अन्योक्तिशैल्यां लिखितं नाटकमस्ति ।

डा॰ उदयभानुसिंहश्च[4] आङ्गल शब्दस्य "एलीगरी" इत्यस्यानुवादं "साध्यवसानम्" इति करोति ।

उपर्युक्तविवेचनेन ज्ञायते यदालोचकैर्नाटकस्यास्य आङ्गलभाषायां "एलीगरी" इति शब्दस्य एव प्रयोगो विहित:, परं हिन्दीभाषायां प्रतीक-रूपक-अन्योक्ति-साध्यवसानादिशब्दानां प्रचलनमभूत् । अतोऽत्र विवेचनमपरि-हार्यत्वेनापेक्ष्यते । आङ्गलभाषायां "Allegory" इति शब्द: सामान्येन विश्रुत: । विभिन्नकोषग्रन्थेषु सोऽर्थान्तरेष्ववतार्यते यथा -

क॰ Allegory[5]- शब्दोऽयं ग्रीकशब्दात् "एलिगोरिया" इत्यस्मान्निष्पद्यते । "एलास" इत्यस्यार्थोऽस्ति "अन्य:", एगोरीन् (Agoreuein) इत्यस्य च "कथनम्" इति । एवं "एलीगरी" इत्यस्य सामान्यार्थ: "अन्य-रूपेण कथनम्" इत्यभवत् । From Greak 'allos' 'other' and 'agoria' to speak.

ख॰ Allegory[6] - Description of subject under the guise of some other subject of aptly suggestive resemblance. An Allegorical representation; an emblem.

---

1. संस्कृत साहित्य का इतिहास, पृ॰312
2. संस्कृत साहित्य की रूपरेखा, पृ॰218
3. हिन्दी नाटक साहित्य का इतिहास, पृ॰51॰
4. संस्कृत नाटक (ए॰बी॰ कीथ) भाषान्तर, पृ॰265
5. CHAMBERS'S ENCYCLOPAEDIA, Vol.I, p.169.
6. The Oxford Dictionary Vol.I, p.232.

ग• **Allegory**[1]- A figurative represention conveying a meaning other than and in addition to the litral. It is generally treated as a figure of Rhetoric.

घ• **Allegory**[2]- Figurative, symbolical.

ङ• **Allegory**[3]- Speaking otherwise that one seems to speak.

उपर्युक्त विश्लेषणेज्ञायते यद् आङ्गलशब्दस्य "एलीगरी" इत्यस्यार्थो वहुधा "अन्योक्ति:" अथवा "अन्यरूपेण कथनम्" इति स्वीक्रियते। यश्च रूपक-पर्यायत्वेनगृहीतुं शक्यते। "रूपक" इति शब्दविषये विदुषां मतानि, यथा -[4]

क• रूप क्रियायाम्। रूपस्य दर्शनं करणं वा रूपक्रिया।[5]

ख• रूप्यते - प्रत्यक्षी क्रियते योऽर्थः।

ग• रूपक: - रूप्यतीति रूपिण्वुल्। मूर्ति: प्रतिकृति:। रूपकालंकार:- निरपह्णव विषये यत्र रूपिताशेषो भवति तत्र रूपकालंकारो भवति।[6]

घ• (रूप + कन् वा रूप + ण्वुल) आकृति: आकारो, वा। मूर्ति: प्रतिकृति:, दृश्यकाव्यम्, अर्थालङ्कारश्च।[7]

ङ• Rupaka - Figurative, metaphorical, illustrating by figurative language, form figure, shape, appearance, image, likeness.[8]

च• रूपक (पुं•सं•) (रूपस्यारोप:) अर्थालंकार:, अभिनयार्ह दृश्यकाव्यम्।[9]

-----------------------------

1• Encyclopaedia Britannica, Vol.I, p.581.

2• Auttentic - Senior Dictionary - B.C. Pathak, p.54.

3• Standard English Hindi Dictionary, Ed. by Prabhat Shastri, p.3.

4• व्याकरण सिद्धान्त कौमुदी - भट्टोजिदीक्षित: 3, पृ•289

5• अभिनव भारती, भाग 2, पृ•406

6• हिन्दी विश्वकोश:- श्री नगेन्द्र, भाग 19, पृ•643

7• संस्कृत शब्दार्थकौस्तुभ: सम्पा• तरणीश झा, पृ•648

8• संस्कृत इंगलिश डिक्शनरी - एम•एम• विलियम, पृ•886•

9• वृहत्त हिन्दी कोश:- सम्पा• श्री कालिकाप्रसाद, पृ•111

छ· संस्कृतसाहित्ये रूपक शब्दस्यार्थो "नाटकम्" इति क्रियते । यथाह धनिक धनञ्जयौ दशरूपके -

"अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते ।

रूपकं तत्समारोपात् दशधैव रसाश्रयम् ॥"

अर्थात् रूपम् एव रूपकम् (रूप + कम्) अथवा रूपयति इति अथवा आरोपयति इति (रुह + णिच्) नटे रामादि अनुकार्यस्य रूपारोपणमेव रूपकशब्दस्यप्रवृत्तिनिमित्तम् ।

अनेन लक्षणेन ज्ञायते यत्प्राय: प्रत्येकं रूपकं तद्भेद् वैदिकसंस्कृतसाहित्यस्य भवेदुत वा लौकिक संस्कृत साहित्यस्य अथ वा आङ्गलसाहित्यस्य भवेत् अस्मिन्नेवार्थे रूपकमस्ति । नाटकं यच्च रूपकस्य एव भेदोऽस्ति स्ववैशिष्ट्यविशेषै: "रूपकात्" पूर्णरूपेण भिद्यते ।

एवं प्रकारेण यदा संस्कृत रूपकस्य आङ्गलं "एलीगरी" ( Allegory ) इति शब्दस्य च तुलना क्रियते तदा उभयोरैक्यं प्रतीयते । अन्यरीत्या कथोपकथनं तदेव सम्भाव्यते यदा प्रस्तुतवस्तुनि अप्रस्तुतमारोप्यते । परं विस्तृतविधानरूपे अथवा प्रबन्धात्मरूपे तु रूपकस्य एव सर्जनं भविष्यति । शब्द-वाक्यगतं विधानं सामान्यतया प्रतीकं संकेतो वा कथ्यते । चेम्बरवेबरमहोदयौ मतमिदमेवानुमोदयत: ।

अधुना प्रतीकशब्दो व्याक्रियते -

क· प्रतीक: - अंगप्रतीकोऽवयवोऽपघनो इत्यमर: ।[3]

ख· प्रतीक: - अंग-अवयव-अंश-भाग इति बृहद्हिन्दीकोष: ।[4]

---

1· दशरूपकम् - 1·8

2· क) रूपकलक्षण चेम्बर्सडिक्शनरी -
A Description of one thing under the image of anger.

ख) Webster's - New International Dictionary -
An Allegory is prolonged metaphor in which typically a siries of actions are symbolic of the other actions while the characters often are types or parsonifications, p.63.

3· अमरकोष: - श्रीमदमरसिंह, पृ· 498

4· बृहद् हिन्दी कोष:,- कामता प्रसाद, पृ·865·

ग॰ प्रतीक: - §सं॰पु॰§ प्रतिकन् निपातनाद्दीर्घ: । अवयव-अंगम् ।
पता-चिह्न् निशान इति हिन्दी विश्वकोष: ।[1]

घ॰ प्रतीक: - प्रतिमा-मूर्ति:-मुख-आननम्-अग्रभाग:, रूपम्, प्रतिरूपम्,
स्थापनापन्नवस्तु: । इतिसंस्कृतहिन्दीकोष: ।[2]

ङ॰ प्रतीक: - प्रतीयते प्रत्येति वा इति" एकदेश:, अंग:, अवयव:,
इति अभिधानरत्नमालायाम् ।[3]

उपर्युक्तव्युत्पत्त्या: ज्ञायते यच्छब्दोऽयमाङ्गल शब्दसिम्बल §Symbol § इत्यनेन साम्यं भजते । आङ्गलभाषायां प्रतीकारार्थे "सिम्बल" शब्दस्य प्रयोगो बहुधादृश्यते ।[4] शब्दोऽयञ्च ग्रीकशब्दात् "सिम्बोलिन" इत्यस्मान्निष्पद्यते । यत्र "सिन" § Syn § इत्यस्यार्थ: "परस्परम्" युगपद् वा "बालिन्" § Ballein § इत्यस्यार्थश्च "प्रक्षेप" इत्यस्ति । अत:"सिम्बल" इत्यनेन "कस्याचिदपि सूचक:" प्रतिनिधिर्वेति निर्गलत्यर्थ: । संकेत: वस्तुसूचनमस्य मुख्यं प्रयोजनमिति । प्रतीक संकेतयोरयमेवार्थ: संस्कृत भाषायां संकेतेन ज्ञापनं सूचनं वेति गृह्यते । यथाह मम्मट:[5] -

"साक्षात्संकेतितं योऽर्थमभिधत्ते स वाचक:" अत्र संकेतेनाभिप्रायोऽस्ति "अव्यवधानेन गृहीतार्थ:" इति ।

एवमेव प्रतीकोऽपि "चिह्न" अथवा प्रतिनिधिरित्यर्थे प्रयुज्यते । एवं प्रतीक-संकेत-रूपक-एलीगरी-शब्दानां व्यक्तिगत विवेचनै: स्पष्टं भवति यत्रूपकं सामान्यं, प्रतीकादयश्च तस्योपसामान्या अथवा विशेष: । एकोऽङ्गी अपरे च तस्याङ्गानि ।

कविर्हि कमपि भावमादाय काव्यंरचयितुं शक्नोति विषयेऽस्मिन् स्वतन्त्र: कवि: । यथोच्यते -

---

1॰ हिन्दीविश्वकोष:, पृ॰546

2॰ आदर्श हिन्दी संस्कृत कोष: - रामस्वरूप शास्त्री, पृ॰365

3॰ अभिधान रत्न माला - पृ॰272॰

4॰ CHAMBER'S DICTIONARY - From 'Symbollein' p.980.

5॰ काव्यप्रकाश:, 2॰2

"भावानचेतनानपि चेतनवच्चेतनानचेतनवद् ।
व्यवहारयति यथेच्छं सुकवि: काव्ये स्वतन्त्रतया ।।"

पर कवेर्कौशलं साफल्यं तु तदैव यदा तस्योक्तिषु ध्वनिगर्भ वैचित्र्य भवेत्, अन्यथा तत्सर्वं बुद्धिचमत्कारतामेव याति । प्रतीकमाध्यमै: रचिता रचना अभिधयाप्रतिपादित कृतीन् निश्चयेनातिशेते । यतो हि प्रकृतो कृत: अप्रकृतारोपो निश्चयेन सशक्तो भवति ।

"एलीगरी" (Allegory) शब्दस्य व्युत्पत्तिषु शब्दस्यार्थ: 'Metaphor' इत्यपि क्रियते । यस्य सामान्यार्थ: "रूपकं" "लक्षणा" वा क्रियते । परं स्पष्टत: " Allegory " इत्ययं नैव Megaphor.[1]

एतदतिरिक्तं केषांश्चित् विदुषां मते आङ्‌गलशब्दा: "पैरबल" (Parable) "फैबल" (Fable) "मोटिव" (Motive) इत्यादय अपि रूपकान्तर्गता एव । एतेषु "पैरबल" इत्यस्य सामान्यार्थ: उपमा, दृष्टान्तो वा क्रियते । अनयो: दृष्टान्तरूपार्थ: समीचीनम् । शब्दोऽयं ग्रीक शब्दात् "पैराबौल" अथवा "पैराबेलीन्" (Parable, Paraballein) इत्यस्मान्निष्पद्यते यस्य खण्डार्थ: एवमस्ति (Para to Compare) एवं Bellein to throw) अर्थात् तुलनात्मक कथा दृष्टान्तो वा । अथवा कस्यापि सिद्धान्तस्य निरूपयित्री कथा अथवा उपदेशपरककथा[2] इति ।

"फैबल" (Fable) शब्दस्यार्थश्च "आख्यायिकोपलब्धार्थ प्रबन्धकल्पना कथा" इति क्रियते । अत्रोक्त प्रबन्धकल्पनाशब्दस्यार्थ: आख्यायिकापरिभाषायामपि कथा एव क्रियते ।[3]

---

1. An allegory is distinguished from a Metaphor by being longer sustained and morefully carried out in its details, and from an allegory by fact that the one appeals to the imagination and the other to the reason. - Encyclopaedia Brittanica,Vol.I, p.581 and Chambers's Page 169.

2. A Comparison, a fable or story of something which might have happened, told to illustrate some doctrine or to make some duty clear. - CHAMERS'S Dictionary, p.658.

3. अमरकोष: - प्रथम खण्ड, श्लोक 5-6.

तृतीयो "मोटिव" (Motive) शब्दो ध्येयस्य प्रतिरूपमस्ति । "प्रधान चेष्टा" अथवा "विचार:" इत्येवास्य सामान्यार्थ: । निष्कर्षरूपेण मोटिव शब्द: केन्द्रभावत्वेन अथवा मुख्यतत्त्वेन गृह्यते ।

विवेचनेनानेन प्रतीयते यत् दृष्टान्त: (Parable), आख्यानम् (Fable) प्रयोजनपरककथा (Motive) इत्येतेरूपकस्य अङ्गान्येव । वस्तुत: "रूपकात्मकस्य अथवा प्रतीकात्मककाव्यस्य क्षेत्रमेतावन्मात्रं विस्तृतमस्ति यत्तत्र दृष्टान्तानां, आख्यानतत्त्वकथानां चास्तित्वं प्रसंगानुरोधेन नैसर्गिकमेव । प्रतिपाद्यदृष्ट्या च त्रयाणामेव रूपककाव्येन सह साम्यमस्ति । एवं रूपकात्मक-साहित्यं त्रिधा विभज्यते ।

1· प्रतीक वर्ग: - (Symbolic) वर्गेऽस्मिन् निखिला वैदिकप्रतीका-पुराणानां तत्तुल्यान्यसाहित्यानां प्रतीका:, संस्कृतप्रतीकात्मक नाटकानि चायान्ति ।

2· आख्यानवर्ग: - (Fabular) अत्र बृहत्कथामूलका: पञ्चतन्त्राद्य: जीवकथा:, नीतिकथा उपदेशयुतानि काव्याङ्गानि च समाहर्तुं शक्यन्ते ।

3· प्रहेलिकावर्ग: - (Enigmatic) चित्रबन्धादिरचनानां प्रहेलिका-मूलकरचनानां च समावेश: रूपकात्मकसाहित्यस्य प्रहेलिकावर्गे कर्तुं शक्यते ।

उपर्युक्तत्रिषुवर्गेषु प्रबोधचन्द्रोदय: प्रतीकवर्गे समाहितो भवति अत एव नाटकमिदं प्रतीकनाटक संज्ञां लेभिरे इत्यत्र नैव संशयलेशोऽपि ।

## ख) प्रबोधचन्द्रोदयात्पूर्ववर्ति संस्कृत प्रतीक नाटक परम्परा -

साहित्यस्यान्यानि तत्त्वानि यथा वेदेषु दृश्यन्ते तथैव प्रतीकात्मक-तत्त्वस्यापि विकासो वैदिककालादेव परिलक्ष्यते । वेदेषु शैल्या अस्या बीजानि यत्र-तत्र विकीर्णानि स्पष्टतयावलोक्यन्ते । वेदानामनेका रिकसंवादे: रूपकशैल्या आभासो भवति । ऋग्वेदे यम-यमीसंवाद:,[2] विश्वामित्र नदी संवाद:[3]

---

1· अमरकोष: - प्रथम खण्ड, श्लोक 5-6

2· ऋग्वेद:, 10·10

3· तत्रैव, 3·33

तथा च तत्र-मोह-अज्ञान-क्रोध-मात्सर्य-काम-अभिमान-अहंकार-लोभादीनां च उलूक-शुशुलूक-कुक्कुर-चटका-गरुड गृध्रादिसंज्ञाभिरुल्लेख अस्याः शैल्याः परिपोषक एव। यथा[1] - उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुम् ।

सुपर्णयातुमुत गृध्रयातुं दृषदेव प्रमृण रक्ष इन्द्र ।।

यजुर्वेदे मनसो व्यक्तिरूपेण कल्पनं तस्य विभिन्नशक्तीनामुल्लेखो दृश्यते ।[2] निरुक्तेऽपि "विद्या ह वै ब्राह्मणमाजगाम गोपाय माशेवधिष्टे"[3] इत्यादिषु विद्याया मानवीकरणं दृश्यते । अन्यान्यपि निदर्शनानि वैदिकसंहितासु विषयेऽस्मिन् प्राप्यन्ते । ब्राह्मणग्रन्थेषु शतपथब्राह्मणस्य[4] "मनु-श्रद्धा-इडा" प्रसंगः रूपकात्मकशैल्यामेवास्ति ।

उपनिषत्सु छान्दोग्योपनिषदि "श्वेतकेतु प्रसंगः"[5] अस्या एव शैल्याः पोषकः । यत्र सत् चिदाभास-संस्कार-अज्ञान-तृष्णादितत्त्वानां मूर्तवत् परिकल्पनं विधायशैलीयमेव निर्वाहिता ।

महाभारतस्यापि "आदिपर्वणि" कीर्तिः-लक्ष्मी-धृतिः-मेधा-पुष्टिः-श्रद्धा-क्रिया-बुद्धि-लज्जा-मत्याद्यः धर्मस्य पत्नीत्वेनोल्लिखिताः । शम-काम-हर्षाश्च धर्मस्य पुत्राः, प्राप्ति-रतिः-नन्दा-च तेषां पत्न्यः ।[6] अनेन तत्रापि रूपकात्मक शैली स्पष्टतयाऽवलोक्यते ।

श्रीमद्भागवतपुराणस्य पुरञ्जनोपाख्यानं[7] तु पूर्णरूपेण प्रतीकात्मकमेव । पुरञ्जनोपाख्यानमेव प्रबोधचन्द्रोदयस्य प्रेरणात्मकत्वेन स्वीक्रियते विद्वद्भिः ।

पश्चात् बौद्ध जैन साहित्ये रूपक कथानां विस्तृतं साहित्यमुपलभ्यते । येषु सिद्धर्षिसूरेः "उपमितिभव प्रपञ्च कथा" कविवर जयरामस्य च प्राकृतकृतिः "धम्मपरिक्खा" उल्लेखनीये स्तः ।

---

1. ऋग्वेदः, 7·104·22
2. यजुर्वेदः, अ· 34, मन्त्र 6
3. निरुक्तम्, 2·4
4. शतपथब्राह्मण, 1·14·15
5. छान्दोग्योपनिषद्, 6·13
6. महाभारतम् - आदिपर्व, 66·14, 15, 32, 33
7. श्रीमद्भागवतम्, स्कन्ध-4, अध्याय 25-29

पुराणसाहित्यानन्तरं लौकिकसंस्कृतसाहित्यस्योद्भवो[1] भवति । तत्र नाटकसाहित्यसर्वेक्षणेन आदिमस्य नाटककारस्य भासस्य त्रयोदश-नाटकानिप्राप्यन्ते । तेषु "बालचरितम्" अस्यामेव श्रेण्यां गण्यते । बालचरितस्य द्वितीयाङ्के कंसदशावर्णनप्रसङ्गे शाप: राज्यश्री च पात्रत्वेन मूर्तवत् कल्प्यते । तयो: कथनोपकथनमपि तत्र दृश्यते । तत्रैव पञ्चमाङ्के कृष्णायुधा: चक्र-शार्ङ्ग-शङ्ख-नन्दक-कौमुदक्यादयश्च मानवरूपेणोल्लिखिता । अनेन नाटकेऽस्मिन् प्रतीकात्मकत्वं स्पष्टतयैवास्ति इति निश्चितम् ।

भासानन्तरं कविकुलगुरो: कालिदासस्य त्रीणि नाटकानि संस्कृतसाहित्ये उपलब्धानि मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलं च । एषु नाटकेषु "अभिज्ञानशाकुन्तलस्य चतुर्थाङ्के प्रतीकात्मकशैल्या आभासो मिलति । यत्र वृक्षलतादय: पतिगृहं गच्छन्तीं शकुन्तलां निजलाक्षाद्रववस्त्राभूषणादि प्रदानेनोपकुर्वन्ति । पिकरुतव्याजेन गमनमनुमोदयन्ति लताश्च तद्विरहे अश्रूणीव मुञ्चन्ति पीतपर्णोत्सर्जनव्याजेन । प्रस्तुतप्रसङ्गे वृक्षादीनां यद्यपि चेतनमानवादि-वद्व्यवहारो दर्शितस्तथापि नैव तेषां मानवीकरणं कृतमुत्प्रेक्षणमात्रमेव तच्चित्रणम् । वर्णनचातुर्यमेवात्र प्रयोजनं न तु रूपकतत्त्वावधानम् ।

अपरो हि नाटककारोऽश्वघोष: । न तस्य किमप्यविकलमधिगम्यते नाटकम् । उपलब्धं नाटकं शारिपुत्रप्रकरणम् (शारद्वतीपुत्रप्रकरणं वा) खण्डितावस्थायामेवोपलभ्यते । प्राप्तांशेन ज्ञायते यत्तस्मिन्नपि नाटके प्रतीकशैलीमाश्रयति कवि: । अत्र हि धृति-दया-क्षमादीनां रूपकपात्राणां वार्तालापं दृश्यते । अनेनानुमीयते यन्नूनं तत्र प्रतीकात्मकशैली स्यात् ।

नाटकरचनाक्रमे अश्वघोषानन्तरं शूद्रकस्य "मृच्छकटिकमित्यभिधानकस्य नाटकस्य स्थानमस्ति । यस्य रचनाकाल: पञ्चमशताब्द्या उत्तरार्धे षष्ठशताब्द्या: पूर्वार्धे वा निर्धार्यते आलोचकै:।[2] सामाजिकनाटकमिदं दरिद्र-ब्राह्मणस्य चारुदत्तस्य गणिकावसन्तसेनायाश्च प्रणयकथाश्रितम् । नाटकेऽस्मिन्

---

1. History of Sanskrit literature: A.B. Keith, p.80-82. Sanskrit Drama : A.B. Keith, p.93-94.
2. संस्कृत साहित्य का इतिहास - मैक्डानल, पृ.361.

नैव कुत्रापि प्रतीकात्मकशैल्याः प्रयोगोऽस्ति । मृच्छकटिकवत् नाटकसाहित्या-द्वितीये राजनैतिके नाटके विशाखदत्तप्रणीते मुद्राराक्षसेऽपि नैव शैलीयमवलोक्यते । तदनन्तरं हर्षवर्धनस्य रत्नावली-प्रियादर्शिका-नागानन्दश्चेति नाटकत्रयस्य स्थानमस्ति एषु त्रिष्वेव नाटकेषु नैवास्याः शैल्याः प्रवर्तनं दृश्यते । पश्चाद् भवभूतिनाऽपि नाटकत्रयमष्टम शताब्द्यां रचितम् । तेषु उत्तररामचरिताख्ये नाटके तमसा-मुरलादीनां नदीनां मूर्तपात्रत्वेन प्रकल्पनमस्ति नात्र तादृशं प्रतीकात्मकमुपलभ्यते । तदनन्तरं दशम शताब्द्याः पर्यन्तमनेकानि नाटकान्यभूवन् परं नैव कुत्रापि प्रतीकात्मकशैल्याः प्रयोगो दृश्यते । पुनश्चैकादशशताब्द्यां श्रीकृष्ण मिश्रेण प्रबोधचन्द्रोदयाख्यमालोच्यं नाटकं पूर्णरूपेण प्रतीकात्मकाख्यां नूतनशैल्यां विरचितमस्ति । इतः प्राक् नैवासीत् शैल्या अस्याः प्रचलनं काऽपि स्वतन्त्र परम्परा वा, केवलं भासस्य बालचरिते अश्वघोषस्य शारिपुत्रप्रकरणे च शैलीयमांशतोऽङ्गीकृता दृश्यते परं नैव स्वतन्त्रतया। एतदपि स्वीकर्तुं शक्यते यच्छारिपुत्रप्रकरणादिविच्छिन्नेयं परम्परा श्री कृष्णमिश्रेण पुनरुज्जीविता । किमपि स्यात् परमुपलब्ध साहित्ये श्री कृष्णमिश्र एव प्रतीकात्मकशैल्याः प्रतिष्ठापक इति निश्चप्रचम् ।

ग) <u>नाट्यशास्त्रोक्तदिशा प्रबोधचन्द्रोदयस्य समीक्षणम्</u> -

प्रबोधचन्द्रोदये नाटके श्रीकृष्णमिश्र अद्वैतवेदान्तस्य विष्णुभक्त्याश्च समन्वयं साधयति । विभिन्नपात्रसंवादमाध्यमेनाद्योपान्तं यस्य स्वरो मुखरितोऽभवत् । दार्शनिक-आध्यात्मिक भावदृष्ट्या रचितं नाटकमिदं यदा नाट्यशास्त्रनिकषोपले परीक्ष्यते न तदापि तस्योत्कर्षंव्याहन्यते । प्राचीन-नाट्यशास्त्रे नाटकस्य तत्त्वत्रयमङ्गीक्रियते "वस्तुनेतारसस्तेषां भेदकः"[1] इति। प्रथमं नाटकस्य कथावस्तु यदि नाटकेप्रतिपाद्यते यथा - "परमार्थतत्त्वं (पुरुषः) वस्तुतस्त्वेक एव तस्य मायया सह सङ्गमो जायते । तयोरपत्यमस्ति "मनः"। तस्य (मनसः) च विवेकमहामोहौ द्वौ पुत्रौ । अयमेव कथावस्तुन आधारः ।

---

1. दशरूपकम्, 1.11

अनयोरेवाध्यात्मिकरूपेणाभिव्यक्तिरस्ति नाटके । प्रबुद्धमहामोहवंशजशक्त्या विवेकस्तस्य वंशजाश्च भयाकुला: । नाटकारम्भे रतिकामयोर्वार्तालापेनैतदेव ज्ञायते । काम: स्वकृत्यै: सन्तुष्टोऽस्ति । परं स तदाकाशभाषाादपि विभेति यस्यां भाषितं यद् विवेकोपनिषत् संयोगात् प्रबोधोदयो भविष्यति । परमुपनिषद्विवेकयोश्चिरवियोगत्वान्नैव तयो: सङ्गम: सम्भाव्यते इत्यनुचिन्त्य कामो मोदते । तदा विवेको मत्या सह तत्रागच्छति कामश्च रत्या सह निर्गच्छति। "विवेकोपनिषत्संगमं मतिरप्यनुमोदयति" विवेकश्च कार्येऽस्मिन् दत्तावधानो भवति ।

द्वितीयाङ्कस्य प्रारम्भे ज्ञायते यन्महामोह: स्वराज्यक्षयभय-
-त्रस्तो दम्भाभिधानं स्वानुचरं पुण्यमयीं काशीं स्वायत्तीकर्तुमादिशति । दम्भस्य पितामह: अहंकारोऽपि काश्यामागच्छति दम्भकृत्यं विज्ञाय च प्रसीदति। महामोहो बृहस्पतिमतं 'लोकायतं' प्रशंसन् तत्रागच्छति चार्वाकोऽपि स्वमतमुद्घोषयन् महामोहमनुसरति । चार्वाकस्तत्र श्रद्धां प्रति स्वचिन्तां महामोहाय निवेदयति, महामोहश्च श्रद्धां निगृहीतुं मिथ्यादृष्टिमादिशति ।

तृतीयाङ्के शान्ति: करुणया सह श्रद्धाविप्रयुक्ता तामन्विष्यन् रङ्गमञ्चे आगच्छति । श्रद्धा महामोहादेशेन निगृहीता, तद्वियोगव्यथिता क्षणमपि स्थातुमक्षमा शान्तिरात्मदाहं चिकीर्षति । करुणा तां निवारयति श्रद्धामन्वेष्टुं चोपदिशति । शान्तिश्च करुणया सह बौद्ध-जैन-कापालिकालयेषु तामन्विष्यति परं तत्र तामसी-राजसी-श्रद्धयोरेव दर्शनं भवति नैव सात्विक्या: श्रद्धाया: । अत्र कविना भिक्षु-क्षपणक-कापालिकपात्रै: बौद्ध-जैन-सोमसिद्धान्तादि-मतानि सम्यङ्निरूपितानि । भिक्षुक्षपणकश्च विवदन्तावन्ते कापालिकमनुसरत:। क्षपणकश्च श्रद्धा-धर्मयोरवस्थितिं विष्णुभक्त्या सह महात्मनां हृदयेषु वाचयति । तच्छ्रुत्वा शान्तिकरुणे मोदेते ।

चतुर्थाङ्के श्रद्धा स्वकीयं दु:खं वर्णयन्ती सूचयति यत्साधर्मेण सहैव महाभैरवीपाशान्निर्गता । विवेको युद्धाय स्वानुचरान् सुभटान् आदिशति । कामं जेतुं स वस्तुविचारं लोभं जेतुं सन्तोषम्, क्रोधं जेतुं च क्षमां नियुङ्क्ते स्वयं च पार्श्विकेन स्वसुतेन सह रथमारुह्य संग्रामस्थलं प्रति प्रस्थानं करोति ।

पञ्चमाङ्कस्य प्रस्तावनया ज्ञायते यद् युद्धे विवेको महामोहं सकुलमुच्छेद्य पराजितवान् । मनः स्वापत्यादि दुःखेन दुःखितमोऽग्नं प्रविक्षति । सङ्कल्पस्तत् येनकेनापि प्रकारेण कार्यादस्मान्निवारयति । तदा सरस्वती विष्णुभक्तेरादेशेन मनसे विषयविरोधितोपदेशं यच्छति । येन वैराग्योत्पत्तिर्भवति । वैराग्योपदेशैर्मनो निवृत्त्याभिमुखो भवति ।

षष्ठाङ्के उपनिषत् स्वविरहदुःखानि निवेदयति विवेकोपनिषत्संयोगश्च जायते । पुरुष आत्मस्वरूपं विज्ञाय "तत्त्वमसि" महावाक्यार्थं चोद्बुद्ध्य परमं पदं प्राप्नोति । प्रबोधोदये सति सकलाज्ञानान्धकारं निलीयते मोक्षावाप्तिश्च जायते । एतावन्मात्रं नाटकस्य कथावस्तुः ।

## ब) प्रबोधचन्द्रोदयस्य कथावस्तुनः नाट्यशास्त्रीया समीक्षा -

प्रतीकात्मकशैल्यां लिखितेषु नाटकेषु कथावस्तुनो नाटकीयगतिप्रवाहः प्रायशो विलीनमेव दृश्यते । तस्य हि कारणं पाण्डित्यप्रकर्षप्रदर्शनं यच्च नाट्यगुणानभिभवति । वेंकटनाथस्य संकल्पसूर्योदयस्य नूनमेव स्थितिः । परं श्री कृष्णमिश्रस्य रचना त्वस्य सिद्धान्तस्य प्रवाद एव तत्र भरतनाट्यशास्त्रोक्त-नियमानां यथासम्भव दृश्यते निर्वाहः । प्रगल्भो हि कविर्दर्शनपाण्डित्ये यथा तथैव नाट्यनियममर्मज्ञेऽपि । यथाऽत्र परीक्ष्यते -

प्रथमंतावन्नाट्यशास्त्रे कथावस्तुनः भेदद्वयं स्वीकृतम् प्रथमम् आधिकारिकमितिवृत्तं, द्वितीयं च प्रासङ्गिकम् । मुख्यमितिवृत्तमाधिकारिकं द्वितीयं च प्रासङ्गिकम् । यथोक्तं नाट्यशास्त्रे [1] -

इतिवृत्तं द्विधाश्चैव बुधस्तुपरिकल्पयेत् ।
आधिकारिकमेकं स्यात् प्रासङ्गिकमथापरम् ।।

प्रबोधचन्द्रोदयस्येतिवृत्ते विवेकस्येतिवृत्तमाधिकारिकमस्ति । विवेक एव नायकस्तस्यैव च भवतिफलावाप्तिः । फलस्वामित्वेन यस्याधिकारो भवति तत्सम्बन्धी इतिवृत्तमाधिकारिकं भवति यथा दशरूपके [2] -

---

1. नाट्यशास्त्रम्, 16.11; दशरूपकम् - 1.11
2. दशरूपकम् - 1.8

"अधिकार: फलस्वाम्यधिकारी च तत्प्रभु:
तन्निर्वृत्तमभिव्यापि वृत्तं स्यादाधिकारिकम् ।।"[1]

नाटके विवेक आद्योपान्तं प्रबोधोदयार्थं प्रयतते यश्च नाटकस्य फलमस्ति यत्र विवेकोऽन्ते साफल्यं लभते । अतस्तत्सम्बद्धमितिवृत्तमाधिकारिकमिति सुनिश्चितम् ।

प्रासङ्गिकमितिवृत्तं पताका-प्रकरी भेदेन द्विधा भवति । "तत्रसानुबन्धं पताकाख्यं प्रकरी च प्रदेश भाक्" अनेन नयेन नाटके विष्णुभक्तेः कथा पताकाख्यं प्रासङ्गिकमितिवृत्तमस्ति । विष्णुभक्तिर्विवेकस्य रक्षार्थं सदैव यतते तत्सहायकांश्च शत्रुबन्धाद्विमोचयति । प्रसङ्गोऽयं नाटकान्तं यावद् दृश्यते । अत: "पताकाख्य"प्रासङ्गिकमितिवृत्तमेतत् कथयितुं शक्यते ।

वैयासिकी-सरस्वत्या: कथा नाटकस्य "प्रकरी" नामानं प्रासङ्गिकमितिवृत्तमस्ति । नाटकस्य पञ्चमाङ्के मन: सान्त्वयितुं रङ्गमञ्चे आगत्य मनश्च प्रबोधोदयं प्रति प्रवृत्तं विधाय अङ्कान्ते रङ्गमञ्चान्निर्गच्छति । एवं तस्या: स्वल्पस्थायित्वं विवेकस्य चोपकर्तृत्वं प्रकरीत्वास्यं प्रासङ्गिकेतिवृत्तं द्योतकम् ।

इति वृत्तस्यावस्थापञ्चकम् - यथा -[2]

"अवस्था पञ्चकार्यस्य प्रारब्धस्य फलार्थिभि: ।
आरम्भयत्नप्राप्त्याशानियताप्तिःफलागमा: ।।"

1. आरम्भ: -[3]

"औत्सुक्य मात्रमारम्भ: फललाभाय भूयसे"

अत्यन्तफललाभौत्सुक्यमात्रमारम्भः निगद्यते इति । प्रबोधचन्द्रोदयस्य प्रथमाङ्के मत्या: - "एवं दीर्घतरनिद्राविद्रावितप्रबोधपरमेश्वरे कथं प्रबोधोत्पत्तिर्भविष्यति" कथनेऽस्मिन् आरम्भाख्या नाट्यावस्थाऽस्ति । वाक्येऽस्मिन्

---

1. दशरूपकम्, 1.13
2. तत्रैव, 1.19
3. दशरूपकम्, 1.20

नाटकस्य प्रबोधोदयरूपफलावाप्तिर्विषये नायिकाया औत्सुक्यं व्यज्यते ।

2. प्रयत्न: -

"प्रयत्नस्तु तदप्राप्तौ व्यापारोऽतित्वरान्वित:"[1] । नाटकस्य तृतीयाङ्के शान्ते: श्रद्धान्वेषणं प्रयत्नावस्थां द्योतयति । कार्यमिदंफलावाप्तौ चापरिहार्यमस्ति ।

3. प्राप्त्याशा -

"उपायापायशङ्काभ्यां प्राप्ति: सम्भव:"[2] अथवा -

"ईषत् प्राप्तिर्यदा काचित् फलस्यपरिकल्प्यते ।
भाव मात्रेण तं प्राहुर्विज्ञा: प्राप्तिसम्भव: ।।"[3]

पूर्वोक्तनयेन प्रबोधचन्द्रोदये कापालिकस्य विष्णुभक्तिं प्रति फलसाधनस्य कथनं विष्णुभक्त्याश्च श्रद्धारक्षणं तदाज्ञया विवेकस्य युद्धार्थं वाराणस्यामागमन् तत्र च विजयं प्रति शङ्काद्यश्च प्राप्त्याशामवस्थां द्योतयति ।

4. नियताप्ति -

"अपायाभावत: प्राप्तिर्नियताप्ति: सुनिश्चिता"[4]
अपि च -[5]
"नियतां तु फलप्राप्तिं यदा भावेन पश्यति ।
नियतां तां फलप्राप्तिं सगुणां परिचक्षते ।।"

प्रबोधचन्द्रोदये विवेकस्य विजयोपलब्धि: सरस्वत्या उपदेशैश्च मनसि वैराग्योत्पत्तिश्च नाटकस्य नियताप्तिरूपावस्थाऽस्ति । यै: प्रबोधोदयरूप फलावाप्ति: सुनिश्चिता इव संवृत्ता ।

---

1. दशरूपकम्, 1.20
2. तत्रैव, 1.21
3. नाट्यशास्त्रम्, 19.73
4. दशरूपकम्, 1.21
5. नाट्यशास्त्रम्, 19.74

5· फलागम: -

"समग्रफलसंपत्ति: फलयोगो यथोदित:"[1]

नाटकस्य षष्ठाङ्के विरक्तेर्मनसि, पुरुषायचब्रह्मस्वरूपज्ञानोपदेश: प्रबोधोदयश्च फलागमावस्थाऽस्ति ।

एवं नाटके पञ्चावस्थानां यथोचितं निवेशो दृश्यते ।

अर्थप्रकृतय: - "अर्थप्रकृतय: पञ्च पञ्चावस्था समन्विता:" अर्थात् अर्थस्य मुख्यफलस्य वा हेतव अर्थप्रकृतय: पञ्चैव भवन्ति बीज-बिन्दु-पताका-प्रकरी-कार्यरूपा: ।

1· बीजम् - नायकस्य प्रधानफलहेतुर्यत्रारम्भे सूक्ष्माभिधानं पश्चाच्च क्रमेण वर्धते तत्बीजम् । यथोक्तं नाट्यशास्त्रे[2] -

"स्वल्पमात्रं समुत्सृष्टं बहुधा यद् विसर्पति ।
फलावसानं यच्चैव् बीजं तत्प्रकीर्तितम् ।।"[3]

साहित्यदर्पणे च यथा -

"अल्पमात्रं समुद्दिष्टं वहुधा यद्विसर्पति ।
फलस्य प्रथमोहेतुर्बीजं तदभिधीयते ।।"

उपर्युक्तलक्षणानुसारं प्रबोधचन्द्रोदयस्य प्रथमाङ्के कामोक्तिषु "सा खलु विवेकेनोपनिषद्देव्यां प्रबोधचन्द्रेण भ्रात्रा सर्म जनयितव्या, तत्र सर्व एते शमदमाद्य: प्रतिपन्नोद्योगा:" इत्यादिषु कथानकस्य बीजमस्ति । अस्मादेव निखिलस्येतिवृत्तस्य विकासो भवति ।

2· विन्दु: - "प्रयोजनानां विच्छेदे यद् विच्छेद कारणम् ।
यावत्समाप्तिर्बन्धस्य स: विन्दु: परिकीर्तित: ।।"[4]

अनेनलक्षणानुसारेण नाटकस्य द्वितीयाङ्के अहङ्कारस्य दम्भ प्रति- "वत्स, मया महामोहस्य विवेक सकाशादत्याहितं श्रुतम्" उक्तिरियं विन्दुराख्या

---

1· दशरूपकम्, 1·22

2· नाट्यशास्त्रम्, 19·22

3· साहित्यदर्पणम्, 6·66

4· नाट्यशास्त्रम्, 19·23

अर्थप्रकृतिरस्ति । यतो हि दम्भाहंकारयोर्दीर्घवार्तालापाद् विच्छिन्ना इव कथावस्तुरनयैवोक्त्या योज्यते ।

3. पताका - नाटके विष्णुभक्तेरितिवृत्तं पताकाख्या अर्थप्रकृतिरिति प्रागेवोक्तम् ।

4. प्रकरी - वैयासिकी सरस्वती प्रसंगः प्रकरी नामा अर्थ प्रकृतिरस्ति ।

5. कार्यम् - अपेक्षितं तु यत्साध्यमारम्भो यन्निबन्धनम् ।
समापनं तु यत्सिद्ध्यै तत्कार्यमिति सम्मतम् ।।[1]

विवेकोपनिषत्संयोगात् प्रबोधोदयो भवति । एतदेव नाटकस्य प्रधानं कार्यमस्ति । एवं नाटके अर्थप्रकृतीनां सम्यग् विन्यासोऽस्ति नैवात्र संशयः ।

पञ्चसन्धयः - मुख-प्रतिमुख-गर्भोऽवमर्श-उपसंहृतिर्निर्वहणमिति पञ्चसन्धयः ।[2]

1. मुखम् - बीजाख्या अर्थप्रकृत्या सह आरम्भाख्यावस्थासंयोगेन मुखाख्या सन्धिर्भवति ।[3] (मुखसन्धिः = बीजं + आरम्भः)

प्रबोधचन्द्रोदये नाटके तत्र प्रथमाङ्के - "प्रबोधोत्पत्तिर्भविष्यति..." इति मत्यावचने आरम्भावस्था, "अस्माकं कुले कालरात्रिकल्पा विद्या नाम राक्षसी समुत्पत्स्यते" इत्यत्र कामोक्तिषु बीजनामा अर्थप्रकृतिरस्ति । उभयोः संयोगेन मुखसन्धिरत्राभवत् ।

2. प्रतिमुखम् - "लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखं च तत्" अर्थात्[4] मुखसन्धौ निविष्टफलप्रधानोपायस्य यत्र लक्ष्यालक्ष्य इव विकासो भवेत्तत्र प्रतिमुख सन्धिर्भवति । सन्धिरयं च "प्रयत्न" अवस्थायाः विन्दुरर्थप्रकृत्या सह संयोगेन सम्पद्यते । (प्रयत्नः + विन्दुः = प्रतिमुखम्) प्रबोधचन्द्रोदयस्य द्वितीये तृतीये चाङ्के, प्रतिमुखसन्धेः सन्निवेशो दृश्यते । उभयोरेवाङ्कयोः कुत्रचिन्महामोहादीनां प्रभावः कुत्रचिच्च विवेकादीनां प्रयत्नैस्तेषां पराभवसदृशादिकं चित्रितं येन मुख्यं फलं कुत्रचित् स्पष्टमन्यत्र चास्पष्टं भवति । अनेन प्रतिमुखसन्धिस्तत्र लक्ष्यते ।

---

1. साहित्यदर्पणम्, 6.69-70
2. तत्रैव, 6.75
3. तत्रैव, 6.76-77
4. तत्रैव, 6.77

3. गर्भसन्धिः - पूर्वसन्धिषु ईषत् स्पष्टफलप्रधानोपायस्य यत्र ह्रासान्वेषण-विकासौ भवति तत्र गर्भसन्धिर्भवति । यथोक्तम् -

"फलप्रधानोपायस्य प्रागुद्भिन्नस्य किञ्चन ।
गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान्मुहुः ।।"[1]

गर्भसन्धौ पताकाप्राप्त्याशारूपार्थप्रकृतिरवस्थायोः संयोगो भवति । परं पताकाया अपरिहार्यत्वमपि कुत्रापि नैवापेक्षते । नाटकस्य तृतीयाङ्के "मूर्तं देवी सिद्धये विष्णुभक्ति.... इत्यादि श्लोकादारभ्य पञ्चमाङ्कस्य यदाभ्युदयः प्रायः प्रमाणादवधार्यते.... इत्यादिपद्यं यावद् गर्भसन्धिरस्ति ।

4. अवमर्शसन्धिः - यत्र गर्भसन्ध्यपेक्षया मुख्यफलोपाय आधिक्येनोद्भिन्नः स्यात् परं शापाद्यैस्तत्र विघ्नमापद्यते अथवा क्रोध-लोभादि व्यसनैः फलोपलब्धौ विमर्शः क्रियेत् तत्र विमर्शसन्धिर्भवति । यथोक्तम् -

"यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः ।
शापाद्यैः सान्तरायश्च स विमर्श इति स्मृतः ।।"[2]

अपि च नाट्यशास्त्रे[3] -

"गर्भनिर्भिन्नबीजार्थो विलोभनकृतोऽथवा ।
क्रोधव्यसनजो वापि स विमर्श इति स्मृतः ।।"

प्रबोधचन्द्रोदयस्य पञ्चमाङ्कस्य यदभ्युदयप्रायः प्रमाणादवधार्यते.... इत्यारभ्याङ्कान्तं यावद् विमर्शसन्धिरेव । प्रसंगेऽस्मिन् नियताप्तिरूपावस्थायाः सरस्वतीप्रसंगरूपार्थप्रकृत्याश्च संयोगोऽस्ति । अतविमर्शसन्धिस्तत्र इतिसुनिश्चितम् ।

5. निर्वहण-सन्धिः - बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् ।
एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत् ।।[4]

उपर्युक्त लक्षणानुसारेण नाटकस्य षष्ठाङ्के विवेकविजयादारभ्य प्रबोधोदयरूपकार्यसिद्धिं यावत् सन्धिरियमेवास्ति । यस्यान्तं भरतवाक्येन सहैव भवति ।

---

1. साहित्यदर्पणम्, 6.78-79
2. तत्रैव, 6.79-80
3. नाट्यशास्त्रम्, 19.42
4. दशरूपकम्, 1.48.49

एवं समस्तविवेचनेनानेन स्पष्टं भवति यत् कृष्णमिश्रस्य नाटकेऽस्मिन् अवस्थाः-अर्थप्रकृत्यः सन्धिमचकं च नाट्यतत्त्वानां समुचितः सन्निवेशोऽस्ति ।

प्रबोधचन्द्रोदयस्य नायकः -
------------------

"नायक" शब्दोऽयं "नी" इत्यस्माद्धातोः निष्पद्यते । {/नी + ण्वुल्} यस्यार्थो मार्गदर्शकः स्वामी प्रधानो वा । काव्यशास्त्रे उत वा नाट्यशास्त्रे नायकशब्देन प्रधानपात्रं गृह्यते । नीयते इति नायकः । यः कथानकं मुख्योद्देश्यमथवा-फलागमं प्रति नयति नायकः स कथ्यते । भारतीयकाव्यशास्त्रमर्मज्ञैर्नायकस्य अनेके सामान्यगुणा निरूपिताः । यथा दशरूपके -

"नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः ।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ।।
बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः ।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः ।।"[1]

आचार्यभरतमते यः सर्वपात्रेषु व्यसनाभ्युदयतुलायां सर्वाधिको व्यसनाभ्युदयफलभाक् भवेत् स नायकः । यथा -

व्यसनी प्राप्य दुःखं वा युज्यतेऽभ्युदयेन यः ।
तथा पुरुषमाहुस्तं प्रधानं नायकं बुधाः ।।[2]

नायकगुणोक्तदिशा समीक्षणेन ज्ञायते यत् प्रबोधचन्द्रोदयस्य नायको विवेक एवास्ति । य आद्योपान्तं फलावाप्तौ कृतप्रयत्नोऽवलोक्यते । प्रबोधोदयरूपं फलं च भुङ्क्ते । प्रबोधोदयार्थं विवेको मनः महामोहसंसर्गाद् विमोचयति । पुनश्च मनसि वैराग्यमुत्पाद्य उपदेशग्रहणार्हतां नयति । स ब्रह्मणो दीनावस्थामालोक्य भृशं रुदति । तन्मुक्त्यै च सततं कृतायासो दृश्यते । स धैर्यवान् आत्माभिमानी चास्ति: नैव कदाप्यात्मानं प्रशंसति प्राप्तविजयश्रीरपि विनम्रः । सम्राट्पदे स्थितोऽपि सदुपदेशान् गृह्णाति । तदनुचराश्च तदाज्ञां प्राणपणैरप्यनुपालयन्ति ।

------------------------------

1. दशरूपकम्, 2.1-2

2. नाट्यशास्त्रम्, 24.21-22

शृङ्गारिकदृष्ट्या विवेको दक्षिणो नायकः खलु । दक्षिणनायकस्यैकाधिकपत्न्य भवन्ति सर्वासु च तस्य समानानुरक्तिर्भवति । नायकविवेकस्यापि मतिः उपनिषच्च द्वे पत्न्यौ । उभयत्र च तस्य समानानुरागः । मत्या आदेशेनैव स उपनिषत्सयोगे प्रवृत्तो भवति । उभयोरेवपत्न्योः मनसोरपि नैवेर्ष्यादिकं दृश्यते । विवेकस्ते प्रीणाति ।

शीलदृष्ट्या नायकस्य धीरोदात्त-धीरोद्धत-धीरप्रशान्त-धीरललितश्चेति चतुर्भेदा भवन्ति । तत्र विवेके धीरोदात्तनायकोक्तगुणाः सम्यक्रूपेण मिलन्ति। अतो विवेको नाटकस्य धीरोदात्तदक्षिणनायक इत्यत्र सुनिश्चितम् ।

प्रबोधचन्द्रोदये रसः - "एक एव भवेदङ्गी शृङ्गारो वीरएव वा" सिद्धान्तममुमधिकृत्य नाटकादौ वीरः शृङ्गारो वा रसो भवितुमर्हति । अत्र "एव" शब्देनान्येषां रसानां वारणं ध्वन्यते । काव्यप्रकाशकारेणमम्मटेन निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः" इत्युक्त्वा नवमरसरूपेणशान्तरसः स्वीकृतः । परं तस्याभिनेयत्वमस्वीकृतम् । दशरूपककारोऽपि रसप्रसङ्गे "शममपि केचित्प्राहुः पुष्टिर्नाट्येषु नैतस्य"[1] इत्युक्त्वा शान्तरसं न स्पष्टमनुमोदयति । भरतमुनिना नाट्ये अष्टावेव रसाः स्वीकृताः । भरतखण्डिनोरुत्तरवर्तिना उद्भटेन "शान्तोरसो नवमः" इति स्वीकृतम् ।

केषांचिन्मतमस्ति यत् शान्तरसो वीरबीभत्सयोरन्तर्भवितुं शक्नोतीति । अतो नैवैतस्य नाट्ये अङ्गीत्वस्वीकर्तुं शक्यते । अपरे प्रतिपादयन्ति शान्तरसे रागद्वेषाद्य बाधका भवन्ति । संसारोऽयं च रागद्वेषात्मकः, अतः शान्ते हृदयसंवादस्याशक्यत्वान्नैवाभिनेयत्वं तस्य युक्तम् । एवं शान्तरसस्यावस्थितिं न स्वीकुर्वन्ति केचनाचार्याः । परं नैवैतत्सर्वं युक्त्युक्तं प्रतीयते । प्रथमं तावन्नैवैतदावश्यकं यच्छान्तरसो भरतमुनिमान्यो भवेत् तदैव तस्याभिनेयत्वं स्यात् । तस्य स्वतन्त्रा स्थितिः स्वीकर्तुं शक्यते । भरतेनापि निर्वेदस्य प्रकारद्वये एकतरं तत्त्वज्ञानत्वेनाम्नातम् । शान्तरसोऽत्राभिप्रेतस्तेनेति सम्भाव्यते । पुनश्च नाट्यशास्त्रस्य प्रमुखो व्याख्याकारो ऽभिनवगुप्तो भरतोक्तादिश्यैव शान्तरसाभिनेयत्वं

---

1. दशरूपकम् 4.35

प्रतिपादयति । तेन हि तत्रोपलब्धप्रक्षिप्तांशैः साधितं यन्नाट्ये शान्तरसो-
प्यङ्गीरसरूपेण स्वीकर्तुं शक्यते । यथा अभिनवभारत्याम्- "क्वचिद्धर्मः
क्वचित्क्रीडा क्वचिदर्थः क्वचिच्छमः । अथ शान्तोनाम शमस्थायिभावात्मको
मोक्षप्रवर्तकः । स तु तत्त्वज्ञानवैराग्याशयशुद्ध्यादिभिर्विभावैः समुत्पद्यते । तस्य
यमनियमाध्यात्मध्यानधारणोपासनसर्वभूतदयालिंगग्रहणादिभिरनुभावैरभिनयः
प्रयोक्तव्यः।व्यभिचारिणश्चास्य निर्वेदस्मृतिधृति सर्वाश्रमशौचस्तम्भरोमाञ्चादयः ।"[1]

धनिकधनञ्जयमहाभागयोः "सर्वथा नाटकादावभिनयात्मनि स्थायित्व-
मस्माभिः शमस्य निषिध्यते । तस्यसमस्त व्यापार प्रविलयरूपस्याभिनययोगात्"
इति कथमपि न समीचीनम् । न केवलं शान्तरसस्य एव कतिपयचेष्टादयः
रङ्गमञ्चे अनभिनेयतां यान्ति नाट्यशास्त्रे च ता वर्जितदृश्यत्वे प्रतिपादिताः।
शृङ्गाररसेऽपि चुम्बनालिङ्गनादय वर्जिताः, अनभिनेयत्वं च रौद्ररसस्यापि
हननं मरणादिदृश्याणामप्येतादृशी एव स्थितिरस्ति । एवमेव शान्तरसेऽपि
क्रियोपशमप्रदर्शनं नैवापरिहार्यम् । लौकिक रागद्वेषादिषु वैराग्यप्रदर्शनत्वादेव
कार्यसिद्धिर्भवितुं शक्यते ।[2]

विश्वनाथेनाप्यनुमोदितं यथा साहित्यदर्पणे[3] -

"युक्तवियुक्त दशायामवस्थितो यः शमः स एव यतः ।
रसतामेति तदस्मिन् संचार्यादिः स्थितिश्च विरुद्धाः ।।"

यश्चास्मिन् सुखाभावोऽप्युक्तस्तस्य वैषयिकसुखपरत्वान्न विरोधः ।
न हि सर्वे सर्वानुपकुर्वन्ति । यथा कश्चिद् रागिभ्यः रोचते शृङ्गारस्तथैव
कश्चिद् वीतरागिभ्यः शान्तम् ।

एवमेव शान्तरसस्य वीररसे अथवा बीभत्सरसेऽपि अन्तर्भावो नैव
सम्भाव्यते । वीररसे अहंकारस्य प्रधान्यत्वात् शान्ते च वैराग्यस्य । उभयोरेव
विरोधत्वान्नैव तत्रान्तर्भावस्य प्रश्नः समुत्पद्यते । वीभत्सेऽपि स्थितिरियमेव ।

---

1. नाट्यशास्त्रम्, 6.1-5 प्रक्षिप्तांशः ।
2. रससिद्धान्तः - स्वरूपविश्लेषणम्, पृ.258-259
3. साहित्यदर्पणम्, 3.250-251

पश्चाद्वर्तिना विशिष्टाद्वैतदर्शनस्याचार्येण वेदान्तदेशिकेन शान्तरसस्य नाट्ये अङ्गित्वमनुमोदितं सङ्कल्पसूर्योदयाख्ये नाटके ।[1]

अतः शान्तो रसोऽपि नाट्ये अङ्गीरसरूपेण भवितुं शक्नोति । प्रबोधचन्द्रोदयप्रभृतिषु आध्यात्मिकनाटकेषु च शान्तरसस्याङ्गित्वं युक्तियुक्तमेव ।

प्रबोधचन्द्रोदये शान्तरसस्य पूर्णः परिपाको दृश्यते । नाट्यशास्त्रीयनये शान्तरसस्य शमो निर्वेदो वा स्थायिभावः, संसारस्य निःसारत्वं दुःखमयत्वमनित्यत्वं चालम्बनम्, पुण्याश्रम-तीर्थ-वनान्त-महात्मनां सङ्गश्चोद्दीपनविभावाः, रोमाञ्चादयश्चानुभावाः, हर्षस्मरणादयश्च सञ्चारिणो भवन्ति ।

नाटकस्य नान्दीपाठादेव शमाख्यस्थायिभावस्य बोधो जायते "सान्द्रानन्दमुपास्महे तदमलं स्वात्मावबोधं महः इत्यादिषु । पुनश्च "तदयं शान्तरसप्रयोगाभिनयेनात्मानं विनोदयितुमिच्छामः । ततो यत्पूर्वमस्मद्-गुरुभिस्तत्र भवद्भिः श्रीकृष्णमिश्रैः प्रबोधचन्द्रोदयं नाम नाटकं....राज्ञः कीर्तिवर्मणः पुरस्तादभिनीतं भवता"। इति सूत्रधारवचनेनापि नाटके शान्तरस-प्राधान्यत्वं प्रतीयते । अत्र शान्तरसस्यालम्बनं प्रबोधोदयोऽस्ति । नाटकस्य द्वितीये तृतीये चाङ्कयोः बौद्ध-जैन-चार्वाकादीनां वेदान्तिकालोचना, काश्यां च ब्राह्मणमठवर्णनं तीर्थस्थलकुरुक्षेत्र-मन्दार-चक्रतीर्थादीनां च वर्णनं शान्तरसस्यो-द्दीपनविभावाः । ब्रह्मांशिभूत आत्मा (पुरुषः) रसस्याश्रयः । शमस्थायीभावे च क्षणे-क्षणे उन्मग्ननिमग्नाः हर्षादयश्च सञ्चारिणः । एभिर्विभावानुभावव्यभिचारि-भावैश्च परिपुष्टः स्थायीभावः शमो नाटकान्ते ब्रह्मरूपतत्त्वत्वेन शान्तरसे परिणमते । अतो नाटकस्याङ्गीरसः शान्त एव युक्तियुक्त इति निश्चप्रचम् ।

प्रबोधचन्द्रोदयस्योपादेयत्वम् -
------------------------------

प्रबोधचन्द्रोदयनाटकं प्रतीकात्मकशैल्यां लिखितं प्रथममेव नाटकमासीदिति तु सुनिश्चितमेव । इतः प्राक् प्रतीकमात्रप्रचलनं न्यूनाधिक्यरूपेण द्वित्रिष्वेव नाट्यकृतिषु प्राप्यते परं नैव तत्र स्वतन्त्ररूपेण निखिलाऽपि नाट्यकृतिः प्रतीकशैल्यां

-----------------------------------

1. सङ्कल्पसूर्योदयः, 1.17

रचिता उपलभ्यते । दार्शनिकाध्यात्मिकविषयस्य नाट्यरूपे परिकल्पनं श्रीकृष्णमिश्रस्य मौलिकोद्भावनाऽऽसीत् । नैवास्या विधाया नाट्यशास्त्रेऽपि कुत्राप्युल्लेखः प्राप्यते। गूढो हि ननु दार्शनिको विषयः नैवाल्पधियो दर्शनरहस्यं वेत्तुं क्षमन्ते । तस्य एव नाटकरूपेण परिकल्पनं कृत्वा अभिनयमाध्यमेन पुरतोऽवस्थापनं नूनमेव दुराराध्यः प्रयासः । माध्यमेनानेन स्वल्पधियोऽपि दर्शनरहस्यमनायासेनैवाववोद्धुं क्षमन्ते नैवात्र संशयः । अभिनवेयमासीद् विधा न पुनस्तस्या नाटकान्तरेण तुलनामिष्यते प्रत्यक्षम् । कविना अद्वैतवेदान्तस्य विष्णुभक्त्याश्च यत्समन्वयात्मकं स्वरूपं प्रस्तुतं तत्र साफल्यं वाधिगतमिति कवेरस्य प्रौढकवित्वशक्तिं परिचाययति । तस्य कवितायां माधुर्यं प्रसादश्च कवितासौष्ठवं द्विगुणयति । अमूर्ता अपि भावास्तत्र मूर्तवदुपस्थापिता। तत्तत्पात्राणां चित्रणमेतादृशं प्रस्तुतं यत्तानि पात्राणि पुरतः स्थितमिव लक्ष्यन्ते । तत्र प्रथमं कामदेवस्य चित्रणं यथा -

"उत्तुङ्गपीवर कुचद्वयपीडिताङ्ग-<br>
मालिङ्गितः पुलकितेन भुजेन रत्या<br>
श्रीमान्जगन्ति मदयन्नयनाभिरामः<br>
कामोऽयमेति मदघूर्णित नेत्रपद्मम् ।।"[1]

कामस्य प्रधानमस्त्रं नारी एव इति प्रसिद्धम् । स्त्रियाश्चरित्रेण को न वञ्चितः ? तत्सहाय्येन वा कामेन को न जितम् । विदुषां योगीनां वा मनसि शास्त्रसम्भवो विवेकस्तदानीं यावत् प्रभवति यावदेन्दीवराक्षीणां दृष्टिविशिखा न निपतन्ति । तासां तु स्मरणमपि मनसो विकाराय अलम् ।" प्रबोधचन्द्रोदये- "प्रभवति मनसि विवेको शास्त्रसम्भवस्तावत्...।" "स्मरणमपि कामिनीनामलमिह मनसो विकाराय"। अपि च "किं नाम वामनयना न समाचरन्ति" "नारीति निरयो नाम्ना कृता"।" इत्यादिष्वुक्तिषु पूर्वोक्तमेव समर्थितम् ।

क्रोधस्य वास्तविकं चित्रणं यादृशं कविना प्रस्तुतं तादृशमन्यत्र दुर्लभमेव। यथा -[2]

---

1. प्रबोधचन्द्रोदयः, 1.10

2. तत्रैव, 2.29

"अन्धीकरोमि भुवनं बधिरीकरोमि
धीरं सचेतनमचेतनतां नयामि ।
कृत्यं न पश्यति येन हितं शृणोति
धीमानधीतमपि न प्रतिसंदधाति ।।"

पद्यमिदं पाठं-पाठं क्रोधान्वितस्य मानवस्याकृतिः पुरतः स्थिता इव दृश्यते । एवमेव दम्भस्य लोभस्य चापि चित्रणं यदा क्रियासमभिहारेण पठ्यते तदा तेषां वास्तविकं स्वरूपं साक्षादिव पुरतोऽवलोक्यते ।

"पुमानकर्ता कथमीश्वरो भवेत्" अतिगूढतत्त्वमिदमतीवसारल्येन सरसरूपेण च कविना हृदयङ्गमं कारितम् । यथा[1] -

"अयः स्वभावादचलं बलाच्चलत्यचेतनं चुम्बकसंनिधाविव ।
तनोति विश्वेक्षितुरीक्षितेरिता जगन्ति मायेश्वरतेयमीशितुः ।।

अर्थात् यथा चुम्बकसंनिधावचलमप्ययश्चलत्वमाप्नोति तथैव ब्रह्मेक्षणप्रेरिता माया विश्वमिदं सृजते एतदेवेश्वरस्येश्वरत्वम् ।

प्रबोधचन्द्रोदये यत्र तत्र शाश्वतसत्ययुताः सूक्तयोऽपि कृतेर्महत्त्वं द्विगुणयन्ति । स्वाभीष्टप्रतिपादनेन सह कविना ताभिः सूक्तिभिः जनसामान्यमपि शिक्षितम् । यथा -

"एकामिषप्रभवमेव सहोदराणामुज्जृम्भते जगति वैरमिति प्रसिद्धम् ।"
"सेर्ष्यं प्रायेण योषितां भवति हृदयम् ।"
"किं नाम वामनयना न समाचरन्ति ।"
"लघीयस्यपि रिपौ नानवहितेन जिगीषुणा भवितव्यम्"
"अनादरपरो विद्वानीहमानः स्थिरां श्रियम्" ।
"अग्नेः शेषमृणाच्छेषं शत्रोः शेषं न शेषयेत्"
"सुहृदामनिष्टाशङ्कि मानसम्"
"निर्दहति कुलविशेषं ज्ञातीनां वैर सम्भवः क्रोधः"
"वामा विधेर्वृत्तयः"
"निरयो नारीति नाम्ना कृतः"
"समानान्वय जातानां परस्परविरोधिनाम्
परैः प्रत्यभिभूतानां प्रसूते संगतिः श्रियम् ।।" इत्याद्यः सूक्तयः कस्य

1- प्रबोधचन्द्रोदय 6.16

सहृदयस्य हृदयं नावर्जयन्ति ।

श्रीकृष्णमिश्रस्य कृतिरियं न केवलं नाट्यशास्त्रीयदृष्ट्या पूर्णतामावहति अपितु कमनीयकवितापरिकल्पनेऽपि नैव साम्यमस्याः । परिणामतो न केवलमालोचकैः समीक्षकैश्चास्याः श्लाघाकृता प्रत्युत परवर्तिभिरनेकैः लेखकैः श्रीकृष्णमिश्रस्य शैलीयमङ्गीकृता । अस्यामेव शैल्यां न केवलं संस्कृतभाषायामेव प्रत्युत हिन्दीभाषायामपि बहूनि नाटकानि विरचितानि । अनेन नाटकस्यास्य वैशिष्ट्यं स्वत एव सिध्यति ।

ङ. <u>प्रबोधचन्द्रोदयस्योत्तरवर्तिसंस्कृतनाटकपरम्परा -</u>

संस्कृतनाटकसाहित्ये स्थापितेयं नूतनाशैली परवर्तिनि नाटकसाहित्ये-ऽन्यां ख्यातिमलभत् । अनेकैः कविभिश्चास्यां शैल्यामनेकानि नाटकानि विरचितानि । अस्याः परम्परायां आरम्भस्तावत् श्यो दशताब्यामभूत् । "यशपाल" महाभागेन मोहराजपराजयाभिधानकं नाटकमस्यां शैल्यां श्यो दशताब्यां विरचितम् । रूपकात्मकशैल्यां प्रणीतं नाटकमिदं जैनधर्मप्रचारोद्देश्येन विरचितम् । नाटकेऽस्मिन् कुमारपालस्य मोहराजे विजयवर्णनं कृतम् । अत्र कुमालपालहेमचन्द्राचार्यादिमानवपात्रैः सह भावतात्त्विकपात्राण्यपि प्रस्तुतानि । प्रबोधचन्द्रोदयवदत्रापि द्वयोः पक्षयोर्मिथः संघर्षो वर्णितः । एकतो नृपःकुमारपालस्तस्य सहायका ज्ञानदर्पण विवेकचन्द्रादयः सन्ति, अपरतश्च महामोहः स्वसैनिकैः सह चित्रितः ।

---

1. Macdenell, A.A.:

   a) One of the most remarkable product piece of the logic phylosophical purport in which practically ohly abstract notion and symbolic figures act as persons, it is remarkable for dramatic life and vigour.

   History of Skt. Literature, A.A. Macdonell, p.367.

   b) A.B. Keith :

   Krishnamisra's example has caused the production of numerous dramas of the same type, But of much less value....

   - The Sanskrit drama, A.B. Keith, p.253.

अन्ते महामोहस्य पराजयं जैनधर्मस्थापना चास्ति । नाटकीयगुणानुरोधेन नाटकेऽस्मिन् सरसत्वमस्ति । कतिपयेषु स्थलेषु प्रबोधचन्द्रोदयेन सह पूर्णतया साम्यमवलोक्यते । यथा मोहराजस्य पद्यमेकम् -

"अर्धाङ्गे गिरिजां बिभर्ति गिरिशो विष्णुर्वहन्त्यन्वहं ।
शस्त्रश्रेणिमथाक्षसूत्रवलयं धत्ते च पद्मासनः ।।"[1]

पद्यमिदं प्रबोधचन्द्रोदयस्य प्रथमाङ्कस्यैकोनत्रिंशत्पद्येन सह साम्यं भजते । एवमेव मोहराजपराजये[2] -

"किंचित्कुन्दप्रसवधवलं किंचिदुन्मेषधीरं
किंचिल्लोलभ्रमरमधुरं किंचिदाकुंचिताक्षम् ।
किंचिद् भावालसमसरलं प्रेक्षितं कामिनीनां
शस्त्रं दृष्ट्वा मम रणमुखे वैरिणो विद्रवन्ति ।।"

पद्यमिदं च नाटकस्य प्रथमाङ्कस्य द्वादशसंख्यात्मकेन पद्येन सह साम्यं भजते ।

संकल्पसूर्योदयाख्या वेंकटनाथस्य प्रतीकशैल्यां लिखिता कृतिरन्याऽस्ति यत्र कविना रामानुजस्य विशिष्टाद्वैतवादस्य स्थापना प्रबोधचन्द्रोदयशैल्यां विहिता । विशालकायमिदं नाटकं दशाङ्कोपेतमस्ति । कथानकं चास्य विवेकमहामोहयोः सङ्घर्षवदेव परमन्ते अस्मिन् महामोहे पराभूते सति श्रद्धापुरुषयोः समागमे पुरुषो विष्णुसारूप्यं भजते । अत्रापि केषुचित्स्थलेषु प्रबोधचन्द्रोदयेन सह साम्यं दृश्यते। यथा संकल्पसूर्योदयस्यलोभः[3] -

लब्धं न मुञ्चति विलक्षणमर्त्तिं भुंक्ते
धत्ते पुनः पुनरसौ महतीं धनायाम् ।
निद्रारसं न लभते महतां निधीनां
रक्षा पिशाच इव सम्प्रति राजराजः ।।

---

1. मोहराजपराजयः, 5.56
2. तत्रैव, पृ. 13।
3. संकल्पसूर्योदयः, 4.50

प्रबोधचन्द्रोदयस्यलोभश्च यथा[1] -

सन्त्येतेममदन्तिनो मदजलप्रम्लानगण्डस्थला
वातव्यायतपातिनश्च तुरगा भूयोऽपि लप्स्ये परान् ।
एतल्लब्धामिर्दलमे पुनरिदं लब्धाधिकंध्यायता
चिन्ताजर्जरचेतसां बत् नृणां का नाम शान्तेः कथा ।।"

एवमेवान्यत्रापि केषुचित्स्थलेषु भावसाम्यं प्राप्यते ।

संकल्पसूर्योदयानन्तरं कविकर्णपूरस्य चैतन्यचन्द्रोदयस्य स्थानमस्ति । दशाङ्कोपेतं नाटकमिदं महाप्रभोश्चैतन्यदेवस्य जीवनवृत्तान्तात्मकमस्ति । मूर्तामूर्तयोरुभयोरेवपात्रयोः संमिश्रणमस्त्यत्र । अमूर्तपात्रेषु भक्ति-विराग-कलि-अधर्मादयो मुख्याः । मूर्तपात्रेषु च चैतन्यदेवस्तस्य शिष्यश्च । भाषाशैली चास्य नाटकस्य प्रसादगुणोपेता । अस्तिसाम्यं प्रबोधचन्द्रोदयेन अस्यापि केषुचित्पद्येषु । यथा चैतन्यचन्द्रोदयस्य पद्यमिदम्[2]

"मूकीकरोत्यलममूकमहो अनन्ध-
मन्धीकरोत्यबधिरं बधिरीकरोति ।
यो यं बली सुमनसं विमनीकरोति
स श्रीमदोविदनकस्य मोहापत्ये ।।"

मदस्यचरित्रात्मकं प्रबोधचन्द्रोदयस्य क्रोधचरित्रात्मकेन "अन्धीकरोमि भुवनम्[3] ...." इत्यादिकेन सह पूर्णरूपेण साम्यं भजते ।

एतदनन्तरं वादिचन्द्रसूरेः ज्ञानसूर्योदयाख्यं नाटकमस्यां श्रेण्यामायाति । चतुराङ्केषु प्रथमाङ्के प्रस्तावनानन्तरं मतिविवेकयोः रतिकामाभ्यां सह संघर्षो वर्णितः । द्वितीयाङ्के मिथ्याचाराणां बाह्याडम्बराणां मतमतान्तराणां खण्डनम्, तृतीयाङ्के च विवेक विजयवर्णनम्, चतुर्थे चाङ्के नायकस्यप्रबोधप्राप्तिः। एवं नाटकस्यास्यापि रचनाचक्रं प्रबोधचन्द्रोदयमनुकरोति । विजयानन्तरं वाग्देवी विष्णुभक्तिवत् पुरुषं प्रबोधेन सह समायोजयति । अष्टशती च सरस्वतीवत् अद्वैतस्थाने

---

1· प्रबोधचन्द्रोदयः, 2·30

2· चैतन्य चन्द्रोदयः, पृ·15

3· प्रबोधचन्द्रोदयः, 2·29

अर्हन्तमुपदिशति । अस्य दयापात्री च प्रबोधचन्द्रोदयस्य श्रद्धामनुकरोति । अत्र न केवलं पात्रसाम्यं दृश्यते, अपितु शैलीमप्यनुकुर्वन् दृश्यते नाटककारः ।

अस्यामेव परम्परायां षोडशशताब्द्यां "भूदेवशुक्लेन" "धर्मविजयाख्यं नाटकं प्रणीतम् । पश्चाद्‌कोपेते नाटकेऽस्मिन्नपि प्रबोधचन्द्रोदयवद् धर्मराज-अधर्मराज-नाम्नोः प्रतिपक्षिणोः सङ्घर्षमस्ति धर्मराजपक्षे अहिंसा-सत्य-अस्तेय-शौच-दान-दम-शान्ति-दयादयः सैनिकरूपेण प्रतीकपात्रत्वेन चित्रितानि । अधर्मराजस्य च पुत्रौ वर्णसंकरः, पुत्रवधूश्च नीचसंगतिः । अस्य अपि निखिलं घटनाचक्रं प्रबोधचन्द्रोदयमनुकरोति । अत्र वर्णसंकरनीचसंगत्योश्च वार्तालापं प्रबोधचन्द्रोदयस्य रतिकामयोर्वार्तालापानुरूपम् । निष्कर्षतो नाटकेऽस्मिन् प्रबोधचन्द्रोदयानुकरणे तद्युगीनस्थितीनां चित्रणमस्ति ।

अष्टादशशताब्द्यां कृष्णदत्तमैथिलमहाभागः "पुरञ्जनचरितम्" प्रणीय शैलीमिमां परिपोषयत् । विष्णुभक्तेः प्रचारप्रसारार्थं रचितं नाटकमिदं भागवतस्य पुरञ्जनोपाख्यानसम्बद्धमस्ति । नाटके नवधाभक्तिः नायकमीश्वरेण समायोजयति । पौराणिककथायाः रङ्गमञ्चीयप्रयोगः प्रबोधचन्द्रोदयशैल्यां कृतमत्र ।

इमामेवपरिपाटीं निर्वहन् आनन्दरायमखिमहाभागो विद्यापरिणयाख्यं नाटकं प्रणीतवान् । यस्मिन् शिवभक्त्या मोक्षावाप्तिरुक्ता । अस्य भाषा सरसाभिनेयानुकूला चास्ति ।

आनन्दरायस्यैवान्या कृतिरप्यस्यां श्रेण्यां लिखिता जीवानन्दाख्या अस्ति । अस्यां रचनायां कविना आयुर्वेदस्य सिद्धान्तानां साहित्यिकाभिव्यक्तिकरणं विहितम् । यत्र योगराजो विज्ञानशर्मा प्रबोधचन्द्रोदयस्य महामोह-विवेकयोश्चरित्रमनुकुर्वतः । योगराजो हि महामोहवत् पराभूते विज्ञानशर्मा चान्ते शिवपार्वत्यानुकम्पया पारदं वररूपेण गृह्णाति । अस्य भरतवाक्यं प्रबोधचन्द्रोदयस्य भरतवाक्यमनुकरोति । अन्यत्रापि वर्णनसाम्यं भावसाम्यं च यत्र तत्र प्राप्यते ।

"रविदासस्य "मिथ्याज्ञानविडम्बनम्" प्रतीकात्मकपरम्परायां प्रणीतं नाटकमस्ति । अङ्कद्वयोपेतस्यास्य नाटकस्य भूमिकया ज्ञायते यदपूर्णेयं कृतिः

गोकुलचन्द्रशर्मणा परिसमाप्ता । वेद-वाग्देवी-करुणा-विष्णुभक्ति-न्यायवेदान्तादय: पात्रत्वेनात्रोपकल्पिता दृश्यन्ते । नात्र नाटकीयसौन्दर्यमवलोक्यते । तत्कालिक--परिस्थितीनामेव चित्रणं तत्रास्ति ।

एतदतिरिक्तं अमृतोदयाख्यस्य नाटकस्यैकोऽप्यस्यां कोट्यां प्राप्यते । यत्र सृष्टिप्रलयस्याध्यात्मिकोत्सर्गस्य च चित्रणमस्ति । पश्चाङ्कोपेतस्यास्य कर्ता कश्चिन्मैथिलगोकुलनाथ आसीत् ।

पूर्वोक्तविवेचनेन ज्ञायते यत्प्रबोधचन्द्रोदयशैल्यां परवर्तिकाले अनेकानि नाटकानि विरचितानि सर्वत्र च न्यूनाधिक्येन प्रबोधचन्द्रोदयस्य कथानकेन साम्यमस्त्येव । नैव कापि नाट्यकृति: प्रबोधचन्द्रोदयमतिशेते । अत: प्रतीकात्मक-नाट्यपरम्परायां प्रबोधचन्द्रोदयो मूर्धन्यतमं स्थानं भजते इति निश्चप्रचम्।

= = = = = =

# तृतीयोऽध्याय:

## प्रबोधचन्द्रोदयस्य दार्शनिकदृष्टि:

क) संक्षिप्तदर्शनसाहित्यं नाट्यपरम्परायां च दर्शनस्य स्थानम्

ख) प्रबोधचन्द्रोदयस्य दार्शनिकसिद्धान्ता: -

1) आलोच्यधर्मदर्शनम्

2) स्वाभिमतधर्मदर्शनम्

1. आलोच्य धर्मदर्शनम् -

(1) लोकायतम् (2) बुद्धागम: (3) जैनमतम्

(4) सोमसिद्धान्त: (5) यज्ञविद्या (6) मीमांसा

(7) तर्कविद्या: ।

2. स्वाभिमतधर्मदर्शनम् -

1) अद्वैतदर्शनम् - (क) ब्रह्म (ख) जीव: (ग) माया

(घ) जगत् (ङ) मोक्ष: ।

2) विष्णुभक्ति:

3) वैयासिकीसरस्वती

4) उपनिषद्

= = = = = = =

क) संक्षिप्तदर्शनसाहित्यम्, भारतीयपरम्परायां दर्शनस्य स्थानं च -

भारतं नाम मानवसभ्यतायाः प्रसवभूमिः । अस्यामेव भुवि बभूव प्रथमज्ञानारुणोदयः । विश्वगुरोः गौरवत्वभिमयमेव भाति पावनी धरा । यथोक्तं मनुना[1] -

"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः स्वं स्वं चरितं शिक्षेरन् पृथिव्यां सर्वमानवाः ।"

अपि च श्रीमद्भागवते[2] -

अहो अमीषां किमकारि शोभनं, प्रसन्न एषां स्विदुत स्वयं हरिः ।
यैर्जन्म लब्धं नृषु भारताजिरे, मुकुन्दसेवौपयिकं स्पृहा हि नः ।।

अत्रैव च सर्वविद्याप्रतिष्ठा,[3] अध्यात्मविद्यानाम्,[4] सर्वधर्माणां चाश्रयः आन्वीक्षिकी विद्या[5] मूर्धन्यतमा इत्यत्र न कोऽपि संशयलेशः । निष्कर्षतः भारतवर्षे दर्शनं महीयते । मानव जीवनेन सह अस्य निविडोऽस्ति सम्बन्धः । उभयोरेव चरमं लक्ष्यमेकमेव निःश्रेयससिद्धिरिति । तदेव निःश्रेयसरूपं परमतत्त्वमधिगन्तुं दर्शनस्य सिद्धान्तरूपेण जीवनस्य च व्यवहाररूपेणोपपत्तिः ।

पाश्चात्यदर्शनं "फिलासफी"ति शब्देनाभिधीयते । "फिलासफी" नाम-विद्यानुरागः ।[6] विद्यानुरागमात्रं चेद्दर्शनं तदा तत्प्रयोजकं चित्तानुरञ्जनमेव । न तथा भारतीयदर्शनस्य । अत्र हि "दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ"[7]

---

1. मनुस्मृतिः, 2.20
2. श्रीमद्भागवत्, 5.19.21
3. मुण्डकोपनिषद्, 1.1
4. गीता, 10.32
5. "प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।

   आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ।" - अर्थशास्त्रम् 1.2
6. PHILOSOPHY - शाब्दिक अर्थ विद्या (ज्ञान) के प्रति अनुराग या LOVE OF KNOWLEDGE PHILOS (GREEK = LOVE, SOPHIA=KNOWLEDGE

   (प्लेटो) हिन्दी विश्वकोष-नागरीप्रचारिणी सभा बनारस तथा - INTRODUCTION TO PHILOSOPHY - KULPE IST ADI.
7. सांख्यकारिका, 1.1

इत्यादिना दर्शनस्य तावत् त्रिविधसन्तापनिवृत्तिः प्रयोजनं प्रोक्तम् ।

दर्शनशब्दस्य निष्पत्तिः:- दृशिर्प्रेक्षणे धातोर्निष्पन्नोऽयं दर्शनशब्दो "दृश्यते अनेन" इति व्युत्पत्त्या चाक्षुषविषयकं ज्ञानमेवाभिधत्ते इति । "प्रेक्षण" इत्यनेन "प्रकृष्टमीक्षणम्" इति गृह्यते । न केवलं चर्मचक्षुभ्यामीक्षणं दर्शनमपितु अन्तश्चक्षुभ्यां दर्शनं मननं अथ च चिन्तनं विधाय सोपपत्तिपूर्वकं निष्पादनं हि दर्शनस्याभिधेयमिति । तच्च निष्पादनं निष्पत्तिर्वा चिन्तनस्यात्मा एवास्ति । स एव दर्शनस्यान्वेषण-विषयोऽस्ति, यथा हि श्रूयते[1] -

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्"। वेद एव दर्शनस्य प्रसवभूमिरिति निश्चप्रचम् ।

"को अद्धा वेद इह प्रावोचत् । कुत आजाता कुत इयं विसृष्टिः"[2] इत्यादिषु स्थलेषु दर्शनतत्त्वदर्शनात् । यच्च दुःखत्र्याभिघातद्धेतुस्वरूपं दर्शनमिति प्रोक्तं तदपि वेदमूलकमेव । यथा ऋग्वेदे[3] -

"उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमं श्रथाय" "अदब्धो विमुमोक्तु पाशान् ।" अपि च यजुर्वेदेऽपि यथा[4] - "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।" अत नैवात्र संशयावसरो यद्दर्शनस्य मूलं वेदाएव।

दर्शनं नाम शास्त्रम् । शास्त्रस्य लक्षणं यथा -

"शासनात् शंसनात् शास्त्रं शास्त्रमित्यभिधीयते
शासनं द्विविधं प्रोक्तं शास्त्रलक्षणवेदिभिः
शासनं भूतवस्त्वेकविषयं न क्रियापरम् ।"

दर्शनशास्त्रं समस्तशास्त्राणां संग्राहकोऽस्ति यत्र हि ब्रह्म-आत्म-अथवा-पराविद्यानाम् (मेटाफिजिक्स् अथवा फिलासफीप्रापर) अध्यात्मचित्तविद्या-

---

1. वृहदारण्यकोपनिषद्, 2.4
2. ऋग्वेद, 1.129.15
3. तत्रैव, 1.24.15; 1.24.13
4. यजुर्वेद; अध्याय: 40.

(सायेंकालॉजी) तर्को न्यायो वा-(लाजिक अथवा द साइंस आफ कांडक्ट) एवं सौन्दर्यशास्त्रं कलाशास्त्रं वा (ईस्थेटिक्स अथवा द सांइस आफ आर्ट) इत्यादि-समेषां विषयाणां परिपूर्णपरीक्षणं प्रस्तूयते ।

विरञ्चिप्रपञ्चेऽस्थावरजंगमात्मकेऽस्मिन्संसारे-संसारे प्राणिमात्रस्य दुःखापघातकेहा तु नैसर्गिकी एव । तद्दुःखसामान्यस्य निवृत्तिर्निःश्रेयससिद्धिश्च दर्शनशास्त्रस्य प्रयोजनमस्ति । यथा -

"यद् आभ्युदयिकं चैव नैश्रेयसिकमेव च ।
सुखं साधयितुं मार्गं दर्शयेत् तद्धि दर्शनम् ।।"[1]

धर्मजिज्ञासा ब्रह्मजिज्ञासा च दर्शनविषयः । "यतोऽभ्युदयनिःश्रेयससिद्धिः सधर्मः" अपि च "न हि अनध्यात्मवित् कश्चित् क्रियाफलमुपाश्नुते" "सम्यग्दर्शनसम्पन्नः कर्मभिर्न निबध्यते, दर्शनेन विहीनस्तु संसारं प्रतिपद्यते च" इत्यादिभिर्मनुस्मृतिवचनैर्ज्ञायते यद्धर्मो दर्शनं च अन्योऽन्याश्रितौ स्तः । निःश्रेयससिद्धिरेव द्वयोः प्रयोजनम् ।

निष्कर्षतः इदमत्र शक्यते वक्तुं यद्दर्शनसाहित्ये आत्म-परमात्म-प्रकृति-जीव-ब्रह्मादि विषयाः सूक्ष्मेक्षिकया प्रतिपद्यन्ते विविच्यन्ते च । विषयाणामेतेषां विवेचनाभिप्रायश्च दार्शनिकानां त्रिविधदुःखस्यैकान्तिकात्यन्तिकी च विश्रान्तिरेव। यतो हि इह सुखदुःखसुधाविषपूर्णे जगदार्णवे नैसर्गिकी जन्मवतामनुकूलप्रतिकूलतया प्रहाणाभिमुखी प्रत्यहं प्रवृत्तिः । सा च कदाचित्कथञ्चिदाशिकेष्टवैशिष्ट्य-भाग्भवन्त्यपि नैकान्तात्यन्ततः कस्यापि सुखं सम्पादयितुं दुःखं चोत्सादयितुमलमिति तत्त्वातत्त्वविवेकोपयिकव्याप्त्यानुमीयते । यद्यपि दृश्यन्ते लोके तत्तद्दुःखोत्सादोपायाः परं नैव तत्रैकान्तविश्रान्तिः । यथोक्तं महर्षिणा कपिलेन[2] -

"दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ ।
दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात् ।।"

---

1. डा० भगवानदास - दर्शन का प्रयोजन ।
2. सांख्यकारिका-1

किं चात्रानेक-दुःखग्राह-ग्रहिले संसाराणवे यावन्ति सुखानि तानि दुःखसंभिन्नान्येव । तदुक्तम् -

"परसम्पदुत्कर्षो हीन सम्पदं पुरुषं दुःखाकरोति इति",

"मृष्यन्ते हि पुण्यसम्भारोपनीतस्वर्गसुधामहाहृदावगाहिनः कुशलाः पापमात्रोपपादिता दुःखवह्निकणिकामिति च ।"

अत्र कारणं च सुखदुःखयोर्वास्तविकोपायस्वरूपपरिज्ञानमेव । तस्माद् दुःखव्यूहोपशमनाय प्रतिकारान्तरे चिन्त्यमाने विभिन्नानि दर्शनानि प्रवृत्तानि । "दर्शनं नाम तत्त्वातत्त्वे दृश्येते अनेनेति व्युत्पत्त्या तत्त्वातत्त्वविवेकशास्त्रविशेषः" इत्यपि निगद्यते । तत्रानादिवासनावशात् "इदं पथ्यमिदं पथ्यम्" इति विचार वैविध्याद् दर्शनानां बाहुल्यं विलोक्यते । अत एव दर्शनसंख्याविषयेविदुषां वैमत्यमवलोक्यते । केचन् शंकराचार्यप्रभृतयःदशदर्शनसम्प्रदायाः इत्युदघोषयन्, इतरे च षड्दर्शनमिति अपरे च षोडशदर्शनमिति । केचन् षडास्तिकदर्शनानि षडेव च नास्तिकदर्शनानि इति मन्यमाना दृश्यन्ते । इयमेव वेदप्रामाण्याप्रामाण्यवादिनी दर्शनविभागसरणिः। आस्तिकं नास्तिकं चेति द्विविधादर्शनसरणिरेव वैज्ञानिकी सर्वमान्या चेति निश्चप्रचम् ।

तत्र वेदाप्रामाण्यवादिषु चार्वाकदर्शनमेवादिमं दर्शनं, यस्य च प्रणेता कश्चिद् बृहस्पतिः । नास्य दर्शनस्य कश्चिदाधिकारिको ग्रन्थोऽद्याप्युपलभ्यते । दर्शनेषु पूर्वपक्षत्वेनास्तिकदार्शनिका अस्य पक्षमुपस्थापयन्ति । सर्वदर्शनसंग्रहे एवास्य सिद्धान्ताश्चिन्तितवरा दृश्यन्ते । यथा - "मरणमेव मुक्तिः, राजैवेश्वरः, प्रत्यक्षमेव प्रमाणम् । जगत्कर्तृत्वनिरासः परलोकेश्वरस्वर्गादीनां कल्पनामथनमेवास्य दर्शनस्य प्रधानो विषयः । निष्कर्षतो भौतिकवादप्रतिष्ठात्मकमिदं दर्शनं वितण्डवादमात्रमेव । अत एव लोकायतविषये न्यायमञ्जर्यामुक्तम् -

"न हि लोकायते किञ्चित्कर्तव्यमुपदिश्यते ।

वैतण्डिककथैवासौ न च पुनः कश्चिदागमः ।।"

रामायणेऽपि यथा[1] -

---

1. रामायणम् - अयोध्याकाण्डः, अध्यायः 102, 38-39.

कश्चिन्न लोकायतिकान् ब्राह्मणास्तान् सेवते ।
अनर्थकुशला ह्येते बाला: पण्डितमानिन: ।।
धर्मशास्त्रेषु मुख्येषु विद्यमानेषु दुर्बुधा: ।
बुद्धिमान्वीक्षिकीं प्राप्य निरर्थं प्रवदन्ति ते ।।[1]

बौद्धदर्शनम् - बौद्धधर्मदर्शनस्य प्रवर्तको गौतमबुद्ध आसीत् यस्य जन्मकाल: 448ई॰पू॰ मन्यते । सुत्त-विनय-अभिधम्मारव्येषु त्रिपिटकेष्वस्य दर्शनस्य ग्रन्था: पालिभाषायां प्राप्यन्ते । गौतमबुद्धेन सर्वजनहिताय दु:खविमोक्षाय च स्वशिष्येभ्य उपदेशा: प्रदत्ता: । क्षणिकवाद एवास्य दर्शनस्य मूलम् । बौद्धेषु शून्यवादेनैकं दर्शनं माध्यमिकानाम् । क्षणिकज्ञानमात्रवादेनापरं योगाचार्याणाम् । ज्ञानाकारानुमेय-क्षणिकबाह्यार्थवादेन सौत्रान्तिकानाम् प्रत्यक्षलक्षण-क्षणिकबाह्यार्थवादेन वैभाषिकानाम्-इति माध्यमिकयोगाचारण-सौत्रान्तिकवैभाषिकाभिधानि चत्वारि दर्शनानि सौगतानाम् ।

आर्हत दर्शनम् - "जिनानुयायिन: जैना:" जिनस्तु रागद्वेषादिदोषान् कर्मशत्रून्जयतीति" जिन एव "तीर्थंकर" इति शब्देन प्रोच्यते जैनधर्मावलम्बिभि: । "तरति संसार महार्णवं येन निमित्तेन तत्तीर्थमिति"। अद्यावधिपर्यन्तं चतुर्विंशतितीर्थंकरा अभूवन् । तेष्वादिमो "ऋषभदेव:" अन्तिमश्च महावीरस्वामी आसीत् । सम्प्रदायोऽयम् श्वेताम्बरदिगम्बर भेदेन द्विधा विभक्त: । अनेकान्तवाद: जैनदर्शनस्य महनीय: सिद्धान्त:, यस्यानुमोदनं गुणरत्नमहाभागेनापि कृतं यथा[2] -

"एको भाव: सर्वथा येन दृष्ट:, सर्वे भावा: सर्वथा तेन दृष्टा: ।
सर्वे भावा: सर्वथा येन दृष्टा एको भाव: सर्वथातेन दृष्ट: ।।"

आर्हतनये प्रमाणद्वयम्,[3] "स्याद्वादस्य प्रमाणे द्वे प्रत्यक्षानुमानमपि च ।"
"चेतना लक्षणो जीव: स्यादजीवस्तदन्यक: ।

---

1. भारतीय दर्शन - वाचस्पति गैरोला, पृ॰93
2. षडदर्शन-समुच्चयटीका, पृ॰222
3. सर्वदर्शन-संग्रह:, पृ॰177

सत्कर्मपुद्गला पुण्यं पापं च तस्य विपर्ययः ।।"

ज्ञानं {सम्मोहादिविहीनं ज्ञानम्} दर्शनं {अर्हन्मुनिनिर्दिष्टमतानुगमनम्} चरित्रं {पापकर्मविरतिः} एते अपवर्गमार्गाः ।

श्वेताम्बरदिगम्बरपरिचयं यथा जिनदत्तसूरिशब्देषु-[1]

"सरोजहरणा भिक्षुणो लुञ्चितमूर्धजाः ।

श्वेताम्बराः क्षमाशीला निःसङ्गा जैनसाधवः ।

लुञ्चितापिच्छिकाहस्ताः पाणिपात्रा दिगम्बराः

उर्ध्वाशिनो गृहे दातुर्द्वितीयाः स्युर्जिनर्षयः ।।"

निष्कर्षतो वेदप्रामाण्यमनभ्युपगच्छन्तमपि जैनदर्शनं न सर्वथा वेदवादेन विरुध्यते, सन्ति तत्र केचन् स्फुटाः सिद्धान्ताः येषां न शक्यते वेदवादेन विरोधं साधयितुम् । अत एव जैनदर्शनं नास्तिकास्तिकयोर्दर्शनयोर्मध्यस्थम्, यस्मादास्तिकदर्शनपरम्परा आरब्धा ।

एवं चत्वारिदर्शनानि सौगतानां, देहातिरिक्तदेहपरिणामात्मवादेन दिगम्बराणाम्, देहात्मवादेन च चार्वाकाणाम् इति द्वे चार्वाक-दिगम्बर{आर्हत} दर्शने । इति मिलित्वा षड्दर्शनानि नास्तिकानाम् ।

वेदप्रामाण्यवादिषु षड्दर्शनानि प्रथितानि । तानि च न्यायवैशेषिक-सांख्ययोगौ-पूर्वोत्तरमीमांसा चेति ।

आन्वीक्षिकी {न्याय} पञ्चाध्यायी गौतमेन प्रणीता । यस्या दशाह्निकेषु 538 सूत्राणि सन्ति । "नीयते प्राप्यते विवक्षितार्थसिद्धिरनेन इति न्यायः" यत्र प्रमाणप्रमेयसंशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णयवाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां षोडशपदार्थानामुद्देश-लक्षणपरीक्षाभिस्तत्त्वज्ञानं प्रयोजनम् । अपवर्गो नाम पदार्थप्रतिपत्तिनिर्भरः पदार्थप्रतिपत्तिश्च प्रमाणपराधीनेति प्रमाणमेव प्रधानं विवेच्यं न्यायदर्शनस्य ।

वैशेषिकशास्त्रन्तु दशाध्यायात्मकं कणादमहर्षिप्रणीतम् । "विशेषं पदार्थमधिकृत्य कृतं शास्त्रं वैशेषिकम्" तस्यापि तत्रैव- "धर्मविशेषोपपादनत्वात्

---

1. सर्वदर्शनसंग्रहः, पृ. 178

द्रव्य-गुण-कर्म-सामान्य-विशेष[1]-समवायाभावानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्" सूत्रेण निःश्रेयसात्मकं फलमुक्तम् । अस्य दशाध्यायेषु 370 सूत्राणि सन्ति परमाणुवाद-अनेकात्मवाद-असत्कार्यवाद-परमाणुनित्यतावाद-सृष्टिवाद-मोक्षवादाश्चास्य सिद्धान्ताः ।

अथ साङ्ख्यशास्त्रं भगवता कपिलेन प्रणीतम् । तत्र त्रिविधदुःखात्यन्तनिवृत्ति ..." इत्यादि "यद्वा-तद्वा तदुच्छित्तिः पुरुषार्थस्तदुच्छित्तिः पुरुषार्थः" इत्यन्तं षडध्यायात्मकम् । अत्र प्रथमाध्याये विषया निरूपिताः । द्वितीये प्रकृतिकार्याणि। तृतीये विषयेभ्यो वैराग्यम् चतुर्थे विरक्तानां पिंगलकुरवादीनामाख्यायिकाः । पञ्चमे परपक्षनिर्णयः । षष्ठे च सर्वार्थसंक्षेपः ।पुंप्रकृति विवेकेन त्रिविध-दुःखात्यन्तनिवृत्तिरेव साङ्ख्यशास्त्रप्रयोजनम् ।

योगशास्त्रं च परमयोगनिष्णातेन भगवता पातञ्जलिना प्रणीतम् । यस्य चतुःपादेषु 194 सूत्राणि । लघुकायोऽपि ग्रन्थोऽयं विशिष्टं महत्त्वं बिभर्ति । "युजिर् योगे" "युज् समाधौ" चोभयोरेवार्थयोर्योगदर्शने योगदर्शन-प्रयोगो दृश्यते । तत्र प्रथमे पादे चित्तवृत्तिनिरोधरूपसमाधेः, अभ्यासवैराग्ययोः साधनस्य च निरूपणम् । द्वितीयपादे विक्षिप्तचित्तस्यापि समाधिसिद्ध्यै यमनियमासनप्राणायामप्रत्याहार-साधारणाध्यान-समाध्योऽष्टावङ्गान्युक्तानि । तृतीये योगजा विभूतयः । चतुर्थे च कैवल्यम् । अस्य च विजातीयप्रत्ययनिरोधद्वारेण निदिध्यासनसिद्धिः प्रयोजनम् । यथा चिकित्साशास्त्रस्य रोगः-रोगहेतुः-आरोग्यम्-औषधं चेति व्यूहचतुष्टयम् तथैव योगदर्शनेऽपि जगज्जगद्धेतुर्मोक्षो मोक्षो-पायश्चेतिव्यूहचतुष्टयम् । दुःखात्मकं जगदिदं हेयम् । प्रकृतेः संयोगः संसारहेतुः प्रकृतिसंयोगादत्यन्तनिवृत्तिरेव मोक्षः, सम्यग् दर्शनं च तदुपायः ।

मीमांसा तु कर्ममीमांसा शारीरक (आत्म) मीमांसा-भेदेन द्विधा। तत्र कर्ममीमांसा मीमांसादर्शनपदेन व्यवह्रियते । शारीरकमीमांसा वेदान्त-दर्शनपदेन प्रख्यापिता । तत्र मीमांसायाम् "अथातो धर्मजिज्ञासा" इत्यारभ्य "अन्वाहार्ये च दर्शनात्" इत्यन्तायाम् "धर्मप्रमाण-धर्मभेदः-शेषशेषीभावः-क्रत्वार्थ-पुरुषार्थ भेदेन प्रयोगविशेषः-श्रुत्यार्थाध्यापनादिक्रमभेदः-अधिकारविशेषः-सामान्य-

---

1\. वैशेषिकदर्शनम् 1.1.4

अतिदेशः-विशेषातिदेशः-ऊह-बाधः-तन्त्रम्-प्रसङ्गः इत्येते पदार्थाः द्वादशस्वध्यायेषु षष्टिपादेषु 2731 संख्यकेषु सूत्रेषु च क्रमेण निरूपिताः ।

यद्यपि कर्मकाण्डमपि अध्याय चतुष्टयात्मकं वैष्णवमतप्रतिपादकं तत्र भवता जैमिनिना प्रणीतं तच्च देवताकाण्डनाम्ना प्रसिद्धम्, तथापि तस्योपासना-द्वय कर्मनिरूपकत्वात् कर्ममीमांसान्तर्गतत्वमेवेति नातिरिक्तता ।

एवं तत्र भवता बादरायणेन चतुरध्यायात्मिका षोडशपादात्मिका पञ्चपञ्चाशतोत्तर-पञ्चशतसूत्रात्मिका "अथातो ब्रह्मजिज्ञासा" इत्यादिका-"अनावृत्तिःशब्दात्" इत्यन्तिका श्रवण-मनन-निदिध्यासनादिन्यायानामुप-पादिका जीवब्रह्मणोरैकत्वसाक्षात्कार कारणीभूता शारीरिकमीमांसा प्रणीता तत्र निखिलवेदान्तवाक्यानां प्रत्यगभिन्ना द्वितीये ब्रह्मणि तात्पर्यमिति प्रथमाध्यायेन समन्वयः प्रदर्शितः । तथा वेदान्तवाक्यानामद्वये ब्रह्मणि समन्वये सिद्धे तत्र सम्भावित स्मृतितर्कादिविरोधमाशङ्क्य तत्परि-हारेण विरोधो द्वितीयाध्यायेन परिहृतः । तृतीयाध्यायेन साधनं निरूपितम् । प्रथमपादेन जीवस्य परलोकगमनादिनिरूपणेन वैराग्यं प्रदर्शितम् । द्वितीयपादेन "तत्त्वमसि" इति महावाक्ये तत्पदार्थ-त्वम्पदार्थयोः परिशोधनम् । तृतीयेन नानाश्रुतीनां पुनरुक्तिरूपदूषणं परिहृतम् । सगुणविद्यासु शाखान्तरीयगुणोप-संहारानुपसंहारौ च निरूपितौ । चतुर्थे निर्गुणब्रह्मविद्याया बहिरङ्गसाधनान्या-श्रमधर्मयज्ञादीनि, अन्तरङ्गसाधनानि शमदमादीनि च प्रतिपादितानि । चतुर्थाध्याये निर्गुणसगुणविद्ययोः फलं निर्णीतम् । तत्र प्रथमपादेन श्रवण-मनन-निदिध्यासनादिवृत्त्या निर्गुणब्रह्मसाक्षात्कारेण उपासनादिवृत्त्या सगुणब्रह्म-साक्षात्कारेण च जीवतः पापपुण्यलेपात्मिका जीवन्मुक्तिरुक्ता । द्वितीयेन म्रियमाणस्योत्क्रान्तिक्रमो निरूपितः । तृतीयेन मृतस्य सगुणब्रह्मविद उत्तर-मार्गोऽभिहितः । चतुर्थेन सगुणब्रह्मविदो ब्रह्मलोके स्थितिः, निर्गुणब्रह्मविदो विदेह-कैवल्यं च निरूपितम् ।

अयमेव षड्दर्शनसाहित्यस्यपरिचयसंक्षेपः । षड्दर्शनपदेन न केवलं षट्संख्यकानिदर्शनानि गृह्यन्ते अस्य हि विशेषार्थाभावात् । वैमत्यमेव विदुषां

दर्शन-संज्ञया विषयकम् । परं विषय-दृष्ट्या "येन परमतत्त्वं दृश्यते" तद्दर्शन-मित्येवावधार्यम्" इति ।

नाटक-परम्परायां दर्शनस्य स्थानम् -

"निःश्रेयससिद्धिः" अथवा "परमपदप्राप्तिः" (मोक्षः) एव भारतीय-दर्शनस्य चरमं लक्ष्यम् । प्रतिपादितं च तद्यथामतं तत्र-तत्र । भिद्यते हि पन्थानो न पुनर्लक्ष्यम् । परमानन्दानुभूतिस्तु सर्वैरेवेष्यते काव्यशास्त्रस्यापि तदेवानुमतम् । आनन्दानुभूतिरेव काव्यस्य परमं प्रयोजनम् । चतुर्वर्गफलसाधनं च तत् । धर्मार्थकाम-मोक्षरूपपुरुषार्थचतुष्टयसाधनभूतं नाट्यम्" इति भरतमुनिनाप्यनुमोदितम् । यथोक्तम् -

"धर्मादिसाधनं नाट्यं सर्वदुःखापनोदकृत् ।
अनुवेदवमूष्यस्तस्येत्थानन्तु नाटकम् ।।"

साहित्यदर्पणकारेण विश्वनाथेनापि "ब्रह्मानन्द सहोदरत्वेन" नाट्यरसोऽङ्गीकृतः । नाट्यं हि सर्वसहृदयसंवेद्यम्, दर्शनं च निसर्गत एव दुर्बोध्यम् नेदं सर्वजनसुलभार्थम् । अस्यागाधाम्बुधिनिमज्जनानन्द तत्त्वभेदि-वैदुष्याधिकारिण एव प्राप्तुं क्षमन्ते । परं यदा शास्त्रस्यास्य तत्त्वान्यभिनयेन पुरतोऽवस्थाप्यन्ते तदा दर्शनशास्त्ररहस्यमनायासेनैव स्मृतिपथमवतरति । लोकानुरञ्जनेन सहैव दर्शनतत्त्वज्ञानं मोक्षत्वाय कल्पते ।

"एका क्रिया च द्व्यर्थकरी प्रसिद्धा" इति नयमनुसृत्यैव विद्वद्भिर्नाटकेष्वपि दर्शनतत्त्वसमावेशो विहितः । यद्यपि नाट्यसाहित्ये दार्शनिकनाटकानामभाव एव परं तथापि यानि नाटकानि दर्शनविषयमवलम्ब्य प्रणीतानि तानि नाटक-साहित्ये महत्त्वपूर्णं स्थानं भजन्ते ।

दर्शन-परम्परायां लिखितेषु नाटकेषु प्रथमं नाटकमश्वघोषस्य "शारिपुत्रप्रकरणम्" कथयितुं शक्यते । रचनेयमश्वघोषस्य बुद्धधर्माश्रिता । अश्वघोषो बौद्धकविरासीत्" इति तु निर्विवादं सत्यम् । खण्डिताशरूपेणोपलब्ध-

---

1. नाट्यशास्त्रम्, 1.1; नाटकलक्षणरत्नकोशश्च, पृ. 3

-शारिपुत्रप्रकरणादेव ज्ञायते यन्नाटकस्यास्य प्रधानं लक्ष्यं बौद्धधर्मप्रख्यानमेवासीत् । नाटकस्यान्ते शारिपुत्रबुद्धयोर्दार्शनिक सम्वादा अस्य दार्शनिकतां द्योतयन्ति ।

अश्वघोषात्परवर्तिषु नाट्यकृतिषु केषुचिदेव दर्शनतत्त्वानि सूक्ष्मेक्षिकया निरीक्षणेन प्राप्यन्ते यत्र तत्र, परं नैव तानि नाटकानि दार्शनिकनाटकता-मधिरोहन्ति । भास-कालिदास-भवभूतिप्रभृतिविदुषां रचनासु प्रतीकपात्रयोजना-ऽल्पांशत एवोपलभ्यते । पश्चादेकादशशताब्द्यां श्रीकृष्णमिश्रेण विवेच्यं नाटकं प्रबोधचन्द्रोदयं प्रणीतम् । प्रतीकनाटकपरम्परायां दार्शनिकनाटकपरम्परायां च नाटकमिदं मुख्यं स्थानं भजते । यत्र चार्वाक्-बौद्ध-जैनाद्वैतवेदान्ताद्य दार्शनिक-सम्प्रदायाः सम्यगुल्लिखिता विवेचिताश्च । श्रीकृष्णमिश्रादेव प्रतीकनाटक-प्रणयनपरम्परा प्रचलिताऽभूत् ।

प्रबोधचन्द्रोदयानन्तरं त्रयोदशशताब्द्यां "यशपालः" मोहराजपराजया-भिधानकं नाटकं प्रणीतवान् यस्य हि प्रयोजनं जैनधर्मस्य लोके प्रचारः प्रसारो वा । आर्हतदर्शनस्य "श्वेताम्बर-दिगम्बर" इति सिद्धान्तद्वयस्यैव सम्यक्प्रतिपादनं विहितम् । नाटकस्यान्ते च प्रतीकशैल्या मोहराजस्य पराभवं वर्णितम् । नाटक-स्यास्यशैली पूर्णतया प्रबोधचन्द्रोदयशैलीमनुकरोति, परं विषयदृष्ट्या यत्र प्रबोधचन्द्रोदये अद्वैतवेदान्तप्रतिष्ठापनमिषेण चार्वाकबौद्धादि विभिन्नदर्शनसंयोगस्तत्र मोहराजपराजये जैनदर्शनस्यैव सिद्धान्ता आद्योपान्तमुल्लिखिताः ।

द्वितीया नाट्यकृतिर्महाकविर्वेंकटनाथस्य "संकल्पसूर्योदयाख्या" अस्ति । वेंकटनाथः रामानुजमतानुयाय्यासीत् । अतः रामानुजस्य विशिष्टाद्वैतवादस्य प्रतिपादनं कविना रूपकात्मकशैल्यां विहितम् । नाटकस्य प्रस्तावनया ज्ञायते यन्नाटकस्योद्देश्यमज्ञानान्धकारा ज्जगद्रक्षणम् । यथा -

"अपदिश्य किमप्यशेषगुप्त्यै, निगमान्तेषु निरूढगौरवेण
प्रविभक्तहिताहितः प्रयोगः कविना कारुणिकेनकल्पिताऽसौ ।।"[1]

अतः कवितार्किक-सिंहस्य श्रीमतो वेंकटनाथस्य संकल्पसूर्योदयं भगवद्रामानुजमुनेरौपनिषद्-सिद्धान्तं व्यावृण्वत् मुमुक्षूणां महदुपकरोति । भगवत्सं-

---

1. संकल्पसूर्योदयः, प्रथम अंक, पृ. 3

-कल्प एव पुंसां मोक्षहेतुरित्यौपनिषदकं सिद्धान्तं पुष्णाति नाटकमिदम्। यथा-[1]

"शुभस्तत्संकल्पश्चुलकयति संसार जलधिम्"

अनेन संकल्पसूर्योदयमिति नामधेयमुचितमन्वर्थकं च प्रतीयते।

कवि कर्णपूरस्य दशाङ्कोपेतं चैतन्यचन्द्रोदयं नाटकं महाप्रभुचैतन्यदेव-वृत्तमरिचयात्मकम्। वैष्णवमतावलम्बिना कविकर्णपूरेण वैष्णव सम्प्रदायस्य सुरम्यं मनोज्ञं च चित्रणं कृतम्। नाटकस्यास्यान्वर्थता यथा -[2]

"आह्लादयन्नखिल जगज्जनानां प्रेमामृतस्यन्दसुधीमप्रादः।

उल्लासयन्कौमुदमुज्जिहीते चन्द्रश्च विश्वम्भर चन्द्रमाश्च।"

नाटकस्यान्ते अद्वैतचैतन्ययोरैक्यं समायोजितम्। यथा -[3]

"अद्वैतचैतन्यदृढोपगूहने न कोऽपि किंचित्परिचेतुमीश्वरः।

चैतन्यमद्वैतमितीक्षते जनोऽद्वैतं च चैतन्यमितीक्षते क्षणम्॥"

इत्थं नाटकमिदमपि दर्शनस्य गूढान् सिद्धान्तान् व्याकरोति। दार्शनिकनाटकपरम्परायां च स्वकीयं महत्त्वं बिभर्ति।

वादिचन्द्रसूरेश्चतुराङ्कोपेतं ज्ञानसूर्योदयनाटकं प्रतीकात्मकशैल्यां दिगम्बरजैनदर्शनसिद्धान्तं पोषयति। श्वेताम्बरसिद्धान्तमालोच्य कविना तत्र दिगम्बरवादस्य स्थापना विहिता। शैली वास्य प्रबोधचन्द्रोदयानुकृतिरेव।

अस्यामेव दार्शनिकसिद्धान्तप्रतिपादनपरम्परायां भूदेवशुक्लस्य "धर्मविजयम्" शैवागम प्रतिपादकम्। अत्र प्रबोधचन्द्रोदयस्याद्वैतस्थाने शैवागमः समर्थितः। यवनसाम्राज्यकालिकेन भूदेवशुक्लेन धार्मिकीव्यवस्थापतनव्याजेन शैवमतमनुमोदितं तत्र।

कृष्णदत्तमैथिलमहाभागस्य "पुरञ्जनचरितम्" भागवतस्य पुरञ्जनो-पाख्यानात्मकं नाटकमप्यस्यां श्रेण्यां गण्यते। अत्र नवधा भक्तिरीश्वरसायुज्याय-परिकल्पिता। सामान्यरूपेणैव तत्र दर्शनविषयप्रतिपादनं दृश्यते।

अष्टादशशताब्द्याः पूर्वार्धे आनन्दरायमखीविरचितं "विद्यापरिणयाख्यं"

---

1. तत्रैव, 1.93
2. चैतन्यचन्द्रोदय, 4.5
3. तत्रैव, 10.8

नाटकं शैवागमधर्मदर्शनप्रतिपादकम् । यस्मिन्नाटके शिवभक्तिर्मोक्षाय कल्पिता । तत्रैव चार्वाक्-सौगत-अद्वैतवेदान्त-सोमसिद्धान्तादीनामपि प्रतिपादनं दृश्यते ।

दर्शनविषयाश्रितं नाटकं "अमृतोदयम्" मैथिलगोकुलनाथस्य दर्शनक्षेत्रे लब्धख्यातिरस्ति । पञ्चाङ्कोपेतस्यास्य नाटकस्य प्रस्तावना "साधना चतुष्टयसम्पत्तिः" इति पदेनाभिधीयते । प्रथमोऽङ्कः" श्रवणसम्पत्तिः" द्वितीयो "मननसम्पत्तिः" तृतीयश्च "निदिध्यासनधर्मसम्पत्" चतुर्थः "आत्म-दर्शनं" पञ्चमश्च "अपवर्गप्रतिष्ठा" इति पदेनाभिधीयते । मोक्षाधिकारिणे साधनचतुष्टयसम्पत्तिरपरिहार्यत्वेन स्वीक्रियते । "नित्यानित्यवस्तुविवेकेहा-मुत्रफलभोगविरागः शमदमादिसाधनसम्पन्मुमुक्षुत्वं चेति साधनचतुष्टयंप्रोक्तम् ।

अमृतोदयस्य प्रस्तावनायां "प्रसरति विषयेषु[1]....." इत्यादिना नित्यानित्यवस्तुविवेकं प्रोक्तम् ।

"नलिप्सेराहुमाजारपीतोच्छिष्टां सुधादधि"[2] अनेन स्वर्गरूपफलं प्रति वैराग्यमुक्तम् । शमदमाद्यस्तु व्यक्तैव । "श्रुतिवर्णितमस्याः रामणीयकं क्षणमनुभूय...[3]" इत्यादिषु च मुमुक्षुत्वं स्पष्टं भवति । एवं प्रस्तावना "साधनाचतुष्टयसम्पत्ति-रित्यन्वर्थकता एव । नाटकेऽस्मिन् बौद्ध-जैन-मीमांसा-सांख्य-योगादीनां दर्शनसिद्धान्तानामपि सम्यगालोचना अस्ति । अतो नाटकमिदं पूर्णरूपेण दार्शनिकनाटकपदं भजते इति निश्चप्रचम् ।

एतदतिरिक्तं देवकवेः 'विद्यापरिणयस्य' "मल्लारीआराध्यस्य" "शिवलिंगसूर्योदयस्य" शंकरदीक्षितस्य च "प्रद्युम्नविजयस्य" गणनाऽपि दर्शननाटकेषु कर्तुं शक्यते । येषु सामान्यविशेषरूपेण दर्शनसिद्धान्तविवेचनं दृश्यते एव । पश्चान्त्वियं परम्परा लुप्तप्राया एव । तथापि शैल्यामस्यां लिखितेषु "प्रबोध-चन्द्रोदयम्" "मोहराजपराजयम्" "चैतन्यचन्द्रोदयम्" "अमृतोदयम्" प्रभृतीनां नाटकानां स्वकीयं विशिष्टं महत्त्वमस्त्येव । इति ।

---

1. अमृतोदयम्, 1.6
2. तत्रैव, 1.18
3. अमृतोदयम् - प्रथमांक, पृ.33

## ख) प्रबोधचन्द्रोदयस्य दार्शनिकसिद्धान्ताः -

प्रतीकनाटकपरम्परायां दार्शनिकसिद्धान्तानधिकृत्य विरचितेषु नाटकेषु प्रबोधचन्द्रोदयं मूर्धन्यतममिति नास्ति संशयलेशोऽपि । दर्शनतत्त्ववेदिना श्रीकृष्णमिश्रेण विरचितेयं नाट्यकृतिर्यत्र नाट्यशास्त्रदृष्ट्या पूर्णतामवगाहते तत्रैवास्या दार्शनिकं महत्त्वमप्यतिशेते । दार्शनिकसिद्धान्तानां यादृक् रम्यं चित्रणं कविना कृतं नैव तादृगन्यत्रोपलभ्यते । नाटकमिदमेकतो दार्शनिकमनोवैज्ञानिकपक्षान् प्रस्तौति, अपरतश्चाध्यात्मिकभावसम्पत्तिमपि प्रथयति । नाटके लोकायत-सौगतार्हतादि नास्तिकदर्शनानां, यज्ञविद्या-मीमांसा-तर्कविद्याद्यास्तिकदर्शनानां च प्रतिपादनमतीव साफल्यमलभत् । नाटके कविना केचिच्चार्वाकादिमतप्रतिपादकाः कापालिकादयः स्वालोचनाविषयीकृताः केचिच्च वैष्णवदर्शनपोषका विवेकादयः समर्थिताः । इत्थं प्रतिपादितं धर्मदर्शनं द्विधा विभक्तुं शक्यते ।

1) आलोच्य धर्म-दर्शनम् ।

2) स्वाभिमतधर्म-दर्शनम् ।

### 1. आलोच्यधर्मदर्शनम् -

यथा प्रागेवोक्तं यन्नाटकेऽस्मिन् नास्तिकास्तिकयोरुभयोरेव दर्शनयोः सिद्धान्ता विवेचिताः सन्ति । तेषु केचन् सिद्धान्ताः पात्रविशेषेन प्रतिपाद्यन्ते निद्यन्ते वान्येना । आलोच्यधर्मदर्शनेषु-लोकायत-बुद्धागम-दिगम्बर-सोमसिद्धान्ता-यज्ञ विद्या-मीमांसा (शारीरिक-पूर्वमीमांसा वा) तर्क-विद्या च ।

### (1) लोकायतम् -

लोकायतेन चार्वाकदर्शनं गृह्यते । स्वचारुत्वाभिर्भाोई तच्चार्वाक इति लोकेष्वायतत्वादनुरञ्जनत्वाच्च लोकस्य लोकायतमिति पदेन व्यवह्रियते ।

प्रबोधचन्द्रोदये कविना चार्वाकपात्रेण बृहस्पतेः लोकायतसिद्धान्ताः यथोक्तदिशा अक्षरशः एव प्रतिपादिताः । यथा -[1] दण्डनीतिरेव विद्या । अत्रैव वार्तान्तर्भवति । धूर्तप्रलापस्त्रयी ।

---

1. प्रबोधचन्द्रोदयः, 2.19

"स्वर्गः कर्तृक्रियाद्रव्यविनाशे यदि यज्वनाम् ।
ततो दावाग्निदग्धानां फलं स्याद्भूरिभूरुहाम् ।।"[1]

अपि च -

"निहतस्य पशोर्यज्ञे स्वर्गप्राप्तिर्यदीष्यते ।
स्वपिता यजमानेन तत्र कस्मान्न हन्यते ।।"

तथा च[2] -

"मृतानामपि जन्तूनां श्राद्धं चेत्तृप्तिकारणम् ।
निर्वाणस्य प्रदीपस्य स्नेहः संवर्धयेच्छिखाम् ।।"

एवमेव आचार्यबृहस्पतिनाप्येव श्लोकोऽयमुद्धृतः[3]-

"अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम् ।
प्रज्ञापौरुषहीनानां जीविकेति बृहस्पतिः ।।"

नाटके चार्वाको महामोहस्य गुरुरस्ति । द्वितीये अङ्के महामोहश्चार्वाकं प्रशंसति । यथा - सर्वथा लोकायतमेव शास्त्रं यत्र प्रत्यक्षमेव प्रमाणम्, पृथिव्यप्तेजोवायवस्तत्त्वानि, अर्थकामौ पुरुषार्थौ भूतान्येव चेतयन्ते । नास्ति परलोकः । मृत्युरेवापवर्गः । तदेतदस्मदभिप्रायानुबन्धिना वाचस्पतिना प्रणीय चार्वाकाय समर्पितम् ।[4] तथा च -

"आत्माऽस्ति देहव्यतिरिक्तमूर्तिर्भोक्ता स लोकान्तरितः फलानाम् ।
आशेयमाकाशतरोः प्रसूनात्प्रथीयसः स्वादुफलप्रसूतौ ।।"

"परावञ्चनायन्तनषष्ठकालाशनप्रभृतिक्रियास्तु धूर्तानामाजीविकैव ।
सुखोपभोगायतनं शरीरोऽयम् ।[5]

"त्याज्यं सुखं विषयसङ्गमजन्मपुंसां
दुःखोपसृष्टमिति मूर्खविचारणैषा ।

---

1. प्रबोधचन्द्रोदयः, 2.20
2. तत्रैव, 2.21
3. तत्रैव, 2.26
4. तत्रैव, पृ.76-77
5. तत्रैव, 2.26

व्रीहीन् जहाति सितोत्तमतण्डुलाढ्यान्
को नाम भोस्तुषकणोपहितान्हितार्थी ।।"[1]

पूर्वोक्तरीत्या श्रीकृष्णमिश्रेण बृहस्पतेः "यावज्जीवेत् सुखं जीवेत्" सिद्धान्त एवाक्षरशोऽनुमोदितः ।

नाटके चार्वाको महामोहस्य कलेश्च सहचरत्वेन चित्रितः । महामोहः "अयि कले, भद्रमव्याहतम्" इत्यादिना चार्वाकमेव कलिरूपेणानुसन्धाति । कलेः साहचर्याद् अज्ञानाधर्मयोःसाधनस्वरूप एव चार्वाकः । इत्थं संक्षेपेणोद्धृतोऽपि चार्वाकः कवेरालोचना विषयतामेवगत इति निश्चितम् ।

§2§ बुद्धागमः - बौद्धमतानुयायी कश्चिद् भिक्षुः रङ्गमञ्चमागत्य बौद्धमतं परिचाययति यथा -

"सर्वे क्षणक्षयिण एव निरात्मकाश्च, यत्रार्पिता बहिरिव प्रतिभान्ति भावाः।
सैवाधुना विगलिताखिलवासनत्वाद्धीसन्ततिः स्फुरति निर्विषयोपरागा ।।"

अयमाशयो यद् यावत् सांसारिकवासनाभिःक्षणभङ्गुराः भावाः धीसन्ततावारोपिताः सन्तः प्रतिभासन्ते तावदेवबन्धः, सांसारिकवासनोच्छेदे विषयसम्बन्धरहिताशुद्धाधीःसन्ततिः स्फुरति सैव निर्वाणावस्था । सौगत धर्मे सौख्यं मोक्षश्च । नास्त्यात्मा स्थायी इति । उपर्युक्तधर्मदर्शने ये बौद्धसिद्धान्ता वर्णितास्तेषु विज्ञानवादसिद्धान्तो मिश्रेण विशेषतो गर्हितो बौद्धमतं च निराकृतम्। यथा प्रबोधचन्द्रे क्षपणकः[2] - "भण तावत् क्षणविनाशिना त्वया कस्य कृते इदं व्रतं धार्यते" । तथा च - "अरे मूर्ख, कस्मिन्नपि मन्वन्तरे कोऽपि मुक्तो भविष्यति । ततस्ते साम्प्रतं नष्टस्य कीदृशमुपकारं करिष्यति ।"

कविना नाटके सौगतधर्मः स्वालोचनाविषयी एवं कृतः प्रथमं तावद् भिक्षु-क्षपणकयोः संवादेषु तयोर्मतयोरालोचना सुस्पष्टैव । पुनश्च बौद्धमतप्रतिपादकं कश्चिद्क्षपणकं दृष्ट्वैव सत्प्रक्षमातिनी करुणा बिभेति । यथा - "सखि क एष तरुणतालतरुप्रलम्बो लम्बमानकषायपिशङ्गचीवरो मुण्डितसचूडमुण्डपिण्ड इत एव आगच्छति बौद्धभिक्षुरेतादृक्स्वरूपवर्णने तं प्रति कवेरुपेक्षा सुस्पष्टैव ।

---

1. प्रबोधचन्द्रोदयम्, 3.8
2. तत्रैव, पृ. 124-125

§3§ जैनमतम् -

क्षपणकाभिधानं पात्रं नाटकस्य तृतीयाङ्के जैनमतं परिचाययति । तदनुसारं जैनमते "अर्हन्" इति ईश्वरसंज्ञा । एषजिनवरभाषितः सिद्धान्तः परमानन्दप्रदाता मोक्षस्वरूपश्च । नवद्वारपुरीपुद्गले §शरीरे§ आत्मा दीप्त्वत्प्रकाशते अयं च सहजनिर्मलः कायिकमलेनलिप्तः । न हि तस्य जलैः शुद्धिरपेक्ष्यते । श्लेष्मादिपूर्णे शरीरे सकलजलैरपि कथमपि शुद्धिर्नसंभवति-मलसंभृतत्वात् । सहजविमलस्वभाव आत्मा ऋषिपरिचरणैर्ज्ञातव्यः ।[1]

अनेनप्रकारेण क्षपणकेन आत्मनः स्वरूपविवेचनं विशेषतः कृतम् । आत्म-सिद्धान्ताश्रित एव जैनसिद्धान्तः । श्रीकृष्णमिश्रेण जैनमतस्यायमात्मसिद्धान्त एव आलोचितः । सौगतमतानुयायी भिक्षुरात्मानं निन्दयन् एवं वदति -[2]

"ज्ञातुं वपुः परिमितः क्षमते त्रिलोकीं
जीवः कथं कथय संगतिमन्तरेण ।
शक्नोति कुम्भनिहितः सुशिखोऽपिदीपो
भावान्प्रकाशयितुमप्युदरे गृहस्य ।।"

अयं भावः - यथाघटाभ्यन्तरे निहितः सुशिखोऽपि दीपो गृहाभ्यन्तर-गतपदार्थसन्निकर्षालभमानस्तान् प्रकाशयितुमक्षमः तथैव जीवो विज्ञानरूपः सन्नपि वपुःमात्रपरिमाणतया दूरस्थैः पदार्थैः सह सन्निकर्षमनाप्नुवन् तान् ज्ञातुं न क्षमते । अतः नवद्वारपुरीमध्ये आत्मा प्रति भासते" कथमिदं सत्यमसत्यमेव ।

एतदतिरिक्तं भिक्षुस्तं "मलपङ्कधरः पिशाचः" शान्तिःकरुणा च "राक्षसः" "पिशाच" इत्यादिवचनैः सम्बोधयन्ति । अत अनेन तम्प्रति कवेरवज्ञता एवद्योत्यते । तस्य च निकृष्टकार्यकलापवर्णयन् कविः जिनवरसिद्धान्तमपिन्यक्करोत्येव ।

§4§ सोम सिद्धान्तः -

सोमसिद्धान्ती कापालिकस्तृतीये अङ्के कापालिकव्रतधारणार्थं

---

1. प्रबोधचन्द्रोदयः, पृ. 117-118
2. तत्रैव, 3.11

लोकान् प्रेरयति । कापालिकमतानुसारं समग्रसांसारिकपदार्थजातमीश्वरात्तथैवाभिन्नम् यथा मुद्रिकाकङ्कणादिभेदेऽपि न तन्मूलं भिद्यते सुवर्णम् । यथाह कापालिकः[1] -

नरास्थिमालाकृतचारुभूषणः, श्मशानवासी नृकपालभोजनः
पश्यामि योगाञ्जनशुद्धचक्षुषा, जगन्मिथो भिन्नमभिन्नमीश्वरात् ।

अपि च[2] -

"मस्तिष्कान्त्रवसाभिपूरितमहामांसाहुतीर्जुह्वतां
वह्नौ ब्रह्मकपालकल्पितसुरापानेन नः पारणा ।
सद्यःकृत्तकठोरकण्ठविगलत्कीलालधारोज्ज्वले-
रर्च्यो नः पुरुषोपहारबलिभिर्देवो महाभैरवः ।।"

एवं सोमसिद्धान्तं प्रतिपादयन् कापालिको धर्मस्यास्य महिमानमित्थं व्यनक्ति[3] -

"हरिहरसुरज्येष्ठश्रेष्ठान्सुरानहमाहरे
वियति वहतां नक्षत्राणां रुणध्मि गतीरपि ।
सनगनगरीमम्भःपूर्णां विधाय महीमिमां
कलय सकलं भूयस्तोयं क्षणेन पिबामि तत् ।।"

मोक्षस्वरूपविषये कापालिकस्य कथनमिदमस्ति यथा[4] -

"दृष्टं क्वापि सुखं विना न विषयैरानन्दबोधोज्झिता
जीवस्य स्थितिरेव मुक्तिरुपलावस्थाकथं प्रार्थ्यते ।
पार्वत्याः प्रतिरूपया दयितया सानन्दमालिङ्गितो
मुक्तः क्रीडति चन्द्रचूडवपुरित्यूचे मृडानीपतिः ।।"

एतदनुसारं साधकः शिवरूपः, तस्य पार्वतीरूपभार्ययाऽऽलिङ्गितस्य सङ्गमजन्यानन्दानुभव एव मोक्ष इति ।

पूर्वोक्तकापालिकसिद्धान्तः कविना बौद्धजैनमुखेन गर्हितः । सिद्धान्तवर्णने बीभत्सरसपरिपाक एव प्रथमं सहृदयमुद्वेजयति । क्षपणको भैरवीक्रियां

---

1. प्रबोधचन्द्रोदय:, 3.12
2. तत्रैव, 3.13
3. प्रबोधचन्द्रोदयः, 3.14
4. तत्रैव, 3.16

"ऐन्द्रजालिकविद्या" इति कथ्यते । पश्चाच्च राजसीश्रद्धायाः विलासपूर्णकृत्यैरपि मतमिदं स्वकीयव्यभिचारमेवप्रस्तौति । इत्थं निरस्तमेव मतमिदं कविना इति निश्चीयते ।

§4§ यज्ञविद्या -

यज्ञविद्या कविना ब्राह्मणोक्तयज्ञक्रियाऽभिप्रेता । नाटके अतिसंक्षेपेणास्या विद्यायाः परिचयउपलभ्यते । पुरुषोपनिषद्संवादे उपनिषद् यज्ञविद्यां परिचाययति। पुरुषस्य "क्व भवत्या एते दिवसा नीताः" इति पृष्टे उपनिषदुत्तरयति यथा -[1]

"कृष्णाजिनाग्निसमिदाज्यजुहूस्रुवादि
पात्रैस्तथेष्टिपशुसोमसुतैर्मखैश्च ।
दृष्टा मया परिवृताखिलकर्मकाण्ड-
व्यादिष्टपद्धतिरथाऽवनि यज्ञविद्या ।।"

अनेन यज्ञविद्या परिचीयते । तया स्वसिद्धान्ता निरूप्यन्ते यथा-[2]
"पुमानकर्ता कथमीश्वरो भवेत्
क्रिया भवोच्छेदकरी न वस्तुधीः
कुर्वन्क्रिया एव नरो भवच्छिदः
शतं समाः शान्तमना जिजीविषेत ।।"

अभिप्रायो ह्यस्य यत् कर्तृत्वशून्यः पुरुषो नैवेश्वरः । §उपनिषद्§ मते ईश्वरत्वं कर्तृत्वाद्युपाधिविशिष्टम् । अतः कर्तृत्वाद्यभावे कथमपि नेश्वरत्वसिद्धिरित्यर्थः । परमार्थसद्ब्रह्मज्ञानं न भवोच्छेदहेतुरपितुज्योतिष्टोमादिरूपा क्रिया संसारनिवर्तिका । "अपामसोममृता अभूम" इत्यादि श्रुतेः । अतः जीवो भवच्छिदक्रियाकुर्वन् समाहितचेतः सन् शतं वर्षाणि यावज्जिजीविषेत् । तथा च श्रूयते "कुर्वन्नेवेह कर्माणिजिजीविषेच्छतं समाः ।" इति । अनेन ईश्वर एव कर्ता भोक्ता चास्ति ।

उपर्युक्तयज्ञविद्यासिद्धान्तं प्रति विवेकस्य - "धूमान्धकारश्यामलित-

---

1· प्रबोधचन्द्रोदय 6·13

2· तत्रैव, 6·15

3· तत्रैव, पृ·255

दृशोदुष्प्रज्ञत्वं यज्ञविद्यायाः येनैवं कुतर्कोपहताः" उक्तोऽयं तन्मतं निरस्यति । अपि च -

"अयं स्वभावादचलं वलाच्चलत्यचेतनं चुम्बकसन्निधाविव ।
तनोति विश्वेक्षितुरीक्षितेरिता जगन्ति मायेश्वरतेयमीशितुः ।।"[2]

अर्थात् वस्तुत ईश्वरेक्षणप्रेरितमायाया एव सृष्टिकर्तृत्वं न त्वीश्वरस्येति। यज्ञविद्या अज्ञानजातं यागादिकर्मभिरन्धतमिस्रमन्धकारेणापनिनीषति । परं यथा तमस्तमोऽपनेतुमसमर्थस्तथैव क्रिया-अज्ञान-प्रभवं जगन्नाशयितुमशक्ता । ज्ञानमेव निर्वर्तकं केवलमज्ञानस्य । अतः यज्ञविद्यामतं निरर्थकमेव ।

§6§ मीमांसा -

उपनिषद्मुखादेव मीमांसायाः परिचयं प्राप्यते । मीमांसया कविना नाटके पूर्वमीमांसा गृहीता । नाटकानुसारं प्रभाकरकुमारिलभट्टौ मीमांसा-सिद्धान्तप्रवर्तकौ । प्रभाकरगुरोर्मते पुरुष एव कर्ता भोक्ता च तद्व्यतिरिक्तमीश्वरो नैवास्ति । कुमारिलभट्टोऽपि मीमांसामतानुयायी परं स उपनिषदोक्तम-कर्तारमभोक्तारमीश्वरमप्यनुमन्यते न चासावीश्वरः कर्मसूपयुज्यते । तद् विषये कुमारिलभट्टस्योक्तिर्यथा -

"एकः पश्यति चेष्टिता निजगतामन्यस्तुमोहान्धधी-
रेकः कर्मफलान्यवाञ्छति ददात्यन्यस्तु तान्यर्थिने ।
एकः कर्मसु शिष्यते तनुभृता शास्तैव देवोऽपरो
निःसङ्गपुरुषः क्रियासु स कथं कर्तेति सम्भाव्यते ।"

कुमारिलभट्टस्योपर्युक्तं मतं विवेकेनापि समर्थितम् "द्वौ तौ सुपर्णौ सयुजौ...." इत्यादिना । परं तत्र ज्ञानान्मुक्तिर्भवति पुरुषश्च कर्तृत्वभोक्तृत्वगुणरहितः" इत्युक्त्वा मीमांसका अपि खण्डिताः ।

§7§ तर्कविद्या -

नाटकोक्ततर्कविद्यायां कविना वैशेषिक-न्याय-सांख्यधर्म दर्शनाणां

---

1. प्रबोधचन्द्रोदयः, 6.16
2. तत्रैव, 6.19

समावेशो विहित: । "ततोमया बहुभि: शिष्यैरुपास्यमानास्तर्कविद्या अवलोकिता:" तास् -

"काचिद् द्वित्वविशेषकल्पनपरा न्यायै: परातन्वती

वादं सच्छलजातिनिग्रहमयैर्जल्पं वितण्डामपि ।

अन्या तु प्रकृतेर्विभज्य पुरुषस्योदाहरन्ती भिदां

तत्त्वानां गणनापरा महदहंकारादिसर्गक्रमै: ।।" इति

उपनिषद् वचनेषु कविना एकत्रैव सांख्य न्याय-वैशेषिक रूप-त्रिदर्शनानि परि-कीर्तितानि । यथा - "द्वित्वविशेषकल्पनापरा" अनेन वैशेषिकं द्योत्यते । द्वित्वस्य-अयमेक:, अयमेक: इतीमौद्वौ" एतादृशापेक्षाबुद्धि जन्यस्य द्वित्वस्य विशेषस्य- "अन्त्यो नित्यद्रव्यवृत्ति:" इति लक्षितस्य विशेषाख्य पञ्चमपदार्थस्य कल्पने सक्ता वैशेषिकविद्या ।

"न्यायै: वादं सच्छलजातिग्रहमयैर्जल्पवितण्डामपि तन्वतीपरा अनेन न्याय विद्या ज्ञायते । गौतमप्रणीता न्याय विद्या अर्थान्तरेण प्रयुक्त शब्दस्यार्थान्तरवर्णन सह जाति निग्रहमयै: पञ्चावयवानुमानवाक्यै: वाद-जल्प-वितण्डां च विस्तारयन्ती न्यायविद्या ।

"प्रकृतेर्विभज्यपुरुषस्योदाहरन्ती" अनेन सांख्यनिर्देश: । सांख्य विद्यामूल-प्रकृते: पुरुषस्य भेदं विभज्य प्रतिपादयन्ती महदहंकारादिसृष्टितत्त्वगणनापरा आसीत्।

तर्कविद्यानुसारं परमाणुभ्यो जगदुत्पद्यते । घटं प्रति कुलालवदीश्वर: कर्तृत्वा जगत्प्रतिनिमित्तकारणमात्रम् । सांख्यदिशा च प्रधानाद्विश्वोत्पत्ति: ।

उपर्युक्ततर्क विद्यामतानि नाटके विवेकमुखेन कविना एवं निरस्तानि । यथा[2] - "अहो दुर्मतयस्तर्कविद्या एतदपि न जानन्ति । सर्वं प्रमेयजातं घटादि-वत्कार्यमिति परमाणुप्रधानोपादानकारणमप्यपेक्षणीयमेवेति । तथाहि -

"अभ्य:शीतकरान्तरिक्षनगरस्वप्नेन्द्रजालादिवत्

कार्यं मेयमसत्यमेतदुदयध्वंसादियुक्तं जगत् ।

---

1. प्रबोधचन्द्रोदय- 6.21

2. प्रबोधचन्द्रोदय:, 6.22

शुक्तौ रूप्यमिव स्रजीव भुजगः स्वात्मावबोधेहरा-

वज्ञाते प्रभवत्यथास्तमयते तत्त्वावबोधोदयात् ।।"

अभिसन्धिः - एतज्जगत् जडत्वेनास्वप्रकाशतया मेयम् (ज्ञानगोचरम्)

अतः कार्यम् । उत्पत्तिविनाशशीलम् । यथाजलचन्द्रादयो भासन्त एव न ते वास्तवाः तथैवेदं जगदपि न वास्तवमिति । स्वप्रकाशपरब्रह्मणि अज्ञाते शुक्तौ रजत इव मालायां च सर्प इव भ्रमउत्पद्यते । तत्त्वावबोधात् सर्वं अस्तमेति । यथा हि मालाऽज्ञाने शुक्त्यज्ञाने च सर्परजते उत्पद्येते, मालाशुक्त्योश्च ज्ञानाद्भ्यं विलीयेते, तथैव ब्रह्मणोऽज्ञाने जगद् विवर्तते आत्मज्ञानाच्च विलीयते"।

निर्विकारं, प्रकाशस्वस्वरूपं, नित्यप्रकाशरूपं ब्रह्म आच्छादितमेघपंक्ति-भिरपि स्वच्छं पवित्रमेव भवति । विकारशङ्कातु मुग्धवधूविकल्पविलसितमिव । अतः विकारशङ्का हेया इत्यर्थः । एवं तर्कविद्या सिद्धान्ता अपि नैव कवेरसाध्यं साधयन्ति कवेरनभीष्टैव च ।

पूर्वोक्तरीत्या श्री कृष्णमिश्रेण संक्षेपतः भारतस्य धर्मदर्शनसिद्धान्ता आलोचना विषयीकृताः । आलोचनेयं तत्कालिकीं धार्मिकीं सामाजिकीं च स्थितिं पुरतोऽवस्थापयति । पात्राणां गर्वोक्तिभिर्वादविवादैश्च नैव नाट्यनियमाः कुत्रचिदप्युल्लङ्घिताः प्रसंगानुकूलमेव सिद्धान्तालोचना प्रतिष्ठापना च नाटकस्य महत्त्वं द्विगुणयति । इति ।

2. स्वाभिमत-धर्म-दर्शनम् -

श्रीकृष्णमिश्रेण नाटके अद्वैतदर्शनं विष्णुभक्त्याश्च समन्वयात्मकं रूपं प्रतिष्ठापितम् । पूर्ववर्तीभिरप्यद्वैतवेदान्तं सम्यक् निरूपितमासीत् । अतस्तत्प्रभावेणैव कविना ब्रह्म-जीव-माया-जगदादितत्त्वानां प्रतिपादनमद्वैतदिशा कृतम् । स्वाभिमतधर्मदर्शनेषु अद्वैतदर्शनम्, विष्णुभक्तिः, वैयासिकी सरस्वती-उपनिषद्गता वेदान्तो मुख्यदर्शनसिद्धान्ताः सन्ति ।

(1) अद्वैतदर्शनम् - अद्वैत दर्शनं कवेरभिप्रेतम् । ब्रह्म-जीवादितत्त्वानां वर्णनमद्वैतदर्शनरीत्यैवोपलभ्यते । अद्वैतदर्शनसम्मताः सिद्धान्ता एव कवेर्मान्या इति दृश्यते ।

अद्वैतवेदान्तिन: "सर्वं खल्विदं ब्रह्म" इति उपनिषद्वचनानुसारं जगत्सत्तां ब्रह्मणि मन्यते । ब्रह्म एव जगन्मूलं सर्वव्यापकश्च । ब्रह्मैव सर्वशक्तिमान् सर्वव्यापक:--अभेद्यगोचरो--निराकारो निर्लेपश्च । प्रबोधचन्द्रोदयस्य निरीक्षणेन ज्ञायते यन्न केवलं ब्रह्मण: परं मायादीनामपि विवेचनं अद्वैतवेदान्तमनुकरोति । अत्र क्रमश: यथा -

(क) <u>ब्रह्म</u> - कविना ब्रह्म चिदानन्दमयं, निरञ्जनं-सहजानन्दसुन्दरस्वभावं, नित्यप्रकाशरूपं, प्रस्फुरत्-सकलत्रिभुवनप्रचारं निराकारञ्च कथितम् - यथा[1] - "चिरं चिदानन्दमयो निरञ्जनो जगत्प्रभु:" अपि च[2] नान्दीपाठे - "सान्द्रानन्दमुपास्महे तदमलं स्वात्मावबोध: मह:" इत्यत्रापि । माया सङ्गात् परमेश्वर: "पुमान्" इति कथ्यते ।

"स्वयमपि यतो मायासङ्गात्पुमानिति विश्रुत:"[3] इत्यादिषु । मायासङ्गात् ब्रह्मण: ज्योतिस्वरूपसत्ताऽपि भिन्नाप्रतीयते । स्वयं प्रकाश: परमेश्वरो मायासङ्गात् विकृतिं प्रापितोऽपि स्वस्वरूपान्न च्यवते यथा सहजश्वेत: स्फटिकमणिर्जपाकुसुमसन्निधानाद्रक्तोऽपि स्वश्वैत्यं न मुञ्चति, तद्वदेव ।[4] तथाप्येषा मायापरमेश्वरस्याधीरतां विधातुं भवति । निरञ्जनश्चासौ जगत्प्रभुरविद्यासम्बन्धेन स्वरूपाद् भ्रंशयित्वा बद्ध इव दीनतां प्राप्नोति । ब्रह्मण: कर्तृत्वाभासो मायासंसर्गात्तथैवावभासते यथा स्वभावादचलमपि लोहं चुम्बकसन्निधौ बलात् स्पन्दते । मायाया एव सृष्टिकर्तृत्वमीश्वरेक्षणप्रेरिताया न त्वीश्वरस्येति तत्त्वम् ।[5] "मायासंसर्गात् विकृतिरसंभाव्या" यथोक्तम्[6] - "शान्तं ज्योति: कथमनुदितानस्तनित्यप्रकाशम्" इत्यादिषु । तदेकशान्तमनन्तमजं तेजस्वरूपमेकमेव ब्रह्म सत्त्वरजस्तमो गुणतारतम्यादेव ब्रह्म-विष्णु-महेश इति अनेकधाप्रकल्प्यते उपास्यते च । परमेतत्तु नैव तात्त्विको भेद: । रजोगुणाधिक्याद्

---

1. प्रबोधचन्द्रोदय:, 1.24
2. तत्रैव, 1.1
3. तत्रैव, 1.25
4. तत्रैव, 1.25
5. तत्रैव, 6.16
6. तत्रैव, 6.23

ब्रह्मेति सत्त्वाधिक्याद् विष्णुरिति तमसाधिक्याच्च शिव इत्युच्यते । परं पर्यवसानन्तु तत्तन्मतानां तस्मिन्नेव परमात्मनि तथैव भवति यथा नानापथ-प्रस्थिता अपि नद्योऽन्ते समुन्द्रमेव प्रविशन्ति । यथोक्तम् -

"ज्योतिः शान्तमनन्तमद्वयमजं तत्तद्गुणोन्मीलनाद्

ब्रह्मेत्युच्युत इत्युमापतिरिति प्रस्तूयते नैकधा ।

तैस्तैरेव सदागमैः श्रुतिमुखैर्नानापथप्रस्थितै-

र्गम्योऽसौ जगदीश्वरो जलनिधिर्वारिप्रवाहैरिव ।।"[1]

"तमेव विद्वानतिमृत्युमेति नान्योऽस्ति पन्था भवमुक्तिहेतुः"[2] अनेन कविना श्रुतेः "तमेव विद्वानतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" वचनमिदमक्षरशोऽनुमोदितम् इत्थं कविना अद्वैतोक्त ब्रह्मसाक्षात्कार एव मुक्तिहेतुत्वेन कल्पित इति निःसंशयम् ।

(ग) जीवः - शांकराद्वैतवेदान्ते आत्मा अथवा जीवो ब्रह्माभिन्न एव । अविद्योपहितत्वाज्जीवात्मा ब्रह्मणः स्वपृथक् सत्तां स्वीकरोति । वस्तुतः ब्रह्मात्मनोरैक्यमेव । वेदान्तिनः स्वमतपुष्ट्यर्थं जीवब्रह्मैक्यपरिचायकं "तत्त्वमसि" महावाक्यमुपस्थापयन्ति । आत्माधिष्ठानभूतमिदं शरीरं पञ्चतत्त्वनिर्मितमेकान्ततो नश्वरम्, आत्मा च अजरोऽमरश्चैतन्यस्वरूपश्च । प्रबोधचन्द्रोदयेऽपि जीवात्मा ब्रह्मांशत्वेन स्वीकृतः ।अज्ञानोपहतोऽयमात्माऽऽत्मानं पृथक् मन्यते । अविद्यामयीं निद्रामुपेत्यायं पुरुषोऽपि लौकिकपुरुष इव व्यवहरन् विस्मृतस्वरूपो लौकिको भवति ।[3] अज्ञानमेव जन्ममरणादि भवचक्रनिमित्तं, तन्निवृत्तिश्चात्मस्वरूपावबोधादेव सम्भवा । अज्ञानमूलकं ससारतरुं समूलमुन्मूलयितुं तत्त्वज्ञानमपेक्ष्यते, अज्ञानस्य ज्ञानैकनिवर्त्यत्वात् । तच्च तत्त्वज्ञानमीश्वराराधनादेव सम्भवति - "ईश्वरचोदनाभिव्यक्ताद्धर्मादेव" इति कणादोक्तेः । ब्रह्मांश एवायमात्मा इति रहस्यस्योद्घाटनं कविना षष्ठाङ्के उपनिषत्पुरुषयोर्वार्तालापे मनोवैज्ञानिकरीत्या मनोज्ञं कृतम् ।[4] पुरुषः पृच्छति- "कथमहमात्मा पुरुष एव परमेश्वरः" तदा उपनिषत् तमुत्तरयति -

---

1. प्रबोधचन्द्रोदयः, 5.9
2. तत्रैव, 6.17
3. तत्रैव, 1.29
4. तत्रैव, 6.25

असौ त्वदन्यो न सनातनः पुमान्

भवान्न देवात्पुरुषोत्तमात्परः ।

स एष भिन्नस्त्वदनादिमायया

द्विधेव बिम्बं सलिले विवस्वतः ।"[1]

यथैकमपि सूर्यबिम्बं तरङ्गवशाद् द्विधाप्रतीयते । तथैव परमेश्वराद-
-भिन्नोऽपि जीवोऽनादिमायावशाद् भिन्न इव प्रतीयते । तत्त्वज्ञानमेव
भेदबुद्धिमपाकरोति । पदार्थानवज्ञानाद् वाक्यार्थो नावगम्यते । तत्त्वावबोधस्योपायः
कविना इत्थं प्रतिपादितः -

"एषोऽस्मीति विविच्य नेति पदतश्चत्तेनसार्धं कृते

तत्त्वानां विलये चिदात्मनि परिज्ञाते त्वमर्थे पुनः ।

श्रुत्वा तत्त्वमसीति बाधितभवध्वान्तं तदात्मप्रभं

शान्तं ज्योतिरनन्तमन्तरुदितानन्दः समुद्द्योतते ।।"

एवं कविना जीवस्य सत्ता अद्वैतानुमोदितैव प्रतिपादिता इति ज्ञायते ।

§ग§ माया - "पुंसः सङ्गमुज्झितस्य गृहिणी मायेति"[2] सम्भूतः
प्रथममहेश्वरस्य सङ्गान्मायायां मन इति विश्रुतस्तनूजः"[3] इत्यादिनाटकप्रसङ्गे-
ज्ञायते मायायाः स्वरूपम् । श्रीकृष्णमते मायाब्रह्मणः शक्तिरेव । यथा भ्रमरूपमपि
जगत् परमार्थः प्रतीयते । निसङ्ग पुरुषस्य गृहिणी माया । §असङ्गो ह्ययं
पुरुषः" इति श्रुति प्रमाणत्वात्§ पुरुषेणास्पृष्टापि माया चुम्बकपाषाणेनासंबद्धापि
यान्तं चुम्बकमनुगच्छन्ती लोहशलाकेव तदीक्षणमात्र कृतार्थतया मनोरूपतनयमसूतवती।
मनोरूपपुत्रादेवक्रमात् भूर्भुवस्वरादीन् लोकानजीजनत् ।[4] पश्चाच्चेयं माया स्वतनयमेव
परमेश्वरपदे निवेशयामास । मनश्च मातुरभिप्रायमासाद्य नितान्तैश्वरसानिध्यात्
प्राप्तैश्वररूपतां नवद्वारपुराणि रचयति यथा[5] -

---

1• प्रबोधचन्द्रोदयः, 6•27

2• तत्रैव, 1•19

3• तत्रैव, 1•17

4• तत्रैव, पृ•32

5• तत्रैव, 1•28

एकोऽपि बहुधा तेषु विच्छिद्यैव निवेशितः ।
स्ववेष्टिमयो तस्मिन्विदधाति मणाविव ।।[1]

अयं भावः- यथा विभिन्नपात्रावस्थापितजलेषु सूर्यस्य विभिन्न-प्रतिबिम्बानि भवन्ति तद्वत्तत्तद्देहेषु परमात्मनोऽप्येकस्यैव प्रवेशः" इति स्पष्टतया ज्ञायते । एवमेव यथाजपाद्युपाधिः स्वरक्तत्वादिकं धर्मं मणौ प्रक्षिपति तद्वत् मनः परमात्मनि स्वकर्तृत्व-भोक्तृत्व-सुखित्वदुःखित्वादिरूपं धर्मं प्रक्षिपति ।

§घ§ जगत् - श्रीकृष्णमिश्रो जगद् भ्रमरूपमन्यते । "ब्रह्मातिरिक्तं सर्वमसत्यम्" इति तस्य मतम् । ब्रह्मरूपवस्तुनि जगद्रूपावस्तु भ्रमः यथा मध्याह्नार्कमरीचिकासु पयःपूरस्य भ्रमः । मध्याह्नमरीचिका दर्शकस्य मरीचिकाविषयकमज्ञानं पयःपूराकारपरिणतिमासादयति, तदज्ञाननिवृत्तौ च पयःपूरभ्रान्तिरप्यपसरति एवं स्वयंप्रकाशमनन्तब्रह्मरूपवस्तुनि तदज्ञानजन्यमखिलचराचरप्रपञ्चरूपमवस्तु समवभासते किन्तु ब्रह्मरूपिणि वस्तुनि ज्ञाते जगद्रूपावस्तु भ्रान्तिर्निवर्तते ।

अतोऽज्ञानवशादेव जगदिदं सत्यवदवभासते असत्यमपि । पितृमातृबन्धुतनयादि प्रियजनेषु च प्रीतिं प्रकटयति मानवः । वस्तुतः समेषामेतेषां संयोगो वियोग एव पर्यवस्यति । यथामार्गे पथिका मिलन्ति तदनन्तरं च वियुज्यन्ते, नद्यां पतिताकाष्ठादयः पयःपूरेणोह्यमानाः परस्परं मिलन्ति स्वल्पेनैव कालेन पुनर्वियुज्यन्ते तथैव ।[2] एते पुत्रकलत्राद्यः पुंसां कमप्युपकारं न करिष्यन्ति, नैव कृतवन्तः, न कुर्वन्ति च । अत एते सुखाय न भविष्यन्ति, एते तु विरहे मर्मान्तकपीडामेव समुत्पादयन्ति ।[3] वस्तुतः ममतावासनानिबन्धनोऽयं व्यामोहः । लोकोऽयं सातिशयशोकपूर्णः सम्पत्तयश्चचपलाः, शरीरं हि विपद्गेहम्, अबला-सततमनर्थबहुला, महदपि धनं मरणकारणमेव । अनेन प्रकारेण सर्वमिदं जगज्जातं शून्यं व्यर्थमेव च ।[4]

---

1· प्रबोधचन्द्रोदयः, 1·1

2· तत्रैव, 5·25

3· तत्रैव, 5·17

4· तत्रैव, 5·24

239609

§ड·§ मोक्ष: -

"तेषां ब्रह्मभिदां विधाय विधिवत्प्राणान्तकं विध्नम् ।
प्रायश्चित्तमिदं मया पुनरसौ ब्रह्मैकतां नीयते ।।"[1]

"तत्त्वावबोधादेव निवृत्ति:"[2]

"ब्रह्मप्रविश्य भवनिर्वृत्तिमात्मनीनाम्"[3]

"श्रुत्वा तत्त्वमसीति वाधितभवध्वान्तं तदात्मप्रभम्"[4]

इत्यादिभिर्नाटकान्तरवर्तिभिर्विभिन्नपात्रोक्तिभि: कविना तत्त्वज्ञानादज्ञाननिवृत्तिरूपो मोक्षोऽभ्युपगत: । ब्रह्मरूपवस्तुनि जाते जगद्रूपावस्तु निवर्तते इति नाटकस्यादावेव संसूचितम् । पुनश्च नाटकस्य नामकरणमेव कवेर्मोक्षाभिप्रायद्योतकम् । प्रबोधरूप §ज्ञानरूप§ चन्द्रस्योदय एव परमं ज्ञानम् । प्रबोधोदये सति अज्ञानान्धकारविनष्टे मोक्षप्राप्तिरेव । विवेकोपनिषद्विद्यादि साहाय्येन कामक्रोधमोहादि-अज्ञानरूप-तत्त्वानि विजित्य प्रबोधमधिगच्छति पुमान् उपनिषद्देव्या: "तत्त्वमसि" रूपमहावाक्यार्थं ज्ञात्वा प्रबोधरूपज्ञानेसति पुरुष: "सोऽहं ब्रह्म" इत्यनुभवति[5] । तदा पुरुष:-

"सङ्गं न केनचिदुपेत्य किमप्यपृच्छन्
गच्छन्नतर्कितफलं विदिशं दिशं वा ।
शान्तो व्यपेत भयशोककषायमोह:
स्वायंभुवो मुनिरहं भवितास्मि सद्य: ।।" इत्यनुभवति ।

अवस्थेयमेव तस्य मोक्षावस्था । मोक्षायचाज्ञाननिवृत्ति: ज्ञानापेक्षा एवेति निश्चप्रचम् । कवेर्मोक्षमार्गोऽयमद्वैतवेदान्तोक्तमार्ग एव परं साधनामार्गे कविना भक्तेरपरिहार्यत्वमङ्गीकृतम् ।

---

1· प्रबोधचन्द्रोदय:, 1·31
2· तत्रैव, पृ·162
3· तत्रैव, 5·31
4· तत्रैव, 6·27
5· तत्रैव, 6·31

§2§ विष्णुभक्तिः - "अस्ति विष्णुभक्तिर्नाममहाप्रभावा योगिनी" सा तु कलिना विरलप्रभावा कृता तथापि तदनुगृहीयान्वयमालोकयितुमपि न प्रभवाम: तदत्रदेवेनावधातव्यमिति"[1] चार्वाकस्य महामोहं प्रति उक्तिरियं विष्णुभक्तेर्माहात्म्यं व्यञ्जयति । श्रद्धाशान्तिरन्विता विष्णुभक्तिः सिद्धेर्मूलं साधनम्" तस्या प्रभावात् प्रतिपक्षमपि विभेति । प्रबोधोदये कविना विष्णुभक्तेरपि अपरिहार्यत्वं विशेषतः स्वीकृतम् । कापालिकस्योक्तौ यथा[2] -

"मूलं देवी सिद्धये विष्णुभक्तिस्तां च श्रद्धानुव्रता सत्त्वकन्या ।

कामान्मुक्तस्तत्रधर्मोऽप्यभून्वेत् सिद्धं मन्ये तद्विवेकस्य कृत्यम् ।"

विष्णुभक्तिकृतसहाय: पुरुषः सारूप्यमधिगच्छति विवेकश्च महामोहादीन् शत्रून् विजयते । "विष्णुभक्तेः प्रासादात्किं नामदुष्करम्" इति कवेरुक्तिः नाटके तस्याः महत्त्वं व्यनक्ति: । साधनामार्गे तत्सहायं नितरामपेक्षणीयम् । ज्ञानोदये विष्णुभक्तिरेव मूलं कारणम् । नाटके पदे-पदे सैव विवेकस्य दु:साध्यं साधयति । तद्व्यतिरिक्तो विवेकोऽपि नि:सहाय्यैव । अत: साधनामार्गस्य परमोपकारिणी विष्णु भक्तिरिति सुनिश्चितम् ।

§3§ वैयासिकी सरस्वती - ज्ञानोदयस्य कृते मनसो नि:सङ्गत्वेन भाव्यम् । वीतरागो मन एव ज्ञानमर्जयितुं क्षमते । मनसि वैराग्योत्पत्तिः रूपकार्यमेव नाटके वैयासिकी सरस्वत्याः । नाटकस्य पञ्चमाङ्के विष्णुभक्तरादेशेन सन्तति-विनाशदु:खितस्य मनसः प्रबोधनाय तस्या उपस्थितिरेतदेवव्यनक्ति: । तस्या मते- "सिन्धोः फेनसमेतेवपुषि यत्पञ्चात्मके पञ्चताम् कोऽयं मोहः।"[3] नित्य--मनित्यवस्तुदर्शनो न पश्यति शोकावेगम् । यतः -[4]

"एकमेव सदाब्रह्मसत्यमन्यद्वि कल्पितं,

कोमोहस्तत्र कः शोकः एकत्वमनुपश्यतः ।।"

शोकावेगदूषितेमनसि स्नेह दोषएव यतोहि स्नेहः सर्वानर्थप्रभवः । ममतासंबन्धग्रन्थोऽयं व्यामोहः । यथाहि गृहकुक्कुटस्यमार्जारभक्षितस्य यादृशं दु:खं न तादृशं मूषकस्यमार्जार भक्षितस्य भवति ।[5] कुक्कुटे ममत्वमत्रहेतुर्दु:खस्य । मोहस्यैव विलसितमेतद्यत् स्वदेहोत्पन्नेऽपि यूकादौ ममत्वाभावात्तन्नि:सारणे

---

1. प्रबोधचन्द्रोदयः, पृ.85
2. तत्रैव, 3.26
3. तत्रैव, 5.14
4. तत्रैव, 5.15
5. तत्रैव, 5.20

ग्लानिमकुर्वन्तो जनाः पुत्रादीनां विषये ममत्वाभिमानादात्मानं परिपीडयन्ति।[1] अतः "असारे संसारे विरसपरिणामे तु विदुषां वियोगो वैराग्यं द्रढयति वितन्वञ्शमसुखम् ।"[2]

पदार्थानामनित्यता भावनमेव तावन्ममतोच्छेदस्य प्रथमोऽभ्युपायः । इह पुत्रमित्रकलत्रादीनां संगमं विद्युत्सम्पातसदृशं क्षणिकम् । निरुद्धमपि मनश्चिन्ता-परम्परया यदभिभूयते तच्चित्तविकार एव । तदपकर्तुं - "नित्यं स्मर जलदनील-मुदारहारकेयूर कुण्डलकिरीटधरं हरिं वा । ग्रीष्मे सुशीतमिव वा ह्रदमस्तशोकं ब्रह्म प्रविश्य भज निर्वृतिमात्मनीनाम्"[3] अयम्भावो यत्पूर्वं साकारोपासनया चित्तं शोधनीयं पश्चान्निराकारे मनः समाधेयं तत्रच स्वरूपावाप्तिलक्षणा शान्तिः संसाधनीया यथा कश्चित् सूर्यांशु संतप्तः ह्रदं प्रविश्य सुखमनुभवति । एवं निर्मलान्तःकरणे आत्मा तथैव प्रतिभाति यथा निर्मलादर्शे रविर्भाति मनसि-विनिवृत्ते सत्यात्माऽपि विषयसम्बन्धराहित्येन बन्धमुक्तः स्व-स्व रूपेण प्रकाशते।[4] अभिसन्धिरियं यन्मन एव मनुष्याणां कारणं बन्धमोक्षयोरतो मनसो विषयभूत-पुत्रकलत्रादिक्षणसंगमान् भूयोभूयो हृदिनिवेश्य सुखी भवेत् । असारे संसारे विदुषां वियोगो वैराग्यमुत्पादयन् शमसुखं द्रढयति । इति ।

एवं वैयासिकीसरस्वत्याः सकलायासो मनसि वैराग्योत्पादनमेव । कवेरभिप्रेता वैयासिकी सरस्वती महदुपकरोति तदुपदेशैरुद्विग्नमपि मनः वैराग्यंप्राप्य प्रबोधमधिगच्छति कवेरायासं च सफलयति ।

§4§ <u>उपनिषद्</u> - "विवेकोपनिषद्देव्यां प्रबोधचन्द्रेण भ्रात्रा समं जनयितव्या" कामस्य रतिं प्रत्युक्त्याऽनया, अपि च "शान्त्यादेरनुकूलनादुपनिषद्देव्या मया सङ्गमः" इति विवेकस्योक्त्या प्रतीयते यत्कवेः प्रबोधोदयरूपायासो विवेकेन सह उपनिषद्देवी संगमे एव सम्भवः । अतः नाट्यफलावाप्तौ कवेरभिप्रेत प्रबोधोदय-रूपमोक्षावाप्तौ वा उपनिषद्महत्त्वसातिशयं भजते । महामोहेपराभूते उपनिषद्

---

1. प्रबोधचन्द्रोदयः, 5·21
2. तत्रैव, 5·22
3. तत्रैव, 5·31
4. तत्रैव, 5·33

स्वनिर्वासनकाल व्यथां

श्रावयन् पुरुषाय निवेदयति यज्जगज्जीवादिकं ब्रह्मैव तत्रैव ब्रह्मणि च ते निलीयन्ते, तस्यैव ब्रह्मणो भासा सर्वमिदं भासते । तच्च निर्विकारं, प्रकाशस्वरूपं, नित्यप्रकाशं च । जगत्सृष्टावपि नैव तद्व्यभिचरति । जीवब्रह्मणोरैक्यमित्थं निरूपितं उपमयाऽनया-

द्वौ सुपर्णौ सयुजौ सखायौ,
समानवृक्षं परिषष्वजाते ।
एकस्तयोः पिप्पलमत्ति पक्व-
मन्यस्त्वनश्नन्नभिचाकशीति ।।[1]

आत्मा (जीवः, पुरुषो वा) परमात्मनः परो नास्ति ।

अनादि मायया एव पृथक् प्रतीयते । यथा सूर्यबिम्बं जले तरङ्गवशात् द्विधा भासते तद्वज्जीवोऽपि परमात्मनोऽभिन्नोऽपि मायावशाद् भिन्न इव भाति । यथोक्तम्[2] -

असौ त्वदन्यो न सनातनः पुमान्
भवान्न देवात्पुरुषोत्तमात्परः ।
स एष भिन्नस्त्वदनादिमायया
द्विधेव बिम्बं सलिले विवस्वतः ।।

एवमुपनिषद् पुरुषं तद्रूपमतीव सारल्येन परिचाययति । विदितात्मस्वरूप एव पुरुषः "तत्त्वमसि" महावाक्यार्थं (बोद्धुं) क्षमते । अत उपनिषद् कल्पना कवेकौशलं द्योतयति । उपनिषच्चात्र स्वाभिमतधर्मदर्शनप्रतीकवत् कवेराशयं साधयति ।

निष्कर्षतः कविना मोक्षप्रतिपादने विष्णुभक्तेः साहाय्यं नितरामपेक्षितम् । अद्वैतविष्णुभक्तिसमन्वितः साधनामार्गविशेषश्च प्रस्तुतः । साधनामार्गस्य निर्वहणं विष्णुभक्तेरादेशैरेव भवति । अद्वैताभिमतसिद्धान्तमनुसृत्य विष्णुभक्तिरादिष्टपथप्रदर्शनसमन्वितस्य साधनामार्गस्य वर्णनमाद्योपान्तं नाटकेऽवलोक्यते । येनान्ते प्रबोधोदयरूपफलप्राप्तिर्भवति ।

---

1. प्रबोधचन्द्रोदयः, 6.20
2. तत्रैव, 6.25

नाटकारम्भे विवेक पराजये कृतप्रयत्नाः काममोहादयो विष्णुभक्ति-प्रभावाद्भीता इव लक्ष्यन्ते । "आः प्रसिद्धमहाप्रभावा सा योगिनी दुरुच्छेद्या" इति महामोहस्यात्मगता चिन्तातांप्रति च तेषां भीतिं दर्शयति । विष्णुभक्त्या प्रदत्तोत्साहो विवेको मोहं प्रति युद्धाय प्रवर्तते । तदनुकम्पया चान्ते विजयं प्राप्नोति । मैत्रीमुदितादयश्चित्तशोधकवृत्तयः विष्णु भक्तेराज्ञया कृतभक्तहृदय-निवासा यैः मनोविकारा विनश्यन्ते आध्यात्मिकं कल्याणं च जायते । वैयासिकी सरस्वती तदाज्ञयैव सन्ततिदुःखदुःखितात्मघातोद्यतस्य मनसे वैराग्यो-पदेशं ददाति येनमनो निवृत्त्याभिमुखं भवति । प्रबोधोदयरूपफलावाप्तिश्च सुकरा भवति ।

"देव्या विष्णुभक्तेः प्रसादात्किं नामदुष्करम्" इति पुरुषस्य विष्णु-भक्तिं प्रति कृतज्ञता तस्याः महत्त्वं ज्ञापयति । अतः कवेर्ज्ञान भक्तेः समन्वयात्मकोऽयं मार्गो मुमुक्षूणां कृते परमुपयोगी इत्यत्रनकाऽपि विप्रतिपत्तिः । कवेरभिमतानि धर्मदर्शनानि मनोवैज्ञानिकीं सरणिमनुसृत्यातीव कौशलेन नाट्यस्य साध्यं पोषयन्ति इत्यत्र नैव संशयलेशोऽपि ।

= = = = = =

# चतुर्थोऽध्याय:

## प्रतिपादित दार्शनिक सिद्धान्तानां मूलदार्शनिक सिद्धान्तानां च

## तुलनात्मकाध्ययनम्

क§ सिद्धान्तानां मूलपरम्परा क्रमिकविकासश्च
वैदिकमथवा श्रौतदर्शनम्, ब्राह्मणदर्शनम्, आरण्यकदर्शनम्, उपनिषद् दर्शनम्

ख§ प्रतिपाद्यविषया:
1§ ब्रह्म-आत्मा च §2§ जीव: §3§ जगत् अथवा सृष्टि:, 4§ मोक्षस्वरूपम् ।

ग§ आस्तिकनास्तिकदर्शनयोरुद्देश्यम्

घ§ प्रबोधचन्द्रोदयोक्त दार्शनिक सिद्धान्तानां पर्यालोचनम् ।

= = = = = =

क) दार्शनिकसिद्धान्तानां मूल परम्परा क्रमिको विकासश्च -

(1) वैदिकं अथवा श्रौत दर्शनम् -

दर्शन साहित्यस्य अथवा दार्शनिक विचारधाराया उत्पत्तिस्तु सृष्ट्युत्पत्तिसहजातित्यवलोक्यते यतो हि आत्यन्तिकदु:खनिवृत्तिरेव दर्शनलक्ष्यं दु:खन्तु आसृष्टेरेव । अत भारतीयदर्शनोत्पत्ति दु:खानुभवकालादेवाभवदित्य- -नुमीयते । पश्चाच्च यथा दु:खनिवृत्ति:साधनेषु तारतम्यं तथैवदर्शनेष्वपि तारतम्यमवलोक्यते ।

विश्वसाहित्यस्यादिमे ग्रन्थे ऋग्वेदे द्वैत-अद्वैत-एकेश्वरवाद-प्रकृति- सृष्टिक्रम-आत्मा-ईश्वरादि विभिन्नदार्शनिकतत्वानि सामान्यविशेषरूपेण प्रतिपाद्यन्ते क्वचित्स्तोकेन क्वचिच्च विस्तरेणापि । सृष्टिमूलकारणत्वेन ऋग्वेदे एकत्राग्निरपरत्र सोम इतरत्र च हिरण्यगर्भ आदि श्रूयते ।[1] एवमेव "एकं सद्विप्रा बहुधा वदन्ति"[2] "पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम्"[3] इत्यादिषु एकेश्वरवाद उपपाद्यते । सृष्टिप्रक्रियाविषये "नासदीयसूक्त:"[4] पूर्णतया दार्शनिक एव । पुरुषादिति सूक्तात्तु[5] अद्वैतपरम्परैव पुष्यते । अथर्ववेदस्य 'स्कम्भो च्छिष्ट' सूक्तयो:[6] परमात्मनो व्यापकता सर्वाश्रयता च स्पष्टतया वर्णिता । तत्र स्कम्भात्मनोरैक्यं प्रतिपादितम्[7] -

---

1. ऋग्वेद; 10.81.2-4; 10.129.1-3; 10.121.1-10
2. तत्रैव, 1.164.46
3. तत्रैव, 10.90
4. तत्रैव, 10.129
5. तत्रैव, 10.90; 1.89
6. अथर्ववेद; 10.7.9, 11.9
7. अथर्ववेद:, 10.8.44

"अकामोधीरो अमृत: स्वयंभू, रसेन तृप्तो न कुतश्चनोन: ।
तमेव विद्वान न बिभाय मृत्योरात्मानं धीरमजरं युवानम् ।।"[1]

एवमेव "उच्छिष्ट" इति ब्रह्मत्वेन प्रतिपादित:-

"उच्छिष्टे नामरूपं चोच्छिष्ट लोक आहित: ।
उच्छिष्ट इन्द्राग्निश्च विश्वमन्त: समाहितम् ।।"

अत्र उच्छिष्ट एव जगत्कारणत्वेन गृहीत: ।

ब्राह्मणदर्शनम् - वैदिकवाङ्मये संहितानन्तरं ब्राह्मणग्रन्था आयान्ति । यज्ञविधानप्रतिपादकत्वान्नैव तत्र प्रत्यक्षतो दर्शनविषय: प्रतिपाद्यते । तथापि यत्र तत्र तत्त्वचिन्तनं प्राप्यतएव वेदव्याख्यानभूतत्वात् । कर्मकाण्डपद्धते: प्रतिष्ठापकत्वादत्र 'आत्मपुनर्जन्मापवर्गादिसिद्धान्तानां' व्याख्यानमस्ति ।

आरण्यक-दर्शनम् - आरण्यकेषु दार्शनिकी व्याख्या तद्रहस्यमीमांसा चास्ति । कर्मापेक्षया ज्ञानमार्गे कृतप्रयत्ना दृश्यन्ते आरण्यका: । तथापि सृष्टिविषये जीवोत्पत्तिविषये चापि यत्र तत्र वर्णनमुपलभ्यत एव ।[2] पाकजक्रियावर्णनं प्रत्यक्षादिप्रमाणनिरूपणं मृत्युभेदा: कारणादयश्च विस्तरेण तत्र वर्णिता: ।[3]

एवं दर्शनज्ञानपरम्परा आरण्यकेष्वप्यविच्छिन्नैव ।

उपनिषद्दर्शनम् - वैदिकवाङ्मये अन्तिमो भाग उपनिषद् वेदान्तो वा । वैदिकर्षिभिरत्राध्यात्मिकविद्यारहस्यविवेचनं विस्तरेण कृतमस्ति । भारतीय-तत्त्वज्ञानस्य मूलं तूपनिषत्सु एवास्ति । सर्वदर्शनसिद्धान्तानामुद्गम उपनिषद्भ्य एवाभवदिति निश्चप्रचम् । आत्मा-ब्रह्म-जीव-मुक्ति:-सृष्टिक्रम-कर्मस्वरूपादयो विभिन्नदार्शनिकविषया: विस्तरश वर्णितास्तत्र । उपनिषदां मुख्य: प्रतिपाद्यो विषय "आत्मा" एवास्ति । अत्र ब्रह्मात्मनोरैक्यं प्रतिपादितम् ।[4] विश्वस्मिन् विश्वे स्थावरजङ्गमात्मकपदार्थाआत्मन एव सारस्वरूपा इति उपनिषदां मन्तव्य: ।[5]

---

1. अथर्ववेद:, 1.19.1.
2. तैत्तिरीय आरण्यक, 1.23, सायण भाष्यम्
3. तत्रैव, 1.2, 1.8
4. वृहदारण्यकोपनिषद्, 2.5.19
5. तत्रैव, 4.4.5

"स वा अयमात्मा ब्रह्मविज्ञानमयो मनोमयो प्राणमयश्चक्षुर्मयो श्रोत्रमयो .....सर्वमय" इत्यादि ।

आत्मनः प्राप्तिविषये कठोपनिषदादि यथा[1] -

"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।

यमेवैष वृणुते तेन लभ्यस्तस्यैव आत्मा विवृणुते तनूं स्वाम् ।।"

सृष्टिप्रक्रिया विषये तत्र विशदविवेचनमस्ति ।[2] ब्रह्मैव जगतः निमित्तोपादानकारणम् । अव्यक्ताज्जगदुत्पद्यते तस्मिन्नेव च लीयते[3] -

"यतो वा इमानि भूतानि जायन्ते

येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति ।"

एवमेवाद्वैतदृशा जगद्ब्रह्मणोः सम्बन्धः प्रतिपाद्यते[4] -

"यथोर्णाभिः सृजते गृह्यते च, यथा पृथिव्यामोषधयः सम्भवन्ति ।

यथा सतः पुरुषात् केशलोमानि, तथाक्षरात् सम्भवतीह विश्वम् ।।"

उपनिषदः संसारदुःखबद्धायजीवायमोक्षमार्गमुपदिशन्ति ।[5] कठोपनिषदः यमनचिकेतसम्वादः तत्त्वज्ञानदृष्ट्या महत्त्वपूर्णमस्ति ।[6] वेदान्तदर्शनस्य आधारस्तु उपनिषदेवास्ति । यथोच्यते- "वेदान्तो नाम उपनिषत्प्रमाणम्"[7] इति । उपनिषदां "तत्त्वमसि" "सदेवसोम्येदमग्र आसीदेकमेवाद्वितीयम्" "सर्वं खल्विदं ब्रह्म" इत्यादय ऐक्य-अनैक्यविधायकश्रुतय एव वेदान्तदर्शनस्य आधारभूताः ।

एवं या दर्शनपरम्परा वेदेषु लब्धमूला सैव ब्राह्मणआरण्यकेषु विशेषतश्चोपनिषत्सु पल्लवितेति।

---

1. कठोपनिषद्, 1.2.23
2. बृहदारण्यकोपनिषद, 1.3.1; छान्दोग्योपनिषद्, 1.1.1.1
3. तैत्तिरीयोपनिषद्, 3.1
4. मुण्डकोपनिषद्, 1.1.7
5. ईशावास्योपनिषद्, 12.14
6. कठोपनिषद्, 1.3.8
7. वेदान्तसार- प्रस्तावना ।

ख} प्रतिपाद्यविषया: -

}1} ब्रह्म-आत्मा च -

कर्मोपासनाज्ञानं चेति भावनात्रयस्य विकासो ब्राह्मणारण्यकोपनिषद्ग्रन्थेषु यथाक्रममुपलभ्यते । भावनात्रयस्य व्यापकरूपमेव षड्दर्शनमस्ति । पृथ्व्यप्तेज वायु-व्याकाशादीनि तत्त्वानि वैदिककाले देवरूपत्वेन स्तूयमानानि दृश्यन्ते । एषा सन्तुष्टिरेव मानवस्य कर्म आसीत्, उपासनामाध्यमेन च मनोरथान्साध्यते स्म ।[1] यत्कृते वेदेषु व्यापकशक्तेरुल्लेख उपलभ्यते यस्मात् सृष्टिरियं जाता । यजुर्वेदस्य पुरुषसूक्ते अयमेव भाव: स्पष्टतया व्यज्यते ।[2] पराशक्तिरियं वेदे कुत्रचिद् "अभयं ज्योति:"[3] अपरत्र "परमंव्योमन्"[4] अन्यत्र च "परमं पदम्"[5] अथवा "अव्यक्त"[6] इत्यादिपदैर्व्यवह्रियते । एवं "तमेव विदित्वाऽतिमृत्युमेति"[7] अपि च[8] -

"न दक्षिणा विचिकिते नसव्या नप्राचीनमादित्या नोतपश्च ।

पाक्याचिद् वसवोधीर्याचिद् युष्मानीतो अभयं ज्योतिरश्याम् ।।"

इत्यादिषु अभयज्योतिषा ज्ञानकामनाभिव्यज्यते । पश्चाद् ब्राह्मण-ग्रन्थेषु अभयज्योतिस्वरूपस्यात्मन: साक्षात्कर्तुं यज्ञविधानपरम्परा प्रचलिता । "यज्ञो वै विष्णु:"[9] इत्यादिभिर्यज्ञो विष्णुस्वरूप: कथित: ।

आरण्यकेषु ब्रह्मण: पृथ्व्यादिरूपे "स्थूल" इति,मनसादिरूपे "सूक्ष्म"

---

1. ऋग्वेद:, 8.12.6
2. यजुर्वेद:, अध्याय:16
3. ऋग्वेद:, 2.27.11
4. तत्रैव, 1.143.2
5. तत्रैव, 1.22.20
6. तत्रैव, 1.17.9
7. यजुर्वेद:, 1.17.9
8. ऋग्वेद:, 2.27.11
9. तैत्तिरीयसंहिता, 1.7.4

इति, प्रणवरूपे च "शुद्ध" इति, स्वरूपत्रयं निगद्यते ।[1] आत्मा तत्र विज्ञानमय आनन्दमयः प्राणमयश्च निगदितः ।[2] ऐतरेयारण्यके ब्रह्मात्मनोरैक्यं प्रतिपादितमस्ति।[3]

उपनिषदां प्रतिपाद्योऽयमेवात्मा । तत्र आत्मसम्बन्धीनि विविधानि मतानि प्राप्यन्ते । अयमात्मा प्राणापानोदानव्यान वायुरूपे प्राणिशरीरं रक्षति । अयमेव कारणं बन्धमोक्षयोः । दृश्यमानाः स्थूलसूक्ष्मपदार्था आत्मस्वरूपा एव ।[4] "आत्मा सर्वव्यापको नैवैतस्माद् बहिर्भूतः कश्चित् सर्वमेवास्मिन् लीयते ।"[5] "ब्रह्मात्मनोरैक्यमस्ति ।[6] आत्मदर्शनार्थं चान्तः करणशुद्धिरपरिहार्या ।[7]

उपनिषदनन्तरं दर्शनं साहित्यं प्रारभ्यते । तत्र हि ब्रह्मात्मनोः विशदविवेचनमस्ति । प्रथमं तावद् वेदाप्रामाण्यवादिनो लोकायतमतानुयायिनः "स्थूलदेह एव आत्मा" इत्यामनन्ति । "मनुष्योऽहम्" "स्थूलोऽहम्" इत्यादयो मनुष्यत्वधर्मविशेषाः स्थूलदेहस्य प्रतीतेः विषयाः सन्ति । बृहस्पतिसूत्रेषु "चैतन्यविशिष्टः कायः पुरुषः" इत्युक्त्वा एतदेवोद्घोषितम् । भौतिकवपुरेव आत्मा चेत् तत्र भौतिकवस्तुनि कथं चैतन्यम् ? प्रश्नेऽस्मिन् चार्वाकस्य कथनं यत् यथा यवशर्करादिसंयोगेन निर्मिता मदिरा अपि मादकतां जनयति नैव तद् द्रव्येषु मादकत्वं तथैव भौतिकतत्त्वानांमात्राविशेषेण सम्मिलितेषु नवगुणोदयो जायते । अतः स्थूलदेह एवात्मा इति चार्वाकः ।

क्षणिकवादिनो बौद्धा बुद्धिमेवात्मपदे उपस्थापयन्ति तेषां कथनमस्ति यदन्तर्बहिर्विद्यमानानि वस्तूनि विज्ञानकारीणि सन्ति, विज्ञानं च मेघेषु तडिद्वत्क्षणे उत्पद्यते क्षणे नश्यते च अत एव क्षणिकम् । स्वापरप्रकाशकत्वात् स्वप्रकाशमपि । विज्ञानेषु एकतरस्य नष्टे द्वितीयं विज्ञानमुत्पद्यते तन्नष्टे च

---

1. तैत्तिरीयारण्यकम्, 7.6.8
2. तत्रैव, 9.1.1
3. ऐतरेयारण्यक, 2.4.1,3
4. बृहदारण्यकोपनिषद्, 4.5
5. तत्रैव, 4.45
6. तत्रैव, 2.5.19
7. कठोपनिषद्, 1.2.23

तुरीयम् । एवं विज्ञानधारा नदीप्रवाहवत् सततं प्रवहति सा च "आलयविज्ञान-धारा" "प्रवृत्तिविज्ञानधारा" चेतिद्विधा भवति । "अहम्" इत्याकारका प्रथमा बुद्धिरूपा "इदम्" इत्याकारका अन्या च मनआदि बाह्यपदार्थरूपा अस्ति । इयं आलयविज्ञानधारारूपाबुद्धिरेव "आत्मा" इति ।

माध्यमिकशून्यवादिनो बौद्धविचारका: "असदेव सोम्येदमग्र आसीत्" इत्यन्-यादिषु श्रुतिषु संकीर्तितं शून्यमेव "आत्मा" इति स्वीकुर्वन्ति ।

जैनदर्शने अणुपरिमाणवादिनो मध्यपरिमाणवादिनश्चेति द्विधा आत्म-परिमाणवादिन आचार्या: सन्ति । अणुवादिन: रोमसहस्रांशवत् आत्मन अणुत्वमामनन्ति, अणुत्वादेव आत्मनो नाडीषु सञ्चरणं सम्भवमिति तेषामभिमतम् । दिगम्बरीया: जैनास्तु आत्मानं मध्यमपरिमाणं वदन्ति । जैनमते जीव - आत्मा वा चेतनद्रव्यमस्ति । "चैतन्यलक्षणोजीव" इति तेषां मतम् । जीवेषु चेतनायास्तारतम्या-ज्जीवास्त्रिधा उत्तममध्यमनिम्न भेदात् ।

न्यायदर्शने द्वादशप्रमेयेषु प्रथम: प्रमेय "आत्मा" गण्यते ।[1] "प्रमाविषयत्वं प्रमेयत्वम्" अथवा "योऽर्थ: तत्त्वत: प्रमीयते तत्प्रमेयम्" अनेन आत्मा प्रमेयत्वाद् ज्ञानविषय: । "ज्ञानाधिकरणमात्मा" इति वा । स च सर्वद्रष्टाभोक्तानित्य: सर्वव्यापकश्चैतन्यामूर्ताश्रय:, स्पर्शादिगुणरहितो देशकालवन्धमुक्त:, सीमातीतश्च ।

"अनवच्छिन्न सदभावं वस्तु यद्देशकालत: ।
तन्नित्यं विभुमेच्छन्तीत्यात्मनो विभुनित्यता ।।[2]

एवं विभुर्नित्यश्चायमात्मा अनादि-अनन्तश्च । शरीरं च आत्मनो भोगायतनम् ।

शरीरेन्द्रिय बुद्धिभ्य: पृथगात्मा विभुर्ध्रुव: ।

आत्मतत्त्वं न्यायदर्शने ईश्वरविषयकविवेचनमपि सूक्ष्मेक्षिकया कृतमस्ति । सर्वज्ञ: सर्वशक्तिमांश्चेश्वरो जीवेभ्यस्तत्कर्मानुरूपफलप्रद: । स ह्याधिपत्य-वीर्य-यश-श्री-ज्ञान-वैराग्यरूप षडैश्वर्यसम्पन्नोऽस्ति ।[3] यथोक्तमुदयनाचार्येण -

---

1· न्यायसूत्रम्, १·१·९

2· सर्वदर्शनसंग्रह:, पृ·88

3· न्यायकुसुमाञ्जलि: - परिशिष्ट ।

ईश्वरोऽयं निराकार: सर्वज्ञ: सर्वशक्तिमान् ।
अनादिरविकारी चानन्त सर्वगतो विभु: ।।
सच्चिदानन्द रूपोऽपि दयालुर्न्यायतत्पर: ।
सर्गस्थितौ लयहेतु: नित्यतृप्तो निराशय: ।।"

ईश्वरसिद्धये विदुषामुपपत्तयस्तेनेत्थं संगृहीता:-[1]

"कार्यायोजनधृत्यादे: पदात् प्रत्यायत: श्रुते: ।
वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्यय: ।।"

वैशेषिकदर्शने द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाश्चेति सप्तपदार्थेषु द्रव्यनामप्रथम: पदार्थ: । द्रव्यो नाम "क्रियागुणसमवायिकारणम्" । गुणक्रियासमवेतं हि द्रव्यं पुन: नवधा विभज्यते यथा - "पृथ्व्यप्तेजोवायव्याकाशाकालदिगात्ममनांसि" इति । एवं वैशेषिकदर्शने नवद्रव्येषु आत्मा गणित: । यो हि चैतन्ययुक्त: ।

प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकारा: सुखदु:खेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि ।[2] एवं न्यायवैशेषिकयोरात्मतत्त्वोल्लेखो नैव भिद्यते ।

मीमांसकमतानुसारेण शरीरेन्द्रियभिन्न: "आत्मा" अथ वा जीवात्मा अस्ति । नित्योऽयमात्मा कर्ता, भोक्ता, अहंभावेनसर्वत्रविद्यमानाद् विभु:, ज्ञानस्वरूपो देशकालापरिच्छिन्नश्चास्ति ।[3] वेदे हि श्रूयते यद्यज्ञानन्तरं यजमान: स्वर्गलोकं याति शरीरन्तु तस्यात्रैव दह्यते, यत्पुनर्गच्छति स एव जीवात्मा ।[4]

प्राभाकरमते जीवात्मा भोक्ता वपुश्च भोगायतनम्, इन्द्रियाणि भोगसाधनानि, सुखदु:खादयश्च भोग्या: ।[5]

सांख्यदर्शने आत्मन: सिद्धये पञ्चहेतव उपन्यस्यन्ते यथा सांख्यकारिकायाम्-

---

1. न्यायकुसुमाञ्जलि, 5.।
2. वैशेषिकसूत्रम्, 3.2.4
3. तन्त्रवार्तिक; शास्त्रदीपिका, पृ.123
4. श्लोकवार्तिक; आत्मवाद~1.5; शास्त्रदीपिका, 1.1.5.
5. भारतीयदर्शन-उमेशमिश्र; पृ.25।

"संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ।।"

अत्र हि परः इत्यनेन "आत्मा" गृह्यते चैतन्यात् । यत्किमपि दृश्यते इत्यत्र संघातजातं तत्सर्वं 'नात्मार्थं' भवति न गुणत्रयेषु स्वयं सम्भवति विपर्ययः । नाधिष्ठानमन्तरा कश्चित्तिष्ठति, भोगस्य कोऽपि भवति भोक्ता, दृश्यते हि जीवमात्रस्यात्यन्तदुःखनिवृत्तये जायमाना प्रवृत्तिरिति कश्चिच्चेतनं तत्त्वमवश्य-मभ्युपगन्तव्यं स चात्मैव । पुरुषश्चेतनाभिमानी । सांख्यदर्शनं तत्वद्वयं स्वीकरोति प्रकृतिः पुरुषश्चेति । प्रकृतिर्नाम सत्त्वरजस्तमसां साम्यावस्था चेतनश्च पुरुष इति पङ्ग्वन्धन्यायवदुभयप्रवृत्तिः ।

योगदर्शने क्लेशकर्मविपाकाशयैर्हीनः पुरुषविशेष ईश्वर इत्यभ्युपगम्यते । समस्तजीवसमूहस्य एभिर्नित्यसम्बन्धोऽस्ति यद्यपि मुक्तजीवानां तत्र सम्बन्धो विच्छिद्यते एभिः परं तेषामपि मोक्षात्प्राक् सम्बन्ध अभवदेव परं ईश्वरस्तु अनाद्यन्तसम्बन्धविरहत्वान्मुक्तजीवेभ्यो भिद्यते । अतः मुक्तजीवेभ्य ईश्वरो विशेषोऽस्ति ।[1] प्रणवस्तस्येश्वरवाचकः । चित्तवृत्तीनां निरोध एव फलं योगशास्त्रस्य । चित्तं हि ज्ञेयम्, आत्मा च ज्ञाता, आत्माधीनं च चित्तमिति ।

अद्वैतवेदान्तसंज्ञया प्रसिद्धिगते वेदान्तदर्शने ब्रह्मात्मनो समीचीनं समालोचनमस्ति । ब्रह्मविषयेशांकरवेदान्तो नैव किमपि प्रमाणमपेक्षते । अहमस्मीति प्रतीतिसाम्यत्वादत्र श्रुतयः प्रमाणमिति तस्य कथनम् । ब्रह्म हि सच्चिदानन्द-स्वरूपम् । यथा मृत्तिकापात्रं मृत्तिकाया विकारमात्रं तथैव जगदिदं ब्रह्मणो विवर्तमात्रमस्ति । तच्चावाङ्मनसागोचरमस्ति । ज्ञाताज्ञेयोऽनन्तोऽखण्डचैतन्यस्वरूपम्।[2] तत्र हि ब्रह्मात्मनोरैक्यप्रतिपादितम् । मायाप्रपञ्चमुच्छिद्य जीवो ब्रह्मात्मनोरैक्यं स्वयमनुभवति । मनो-बुद्धिचिदहंकारान्तःकरणवृत्तिबद्धं चैतन्यमेव प्रत्यगात्माऽस्ति । तथा च विशुद्धो विनिर्मुक्तं चैतन्यं "ब्रह्म" इत्यस्ति । यथाऽस्ति घट-घटाकाशयोरभेदः। यथा घटे नष्टे घटाकाशो महाकाशे विलीयते नासौ तस्मादुत्पद्यते, न वा विकरोति

---

1. पातञ्जलयोगदर्शनम्, 1.24
2. पञ्चदशी, 1.15; 1.16

तं तथैव चात्मा न ब्रह्मणो विकारोऽवयवो वा । दृष्टान्तोऽयं ब्रह्मात्मनो-रभेदमुपपादयति विकारत्वमवयवत्वं च निराकरोति । "अयमात्मा ब्रह्म" "आत्मैवेदं सर्वं" इत्यादीनि श्रुतिवचांसि ब्रह्मात्मनोरपृथक्त्वं साधयन्ति । श्रूयते चापरत्रयथा-

"स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो ।"[1]

अपि च -

"य आत्मनि तिष्ठन् आत्मनोऽन्तरो यमात्मा न वेद । यस्यात्मा शरीरं य आत्मानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ।"[2] इत्यादिष्वपि ब्रह्मात्मनोरभेदं सुस्पष्टमेव । अत वेदान्तनये आनन्दमय-ज्ञानस्वरूपो, देशकालाद्यन-वच्छिन्नोऽयमात्मा ब्रह्मस्वरूपएव । इति ।

(2) जीवः -

भारतीयदर्शनवाङ्मये जीवविषयकविवेचने वैमत्यमवलोक्यते । प्रथमं लोकायतिकाः "चैतन्यविशिष्टः कायः पुरुषः" इत्युक्त्वा स्थूलमानवदेहमेव आत्मरूपेण स्वीकुर्वन्ति । "जलबुद्बुदवज्जीवाः" इति तेषामभिमतम् । पृथिव्या-पस्तेजोवायुरिति तत्त्वचतुष्टयसंघातात् चैतन्यमुत्पद्यते । चैतन्यांशादेव ज्ञानं जायते देहांशस्तु स्थावरएव ।

बौद्धानां मते जीवात्मा विज्ञानरूपोऽस्ति । अनित्यत्वाच्चतस्य जीवात्माऽप्यनित्य एव । जैनास्तु जीवात्मा देहभिन्न इत्यामनन्ति । तथापि ते तस्य स्थितिं देहपरिमाण एवाङ्गीकुर्वन्ति ।

आस्तिकदर्शनेषु नैयायिकानां वैशेषिकाणां च कथनमस्ति यज्जीवात्मनः सुखदुःखादय गुणा अनित्याश्चेज्जीवात्माऽप्यनित्य एव । प्राभाकरमीमांसका अपि

---

1. छान्दोग्योपनिषद् 6.9.7
2. बृहदोपनिषद्

मतस्यास्यपोषका: । शैव-साङ्ख्य-योगसम्प्रदायेषु "आत्मा" ज्ञानस्वरूप एव । अद्वैतिन आत्मानं निर्गुणं कथयन्ति, विशिष्टाद्वैतिनो नैयायिकवैशेषिकाश्च सगुण आत्मा इति वदन्ति ।

जीव: कर्ता भोक्ता वा विषयेऽस्मिन्नपि वैमत्यं दृश्यते । न्याय-वैशेषिक-दर्शनयो: जीवात्मा कर्तृत्वेनाङ्गीकृत:, परं रामानुजमध्वसम्प्रदायावलम्बिन: सति सत्येऽपि नैमित्तिकमामनन्ति । अद्वैतवेदान्तिन: "सोपाधिको आत्मा कर्ता" इति वदन्ति । साङ्ख्यदर्शने प्रकृति: कर्तृत्वेन स्वीक्रियते । अत: प्रकृतिसान्निध्याज्जीवात्मनोऽपि कर्तृत्वमुपपाद्यते । इति ।

§3§ जगत् अथवा सृष्टि: -

ऋग्वेदान्तरं ब्राह्मणारण्यकेषु सृष्टे: वर्णनं यथाक्रममुपलभ्यते । एषु ग्रन्थेषु सृष्टेरुत्पत्ति बहुधा वर्णिता । कुत्रचित् "प्रजापति:" इत्यस्यकल्पना[1] कृता अन्यत्र "ऋतात्" प्रजापतेरुत्पत्तिर्वर्ण्यते । ऋतस्यार्थ: यास्क: "यज्ञ" इति करोति ।[2] कुत्रचिच्च ऋतशब्दो ब्रह्मण: पर्यायत्वेनापि गृह्यते । अपरत्र "असत्" इत्यस्मात्, अन्यत्र च "जलात्" सृष्टेरुत्पत्ति: श्रूयते ।[3] तैत्तिरीयआरण्यके पाकजप्रक्रिया-वर्णनमुपलभ्यते[4] जले विद्युत्शक्तेश्चर्चा वास्ति ।[5]

उपनिषदनुसारेण सृष्टेरादौ मृत्युरेवासीत् । पश्चाच्च मन:-आप:-तेज-पृथ्वी-प्रजापतिश्चयथाक्रममुत्पद्येरन् । अन्यत्रोक्तं यत्पूर्वं पुरुषोत्पत्ति: पुनश्च नार्या, द्वाभ्यां च विश्वोत्पत्तिरभवत् ।[6] "द्यावा भूमिमजनयन देव एक:" इत्यत्र खाज्जगदुत्पत्तिर्निगदिता । तस्मिन्नेव चास्य लयं भवति । सारत: कथयितुं शक्यते यत्पूर्वमव्यक्तरूपमेव आसीत् । अव्यक्तादेवेदं व्यक्तं जगदुत्पद्यते तच्चाव्यक्तं ब्रह्म तस्मादेव सृष्टिरिति वेदान्तमर्यादा ।[7]

---

1· शतपथब्राह्मण, 7·1·4·17, 23; 7·1·2·1; 6·8·1·1-23
2· निरुक्तम्, 4·19·9
3· तैत्तिरीयारण्यक, 1·13 सायण-भाष्यम्
4· तत्रैव, 1·2
5· तत्रैव, 1·24·1
6· वृहदारण्यकोपनिषद्, 1·4·1
7· ब्रह्मसूत्र-भाष्यम् ।

दर्शनसाहित्ये चार्वाकाः "पृथिव्यापस्तेजोवायुरिति तत्त्वचतुष्टयं स्वीकुर्वन्ति । तत्समुदाये शरीरेन्द्रियविषयसंज्ञा' इति तेषां मतम् । एवं स्थूलपदार्था एव जगद्धेतुत्वेन स्वीक्रियन्ते तैरिति । बौद्धा अपि नैव आकाशतत्त्वंस्वीकुर्वन्ति परमाणु-अवयवप्रवाहएव संसारं निर्मिमीते इति तेषां मतम् । जैना अपि परमाणुमेव जगदुत्पत्तिकारणत्वेनामनन्ति । न्यायवैशेषिका अपि परमाणुवादिनः परमाणुमेव च संसारहेतुत्वेन कथयन्ति । नित्यः परमाणुरिति तेषां मतम् । मीमांसका वैयाकरणाश्च परमाणूनामनित्यत्वात्तेषां कारणत्वं निराकृत्य शब्दस्य नित्यत्वं साधयन्ति । व्याप्तिमत्त्वाच्च शब्दस्य कारणत्वमुपपादयन्ति । सांख्ययोगाश्च शब्दस्य कारणत्वं निराकुर्वन्ति । त्रिगुणात्मकां प्रकृतिं च कारणत्वेनोपकल्पयन्ति । अद्वैतनये प्रकृतिपरिणामवादं निषिध्यते । ब्रह्मविवर्त-वादश्चोपपाद्यते । एवं विभिन्नदार्शनिकसम्प्रदायेषु विभिन्नरूपेण सृष्टेरुत्पत्तिर्नि-गदिता । नैव तत्र मतैक्यमवलोक्यते दार्शनिकानाम् ।

## §4§ मोक्षस्वरूपम् -

मोक्षस्तावद् भारतीयदर्शनस्य चरमं परमं च लक्ष्यम् । भवदुःखात्यन्तिकोच्छेद एव मोक्षो मुक्तिर्वा । अज्ञानमविद्योपहतचेतो वा भवबन्धहेतुः । परमतत्त्वज्ञान-मात्मज्ञानं वा मोक्षः । तज्ज्ञानोपाय एव भारतीयदर्शनस्य केन्द्रबिन्दुरस्ति । अत एव मोक्षशास्त्रेणाप्यभिधीयन्ते दर्शनसम्प्रदायाः । एवं मोक्षविषये तत्र विशदविवेचनं दृश्यते । यथाक्रमं सारतएवात्रोल्लिख्यते ।

प्रथमं तावत् चार्वाकमतानुसारं "मरणमेवमोक्षः" "नैवपरलोकः परलोकिनो-ऽभावात् परलोकाभावः" अतः मरणमेव अपवर्गः "यावज्जीवेत् सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत् । भस्मी-भूतस्य देहस्य पुनरागमनं कुतः ।।" एवं स्थूलवादिनो बृहस्पतिमतानुयायिनो मृत्युमेव मोक्षत्वेनामनन्ति ।

आर्हतदर्शने सप्तद्रव्येषु मोक्षगणनाऽस्ति । जीवाजीवास्रवबन्ध-संवर-निर्जरा-मोक्षाश्चेति । वस्तुतः आचारे अहिंसा, विचारे अनेकान्तता, वाण्यां

स्याद्वाद:, समाजे च अपरिग्रह:, इत्येव जैनमतस्य सार: ।

"जह मम ण पियं दु:खं जाणिहि एमेव सव्व जीवाणम्"[1]

इति सूत्रवाक्यमेव जिनां नीतिशास्त्रस्याश्रयभूतमत्र । मुक्तौ जीवो ऽनन्त-चतुष्टयमाप्नोति । अनन्तज्ञानम्, अनन्त दर्शनम्, अनन्तसुखम्, अनन्तवीर्यञ्चेत्यनन्त-चतुष्टयम् । ईश्वरास्तित्वाभावाज्जीवो निजप्रयत्नैरेव मोक्षमधिगच्छति ।

"सर्वमनित्यं, सर्वमनात्मं निर्वाणं शान्तम्" त्रिसूत्रात्मिकैयं शिक्षा बौद्धदर्शनप्रासादस्याधारशिला । निर्वाणं हि नि:श्रेयस-मुक्ति:-अमृत-परमानन्दस्य च स्थितिरस्ति । सा हि वर्णनातीता-तर्कप्रमाणाभ्यां रहिताऽलौकिकावस्था । तत्कृते बुद्धेन सम्यग्दृष्टि:-सम्यक्संकल्प:-सम्यग्वाक्-सम्यक्कर्म-सम्यगाजीव-सम्यग् व्यायाम-सम्यकस्मृति:-सम्यक् समाधिश्चेत्यष्टाङ्गको मार्ग उपदिष्ट:

आरोग्या परमालाभा, सन्तुट्ठि परमं धनम् ।
विस्सास परमा जाति निब्बाणं परमं सुखम् ।।[2]

न्यायदर्शने "आत्यन्तिको दु:खनिवृत्तिर्मोक्ष:" इत्यभिहितम् तत्त्व-ज्ञानान्मिथ्याज्ञानं विनश्यते मिथ्याज्ञानं हि कारणं दोषाणाम्। सर्वविधदोष-ध्वंसात् कर्मप्रवृत्तेरपि नाशो भवति । कर्माभावे नैव पुनर्जन्म भवति या खलु दु:खनिवृत्तेरेवावस्था स एव 'मोक्ष' अथवा 'निश्रेयस' इति कथ्यते ।[3] तर्कदीपिकायां चरमदु:खध्वंसो मोक्ष:, न्यायवार्तिके च आत्यन्तिकदु:खाभावो मोक्ष इत्युच्यते । सांख्यकारिकायां ईश्वरकृष्ण: "अत्रैगुण्याच्च कैवल्यं" आत्यन्तिकोदु:खत्रयाभाव: कैवल्यम्" इति भणति ।

योगदर्शनव्यासभाष्यं च "पुरुषार्थशून्यानां गुणानां प्रतिप्रसव: कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति" कथयति । अस्याभिप्रायोऽयं यच्चेतनशक्ते: {आत्मन:} स्वप्रकृतस्वरूपे अवस्थितिरेव मोक्ष: । इति ।

---

1. धम्मपद-1.
2. तत्रैव,
3. न्यायसूत्रम्, 1.1.2, सायण भाष्यम्।
4. ब्रह्मसूत्रम् - शाबर-भाष्यम्, 1.1.4

मीमांसका स्वीकुर्वन्ति यत् शरीरेन्द्रिय-विषयरूपप्रपञ्चत्रयाबद्धो जीवात्मा अनादिकालादेव विषयाबद्धो दुःखानि भुङ्क्ते। एषामात्यन्तिको विनाश एव मुक्तिः। "प्रपंचसम्बन्धविलयो मोक्षः"। निष्कामकर्मणा आत्मज्ञानं जायते पूर्वजन्मसंचितकर्माणि च क्षीयन्ते एवं पुनर्जन्मविमुक्तो जीवो निर्बन्धावस्थायां मोक्षत्वमधिगच्छति।

ब्रह्मसूत्रभाष्ये शंकराचार्यो मोक्षस्वरूपमित्थं प्रतिपादयति[1] - "इदं तु पारमार्थिकं कूटस्थनित्यं व्योमवत्सर्वव्यापि सर्वविक्रियारहितं नित्यतृप्तं निरवयवं स्वयं ज्योतिः स्वभावम् यत्रधर्माधर्मौ कार्येण सह कालत्रयं च नोपावर्तेते।"

अविद्यावशाद् ब्रह्मभावच्युतो मानवो जीवत्वमधिगच्छति। अविद्यया एक एव परमेश्वरो मायया मायाविवदनेकधा विभाव्यते, नान्यो विज्ञानधातुरस्तीति। अतः "ऋते ज्ञानान्न मुक्तिः" "अहं ब्रह्मास्मि"[2] जीवो ब्रह्मैव नापरः" इत्येव मुक्तेः स्वरूपम्।

एवं सामान्यतो भारतीयदर्शनसम्प्रदायेषु कर्म-ज्ञान-भक्तियोगाश्च न्यूनाधिक्यपरिमाणतो मोक्षसाधनत्वेन स्वीक्रियन्ते। यत्र मीमांसका मोक्षप्राप्तये कर्मापेक्षन्ते तत्र वैष्णवा वेदान्तिनश्चेश्वरभक्तिमीहन्ते। सांख्ययोगौ कैवल्यार्थं योगाभ्याससमीहेते। शांकरवेदान्तिनश्च ज्ञानमेव मोक्षहेतुत्वेनोद्घोषयन्ति। ऋते ज्ञानान्नमुक्तिरिति श्रुतिवचनमनुमोदयन्तः। इत्थं सर्वदर्शनानां भिद्यन्ते साधनानि न पुनः साध्यमिति निश्चप्रचम्। तच्च साध्यं मोक्षो मुक्तिः कैवल्यं वा इति।

ग§ आस्तिक-नास्तिक दर्शनयोरूद्देश्यम् -

"दृश्यते अनेन" इति दर्शनम्" अनया व्युत्पत्त्यैव दर्शनस्योद्देश्यं ज्ञानप्राप्तिरिति स्पष्टयते। दर्शनं हि चाक्षुषविषयः, चक्षुरिन्द्रियप्राप्तं ज्ञानं चक्षुप्रत्यक्षमस्ति। परं दर्शननये सन्त्येतादृशानि तत्त्वानि येषां चाक्षुषप्रत्यक्षं नैव

---

1. ब्रह्मसूत्रम्, शाबर-भाष्यम्, 1·1·4
2. बृहदारण्यकोपनिषद्, 1·4·10

जायते । तत्कृते तात्त्विकबुद्धिरपेक्षते, या च प्रज्ञा चक्षुः, ज्ञानचक्षुरथवा दिव्यदृष्टिरित्यभिधीयते । अनेन दर्शनं नाम तत्साधनं येन ज्ञानं प्राप्यते इति । श्रुतिष्वपि दर्शनस्य दृष्टेर्वा प्रयोग आत्मसाक्षात्काराय ब्रह्मसाक्षात्काराय वा दृश्यते । यथा "आत्मा वा अरे द्रष्टव्यः"[1] इत्यादिषु "दृशू" इति शब्दस्यार्थ आत्मदर्शनमेवास्ति । निःश्रेयसान्वेषणमेव मानवजीवनस्य लक्ष्यमस्ति । आत्यन्तिकदुःखनिवृत्तिः शाश्वतसुखावाप्तिश्च निःश्रेयसम्, तच्च दर्शनस्य प्रयोजनं लक्ष्यं वा यथोक्तम्[2] -

यद् आभ्युदिकं चैव नैश्रेयसिकमेव च
सुखं साधयितुं मार्गं दर्शयेत् तद्धि दर्शनम् ।

मनुस्मृतिरपि "सम्यग्दर्शनसम्पन्नः कर्मभिर्न निबध्यते इत्युक्त्वा सम्यग्दर्शनस्य {आत्मदर्शनस्य} महत्त्वं प्रतिपादयति । दुःखमयो हि जीवलोकोऽयम् । संसारस्यास्य दुःखाश्रयत्वं सम्यगवगम्य भारतीयैर्विचारकैस्तन्निवृत्तिरूपाया चिन्तिताः । "दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातकेहेतौ" इत्यनुसारेण दुःखत्रयस्य हेतुं तत्स्वरूपं प्रतीकारोपायाश्च चिन्तयद्भिः ऋषिभिर्यत्किञ्चिदपि दृष्टमनुभूतं स्वबुद्धिविषयीकृतं वा तत्सर्वं लोकोपकृत्यै सूत्ररूपेण निबद्धम् । पश्चाच्च तेषां सूत्राणां भाष्यकृद्भिः स्वतन्त्रतया वा विषयं समीक्षमाणैर्बहुभिर्विद्वद्भिरनेके ग्रन्थाः प्रणीताः येषु जगदात्मनो मनसश्च विषये विस्तरेणोल्लिखितमस्ति । एवं जगत्-आत्मा-मनश्चरहस्यान्वेषका गवेषका भवदुःखनिवृत्तिरूपायचिन्तापराः स्व-स्वमतानुसारं रहस्यानुद्घाटयामासुः । भारतीयज्ञानपरम्परायाः निर्गमनस्थलस्तु वेद एव । साक्षात्कृतधर्माणः ऋषयः सृष्टेः दुःखमेककारणं कल्पयन्तः तदपवातकहेतवे आत्मज्ञानमेवाऽबुवन् । वैदिकसंहितानन्तरमुपनिषत्साहित्ये तु आत्मदर्शनस्यैव उपायाः सूक्ष्मेक्षिकया निर्दिश्यन्ते । उपनिषदां तत्त्वान्वेषणमेव भारतीयदर्शनस्याधारभूतः । तत्रास्तिक-नास्तिकदर्शनरूपेण द्विधा विचारो दृश्यते । नास्तिकदर्शनकोट्यां चार्वाक-बौद्धजैनादीनां गणना क्रियते । तत्र बौद्धधर्मप्रतिष्ठा-

---

1. वृहदारण्यकोपनिषद, 2.4.5
2. डा० भगवानदास गुप्ता - दर्शन के प्रयोजन

पकोबुद्धोऽपि जन्ममरणादिवन्धानवलोक्यैव वैराग्यमङ्गीचकार । जन्ममरणयोर-दृष्टपार: न पुनरहं कपिलाह्वयवयं प्रवेष्टा" इत्युक्त्वा दु:खमन्विष्य सत्यचतुष्टयेषु तदुत्पत्तिस्तन्निवृत्तिं चोद्बोधितवान् । जैनधर्मप्रवर्तकस्य महावीरस्वामि-स्सद्देश्यमपि दु:खनिवृत्तिरपवर्गप्राप्तिरासीत् तत्कृते स सम्यग्दर्शन-सम्यग्ज्ञान-सम्यक्कर्म-सम्यक्चरित्रं चोपदिष्टवान् ।

न्यायदर्शने प्रमाणप्रमेयादिषोडशपदार्थानां यथार्थज्ञानं दु:खनाशाय कल्पितम् । सर्वदु:खक्षय एवापवर्गो मोक्षो नि:श्रेयसो वाऽस्ति ।

वैशेषिका: स्वीकुर्वन्ति यद्धर्मविशेषज्ञानात् तत्त्वज्ञानं ततश्च सर्वदु:ख-विनिर्मुक्तमोक्ष: प्राप्यते । सांख्येऽपि त्रिविधदु:खनिवृत्तिरेवपरम पुरुषार्थ: कथित: । योगदर्शने चाविद्यानाशात्तत्त्वज्ञानं समर्थितं येन मोक्षप्राप्तिर्जायते । वेदान्तदर्शने आत्मज्ञानं यथार्थज्ञानं वा ब्रह्मप्राप्त्यै स्वीकृतम् तत्प्राप्तौ च सर्वविधदु:खनिवृत्ति: परमानन्दानुभूतिश्च जायते ।

एवं समेषां दार्शनिकानामास्तिकानामाहोस्विन्नास्तिकानां च विचारकाणां लक्ष्यं कष्टबहुलस्य नरस्य दु:खनिवृत्तिरेव । दृश्यते हि जीवनमात्रे निसर्गत: सुखावाप्ते: प्रवृत्ति: । दर्शनं दु:खहानाय सुखलाभाय च प्रयतते । सैव दु:खनिवृत्तेरवस्था मुक्ति-मोक्ष-अपवर्ग-निर्वाणादि-पदैरभिधीयते सर्वैश्चास्तिक-नास्तिकैरभ्युपगम्यते येन केनापि नयेन ।

ब) प्रबोधचन्द्रोदयोक्तदार्शनिकसिद्धान्तानां पर्यालोचनम् -

भारतीयदार्शनिक सिद्धान्तानधिकृत्य प्रणीतेषु नाटकेषु प्रबोधचन्द्रोदयाख्यं नाटकं महत्त्वपूर्णं स्थानं भजते इति कृतं कथनेन । दर्शनतत्त्ववेदिना श्रीकृष्णमिश्रेण नाटकेऽस्मिन् विभिन्नदार्शनिकसिद्धान्तानामुल्लेख: सामान्यविशेषरूपेण कृत: । तेषु सिद्धान्तेषु चार्वाक:-बुद्धागम:-दिगम्बर:-सोमसिद्धान्त:-मीमांसा-तर्कविद्या-अद्वैतवेदान्तदर्शनं च विशेषत उल्लेखनीया: । नाट्यरूपेणैषां तत्त्वानां परिकल्पनमेव कवेर्बुद्धिवैभवं प्रकटयति । निसर्गविरुद्धवृत्तीनां यथार्थचित्रणमतीवनैपुण्येन दृश्यते अत्र। अन्ते च ज्ञानोन्मुखवृत्तय आत्मज्ञानविमुखवृत्तीनतिशयन्ते कवेरभीष्ट: प्रबोधस्योदयश्च जायते । प्रबोधोदय एव ज्ञानावाप्तिस्तस्माच्च मोक्षावाप्ति: ।

एवं श्रीकृष्णमिश्रस्य भारतीयदर्शनस्य चोद्देश्यमेकमेव प्रतीयते । नाटके उभयोरेव दर्शनयोः सिद्धान्ताः प्रतिपादितास्तत्र चार्वाकादीनां सिद्धान्ता आलोचिता अद्वैतदर्शनादयश्च समर्थिताः । अत्र यथाक्रमं निरूप्यन्ते । प्रथमं तावत्प्रबोधचन्द्रोदयस्य चार्वाक दर्शनम् –

नाटकस्य द्वितीयाङ्के महामोहपात्रेण कविना चार्वाकसिद्धान्ताः प्रतिपादिताः । नाटकाध्ययनेन ज्ञायते यत्कविना बृहस्पतिरुक्तसिद्धान्ताः पूर्णरूपेणोल्लिखिताः । चार्वाकदर्शनस्य नैव काप्याधिकारिका प्रामाणिका वा कृतिरुपलभ्यते । सर्वदर्शनसंग्रहे अस्य तत्त्वानां निरूपणं प्राप्यते । तत्रोल्लिखिताः दर्शनसिद्धान्ता एव यथावत् रूपेण नाटके दृश्यन्ते । मतस्यास्य प्रणेता कश्चिद् बृहस्पतिरित्यपि ज्ञायते । नाटकस्य द्वितीयाङ्के महामोहो लोकायतमित्थं प्रशंसति – "सर्वथा लोकायतमेव शास्त्रं यत्र प्रत्यक्षमेव प्रमाणं, नास्ति परलोकः, मृत्युरेवापवर्गः......इत्यादि ।[1] तत्रैव महामोहस्य "तदेतदस्मदभिप्रायानुबन्धिना वाचस्पतिना प्रणीय चार्वाकाय समर्पितम्" उक्तिरियं निर्दिशति यत्कश्चिद् बृहस्पतिप्रणीतश्चार्वाकसिद्धान्त एव कवेरभीष्टः ।

सर्वदर्शनसंग्रहे चार्वाकमतस्य सारो यथा –[2]

"न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः ।
नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः ।
अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्
बुद्धिपौरुषहीनानां जीविका धातुनिर्मिता ।
पशुश्चेन्निहतः स्वर्गं ज्योतिष्टोमे गमिष्यति
स्वपिता यजमानेन तत्र कस्मान्न हिंस्यते ।।
मृतानामपि जन्तूनां श्राद्धं चेत्तृप्तिकारणम् ।
निर्वाणस्य प्रदीपस्य स्नेहः संवर्धयेच्छिखाम् ।।

---

1. प्रबोधचन्द्रोदयः – द्वितीयाङ्क, पृ. 76-77.
2. सर्वदर्शनसंग्रहः – माधवाचार्य, पृ. 23-24.

यावज्जीवेत्सुखं जीवेदृणं कृत्वा घृतं पिबेत् ।
भस्मी-भूतस्य देहस्य पुनरागमनं कुत: । इत्यादि ।

प्रबोधचन्द्रोदये चार्वाको यथा - "दण्डनीतिरेव विद्या । अत्रैव वार्तान्तर्भवति । धूर्तप्रलापत्रयी स्वर्गोत्पादकत्वेन विशेषाभावात्"। पश्य-[1]

स्वर्ग: कर्तृक्रियाद्रव्यविनाशे यदि यज्वनाम् ।
ततो दावाग्निदग्धानां फलं स्याद् भूरि भूरुहाम् ।।

अपि च -

"निहतस्य पशोर्यज्ञे स्वर्गप्राप्तिर्यदीष्यते ।
स्वपिता यजमानेन तत्र कस्मान्न हन्यते ।
मृतानामपि जन्तूनां श्राद्धं चेत्तृप्तिकारणम् ।
निर्वाणस्य प्रदीपस्य स्नेह: संवर्धयेच्छिखाम् ।।
अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम् ।
प्रज्ञापौरुषहीनानां जीविकेति बृहस्पति: ।।"

पुनश्च -

"त्याज्यं सुखं विषयसङ्गमजन्मपुंसां
दु:खोपसृष्टमिति मूर्खविचारणैषा ।
व्रीहिञ्जिहासति सितोत्तमतण्डुलाढ्यान्
को नाम भोस्तुषकणोपहितान्हितार्थी ।।"

पद्यमिदमप्युभयत्र समानमेव । एवं ज्ञायते प्रबोधचन्द्रोदयस्य चार्वाकसिद्धान्त: सर्वदर्शनसंग्रहस्य चार्वाकसिद्धान्तै: सह पूर्णरूपेण साम्यं भजन्ते ।

बुद्धागम: -

"सर्वे क्षणक्षयिण: एव निरात्मकाश्च,
यत्रार्पिता बहिरिव प्रतिभान्ति भावा: ।
सैवाधुना विगलिताखिलवासनत्वा-
द्धीसन्तति: स्फुरति निर्विषयोपरागा ।।"[2]

---

1. प्रबोधचन्द्रोदय:, पृ.77, 2.19, 20, 21, 23.
2. तत्रैव, 3.8

नाटकस्य तृतीयाङ्के श्लोकेनानेन बौद्धदर्शनसिद्धान्तः प्रतिपादितः। अयं भावो यत् सर्वे पदार्थाः क्षणिका नास्ति आत्मा। एते क्षण भङ्गुरा भावा विज्ञानसन्ततावारोपिता बाह्या इव प्रतिभासन्ते। सांसारिकवासनो-च्छेदे विषयसम्बन्धरहिता शुद्धाधीसन्ततिः स्फुरति सैवानिर्वाणावस्था।

बौद्धदर्शनस्य प्रवर्तको बुद्ध आसीत्। एक एव बोधयिता बौद्धयानां बुद्धिभेदाच्चतुर्धा विभज्यते। गुरूपदिष्टं मार्गं ते बुद्धिभेदाच्चतुर्विधया भावनया यथेच्छं भावयन्ति, सर्वं क्षणिकं, दुःखं स्वलक्षणं-स्वलक्षणम्, शून्यं शून्यमिति भाव-मापद्यमानाः। वस्तुत बौद्धा जगतो भावस्य वा क्षणिकत्वमुपपादयन्ति। अस्ति तत्रार्यसत्यचतुष्टयम्- दुःखमायतनं समुदयो मार्गश्चेति।[1]

तत्र दुःखं यथा -

"दुःखसंसारिणः स्कन्धास्ते च पञ्च प्रकीर्तिताः।
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च॥"

आयतनम् यथा -

पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम्।
धर्मायतनमेतानि द्वादशायतनानि तु॥

समुदयश्च यथा -

"रागादीनां गणो यस्मात्समुदेति नृणां हृदि।
आत्मात्मीयस्वभावाख्यः स स्यात्समुदयः पुनः॥"

मार्गश्च यथा -

"क्षणिकाः सर्वसंस्कारा इति या वासना स्थिरा।
स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते॥"

उपर्युक्तसत्यचतुष्टयेषु प्रबोधचन्द्रोदये मार्गरूप सत्यस्योल्लेखः कविना कृतः। नैव नाटके बौद्ध सिद्धान्तस्य कापि विस्तृत व्याख्याऽस्ति। परमुल्लिखितप्रसङ्गेनैतदेव ज्ञायते, बौद्धानां "सर्वं क्षणिकत्वसिद्धान्त एव कवेर भीष्टः। "क्षणिकाः सर्वे संस्काराः, नास्त्यात्मा" इतिभिक्षुवचनेन पूर्वोक्तमेव समर्थितम्।

---

1. सर्वदर्शनसंग्रहः, पृ. 101 विवेकविलासः, 8.268-71.

जैनमतम् - बुद्धागमवन्नाटकस्य तृतीयाङ्के दिगम्बरजैनसिद्धान्तोऽपि संक्षिप्त उल्लिखित: । आर्हतमतावलम्बिकश्चित् लुञ्चितपिञ्छिकाहस्तो दिगम्बर, आर्हत-दर्शनं भणति । तन्मतानुसारेण - "नवद्वारपुरीमध्ये आत्मा दीप इव ज्वलित:" "मलमयपुद्गलपिण्डस्य सकलजलैरपि शुद्धिरसम्भवेति, आत्मासहजनिर्मल: ऋषिपरिचरणैर्ज्ञातव्य एवं संक्षेपेणैवास्यासिद्धान्तस्योल्लेखस्तत्रप्राप्यते ।

जैनदर्शने "सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग:"[1] इत्यादिना साधनत्रयं मोक्षाय कल्पितम् । श्रीकृष्णमिश्रस्य दिगम्बरस्तु आत्मज्ञानमेव मोक्षत्वाय भणति तत्र हि आत्मन: ज्ञानार्थं ऋषिपरिचर्या प्रोक्ता दिगम्बरेण यथा[2] -

"दूरे चरणप्रणाम: कृतसत्कारं च भोजनं मिष्टम् ।
ईर्ष्यामलं न कार्यं ऋषीणां दारान् रममाणानाम् ।।"

नाटकोक्ता ऋषिपरिचर्या नैव जैनदर्शनमनुकरोति । तत्र "भुंक्ते न केवली न स्त्री मोक्षमेति दिगम्बर:"[3] इत्यादिना स्पष्टरूपेण विरोधो दृश्यते । अत: नाटकोक्ता ऋषिपरिचर्या नैव दिगम्बरसिद्धान्तेन साम्यं भजतेपुनश्च परस्त्री-गमनदोषदूषितत्वादपि हेय: सिद्धान्तोऽयम् । नाटकेऽपि बौद्धजैनमतप्रतिपादकौ भिक्षुक्षपणकौ कापालिकेन सह मद्यस्त्रीरतौ स्वधर्मपरित्यक्तावभवताम् । एवं विवेकमार्गेबाधामुपस्थापयितुमेव नास्तिकदर्शनसिद्धान्ताविमौ परिकल्पितौ कविना इति प्रतीयते । नेष्टसिद्धान्तेन सह तयो: संगति: समन्वयं चेति साक्षाद् दृश्यते ।

मीमांसा - मीमांसादर्शनसिद्धान्तस्यापि नाटके स्तोकेन परिचयं प्राप्यते । नाटकस्य षष्ठाङ्के उपनिषद् दर्शनसिद्धान्तमिमं परिचाययति । उपनिषद्देव्या: "तत: कर्मकाण्डसहचरी मीमांसा मयादृष्टा -

विभिद्य कर्माण्यधिकारभाञ्जि
श्रुत्यादिभिश्चानुगता प्रमाणै: ।

---

1. तत्त्वार्थसूत्रम्, 1.1
2. प्रबोधचन्द्रोदय:, 3.6
3. विवेकविलास: - जिनदत्तसूरी, पृ.51

अङ्गैर्विचित्रैरभियोजयन्ती
प्राप्तोपदेशैरतिदेशिकैश्च ।।"[1]

अनया उक्त्या मीमांसा परिचीयते । यतो हि मीमांसायां श्रुतिलिङ्गादि-षट्प्रमाणानां विस्तृतं विवेचनमवलोक्यते । यथोक्तं जैमिनिसूत्रे[2] - "श्रुतिलिङ्ग-वाक्यप्रकरणस्थान-समाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् ।" पुनश्च मीमांसायां काम्यप्रतिषिद्धनैमित्तिककर्मणां प्राधान्यं प्रोक्तम् । स्वर्गा-वाप्तये काम्यकर्माणि, अनर्थकरकर्मपरित्यागार्थं प्रतिषिद्धकर्माणि सन्ध्या-श्राद्धादि-अहेतुककार्यनियमतः प्रतिपादनं नैमित्तिक कर्माणि कथ्यन्ते । एवं कर्मत्रयस्य फलं तु मोक्षप्राप्तिरेव । "स्वर्गकामो ज्योतिष्टोमेन यजेत्" निरतिशय-सुखस्यैव नामापरं स्वर्गमस्ति ।

"नेयं कर्मोपयुक्तं पुरुषमुपनयति किन्तु अकर्तारमभोक्तारमीश्वरम् । न चासावीश्वरः कर्मसूपयुज्यते" अनया कुमारिलस्वामिनः उक्त्या प्रतीयते यन्मी-मांसकः पुरुषं कर्तारं भोक्तारं च मनुते शास्त्रमिदं च वेदान्ताद् भिद्यते[3] । वेदान्तानुमोदितं सिद्धान्तश्च तत्रैव कुमारिलस्वामिना इत्थमुक्तः-

"एकः पश्यति चेष्टितानि जगतामन्यस्तु मोहान्धधी-
रेकः कर्मफलानि वाञ्छति ददात्यन्यस्तु तान्यर्थिने ।
एकः कर्मसु शिष्यते तनुभृतां शास्तेव देवो परो
निःसङ्गः पुरुषः क्रियासु स कथं कर्तेति संभाव्यते ।।"

न्यायवैशेषिकसांख्यदर्शनसिद्धान्तानामपि कविना सक्षिप्त उल्लेखः कृतः । यथा[4] -

"काचिद् भित्त्वाविशेषकल्पनपरा न्यायैः परातन्वती
वादं सच्छलजातिनिग्रहमयैर्जल्पं वितण्डामपि ।

---

1. प्रबोधचन्द्रोदयः, 6.18
2. जैमिनिसूत्रम्, 3.3.14
3. प्रबोधचन्द्रोदयः, 6.19
4. तत्रैव, 6.21

अन्या तु प्रकृतेर्विभज्यपुरुषस्योदाहरन्ती भिदां
तत्त्वानां गणनापरा महदहंकारादिसर्गक्रमैः ।।"

यद्येऽस्मिन् न्यायवैशेषिकसांख्यतत्त्वानां निर्देशोऽस्ति । प्रथमं तावत् "काचिद्द्वित्वविशेषकल्पनापरा" अनेन द्वित्वस्य "अयमेकः अयमेकः इतीमौ द्वौ" एतादृशापेक्षा-बुद्धिजन्यस्य द्वित्वस्य विशेषस्य - "अन्त्यो नित्यद्रव्यवृत्तिः" इति लक्षितस्य विशेषाख्यपञ्चमपदार्थस्य निरूपणे संसक्ता काचिद्वैशेषिकविद्या इति गृह्यते । पुनश्च "सच्छलजातिनिग्रहमयैर्जल्पं वितण्डामपि न्यायैः तन्वती परा" अनेन गौतमप्रणीतन्यायसिद्धान्तस्योल्लेखोऽस्ति । अत्र न्यायैरित्यनेन पञ्चावयवानुमानवाक्यैरिति, वादम् इत्यनेन तत्त्वबुभुत्सुकथाम् जल्पमित्यनेन च विजिगीषुकथामिति, वितण्डामित्यनेन च परपक्षदूषणावसानां कथामिति गृह्यते । पुनश्चोपनिषद्देव्या निजवेदान्तसिद्धान्तनिरूपणे "ताभिः परमाणुभ्यो विश्वमुत्पद्यते, निमित्तकारणमीश्वरः" इति कथनेनापि तासामुपर्युक्तसत्यमुद्घाट्यते ।

अत्रैव "अन्या तु प्रकृतेर्विभज्य•••इत्यत्र सांख्यसिद्धान्तस्योल्लेखः । यथाह-सांख्ये सर्गक्रमे, "प्रकृतेर्महान् महतोऽहंकारः, अहंकारात्पञ्चतन्मात्राणि, तन्मात्रेभ्यो भूतानि, भूतेभ्यो निखिलं जगत्"इति । पश्चाच्च तया उपनिषद्प्रति "कथमीश्वरमेव विकारिणं कृत्वा विनाशधर्मिणमुपपादयसि । ननु रे प्रधानाद्विश्वोत्पत्तिः" इति कथनेनापि तस्याः सांख्यत्वं परिपुष्यते । सांख्ये हि प्रकृतिपुरुषपरिकल्पनात् प्रधानाच्च विश्वोत्पत्तिः स्वीकारात् । अनेन स्पष्टं भवति यत्कविना वैशेषिक-न्याय-सांख्यस्य च सिद्धान्तानामुल्लेखमात्रमेवात्र कृतम् ।

<u>अद्वैतवेदान्तदर्शनम्</u> - कामं सन्तु प्रायः सर्वेषां दर्शनानां मतवादाः यत्र कुत्रापि नाटककृता निरूपिता न पुनस्तन्मतप्रतिपादने दृश्यते तस्य विचारभरः, पर्यवसीयते हि नाटकस्य विचारयात्रा अद्वैतोपपादने । सन्ति ये वेदान्तस्यप्रथिताः सिद्धान्ताः सर्वे वर्चितवरा सन्ति तत्र वैशद्येन । शब्दान्तरेषु कथयितुं शक्यते यथा बहवोऽम्बुवेगा नद्यः समुद्रमेवाभिमतन्ति तथैव कवेरस्यापि दर्शनानां मतनिरूपणयात्रा अपि शांकरवेदान्ते एव पर्यवसीति ।

शङ्कराचार्यमतानुसारं "बृहत्तमत्वाद् ब्रह्म"[1] अर्थात् ब्रह्मतत्त्वमेव बृहत्तरम्, अत एव ब्रह्मपदेनाभिधीयते । तच्च "परमार्थसत्यस्वरूपम्" ।[2] वेदान्तसारस्यादिमे श्लोके ब्रह्म "अखण्डसच्चिदानन्द, अवाङ्मनसागोचरम्, अखिलाधारस्वरूपश्च" इति कथितम् । तत्र सदिति पदेन तस्य त्रिकालाबाध्यत्वं चिदित्यनेन चैतन्यात्मकत्वम्, आनन्द इति विशेषणेन तस्य दुःखाभावरूपत्वम-भिव्यज्यते ।

प्रबोधचन्द्रोदयोक्तं ब्रह्मस्वरूपमुपर्युक्तब्रह्मस्वरूपेण नितरां साम्यं भजते यथा मङ्गलाचरणपद्येनैव -[3]

मध्याह्नार्क मरीचिकास्विव पयःपूरो यदज्ञानतः

. . . . . . . . . ।

. . . . . . . . . ।।

सान्द्रानन्दमुपास्महे तदमलं स्वात्मावबोधं महः ।।

पुनश्च - "चिरं चिदानन्दमयो निरञ्जनो जगत्प्रभुः"[4] इति विवेकोक्तावपि पूर्वोक्तमेव तत्वं समर्थयति । अपरत्र च मत्या उक्तरूपस्य समर्थनं विदधाति यथा - "सहजानन्दसुन्दरस्वभावो नित्यप्रकाशः प्रस्फुरत्सकलत्रिभुवनप्रचारः परमेश्वरः श्रूयते ।"[5] अनादिमाया वशाद् ब्रह्मैव कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमा-नित्वेनेहलोकपरलोकगामी व्यवहारिको जीव इत्युच्यते । परमेश्वरादभिन्नोऽपि जीवोऽनादिमायावशात् तथैव भिन्न इव भाति यथैकमपि सूर्यविम्बं तरङ्गवशाद् द्विधा प्रतीयते । भावोऽयमेव नाटके इत्थं व्यक्तः - यथा -[6]

असौ त्वदन्यो न सनातनः पुमान्
भवान्न देवात्पुरुषोत्तमात्परः ।

---

1. ब्रह्मसूत्रम् - शाङ्करभाष्यम्, 2.1
2. शाङ्करभाष्यम् - तैत्तिरीयोपनिषद्, 2.6
3. प्रबोधचन्द्रोदयः, 1.1
4. तत्रैव, 1.24
5. तत्रैव, पृ.40
6. तत्रैव, 6.25

स एष भिन्नस्त्वदनादिमायया
द्विधेव बिम्बं सलिले विवस्वतः ।।"

अपि च - "स्वयमपि यतो माया सङ्गात्सुमानितोविश्रुतः ।"[1]

अद्वैतवेदान्ते मोक्षार्थमात्मज्ञानमुपदिष्टम् । आत्मज्ञानात् मायाया अविद्याया वा विनाशो भविष्यति पुरुषश्चात्मस्वरूपमवबुध्य परमानन्दप्रदायकं मोक्षपदमधिगच्छति । "तमेव विद्वानतिमृत्युमेति नान्यःपन्था विद्यतेऽयनाय" इति श्रुतिवचनमप्येतदेवानुमोदयति । प्रबोधचन्द्रोदये च यथा -[2]

स्वभावलीनानि तमोमयानि
प्रकाशयेद्यो भुवनानि सप्त ।
तमेवविद्वानतिमृत्युमेति
नान्योऽस्ति पन्था भवमुक्तिः हेतुः ।

वेदान्तोक्तेश्वरः "अकर्ता अभोक्ता" चास्ति । वस्तुतः स्वर्गाहौं जीव एवेश्वरो न तदन्यः । यथोक्तम् -

"द्वौ तौ सुपर्णौ सयुजौ सखायौ
समानवृक्षं परिषस्वजाते
एकस्तयोः पिप्पलमत्ति पक्व-
मन्यस्त्वनश्नन्नभिचाकशीति ।।"

इति श्रुतिवचनं यथोक्तरूपेणोद्धृत्य शब्दान्तरेष्वपि प्रतिपादनं कृतमस्ययथा-[3]

"एकः पश्यति चेष्टितानि जगतामन्यस्तु मोहान्धधी-
रेकः कर्मफलानि वाञ्छति ददात्यन्यस्तु तान्यर्थिने ।
एकः कर्मसु शिष्यते तनुभृतां शास्तैव देवो परो
निस्सङ्गः पुरुषः क्रियासु स कथं कर्तेति सम्भाव्यते ।।"

यथा मालाऽज्ञाने शुक्त्यज्ञाने च सर्परजते उत्पद्येते, मालाशुक्त्योश्च

---

1. प्रबोधचन्द्रोदय, 1.25
2. तत्रैव, 6.17
3. तत्रैव, 6.19

ज्ञानादुभये विलीयेते तथैवात्मनोऽज्ञाने जगद् विवर्तते, आत्मज्ञानाद्विलीयते च । यथोक्तं प्रबोधचन्द्रोदये[1] -

भ्रमः शीतकरान्तरिक्षनगरस्वप्नेन्द्रजालादिवत्
कार्यं मेयमसत्यमेतदुदयध्वंसादियुक्तं जगत् ।
शुक्तौ रूप्यमिव स्रजीव भुजगः स्वात्मावबोधे हरा-
वज्ञाते प्रभवत्यथास्तमयते तत्त्वावबोधोदयात् ।। "

श्रुत्यनुमोदितं "तत्त्वमसि"[2] इति महावाक्यार्थो वेदान्तस्यास्य आधारभूतः । "अथातो ब्रह्मजिज्ञासा" इत्यनेनारब्धो ब्रह्मसूत्राख्यो ग्रन्थो "तत्त्वमसि" इत्यस्य व्याख्यायामेव पर्यवसति । श्रीकृष्णमिश्रस्य प्रबोधोदयोऽपि "तत्त्वमसी"तिमहावाक्यस्यार्थं बोधयित्वा एव जायते । नाटकानुसारं पदार्थविज्ञानाद्वाक्यार्थो नावगम्यते । तदवबोधोपायश्च नाटके यथा[3] -

एषोऽस्मीति विविच्य नेतिपदतश्चित्तेन सार्धं कृते
तत्त्वानां विलये चिदात्मनि परिज्ञाते त्वमर्थे पुनः ।
श्रुत्वा तत्त्वमसीति बाधितभवध्वान्तं तदात्मप्रभं
शान्तं ज्योतिरनन्तमन्तरुदितानन्दः समुद्योतते ।।

एवं महावाक्यार्थमवबुध्य पुरुषः आत्मनं परमेश्वरादभिन्न इवानुभवति । तस्य रागद्वेषादयो विनश्यन्ते परमं पदं प्राप्य च स ब्रह्मसायुज्यमाप्नोति । यथाह श्रीकृष्णमिश्रः[4] -

सङ्गं न केनचिदुपेत्य किमप्यपृच्छन्
गच्छन्नतर्कितफलं विदिशं दिशं वा ।
शान्तो व्यपेतशोककषायमोहः
स्वायंभुवो मुनिरहं भवितास्मि सद्यः ।।

---

1. प्रबोधचन्द्रोदयम् - 6.22
2. छान्दोग्योपनिषद्, 6.8.7
3. प्रबोधचन्द्रोदयम् - 6.27
4. तत्रैव, 6.31

एवं ज्ञायते यत्कविना अद्वैत वेदान्तस्य सिद्धान्तमवलम्ब्यैव नाटकमिदं प्रणीतम् । तद्व्याजेन प्रतिपादितानां सिद्धान्तानां पर्यवसानं अद्वैत-वेदान्ते एव भवति । आद्योपान्तं नाटके सिद्धान्तस्यास्य विश्लेषणं दृश्यते । इति ।

= = = = = =

# पञ्चमोऽध्याय:

## प्रबोधचन्द्रोदयस्य मनोवैज्ञानिकदृष्टि:


क§ मनोविज्ञानम्

1§ मनोविज्ञानस्य लक्षणम् §2§ मनोविज्ञानस्यप्रयोजनम्

3§ मनोविज्ञानस्य विकासक्रम: । §4§ मनोविज्ञानस्य शाखा: ।

ख§ मन:-स्वरूपम्

मन:-शरीरयो: सम्बन्ध:

ग§ ज्ञानात्मकमनोवृत्तय:

1§ ज्ञानसामान्यनिरूपणम् §2§ ज्ञानस्य प्रकारा:

घ§ भावात्मकमनोवृत्तय: -

1§ सवेगा: §2§ भावना

ङ• § प्रयत्नात्मक मनोवृत्तय: -

1§ सहजाप्रतिक्रिया: §2§ उद्वेगात्मका: प्रतिक्रिया:

3§ मूलप्रवृत्त्यात्मका: प्रतिक्रिया:

च§ मनोविज्ञानं दर्शनं च

छ§ प्रबोधचन्द्रोदयस्य मनोवैज्ञानिकता ।


= = = = = =

मनोविज्ञानम् -

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मेमनः शिवसङ्कल्पमस्तु ।।
सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीषुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मेमनः शिवसङ्कल्पमस्तु ।।[1]

मानवजीवनस्य नियन्त्रकेषु मनसः स्थानं प्रमुखमिति ऋषिभिश्चिरमेवा--म्नातम् । मनसोगतिर्विचित्रा । मनोभेदेनैव व्यक्तिभेदो दृश्यते । मन एव मनुष्यस्य सर्वकर्मणां नियामकम् । मनसैव जगत् स्वर्गरूपे नरकरूपे वा परिवर्तितुं शक्यम् । अत एवोक्तम् ऋग्वेदेऽपि -

समानी व आकूतिः समानी हृदयानि वः ।
समानमस्तु वो मनः .................।।

उपनिषत्स्वपि मनसो महिमा गीयते । "यन्मनसा न मनुते येनाहुर्मनो मतम्" इत्यादिश्रुतिभिर्मनसः कार्यक्षेत्रं, शक्तिसीमानं, लयोपायाश्चोपवर्ण्याद्भिर्मनसः रहस्यमुद्घाटितम् । भारतीयसाहित्य वाङ्मये पदार्थ-तत्त्व-निरूपणे मनः--सम्बन्धिना बुद्धिचित्ताहङ्काराणां, प्रकृति पुरुषयोः, आत्मपरमात्मनोः, कार्यकारणयोः, अनुभवस्मृति-प्रमाणां च विषयेऽपि सूक्ष्मावलोकनं विधाय केचित् सिद्धान्ताः प्रतिपादिताः । तानेव अधिकृत्य पश्चाद्वर्तिभिर्मनीषिभिः मानसशास्त्रविषयकं साहित्यं विहितम् ।

१।१ मनोविज्ञानस्य लक्षणम् -

मनसो विज्ञानं मनोविज्ञानं कथ्यते । यस्मिन् शास्त्रे मनसो विचाराणां व्यवहाराणाञ्च विवेचनं भवति तन्मनःशास्त्रमित्यभिधीयते । मानवव्यवहाराणां कारणं मन एव । मानसिक-विचारा एव मानव-क्रियाभिः प्रकाश्यन्ते । मनसि

---

1. यजुर्वेद, 34·1-6.

प्रतिक्षणं विचाराः कामाश्चोत्पद्यन्ते । तेभ्यः विचारेभ्यः कामेभ्यश्च क्रियोत्पत्तिर्भवति । एतेषां व्यक्ताव्यक्तमनः-प्रेरितानां मानवव्यापाराणां वैज्ञानिकरीत्याऽध्ययनमेव मनोविज्ञानम् । आङ्गलभाषायां "सायकालोजी" ( Psychology ) शब्दो मनोविज्ञान-पर्यायवाची अस्ति । "सायकालोजी" इति शब्दस्य सर्वप्रथमः प्रयोगः सप्तदशशताब्दामभवत् । इतः पूर्वं षोडशशताब्दां "साइकोलाजिया"[2] इति शब्दस्य प्रचलनमासीत् । "सायकालोजी" शब्दस्य निष्पत्तिः "साइके" ( Psyche ) "लोगस्" ( Logos ) इत्यनयोः ग्रीकभाषाशब्दयोर्योगेन भवति । तत्र "साइके" इति शब्दस्यार्थः "आत्मा" "लोगस्" इत्यस्य चार्थो "विचार" इति । अनेन शब्दस्यास्यार्थः "आत्मविचारः" उत वा "आत्मविद्या" इति निश्चीयते । पाश्चात्येष्वपि पुरा-काले अस्यार्थः "आत्मविज्ञानम्" इति प्रयुज्यते स्म । आत्मनो विज्ञानस्वरूपत्वात्तदध्ययने काठिन्यमनुभूतम् । अतः परवर्तिभिः विचारकैरात्मानं विहाय तत्स्थाने आत्मनो व्यक्तगुणस्य चेतनाया अध्ययनं प्रारब्धम् । पुनश्च चेतनाया अपि निश्चितस्वरूप-निरूपणाशक्यत्वाच्चेतनमनसो व्यवहाराणामध्ययनमारब्धम् । मनःशास्त्रिभिराधुनिकमनोवैज्ञानिकैश्च मनसश्चेतनाचेतनरूपं भेदद्वयं कृतम् । एवं चेतनाचेतनरूपमनसो व्यापाराणां वैज्ञानिकरीत्याऽध्ययनं मनोविज्ञानस्य विवेच्यो विषयोऽस्ति । आन्तरिकबाह्यरूप-मानसिक-व्यापारा आन्तरिक-बाह्यः-परोक्ष-प्रत्यक्ष-पदैरपि ज्ञायन्ते । परोक्ष-मनसो व्यापाराणामध्ययनमनुभूत्या, प्रत्यक्षाणां च निरीक्षणेन क्रियते । एवं चेतनाचेतनयोः मनसः प्रत्यक्षाणां परोक्षाणां च व्यवहाराणा-मध्ययनं मनोविज्ञानं निगद्यते ।

(2) मनोविज्ञानस्य प्रयोजनम् -

"परिवर्तनशीलेयं प्रकृतिः"। तत्र हि विचित्ररूपाः खलु चित्तवृत्तयः" । परिवर्तनेऽस्मिन् नैव मानव उदासीनद्रष्टा भवति अपि तु स स्वयं परिवर्तनं विदधाति । मानवजीवने बाह्यपरिस्थितीनां प्रभावस्तु स्वभाविक एव

---

1. द्रष्टव्य - वेवस्टर्स न्यू इन्टरनेशनल डिक्शनरी - द्वितीय संस्करण ।
2. तत्रैव

परिस्थितयस्तु तं परिवर्तयितुं तस्य शक्तिसन्तुलनं च नाशयितुं चेष्टन्ते । मानवः सततं शक्तिसन्तुलनं स्थिरीकर्तुं प्रयतते तत्कृते सः अनेकाः व्यक्ता अव्यक्ताश्च चेष्टाः करोति । मनोविज्ञाने एतासां चेष्टानामध्ययनं विधीयते । अद्यत्वे पदार्थविज्ञानेनास्माकं ज्ञानं बाह्यवस्तुविषये उपचीयमानं दृश्यते, तथापि मनश्चेष्टा स्वभावविषयकज्ञानमद्याप्यपूर्णमिव । मनोविज्ञानं मानवप्रकृति-चेष्टास्वभावविषयकज्ञानोपार्जनस्य साधनं तासु नियन्त्रणमनिवार्यं यच्च मानसिकक्रियाणां सम्यग्ज्ञानेन विना नैव सम्भाव्यते । मनोवेगानां नियन्त्रणाय तेषां गूढानि कारणानि ज्ञातव्यानि । प्रातरुत्थाय भ्रमणार्थं गन्तुं कामयमानोऽपि जनः सूर्योदयानन्तरं यावच्छेते । परनिन्दाविरतिं चेष्टमानोऽपि प्राप्तावसरे परनिन्दामाचरति । दुःखार्ताय किञ्चिद्दातुमिच्छन्नपि न शक्नोति दातुं केनाप्यन्तःस्थितेन वार्यमाण इव । सर्वस्यास्य कारणमन्तर्मनस्यन्वेष्टव्यम्, तच्च मनोविज्ञानेनैव सम्भाव्यते । अनेन जनः स्वचेष्टानां सुनियन्त्रणमात्मशक्ति-विकासं च कर्तुं शक्नोति । एवं सुघटितं व्यक्तित्वं मनोविज्ञानेनैव शक्यं भवति ।

मनोविज्ञानेनात्मविषयकज्ञानोपार्जनवत् परविषयकं ज्ञानमप्युपार्जयितुं शक्यते । यथोक्तं यन्मानवस्वभावचेष्टाध्ययनमेव मनोविज्ञानस्योद्देश्यम् । परमनोऽध्ययनेन व्यवहारदोषा नश्यन्ति । कस्यां परिस्थित्यां को मानवः कथं व्यवहरिष्यति ? कथं च व्यवहर्तव्यम् ? इत्यादि सर्वमनेनावगम्यते । तदवगमनेन जनाः कुशलाः, राजनीतिज्ञाः समाजसेविनश्च भवन्ति । अनेन हि शिक्षाशास्त्रिणः स्वकार्यमतीव कौशल्येन सम्पादयितुं शक्नुवन्ति । बालानां प्रकृतिमविज्ञाय न हि कोऽपि तेषां विकासं निर्दोषं कर्तुं प्रभवति । शिक्षकोऽविदितबालस्वभावो नैव स्वकीयं पाठं रुचिकरं विधातुं क्षमते । बालमनोज्ञाः शिक्षका अत्यल्पायासेन यच्छिक्षयन्ति न तस्य दशगुणेनापि यत्नेन बालमनोऽनभिज्ञास्तच्छिक्षयितुं प्रभवति । बालानां रुचयो बुद्धयश्च भिन्ना भवन्ति, न हि एक एव विषयः सर्वेभ्यः रोचते । कश्चिद् गणिते सफलो भवति कश्चिद्यन्त्रविद्यायाम् । एवमेव सर्वेषां बुद्धिरपि नैव समा भवति । एवं बालानां प्रकृतिं बुद्धिं च सम्यक्-परिज्ञाय यः शिक्षयति स एव सफलो भवति शिक्षकः ।

स्वास्थ्यलाभसहायकं खलु मनोविज्ञानम् । "अनिन्द्रोन्मादात्मघातादि-दोषाः कथमुत्पद्यन्ते ? कथं वा तेषां निराकरणं सम्भवति ? मनोरोगाणां किं कारणम् ? क्वच तेषां शरीरे प्रभावो भवति ? इति सर्वं मनोविज्ञानेन सरलतया ज्ञातुं शक्यते । राजनीतिज्ञाः कलाकाराश्च मनोविज्ञानेन स्वक्रियासु निपुणा भवन्ति । एकाकी मानवः एकान्ते कथं व्यवहरति जनसमुदाये च कीदृशम् ? का कलाकृतिः, किं काव्यम्, कीदृशं वा भाषणं कस्य मनसि कीदृशं प्रभावमुत्पादयतीत्यवबुध्य कूटनीतिज्ञा राजनीतिकार्येषु साफल्यम्, कलाकाराश्च स्वकृतिभ्यः लोके ख्यातिं कीर्तिं समादरं च लभन्ते । एवं मनोविज्ञानेन तदवबोधनपूर्वकं सम्यग् विधीयमानं कार्यजातं रुचिरं सरलं च सञ्जायते । मनोविज्ञानस्य प्रयोगो हि कार्ये प्रीतिमुत्पादयति साफल्यं द्विगुणयति, लोकमनु-रञ्जयति प्रचुरामुपयोगितां चाभिवर्धयति । तस्माद् मनोविज्ञानाध्ययनमुपयोगिता प्रयोजनं वा सर्वोपरि इत्यत्र नैवशङ्कालेशोऽपि । किं बहुना मनोविज्ञानस्याध्य-यनास्पृष्टं नैवास्माकं वैयक्तिकस्य सामाजिकस्य वा जीवनस्य किमप्यङ्गमवलोक्यते अनेनापि मनोविज्ञानाध्ययनाववोधनं च परमाय कल्याणाय भवति इत्यत्र नैव कस्यचिदपि विप्रतिपत्तिः ।

{3} <u>मनोविज्ञानस्य विकासक्रमः -</u>

अद्यत्वे प्रयुज्यमानस्य "मनोविज्ञान" इति शब्दस्य स एवार्थोऽयं 'आङ्गल-भाषायां प्रयुज्यमानस्य "सायकालोजी" इति शब्दस्य । यस्यार्थः आत्मविषयक-सल्लापः' इति तु पूर्वमेवोक्तम् । अतः प्राचीनकाले पाश्चात्येषु "सायकालोजी" इत्यस्य विषये आत्मनः स्वरूप-गत्युत्पत्ति-निलयादिषु विचारः क्रियते स्म । तेनैषो विषय आध्यात्मिक शास्त्रान्तर्गत इति तात्कालिकानां मतिरासीत्, ते च "मननचिन्तनादिनाऽन्तर्निरीक्षणेन चात्मनः स्वरूपं विज्ञेयम्" इति स्वीकुर्वन्तिस्म । एवं तदानीं मानवव्यवहाराध्ययनस्यावश्यकता न जाता । भारतेऽपि भारतीया दार्शनिकात्मनो मनसो वा विषये विपुलविचारः कृतवन्तः । आत्मनो विषये अनेके दर्शनग्रन्था निर्मिताः । उपनिषदारभ्यानेकेषां शास्त्राणां रचना जाता । पाश्चात्यैरिव भारतीयैरात्मतत्त्वज्ञानार्थं चिन्तनमननात्मनिरीक्षणपद्धतिरङ्गीकृता ।

कालेन गच्छता विज्ञानस्य प्रभावादात्मतत्त्वविषये पाश्चात्यविदुषां संशयः शङ्का वा समुत्पन्ना । तदा सन्दिग्धमात्मानं विहाय मनस्तत्त्वमेवाध्ययन-विषयतामुपगतम् । आत्मतत्त्वापेक्षया मनस्तत्त्वं स्थूलतरं प्रचुरव्यवहारविषयं चेति येन विद्वांसः सन्तोषमनुभवन्तः परं मनसोऽपि आत्मतत्त्ववदप्रत्यक्षत्वमेव, अतस्तदपहाय चेतनामात्रावलम्बिनः संवृत्ताः पाश्चात्यविद्वांसः । चेतनाया अध्ययनमेव तदा मनोविज्ञानस्य विषयोऽभ्युपगतः । चेतना हि नैवलोकसाधारणी, चेतनावृत्तिस्तु विचित्ररूपा । कस्मैश्चित् वसन्तर्तु रोचते अन्यस्मै च ग्रीष्मर्तुः; कश्चिन्मालूरफलाय {विल्वफलाय} स्पृहयति कश्चिच्च आम्रफलाय एवं व्यक्ति-भेदेन चेतनाऽपि भिद्यते । एवं चेतनाऽपि वैज्ञानिकाध्ययनानर्हत्वान्मनोविज्ञान-क्षेत्राद् बहिर्गता । तत्स्थानं च व्यवहारेण गृहीतः, मनोवैज्ञानिकैश्च मानव-व्यवहाराध्ययनं प्रारब्धम् । तथा च "व्यवहारवाद" इति सम्प्रदायस्य प्रचलनमभूत् । सम्प्रदायेऽस्मिन् मनोव्यापाराध्ययनत्वान्मनोविज्ञानं शरीर-विज्ञानस्य कक्षामध्यास्ते । वाट्सनमहोदयः सम्प्रदायस्यास्य प्रवर्तकआसीत् । तन्मतानुसारं व्यवहाराध्ययनार्थं वस्तुनिष्ठो विधिराश्रणीया न त्वात्मदर्शनरूपा । व्यवहारवादिनो मनोविज्ञानं विशुद्धजीवविज्ञानं मन्यन्ते न त्वभिनवविज्ञानम् । तन्मतेऽन्तर्निरीक्षणं भ्रामकमेव । पदार्थरसायनादीनामिव मनोविज्ञानस्यापि विधिर्निरीक्षणं प्रयोगश्चैव । वाट्सनमहोदयेन संवेदनानां सत्ता अपि निराकृता स परिवेशवादी, परिवेषमानवः पूर्णतया शासितो भवति इति मन्यते । एवं व्यवहारवादिभिर्मनोविज्ञानस्याध्ययने व्यवहाराध्ययनस्य महत्त्वं प्रतिपादितम् ।

तदनन्तरमचेतनमनोवादिनामपि क्षेत्रेऽस्मिन् एकोऽभिनव सम्प्रदाय आविर्भूतोऽवलोक्यते । फ्रांसदेशीयेन सिगमण्ड-फ्रायडमहोदयेन मनोविज्ञानस्य कार्यकारणशृङ्खलायां अचेतनस्य मनसः समावेशं कृत्वा चिन्तनस्याभिनवं द्वार-मुद्घाटितम् । व्यक्तादपि मनसोऽव्यक्तमचेतनं वा मनो महत्त्वपूर्णं प्रबलतरं चेति तेषामभिमतम् । स "मनः सक्रियम्"[1] इति निरूपयति । मनसः कार्यं चेष्टात्मकम्, अभोगात्मकं वा न तु ज्ञानात्मकम् । वयं यत्किमपि कार्यं विचारयामः,

---

1. History of Psychology, Peters, R.S. Bretts.

कथयाम: अथवा कुर्मस्तत्र प्रायशोऽचेतनमव्यक्तं वा मन: प्रयोजकम् । 'इदमकार्यमनुचितं च, न पुनरेतत्करिष्यामि' इति कृतनिश्चया अपि समुत्पन्ने प्रसङ्गेऽवशा इव पुनस्तदेवानुतिष्ठन्ति, इति अनुभवगोचर एव । तत्र हि इदमचेतनमव्यक्तं वा मन एव प्रयोजकम् ।

"मन: संवेदनाप्रत्यक्षविचारादिबौद्धिकप्रक्रियाणां समष्टिर्नास्ति नहि तद्विचारसंवेदनादिधर्मयुक्त आध्यात्मिक पदार्थ: । तत्तु गम्भीरतरङ्गित सागर इव । तस्य रहस्यानि चेतनातर्कयो: शान्तेरस्तरे नावगम्यन्ते" इति फ्रायडोक्ति:[1] । फ्रायडमहोदय: मनश्चेतनम्, पूर्वचेतनम्, अचेतनम् चेति तिस्रोऽवस्था: स्वीकरोति । अयमेव सम्प्रदायो "नूतनमनोविज्ञानम्" "मनोविश्लेषणवादश्चेति नाम्ना प्रथते ।

मनोविज्ञानस्य विकासपरम्परायां ग्रीकपरम्पराया महत्त्वपूर्णं स्थानमस्ति । परम्परेयं चतुर्षु विभागेषु विभज्यते । प्रारम्भिकग्रीकपरम्परायां दर्शनं प्रकृतिवादी आसीत् । यस्यां दर्शनसाहित्यस्योत्थानमभूत् या च सोफिस्टों महाभागस्य प्रागकालिकी परम्पराऽवगम्यते । कालश्च पञ्चमशताब्दीं यावत् स्वीक्रियते ।[2]

द्वितीयो भाग: सोफिस्टों सुकरातमहाभागयो: कालीन् आसीत् । अनयो: सुकरात महोदयो मान्य: श्रेष्ठश्च विद्वान् आसीत् । येन नीतिशास्त्रमनोविज्ञानस्योपदेश: प्रदत्त: ।

पश्चाच्च तृतीय भागे प्लेटो-अरस्तूमहोदययो: कालो गण्यते । चतुर्थे च अरस्तूत्तरकाल: स्वीक्रियते ।[3]

अस्यां परम्परायां प्लेटो-अरस्तू च विशेषत उल्लेखनीयो आस्ताम् । अनयो: काले दर्शनमनोविज्ञानयो मिथ: सम्बन्धविश्लेषणं विशेषतोऽभूत् । तत्कालिकं दर्शनं ज्ञाननियमान्वेषणादालोचनात्मकम्, सत्यानुसन्धाने तर्कसामर्थ्यस्वीकारात् तर्कतावादी, मानवाध्ययनविषयत्वात् मानवतावादी अपि च आध्यात्मिकं च

---

1. Historical Introduction to Modern Psychology, Murphy, G.
2. History of Experimental Psychology, Boringr, G.
3. मनोविज्ञान का इतिहास, डा॰ जे॰डी॰ शर्मा, पृ॰101॰

तथ्य निरूपणे प्राधान्यत्व स्वीकारात् एवं चतुर्थां स्वीकर्तुं शक्यते ।[1]

सुकरातशिष्य: प्लेटो एथेन्साभिधाने स्थाने जनिमलभत् पश्चात् अरस्तु-डिमास्थनीज-लायकरगस मनोवैज्ञानिका अस्य शिष्यत्वं स्वीकुर्वन् । प्लेटोमतानुसारं आत्मा अजर: अमरश्च । शरीरगतिहेतुत्वेन तेन आत्मा स्वीकृत: । यश्च विवेकवान् विवेकहीनश्चेतिद्विधा विभज्यते । विवेकवान् आत्मा शिरसि निवसति । विवेकहीन-आत्मन: मनसो वा उच्चभागो हृदि अधोभागश्च तृष्णाक्षुधावासना-धिष्ठाने तिष्ठति ।

इच्छा-संवेग-ज्ञान रूपेण तेन व्यवहारस्य प्रतिक्रमाम्नातम् । तेन मन: शरीरयो द्वैतभावं स्थापितमुभयोश्च पृथक्-पृथक् सत्ता स्वीकृता । भौतिकोवपु: नश्वरो मनश्चाजरमनश्वरमस्ति । संक्षिप्तत: प्लेटो महाभाग: तर्कनावादी ( Rationalist ) आसीत् ।[2]

अरस्तूमहोदयो व्यवहारवादी आसीत् । तदनुसारं ज्ञानरहस्यहेतुना-मवबोधनमेव वास्तविकं ज्ञानम् । इयमेव तत्त्वमीमांसा ( Metaphysics ) इति कथ्यते । मनोविज्ञानक्षेत्रेऽस्यापूर्वं महत्त्वपूर्णं च योगोऽस्सीत् । प्रतिभावान् अरस्तू भौतिकविज्ञानस्य, जैवविज्ञानस्य मनोविज्ञानस्य तत्त्वमीमांसाया-श्च प्रकाण्डपण्डित आसीत् । विलडरेण्टमहाभागेन स्वकीये 'Story of Philosophy' नाम्निग्रन्थे अरस्तु स्वयं ग्रीकस्य "एनसाईक्लोपेडिया ब्रिटैनिका" इति कथितम् ।

मनोविज्ञानक्षेत्रे युंगमहाभागोऽप्युल्लेखनीय: । य: "अन्तरराष्ट्रीय-मनोगाहनीयपरिषद:"[3] प्रथमोऽध्यक्ष आसीत् । परिषद: स्थापना फ्रायड-महाभागेन विहिता 1910 तमे वर्षे । युंग महोदयानुसारं चेतनं उत वा चेतना मनोविज्ञानार्थं नैव कल्पनार्हाणि वस्तुनि प्रत्युत प्रतिकूल विषयोऽयम् । निश्चयवाद: फ्रायडमहोदयस्य ऐडलरस्य च प्रयोजनवादो युंगानुमोदितो आस्ताम् ।

---

1. History of Philosophy, Thilly, F.A., p.18.
2. तत्रैव
3. Carl Gustav Jung (International Psychoanalytic Association.

1912 ई॰ तमे वर्षे युंगेन कामशक्तिविषये निजमतं 'The Psychology of the unconscious' अभिधानेपुस्तके प्रस्तुतम् । तदनुसारं कामशक्तिः जीवनस्य "सामान्यउर्जा"[1] एवास्ति । तस्य प्रमुखसिद्धान्तेषु अभिमुखनियमः[2] उल्लेखनीयः खलु । सर्जनापक्षयो निर्माणविनाशौ, निद्राविवरणौ चैव जीवनमस्ति । एतदेव "ब्रह्माण्डनियम"[3] विकासस्य "न्यायनियम"[4] इति चापि कथ्यते । प्राचीन ग्रीक-दार्शनिको 'हेरोडोटस' आदर्शवादी जर्मनदार्शनिको 'हीगेल' महाभागश्च अपि ब्रह्माण्डनियमं स्वीकृतवन्तौ । चेतन-चेतक चेतनम्-अचेतनं चेति रूपेण युंगेन मनसो भागत्रयं स्वीकृतम् ।

मनोविज्ञानक्षेत्रे मैक्डूगल महाभागेन प्रयोगवादस्य स्थापना विहिता । तेन 1908 तमे वर्षे द्वादश मूलप्रवृत्तयः वर्णिताः पुनश्च 1932 तमे वर्षे तेनैव सप्तदशमूलप्रवृत्तयः उल्लिखिताः । सारतोऽस्य प्रयोजनवादः क्रियावादस्यैव व्युत्पन्नः आसीत् ।

एवं मनोविज्ञानक्षेत्रे फ्रायड्-युंग-अरस्तु-सुकरातदयो विशेषत उल्लेखनीयाः ।

§4§ मनोविज्ञानस्य-शाखाः -

अद्यत्वे मनोविज्ञानस्य विषयोऽतिव्यापकः समृद्धश्च संवृत्तः । पाश्चात्य-देशेषु मनोविज्ञानविषयकं व्यापकान्वेषणं जातम् । परिणामतः जीवनस्य कोऽपि तादृशो भागो नैव दृश्यते अद्यत्वेयत्रमनोविज्ञानस्य गतिरपेक्षिता न भवेत् । अनेनास्य बहवो विभागा जाताः प्रचुराः शाखाः प्रशाखाश्च विविच्यमाना दृश्यन्ते तासु सामान्यमनोविज्ञानं, प्रयुक्तमनोविज्ञानं, विक्षिप्तमनोविज्ञानं चेति-तिस्रः शाखा मुख्याः । तासामपि प्रशाखाणां बाहुल्यमवलोक्यते अत्र संक्षिप्ततस्तद्विषये किमप्युच्यते ।

---

1. Libido is the general energy of life.
2. Principals of opposites.
3. Cosmic principle.
4. Dialectic Law of Development.

क) <u>वैयक्तिकं मनोविज्ञानम्</u>[1] - सामान्यमनोविज्ञानस्याद्यं रूपमेतद् । पुरा विद्वांसोऽन्तर्दर्शनात्मकेन प्रधानेन विधिना स्वमनोवृत्तीनामध्ययनं विश्लेषणं च कुर्वन्तिस्म । मनोविज्ञानमिदं मानवमध्ये व्यक्तिभेदं जनयति । भवन्ति केचन् संवेगप्रधाना अन्ये विचारप्रधाना, इतरे च कर्मप्रधाना कर्मशीला वा । केचन् बहिर्मुखवृत्तयो भवन्ति अन्ये चान्तर्मुखवृत्तयः अपरे चोभयवृत्तयः । एवं हि सर्वस्य अपि जातेर्जनसमूहस्य च केचिद् विशिष्टा भवन्ति । वैयक्तिकं मनोविज्ञानं व्यक्तीनां जातीनां अलौकिकप्रतिभावतां मूढानां च मनोवृत्तेरध्ययने साहाय्यं विदधाति । आत्मसाम्येन तुलनाविधिमाश्रित्य परेषामपि वृत्तीनां वैयक्तिक-मध्ययनं पूर्वत एवानुवृत्तं दृश्यते । अत एव विज्ञानमिदं विश्लेषणात्मकं मनोविज्ञानमिति पदेन व्यवह्रियते ।

ख) <u>सामाजिकं मनोविज्ञानम्</u>[2] - सामान्यमनोविज्ञानस्यैवापरं रूपं सामाजिकमनोविज्ञानम् । मानवस्य व्यक्तिरूपेण समाजरूपेण च व्यवहारभेदो भवत्येव । यथा कश्चित् समाजे व्यवहरति नैव तथैकाकित्वे । यः पुरुषो वैयक्तिरूपेणातीव शिष्टोऽस्ति स एव कदाचित् समवेतानां विद्रोहिणामुपद्रव-कारिणां समुदाये लोकान्तरवदशिष्टमभद्रं च व्यवहरति । यतो हि सामुदायिकं मनो वैयक्तिकान्मनसो भिन्नमास्ते । ये नियमाः सामाजिकानां सम्बन्धानां नीतिव्यवहाराणां चानुशासका भवन्ति तेषामन्वेषणं समाजमनोविज्ञानं करोति । विविधपरीक्षणैर्ज्ञायते यज्जनसमुदायः पृथक्जनापेक्षयाऽल्पविचारवान् चञ्चलः अतिसंवेगशीलः, अनुत्तरदायित्ववांश्च भवति । समाजमनोविज्ञानमस्य कारणानां नियमानां चानुशीलनं विदधाति । लोकमनोविज्ञानमपि समाजमनोविज्ञानस्याङ्गम् । निरीक्षणमेव सामाजिकमनोविज्ञानस्य प्रधानाध्ययनसाधनम् ।

ग) <u>प्रयोगात्मकं मनोविज्ञानम्</u>[3] - आधुनिके युगे शिक्षामनोविज्ञानस्य ~~प्रयोगात्मकमनोविज्ञानस्य बहु महत्त्वपूर्णं स्थानमस्ति । शिक्षकाः शिक्षामनोविज्ञानस्य~~

---

1. Individual Psychology.
2. Social Psychology.
3. Experimental Psychology.

प्रयोगमनोविज्ञानस्य वा महत्त्वपूर्णं स्थानमस्ति । शिक्षका: शिक्षामनोविज्ञानस्य सरणिमाश्रित्यातीव कौशलेन स्वकार्यं निष्पादयितुं सक्षमा भवन्ति । शाखेयं परीक्षणप्रधाना वर्तते । वैयक्तिकसामाजिकमनोविज्ञानयो निरीक्षणप्राधान्यं भवति परं शिक्षामनोविज्ञाने परीक्षणस्य प्राधान्यं वर्तते । अस्मिन् बालकस्य-निरीक्षकस्य शोधकर्तुश्च बुद्धेः स्मरणशक्तेश्च, अनुसन्धाने प्रयोगा अनुष्ठीयन्ते प्रयोगसाहाय्येन मनःशास्त्रिणः पशुबालककिशोरवृद्धादीनां च मनोवृत्तेः परीक्षणं तद्विषयकमन्वेषणं च कुर्वन्ति एवं प्रयोगात्मकमनोविज्ञानं चेतनाया गुणात्मकं परिणामात्मकं च विश्लेषणं निष्पादयति । प्रयोगैर्मानवस्य बुद्धिकौशल्यं, व्यक्तित्वपरीक्षणं च सम्भवति । अद्यत्वे सर्वशास्त्राणां प्रवृत्तिः प्रयोगात्मिका जाता । विचारकाः प्रयोगैः परीक्षणं विधाय एव सत्यप्रतिपादने दत्तचित्ता भवन्ति । मनोविज्ञानस्यास्य महत्ता उपादेयता च प्रतिदिनं वर्धते एव ।

घ) <u>बालमनोविज्ञानम्</u>[1] - मनोविज्ञानस्यास्य बालानां मनोविकाराध्ययनमेव विषयः । यथा शिक्षामनोविज्ञानं शिक्षकानां कृते अत्यावश्यकं तथैव बालानां लालन-पालनार्थं पितृभ्यामपरिहार्यमिदं मनोविज्ञानम् । हर्वटस्पेन्सरमहोदयेन समेषां कृते अस्यपरिज्ञानमपरिहार्यं प्रतिपादितम् । अनेन बालानां संवेदना-प्रत्यक्षीकरण-स्मृति-कल्पनादीनां ज्ञानं प्राप्यते बालस्य काः सहजप्रवृत्तयः ? किं स्वरूपा-बुद्धिस्तेषां ? कथं वा बालो शिक्षते ? इत्येतेषां विवेचनं बालमनोविज्ञाने भवति। अस्मिन् बालमनः अन्तःनिरीक्षणेन प्रयोगेन, स्वातन्त्र्येण च संक्ष्यते । अनेनास्य यथावदुपयोगेन बालानां लालने पालने च महानुपकारो भवति इदानीं बाल-मनोविज्ञानस्य साहाय्येन बालस्वभावस्यावधारणं सुकरं जातम् ।

ङ) <u>विकृत मनोविज्ञानम्</u>[2] - मनोविज्ञानस्यान्याशाखया असाधारणजनानां मनोस्थितेरध्ययनं क्रियते । केचन जनाः भ्रम-विभ्रम-दिवास्वप्न-सम्मोहन-मूर्च्छादिवशगता सामान्यवदाचरन्ति मनःस्थितिश्च तेषामसामान्या भवति ।

---

1. Child Psychology.
2. Abnormal Psychology.

संवेगानवस्थया मनसि दोषा जायन्ते येनानभिव्यक्तं भवति व्यक्तित्वम् । काश्चिन्मनोविकृतयोऽस्थायिन्य:, काश्चिच्च स्थायिन्यो भवन्ति । विकृतमनोविज्ञानं मनोविकाराणां कारणान्यन्वेषयति, तान्निराकारोपायांश्च प्रतिपादयति । पूर्वापेक्षया अद्यत्वे मनोविकारग्रस्तानां सङ्ख्या अत्यधिका दृश्यते जीवनसङ्घर्षबाहुल्यात् । अत: साम्प्रतं विकृतमनोविज्ञानस्यापेक्षापि पूर्वकालापेक्षया अधिका वर्तते ।

च) <u>शारीरिकं मनोविज्ञानम्</u>[1] - अस्माकं मनस: प्रक्रिया शरीरेणैव सम्बद्धाऽस्ति । शरीरकार्यै: शारीरिकचेष्टाभिर्वा मानसिकी प्रतिक्रिया द्योत्यते । शरीराङ्गविशेषजन्यव्यापाराणां शारीरिकप्रक्रियाणां वाऽध्ययनं शरीरमनोविज्ञानस्य कार्यम् । मनसो व्यापाराणां चाध्ययनं मनोविज्ञानमिदम् । मानसिकशारीरिकप्रक्रियासम्बन्धविश्लेषणप्रधानात्वादिदं शारीरिकमनोविज्ञानमुच्यते ।

छ) <u>व्यावहारिकं मनोविज्ञानम्</u>[2] - व्यवहारक्षेत्रानुसारेण व्यावहारिकमनोविज्ञानस्यानेका उपशाखा अद्यत्वे प्रसिद्धा: । तत्र हि शिक्षामनोविज्ञानम्, व्यापारमनोविज्ञानम्, औद्योगिकमनोविज्ञानम्, विधिमनोविज्ञानम्, चिकित्सामनोविज्ञानम्। चिकित्सामनोविज्ञानं च साम्प्रतं शास्त्ररूपतां प्राप्तम् । मनोविज्ञानविषयकैरनुसन्धानैरन्यैर्वा प्रयोगैर्ये नियमा निर्धारिता, मनोविज्ञैस्तेषामुपयोगो जीवनेऽपि विधीयते । तेषु हि शिक्षामनोविज्ञानस्योपयोगो बालानां विकासाय व्यापारमनोविज्ञानं च व्यापारकलाया नियमान् प्रतिपादयति विधिमनोविज्ञानं च न्यायधीशाधिवक्तृसाक्षिणां च मनोवृत्तेरध्ययनं करोति ।

एवं विभिन्नक्षेत्राणां विभिन्नकार्यरूपाणां चाध्ययनं मनोविज्ञानस्य विविधाभि: शाखाभिरद्यत्वे क्रियते । समेषां च तासां शाखाप्रशाखानां मन: सम्बन्धात् मन:स्वरूपाध्ययनं परिज्ञानं चापरिहार्यम् यतो हि मन: एव कारणं मानवानां बन्धमोक्षयो: । मनोऽभिरुचिर्हि भिन्ना वर्तते । 'विचित्ररूपा: खलु चित्तवृत्तय:' 'मुण्डे मुण्डे मतिर्भिन्ना' इत्यादय आभाणका प्रसिद्धा एव तत्रापि

---

1. Physiological Psychology.

2. Behaviour Psychology.

विभिन्नमतिषु मन एव कारणम् । अतः साम्प्रतं मनः स्वरूपमपि संक्षेपेण निरूप्यते ।

(अ) मनः स्वरूपम् - आङ्गलभाषायां "कॉन्शेस्" (conscious) "मेण्टल फंक्शन्" (Mental Function) इत्यादिभिः शब्दैर्व्यवह्रियमाणो "मानसव्यापार-रूपचेतनात्मकोऽनुभवरूपो वा" अचेतनात्मके संगठनरूपः । अनकान्शेन्स स्ट्रक्चर - (unconscious structure) इत्यादिभिः पदैर्मिस उभयात्मकं स्वरूप-मभ्युपगम्यते । इत्थं हि चेतना चेतनरूपांशोभयात्मकं मनः । तत्र हि अनुभवरूपे ज्ञान-इच्छामनोव्यापारादिका मनोवृत्तयः समाविशन्ति । स्थावरजङ्गमयो-र्भेदोऽप्यनेनैवानुभवेनजायते । एके हि अनुभवहीना अपरे च चेतनामनुभवन्तोऽनुभवयुक्ता इति । अनुभव एव चेतनापदेनापि ज्ञायते परमुभयोर्व्याप्य-व्यापक-भावसम्बन्धो-ऽस्ति । तत्र चेतना व्याप्या अनुभवश्च व्यापक इति । प्रायशः स्पष्टानुभूतिरू-चेतना कथ्यते । अस्माकं सर्वेऽप्यनुभवा विस्पष्टा नैव भवन्ति, अविस्पष्टा अप्यनुभवा भवन्त्येव । यथा कस्मिंश्चित् कार्ये संलग्नः कोऽपि शनैः शनैः गीतमपि गायति तदा गीयमानस्य गानस्य अस्फुटोऽनुभवो भवत्येव । चेदकस्मादेव गानध्वनिः रुद्धा भवेत्तर्हि कार्यान्तरव्यापृतोऽपि जनस्तात्कालिके स्वानुभवे किञ्चिद् विलक्षणतामनुभवति । एवमेव स्फुटानुभवव्यतिरिक्तोऽपि भवत्यनुभवः । स्फुटोऽनुभवश्चेतनापदेन व्यज्यते । तदव्यतिरिक्तः परिस्फुटोऽपि भवति भूयान् अनुभव इति चेतना व्याप्या एव, अनुभवश्च व्यापक इति मनोवैज्ञानिकानां मतम् ।

मनः शरीरयोः सम्बन्धः - निविडो हि मनसः शरीरस्य च सम्बन्धः । "स्वस्थे शरीरे स्वस्थं मनो निवसति" इति सुप्रसिद्धालोकोक्तिर्मनसि शरीरस्य प्रभावं द्योतयति । मनसः स्थितिः शरीरं प्रभावयति, शरीरस्य स्थित्या च मनः प्रभावितं भवति । हर्षोद्रेके शरीरे नवा स्फूर्तिरभिलक्ष्यते, खिन्ने च मनसि शरीरमपि निर्वीर्यमुषितमिवप्रतिभाति । बाह्यपदार्थानां ज्ञानं ज्ञानेन्द्रियैर्भवति । ज्ञानेन चेष्टाजननी संवेदना उत्पद्यते । ज्ञानसंवेदनाचेष्टानां प्रत्येकं शरीरेण सह सम्बन्धो वर्तते । मनः-शरीरयोः सामान्ये कस्य प्राधान्यमिति विवेको दुष्कर एव । शरीरशास्त्रिणां "शरीरमाद्यं खलु धर्मसाधनम्" स्वस्थं मनः स्वस्थशरीरएव उत्पद्यः

लोकोक्तय: शरीरस्य प्राधान्यं द्योतयन्ति । परं मनोव्यापारा: स्वस्थशरीर-हेतव इति नयेन मनस: प्राधान्यं ज्ञायते । अस्माकं शुभाशुभविचारप्रभावादेव शरीरस्य स्वास्थ्यं वर्धतेऽपक्षीयते वा एवं मन एवप्राधानम् । न हि मनसा विना शरीरं स्थातुं शक्नोति । मनसि श्रान्ते शरीरं श्रान्तं जायते, मनो विकृतौ शरीरे रोगा जायन्ते एवमेव शरीरे दोषे मनोदोषा भवन्ति । रुग्णमनुष्यस्य मनोऽपि सम्यग्विचारयितुं न शक्नोति । इदमेव कारणं यत्सामान्यत: जना मन:शरीरयोरविच्छिन्नं सम्बन्धमन्यन्ते ।

एवं घनिष्ठे सम्बन्धे सत्यपि मन: शरीरयोर्गुणस्वभावेषु महान् विरोध:। योरोपीयमनोवैज्ञानिकेन डेकार्ट महोदयेन[1] विरोधोऽयं इत्थं प्रतिपादित: - तन्मतानुसारं - शरीरं जडपदार्थैर्निर्मितम्, जडपदार्थाश्च क्रियाचेतनाहीना:, अवकाशयुक्ताश्च । मनसोगुणास्त्वेतद्विरुद्धा:, मन: क्रियाशीलम् चेतनावकाश-युक्तं च भवति" इति । इत्यभिलक्ष्यैव मन: शरीरसम्बन्धविषये पाश्चात्य-दर्शने त्रय: पक्षा उपलभ्यन्ते, द्वैतवादो, अद्वैतवादो, द्वैताद्वैतवादश्चेति । एतेषामप्यनेके उपवादा दृश्यन्ते ।

निष्कर्षरूपेण मन: शरीरयोर्विषये त्रयो वादा: प्रमुखतया प्रसिद्धिं गता:।

1. पारस्परिकप्रतिक्रियावाद: (Inter-actionism)
2. समानान्तरवाद: (Parallelism)
3. जडवादोव्यवहारवादो वा (Meterialism or Behaviourism)

1. मनस: क्रियाणां प्रभाव: शरीरे, शरीरस्य च क्रियाणां प्रभावो मनसि भवति । स्वस्थशरीरं स्वस्थान् विचारान् आदधाति मन: स्वास्थ्यं शरीरस्वास्थ्याधीनम् । उभयोरेव प्रतिक्रिया परस्परसापेक्षा भवति । अयमेव पारस्परिक प्रतिक्रियावाद: ।

2. शरीरं मनश्च परस्परं स्वतन्त्रम् । न शरीरस्य मनसि कश्चन् प्रभावो, नापि मनोव्यापाराणां शरीरे कश्चन प्रभाव: । एवमुभयोर्नैव कार्यकारणभाव-

---

1. Historical Introduction to Modern Psychology,
Murphi G.

उपपद्यते । तथापि स्वतन्त्रतया समानन्तररूपेण सहगामिनस्तयोर्व्यापाराः । वयं विचारयाम: भाषामहे च, अत्र प्रथमा क्रिया मानसिकी अपरा च शारीरिकी । सामान्या जना: "विचारणा" कारणं भाषणं च कार्यं मन्यन्ते परं मतेऽस्मिन् तयोर्नैष सम्बन्ध: । विचारणा पूर्वगामिनीनां मानसिकक्रियाणां फलम् भाषणं च पूर्वगामिनीनां शारीरिकक्रियाणां फलम् । मतस्य अस्य स्थापना हालैंडनिवासिना स्पाइनोजा (SPL-NOJJA) महाभागेन कृता । मन: शरीरयोर्निरपेक्षताप्रतिपादकत्वात् सिद्धान्तोऽयं समानन्तवाद इति नाम्ना प्रथितम् ।[1]

3. जड्वादिनस्तु चेतनता शरीरस्यैव विकारविशेषं मन्यन्ते । एते मन: शरीरयोरभेदं जडात्मकमुपपादयन्ति । एतेषां नये शरीरव्यतिरिक्तं नैव किंचिच्चैतन्यं नाम । शारीरिक क्रिया: शरीरस्यैव नाडीतन्तुभिर्भाव्यते । विचारस्तु तासां ज्ञानमात्रमाविष्करोति । विचारो हि शरीरस्यान्य क्रिया संचालकरूपएव । "सर्वा अपि क्रिया मस्तिष्के सुषुम्णायां वा वर्तमानानां परिवर्तमानानां परिणाम:" इति जड्वादिन: । वादस्यास्यैव व्यवहाररूपेण परिणति: संवृत्ता: । अस्य प्रवर्तकस्य जॉन बी॰ वाटसनमहोदयस्यनये सर्वाऽपि सरला जटिला वा क्रिया सहजक्रियाया एव परवर्तितं रूपम् । यथा नासिकायां धूलिकणेषु प्रविष्टेषु छिङ्का सहजा क्रिया यथा वा मण्डूकस्य पादे सूच्यां निविष्टायां तस्य पादे शीघ्रमेवोत्क्षेपो भवति तथैव सर्वा अपि सम्भवा वातप्रतिवात सङ्घर्षात्प्रादुर्भवन्ति इति सहजत्वमेव तासांसमस्तानाम् । जड्वादविपरीतश्चैतन्यवादो मस्तिष्कस्य शरीरस्य च समस्ता: क्रिया मनसो विचारणाभिच्छानां च परिणाम" इति स्वीकरोति ।

मन:शरीरयो: सम्बन्धश्चेतनावादसंज्ञया अपि ज्ञायते । चेतना हि व्यक्तिनिष्ठा । तस्या: सम्बन्ध: केनापि प्राणिना आत्मना वा भवत्येव । आत्माचेतनाद्रष्टा[2] तस्य चेतनापूर्वासत्ता सम्भाव्यते । चेतना तु द्रष्टुर्दृश्यं प्रति

---

1. मनोविज्ञान का इतिहास - डॉ॰ रामइकबाल पाण्डेय, पृ॰ 138
2. Self consciousness.

प्रतिक्रिया न हि द्रष्टारं विना चेतनायाः सत्ता सम्भवति अयमेव द्रष्टा विशुद्धात्मा अहंकार-पदवाच्यो वा। विशुद्धात्माऽनुभवेऽन्तर्निविष्टो भवति परं न असौ अनुभव-विषयः। अनुभवमूलकादात्मनः क्रमेण विशुद्धात्मनो विकासो जायते। वार्डरमहोदयेन विकासस्य तिस्रो भूमिका व्याख्याता। प्रथममात्मा, संवेदनामादाता, तृष्णामनुभविता च भवति, इयं हि प्रथमा भूमिका। ततः स विकल्पको भवति, कल्पनां विदधाति, विचारं करोति तदादातुं च चेष्टते इयमात्मनो द्वितीया भूमिका। अस्यामेवावस्थायामयं विचारवान् सङ्कल्पशीलश्च भवति तृतीयावस्थायां भावकालिकीं स्थितिं विचारयति, लक्ष्यं दृढीकरोति, तत्प्राप्त्यै च निजशक्तेः अथवा कृतिशक्तेः (WILL-POWER) प्रयोगं करोति।

ग) ज्ञानात्मकमनोवृत्तयः -[1]

(1) ज्ञान-सामान्यनिरूपणम् - मनोविज्ञानक्षेत्रे ज्ञानं हि चेतनायाः कार्यविशेषेण जायते। चेतनायाः मुख्यतया त्रीणि कार्याणि मनोविद्भिः स्वीक्रियन्ते। ज्ञानं वेदना-चेष्टा च। कस्यापि पदार्थस्य दर्शनानन्तरं चैतन्यस्य तेन सह सम्पर्को भवति चेतनया मनसि तद्वस्तुविषयकं ज्ञानमुत्पद्यते। तस्य आकार-प्रकारोपयोगविषये किञ्चिज्जायते। तत्सम्पर्केण मनसि कोऽपि संवेग उत्पद्यते, सुखस्य दुःखस्य वा वेदना जायते, वेदना एवानुभूतिरपि कथ्यते। ततो मनसि प्रवृत्तिरुदेति। तदादातुं हातुमन्यथा विधातुं वा प्रवृत्तं भवति मनः। इयमेव चेष्टा कथ्यते।

एवं सर्वासु प्रक्रियासु ज्ञानवेदनाचेष्टात्मकानि त्रीणि तत्त्वानि भवन्ति। अस्यामवस्थायामन्योऽन्यतारतम्यमवलोक्यते। यस्यामवस्थायां ज्ञानस्य प्रामुख्यं सा ज्ञान-दशा वा कथ्यते। ज्ञानाद्वेदना, वेदनायाश्च चेष्टाजायते। एवं ज्ञानेन-सुखदुःखयोः संपृक्तत्वान्नहि ज्ञानं वेदनाहीनं भवति। यदाभीष्टवस्तु सम्बद्धज्ञानं भवति तदा रुचिकरं यदाप्रियवस्तुनिबद्धं भवति तदा अरुचिकरं भवति यतोहि अभीष्टवस्तु दर्शनात् सुखं जायते अनाभीष्ट वस्तुदर्शनाच्च दुःखं जायते अभीष्टदर्शनेऽवधानं भवति अवधानं तु चेष्टैव। यथा मार्गेगच्छन् सुहृदवलोकने सुहृद्ज्ञानं भवति

---

1. The congnitivemodification of Mind.

तस्माज्ज्ञानात् सुहृद्प्राप्तिरूप सुखमुत्पद्यते । तदा सुहृदालिङ्गनरूपेच्छा उत्पद्यते । प्रक्रियायामस्यां ज्ञानं वेदना चेष्टा इत्येव क्रमः सामान्यतो भवति क्वचिच्च व्यतिक्रमोऽपि । एवमेव ज्ञानवेदनाक्रिया यथा परस्परमुपकुर्वन्ति तथा विरुध्यन्ते इति विरोधानुरोधोभयविरुद्धरूपेण संवेगावस्था ।

(2) ज्ञानस्यप्रकाराः - ज्ञानस्य विभिन्नप्रकारेषु संवेदना-प्रत्यक्षीकरणं-स्मृतिः-कल्पना-विचारादयो मुख्याः प्रकाराः । निर्विकल्पकं ज्ञानं संवेदना कथ्यते । प्रत्यक्षीकरणं संवेदनायाः अर्थग्रहणम् । अतीतानुभवानां तेनैव क्रमेण पुनरुत्पादः स्मृतिः । अतीतानुभवाश्रयेण मनसि कस्यचिन्नवस्य वस्तुनः उत्पादनं कल्पना । स्मृतिकल्पनाश्रयेण कस्यचित्तथ्यस्यानुसन्धानं तर्को विचारो वेति कथ्यते ।

(क) संवेदना[1] - यदा अस्माकं किमपि ज्ञानेन्द्रियं बाह्यपदार्थेन संपृक्तं जायते अथवा यदा ज्ञानेन्द्रियार्थसन्निकर्षो भवति तदा ज्ञानवाहिन्यो नाड्य उत्तेजिता भवन्ति उत्तेजनेयं च सुषुम्नामार्गेण केन्द्रं मस्तिष्कं वा प्राप्नोति तदा विशिष्टमिन्द्रियजं ज्ञानमुत्पद्यते । एवमुत्तेजना ओधेन्द्रियस्याग्रिमे भागे प्रतिक्रियां करोति ततो मनसि संवेदना जायते । वार्डरमहोदयस्य[2] कथनमस्ति यद् विशुद्धा संवेदना मनोवैज्ञानिककल्पनैव । यदा वयं कमपि पदार्थं पश्यामस्तदा तदभिज्ञानात् पूर्वं निरर्थकं ज्ञानं चक्षुरिन्द्रियोत्तेजनेन भवति । इदं ज्ञानं संवेदना कथ्यते । यदा च स पदार्थः परिचीयते तदा सैव संवेदना प्रत्यक्षज्ञानं सम्पद्यते ।

(ख) प्रत्यक्षीकरणम्[3] - संवेदनायाः अर्थग्रहणं(प्रत्यक्षीकरणम्) उत्तेजना संवेदनां जनयति । उत्तेजनामन्तरा न सम्भवति संवेदना । शूलनिक्षेपेण पीडा भवति यदत्र शूलक्षेपः सैव उत्तेजना तज्जन्या च पीडा संवेदनेति । यया क्रियया प्राणी संवेदनानामर्थग्रहणं करोति, सा क्रिया प्रत्यक्षीकरणम् । तस्याधारः सञ्चितोऽनुभवः स एव संवेदनानां अर्थग्रहणे सहायको भवति । उदाहरणतया कश्चित् पृष्ठतो

---

1. Sensation.
2. History of Psychology.
3. Perception.

गर्जनां शृणोति सिंहगर्जनेयमित्यनुभवति । "सिंहगर्जना" इति ज्ञाने अन्यासामपि क्रियाणां निवेशो भवति यथा क्रमेण "गर्जना" श्रवणकाले एव मनसः प्रस्तुतीकरणं श्रवणेन्द्रियस्योत्तेजनम् मस्तिष्के गर्जनरूपशब्दस्य संवेदना, शब्दं प्रति अवधानम्, गतानुभवाश्रयेण संवेदनायाः अर्थग्रहणं चेति । गतानुभवस्तु यथा अरण्येऽस्मिन् ऋक्षभल्लूकादयः अन्येऽपि हिंसकाः पशवो निवसन्ति परं नैव तेषामेतादृशी भयावहा गर्जना एवं तदव्यतिरिक्ता नूनमियं सिंहस्य गर्जना, इति । एवं नैकक्रियापूर्विका हि प्रत्यक्षक्रिया[1] इति सिध्यति । अतः संवेदनायाः अर्थग्रहणमेव प्रत्यक्षीकरणमिति निश्चितम् ।

ग) स्मृतिः[2] - मानवजीवने स्मृतेर्महत्त्वं सुविदितमेव न हि काऽपि शिक्षा, कोऽप्यभ्यासो वा स्मृतिं विना साफल्यं भजते । विचारस्याप्याधारः स्मृतिरेव । न हि कश्चित् पुरातनानुभवानां स्मरणादृते विचारं कर्तुं प्रभवति । प्रत्यक्षानुभवेऽपि स्मृतेः साहाय्यमपेक्ष्यते । सर्वजनेषु नैसर्गिकीयं स्मृतिः सर्वजनकाम्या। सर्वेषां स्मृतिशक्तिर्नैव समाना । येषां स्मृतिर्बलवती भवति ते शीघ्रमेव दृश्यमानमवलोक्य, वार्तां वा श्रुत्वा पाठं वा पठित्वा स्मरन्ति । एवं-विधाजना मेधाविनो गण्यन्ते एवं स्वल्पकाले कण्ठस्थीकरणं साधुस्मृतेः प्रथमं लक्षणम् । केचित् वस्तूनि शीघ्रं स्मरन्ति शीघ्रमेव विस्मरन्ति च, न तेषां स्मृत्या विशेषो लाभः । स्मृतस्य चिरधारणं स्मृतेर्द्वितीयं लक्षणम् । एवमेव-

"पुस्तकस्था तु या विद्या परहस्तगतं धनम् ।
कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम् ।।"

इति नयानुसारं धारणायामपि यदि कार्यकाले जाते झटिति न स्मर्यते तदा न कोऽपि लाभः स्मृत्याः । अतः स्मृत्याः प्रत्याह्वानमपि स्मृतेर्लक्षणम् । स्मृतिवत् विस्मृतिरपि सर्वेषां नैसर्गिकी । विस्मृतिरप्यत्यन्तोपयोगिनी । विस्मृत्यभावे अप्रियाणां- इष्टवियोगनिधनानां सतत स्मरणेन जीवनं

---

1. The consciousness of particular material things present to a sense is now a days called perception.
- W. James - Principal of Psychology, p.76.

2. Memory.

दुःखाकीर्णं जायते । कण्ठस्थीकरणं, धारणा, प्रत्याह्वानं च स्मृतेस्त्रीण्य-ङ्गानि । स्मरणस्य प्रत्याह्वानम्, प्रत्यभिज्ञा चेतिप्रकारद्वयम् । कण्ठस्थीकृतस्य वस्तुनोऽन्यथास्मरणं "प्रत्याह्वानम्" कथ्यते । कदाचित् कण्ठस्थीकृतं प्रयत्नेनापि पुनः प्रत्याह्वाययितुं न शक्यते परं बहुषु प्रत्यभिज्ञायते । एतत्पुनः स्मरणं "प्रत्यभिज्ञा" इत्यभिधीयते ।

घ) कल्पना[1] - "इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्" इति न्यायदर्शनस्य प्रत्यक्षलक्षणम् । इन्द्रियवस्तुसन्निकर्षेण मस्तिष्कस्नायवस्तथा प्रभाव्यन्ते यथा ते अनुपस्थितावपि वस्तुनः काञ्चित्कालं तद्वस्तुनश्चित्रमुपस्थापयितुं क्षमन्ते । एतानि चित्राणि प्रत्यक्षज्ञानमूलकान्येव भवन्ति । विलियमजेम्समहोदयेनायमेव सिद्धान्तोऽनुमोदितः[2] । यया मनः शक्त्यैकदा प्रत्यक्षीकृतस्य पदार्थस्य तत्पदार्थे-ऽन्तर्हितेऽपि प्रत्यक्षमिव ज्ञानं कार्यते, सा मनः शक्तिः कल्पना इत्यभिधीयते । अतः सामान्यतः कथयितुं शक्यते यत् "पदार्थस्यानुपस्थितौ तद्विषयकस्य कस्यापि विचारस्य मनसि सञ्चारः कल्पना" इति । मनः शास्त्रे रचनात्मिका क्रिया कल्पना कथ्यते यथा हि जनाः प्राक्तनानामनुभवानामाश्रयेण नूतनविचार-सृष्टिं कुर्वन्ति ।

मानवमनःशक्तिषु कल्पना सर्वाधिका महत्त्वपूर्णा, अद्भुता च । इयं हि जनानां वैशिष्ट्यं स्पष्टीकरणे पूर्णरूपेण सहायिका भवति । एषा हि पूर्वानुभवाश्रिता सर्वथा नवा विलक्षणाकृतिर्भवति मनसः अस्यास्तीव्रो वेगः जनस्य सम्पूर्णमाचरितं प्रभावयति । मानवस्तदवस्थायां वोपस्थितं चिन्ताजालं विस्मरति, मनोरमं मनः-कल्पितं लोकं स्वपुरत इव निभालयति सौन्दर्यं प्रति रुचिरुत्पद्यते, दूरस्थैः प्रणयिभिः सह सम्पर्कं जायते । एवं साहित्यसङ्गीत-कलाविज्ञानानांजननी कल्पनैव । कल्पनां विना नैवोन्नतिः सम्भवतीति । इयं हि मानसी क्रिया । बाह्यपदार्थैरुत्तेजितानि ज्ञानेन्द्रियाणि संवेदनामनुभवन्ति

---

1. Imagination.

2. Sensation, once experienced modify the nervous organism so that copies of them arise again in the mind after the original outward stimulus is gone.

- Principals of Psycology, W. James, Vol.II, p.44.

तदा प्रत्यक्षं भवति । परं यदा पदार्थानामभावे ज्ञानेन्द्रियाणि संवेदनामनुभवन्ति तदा मानवः स्वपूर्वानुभवानां पुनर्निर्माणं कर्तुं प्रभवति । कदाचिन्नवनिर्मिता अनुभवाः प्राक्तनानामनुभवानां प्रतिकृतयो भवन्ति, पूर्वावलोकितं चित्रं च तेनैव क्रमेण यथावद्रूपेण मनसः प्रत्यक्षं जायते तदा सा कल्पना "स्मृतिः" इति कथ्यते । परमतीतघटनाया नवेन क्रमेण स्वरूपेण वा आवृत्तिः "कल्पना" निगद्यते ।

मैक्डगलमहोदयमते[1] कल्पनायास्तिस्रः कोटयो भवन्ति । तत्र निकृष्टा कल्पना पुनरुत्पादिका स्मृतिर्वा, मध्यमा निर्माणात्मिका, उत्तमा च नवसृजनात्मिका । प्रथमायां पूर्वानुभवानामेव शुद्धं चित्रं भवति । पूर्वानुभूतस्मृतेर्-तद्वदेवानुक्रमेण स्मरणं निरूपणं वा । द्वितीयायां पूर्वदृष्टरपेक्षिता भवति । मानव-मस्तिष्के कानिचिदनुभूतानि चित्राणि भवन्ति तदाश्रेण कस्याश्चित् क्रियायाः परीक्षा मनसि क्रियते । यथा पूर्वमालेख्यं मनसि रच्यते ततश्च पटे । कुम्भकारस्य मनसि करिष्यमाणस्य घटस्य रूपं पूर्वं मनस्येव भवति । तृतीया नवसृजनात्मिका कल्पना नवकथा प्रबन्धे समस्या समाधाने च स्फुटिता भवति । एतदेव-कल्पनायाः श्रेष्ठतमं रूपम् ।

ङ॰) तर्कः, विचारो वा[2] - मानवः सदैव योजनानुकूलमाचरति । स न केवलं प्रस्तुतेन परिवेशेन व्यवहरति तत्परिवर्तितुमपि वाञ्छति यतो हि मानवः कर्ताविचारकश्चेति निगद्यते । तस्य योजनाः विचारणायाः फलान्येव । मनोव्यापाराणामवयवेषु ज्ञानपक्षे विचारात्मकः पक्षः श्रेष्ठतमः प्रधानतमश्चास्ति विचारोऽथवा विचारणायामेव मनोव्यापाराणां पर्यवसानं भवति । प्रत्यक्षीकरण-स्मृतिः-कल्पनादयो विचारसन्ताने साहाय्यमाचरन्ति । "मननान्मनुष्यः" इति मननात्मको विचार एव मानवानां पशुभ्यो भेदकं तत्त्वम् ।

यूनानदेशीयेन दार्शनिकेन अरस्तूमहाभागेनापि "मानवो हि विवेकशीलो जन्तु" इति वदता मानवानां पश्वादिभ्यो वैशिष्ट्याधायक इति प्रतिपादितम्।

---

1. Introduction of Psychology : Medwell.
2. Thinking.

निजविचारसामर्थ्येनैव मनुष्येण सर्वेषु प्राणिषु स्वाधिपत्यं स्थापितम् । अनेनैव मनुष्य: स्वपूर्वानुभवानां कार्येषूपयोगं कर्तुं समर्थो भवति न पश्वादय: । कस्यापि कार्यस्यारम्भे मानव: स्वपूर्वानुभवान् स्मरति, तस्य च वर्तमानेनानुभवेन सह साम्यं विदधाति वैषम्यं च विवेचयति । तदनुसारं विधीयमानस्य कार्यस्य परिणामविषयकमनुमानं च विदधाति, ततश्च तत्र प्रवर्तते ततो निवर्तते वा । यो हि पूर्वानुभवबलात्परिणामानुमाने कुशलो भवति स एव कार्येषु साफल्यमधिगच्छति । ये जनाश्च परिणाममविचार्यैव कार्येषु प्रवर्तन्ते ते प्राय: पश्चातापभाजोऽपि भवन्ति, अविवेकशीलाश्चाभिधीयन्ते । आवेशवशादविवेकपुरस्सरमेव प्रवर्तमानानां व्यवहारा: पशुव्यवहारसदृशा एव भवन्ति न विवेकोचिता । स्मरणीयमत्र वचो भारवे: -

"सहसा विदधीत न क्रियामविवेक: परमापदां पदम् ।"[1]

वस्तुतो विचार एव मानवत्वनिकषो भवति । पूर्वानुभवस्योपयोगानुसन्धानेन वर्तमानसमस्यानां समाधाने संलग्नो मानसो व्यापारविशेषएव विचारपदेनाभिधीयते । लोके प्रायो द्विविधा समस्या: दृश्यन्ते । काश्चिद् व्यवहारसम्बद्धा, काश्चिच्च ज्ञानविषयसम्बद्धा: । यदा काश्चित् समस्योपस्थिता भवति तदा तत्समस्या समाधानं मानवस्याद्यं लक्ष्यं भवति । तल्लक्ष्योपस्थितिरेव विचारप्रवर्तिका । तत: लक्ष्यप्राप्त्यर्थं प्रयत्नो विधीयते । प्रारभ्यमाणे प्रयत्ने पूर्वानुभवानां स्मरणं भवति । तेषामनुभवानां प्रकृत्या उपयोग: क्रियते । एवं लक्ष्योदय:, यत्नारम्भ:, पूर्वानुभवस्मरणम्, तेषां च प्रकृतोपयोग: इति विचार प्रक्रिया चतुर्धा भिद्यते । सर्वेष्वेव व्यापारेषु मानसमभिभाषणमनवरतं प्रवर्तते, एवं मानसं भाषणमपि विचारप्रक्रियाया अङ्गं भवति । मानव: कार्यारम्भात्पूर्वमेव सम्भाव्यमानानि स्खलितानि विचारयति कल्पनयैव च तन्निवारणोपायांश्चापि चिन्तयति ततस्तत्र प्रवर्तते । "विचारशीलो हि मानव:" इति नये एव प्रक्रियेयं प्रयुज्यते, नैव पश्वादिषु विचारशक्तिस्तथा ते हि अबुद्धिपूर्वमेव प्रवर्तन्ते । तदेव तेषां व्यवहारा: सदोषा भवन्ति । एवं दृश्यते यन्मानवो

---

1. किरातार्जुनीयम्, 2.30

बाह्यनुष्ठानात्पूर्वं मानसं व्यापारमनुतिष्ठति । अर्थात् विधीयमानस्य सर्वा अपि प्रक्रिया मनसि निदधाति मीमांसते च । ततस्तस्य बाह्यव्यापारा भवन्ति ते च मानसव्यापारानुकरणमेव । बाह्यव्यापारात्पूर्वं योऽयं पुरुषस्य मानसो व्यापारो भवति स एव क्रियारूपदवाच्यो भवति । इत्थं प्रक्रियाया अस्या पञ्च प्रकारा दृश्यन्ते -

{1} लक्ष्यप्राप्त्यर्थमभिलाषोदय: ।

{2} लक्ष्यप्राप्त्यर्थ-प्रारम्भिकी चेष्टा ।

{3} पूर्वानुभवानां स्मरणम् ।

{4} तेषामनुभवानां प्रकृत प्रसंगे उपयोग: ।

{5} मानसमभिभाषणम् । इति ।

{ब} <u>भावात्मक-मनोवृत्तय:</u> - (Emotional Modification of mind):

ज्ञानात्मका, भावनात्मका, क्रियात्मकाश्चेति त्रिधा मनोव्यापारा: पूर्वमेव विवेचिता: । तत्र ज्ञानात्मकानां मनोव्यापाराणां प्रत्यक्षादयो भेदा अपि तत्रैव व्याख्याता: । अधुना भावात्मक-मनोव्यापाराणां विवेचनमुपक्रम्यते । यथा पूर्वमेवोक्तं यच्चेतनापदार्थसन्निकर्षेण ज्ञानमुत्पद्यते । ततस्तत्सम्पर्केण मनसि कोऽपि संवेग उत्पद्यते सुखस्य दु:खस्य वा वेदना जायते ।सा चानुभूतिरिति । अस्या एवानुभूतेरथवा वेदनाया वेदना-संवेग-भावनादयो भेदा परिगण्यन्ते । अनुभूति -काले द्रष्टा निष्क्रियो भवति । यथा कश्चिन्मार्गे गच्छन् पुरुषमन्यं पश्यति तदा प्रथमं ज्ञानं भवति यत् पुरोदृश्यमान: पुरुष: "मममित्रम्" इति । मित्ररूपज्ञानानन्तरं मनसि सुखस्यानुभवो जायते । ततस्तमालिङ्गितुं चेष्टते । एवमनुभूतिर्ज्ञानजन्या क्रियाजनिका च । अनुभूतिरात्मगतोऽनुभव: । इयमनुभूति: संवेदनापेक्षया स्थिरा परिवर्तनशीला च । न चानुभूतिरेकाकिनी भवति, प्रत्यक्षीकरण- -स्मृति:-कल्पना-संवेग-सङ्कल्पादिषु काऽपि मानसिकी प्रक्रिया तत्सहचारिणी भवत्येव । अनुभूतिर्ज्ञानादिभन्ना भवति । अनुभूतेरुपयोग: परिस्थितिज्ञाने आत्मविषयकेज्ञाने वा न भवति । मन: संवेदनया पदार्थप्रकृतिं परिचिनोति,

मनोबाह्यानां पदार्थानां तेषां सम्बन्धानां च सूचना प्रदीयते अनुभूतिश्चात्मनएव मनस आन्तरिकीं दशां सूचयति । वुडवर्थमहोदयानुसारमनुभूतिः संवेदनाभिन्ना । अनुभूत्यां बहिर्जगतः आत्मशरीरस्य तथ्यानां च बोधो नैव भवति । अनुभूतिर्हि मनसो निष्क्रियावस्था । संवेदना बाह्योत्तेजना मनस्युत्पद्यते । संवेदना बाह्योत्तेजनाधीनत्वात् वस्तुसापेक्षा अनुभूतिश्चात्मसापेक्षा यतः सा मनोऽधीना ।

1) संवेगाः - (Emotions): मानवो विचारशीलत्वात् प्राणिषु श्रेष्ठतमः । स विचारपूर्वकं तर्कपूर्वकं वा निजकर्मसु प्रवर्तते । तथाप्यनेकदा तस्य चेष्टितानि तर्कविरहितानि भवन्ति । समूहे प्रायशो जनानामाचरणं विचारशून्यमिव भवति एकाकिनोऽप्यनेकानि कर्माणि न विचारमनुसरन्ति । धार्मिकाः, साहित्यकाः, कलाकाराः राजनीतिविदश्च प्रायो बहुधा संवेगेन, न तु तर्केण शासिता भवन्ति। ये चेदमवगच्छन्ति ते जनेषूत्तेजनामुत्पाद्य स्वेष्टं साधयन्ति । शेक्सपिअरमहोदयस्य जूलियससीजरेत्याख्ये रूपके सीजरमन्त्रिणः "एण्टोनी" इति नाम्नो महाशयस्य भाषणमीदृशमेव । तद् भाषणेन दर्शनशास्त्रमर्मज्ञस्य ब्रूटसमहोदयस्य सर्वे तर्काः निरस्ताः, जनाश्च ब्रूटसवधायोत्तेजिता भवन्ति । कदाचित्तु स्वकीयमेव संवेगावस्थायामाचरितं पर्यालोच्यजना लज्जयाधोमुखा जायन्ते । संवेगात्मकानुभवकाले जनः पूर्णरूपेणाव्यवस्थितो जायते तस्यात्मन उपरि नियन्त्रणं नश्यति । एवमनुकूलं प्रतिकूलं वा किमपि वस्तुजातमवलोक्य इन्द्रियान्तरैर्वाऽनुभूय यो मनोविकार उत्पद्यते स एवात्र "संवेग" इति पदेन कथ्यते । इन्द्रियार्थसन्निकर्षाद्यज्ज्ञानमुत्पद्यते तत् संवेदनात्मकं, भावना संवलितं चेति द्विविधं भवति । यथा स्वदेशे वसन्तो जना अहर्निशं स्वजातीयान् जनानवलोकयन्ति, सामान्यतस्तेषामवलोकनेन मनसि न काऽपि विक्रिया उत्पद्यते स्वरूपमात्रमेवानुभूयते, तदिदं सामान्यं संवेदनात्मकं ज्ञानं भवति । परं कदाचित् सुदूरे विदेशे वसतां जनानां यदि अकस्मात् स्वजातीयेन-स्वदेशीयेन वा जनेन सह सम्मेलनं भवति तदा तयोर्ज्ञानं भावना संवलितं भवति नैव सामान्यम् । तयोरन्योऽन्यदर्शनेन मनसि महानाह्लादो ऽद्भुतो भावातिरेकश्च समुद्भवति, तदिदं भावनासंवलितं ज्ञानमेव "संवेग" इति कथ्यते । एवं कस्यापि

---

1· मनोविज्ञान - वुडवर्थ मार्विक्स ।

विषयस्यावलोकनेन श्रवणादिना वा चेतसि या बाधा विकृतिर्जायते सैव संवेगाख्यया भजते ।

लोकव्यवहारे दैनिके चोपयोगे जनजीवने संवेगानामप्रतिहतं साम्राज्यं सर्वत्राप्यवलोक्यते । का जनस्य अभिरुचि: कस्तस्य सिद्धान्त: सामाजिक समस्यानां विषये के विचारास्तस्य इत्यादीनां प्रश्नानां निर्णयं प्राय: संवेगा एव कर्तुं प्रभवन्ति यथा पूर्वमेवोक्तं यल्लोको बहुधा तर्कं ज्ञानं चाप्युपेक्ष्य संवेगानुरोधेनैव प्रवर्तते । अत: जनजीवने संवेगानां महत्त्वपूर्णं स्थानं भवति । संवेगशून्यं जीवनं दुर्लभमेव । संवेगबलेनैव युद्धेषु परपरित्राणे वा वीरा: साहसिकाश्च पुरुषा: स्वप्राणानप्यविगणय्य परेषां रक्षां विदधति । संवेग-सामर्थ्येनैव कारुण्याप्लावितहृदया: सन्त: दीनानुद्धरन्ति । संवेगा लोकव्यवहार-प्रवर्तका, नीति निर्देशका:, जीवन संचालकाश्च भवन्ति । मानवानां मानसिकं शारीरिकं च स्वास्थ्यं संवेगाधीनम् तेषां नियन्त्रणेन जन: समाजे प्रतिष्ठां लभते । य: क्रिया समभिहारेण क्रुद्धो भवति तमनेके रोगा आक्रमन्ति ।

ट्राइटन महोदयेन प्रतिपादितं यत्क्रोधावेशे एकस्या मातुर्दुग्धं तथा विषमयं जातं यत्तस्य पानेन शिशोर्मृत्युरेवाभवत् । केचित् संवेगा: पाचनशक्ति-मुद्दीपयन्ति शरीरपोषणे च सहायका भवन्ति । अत: मानवजीवने तेषामतीव महत्त्वपूर्णं स्थानमिति निर्विवाद सत्यम् ।

२) भावना - संवेगात्मिका स्थायिनी प्रवृत्ति: "भावना" कथ्यते । वस्तुविशेषे केन्द्रीयभूतानां संवेगात्मकानां प्रवृत्तीनां सुव्यवस्थिता समष्टिभूता वा भावना इति शेण्डमहोदया: । ?

कस्यापि व्यक्तिविशेषस्य सम्पर्केऽनुभूयमाना: स्थायिभावा: कदाचित् पुरुषस्य नैतिकधारणानुरूपा कदाचिच्च तत्प्रतिकूला भवन्ति । अनुकूल भावाङ्गी-करणे नैव काठिन्यमपितु प्रतिकूल स्थायिभावा: नैव सुखेनात्मसाततां गच्छन्ति-मनसि च भावनाग्रन्थिमुत्पादयन्ति । ये स्थायिभावा लोकाचारविरुद्धत्वाद-प्रकाश्या भवन्ति जनस्तेषां बलान्निग्रहं करोति । तदा तेऽव्यक्तरूपेण निलीयन्ते न तु विनश्यन्ति । तेऽपि भावनाग्रन्थिं जनयन्ति । तेषां च प्रभावो मानव-

---

1. Triton -'In Tone with the Infinit.'

-व्यवहारे अवलोकयितुं शक्यते । मनोग्रन्थयो हि कदाचिन्मानसान् शारीरान् च रोगानुत्पादयन्ति । येषां रोगाणामपराधानां वा चिकित्सा मनोविश्लेषण-विधिना सम्यक् कर्तुं शक्यते नाऽन्यथा । अयं विधिः रेचनविधिरुच्यते । ड्रेवरमहोदयस्य[1] कथनानुसारेण भावना नाम प्रवृत्तिः । अस्यां संवेगात्मक-प्रवृत्तीनां विचारेण सह साहचर्यं भवति । संवेगोऽल्पकालस्थायी उद्रेकः, भावना तु स्थायिनी संवेगात्मिका प्रवृत्तिः । सरला भावना संवेगविशेषस्य असकृद्भवस्य परिणामः । जटिला च भावना बहुविधान् संवेगानुत्पादयितुं क्षमते ।

मेक्डूगलमतेन[2] वस्तु विशेषस्यानुभवादुत्पन्ना तद्वस्तुं प्रति स्थायिनी चेष्टात्मिका अभिवृत्तिर्भावना भावनाऽर्जिता प्रवृत्तिः, यस्याः सृष्टिः काल-क्रमेण संवेगात्मकानुभवेभ्यः क्रियाभ्यश्च भवति ।

(ङ) <u>प्रयत्नात्मका मनोवृत्तयः</u> - (Volitional modification of mind):

त्रिविधमनोवृत्तिषु ज्ञानात्मिका भावात्मिका च मनोवृत्तयः विवेचितपूर्वाः । इदानीं प्रयत्नात्मक (क्रियात्मक) मनोवृत्तिविषये विवेचन-मवशिष्यते । क्रियात्मकमनोवृत्तीनां सहजाप्रतिक्रिया, उद्वेगात्मिका प्रतिक्रिया मूलप्रवृत्तयश्चेति भेदाः स्वीक्रियन्ते मनोविज्ञानविद्भिः ।

1. <u>सहजा प्रतिक्रिया</u> - बाह्यविषयाणामनुभवात् सम्पर्काद्वा सर्वेषामपि प्राणिनामनुकूला प्रतिकूला वा काचित् प्रतिक्रिया भवत्येव । तासु प्रतिक्रियासु या विचारानपेक्षिणी प्रतिक्रिया भवति सा 'सहजा प्रतिक्रिया' नाम्ना व्यवह्रियते या च विचारापेक्षिणी प्रतिक्रिया सा हेतुपूर्विका जटिला वा प्रतिक्रिया इत्युच्यते । विचारानपेक्षिणी सहजा प्रतिक्रिया जन्मजैव स्वाभाविकी अपरिवर्तनीया च भवति । यथा कश्चित् कीटः कस्यापि जनस्य हस्ते प्रसर्पण-मारभते दंशादिकं च करोति तदा अविलम्बं हस्त उत्क्षिप्यते । ईदृशोव्यापारे

---

1. An Historical Introduction of Modern Psychology : Murphy, Part III, p.154.
2. Outline of Psychology : McDougall William.

विचारस्यावसरो न भवतीति विचारानपेक्षिणी सा सहजा प्रतिक्रिया भवति। न केवलं हस्तोत्क्षेपणमथवा गात्रावधूननमेव विचारानपेक्षं परं नेत्रयोः कनीनिकायाः संकोचविकासौ, निमेषप्रक्रिया, अश्रुप्रवाहः शिङ्कादयश्चान्येऽपि व्यापारा विचारानपेक्षिणीषु सहजप्रतिक्रियासु गण्यन्ते। वैशेषिके दर्शने जीवनपूर्वकः इच्छापूर्वकश्चेति द्विधा यत्न इति वर्णितम्। तत्र यो जीवनपूर्वको यत्नः स इच्छादिकमन्तरेव भवतीति विचारानपेक्षिणी प्रतिक्रिया तत्रापि स्वीकृता। यदि मक्षिका कदाचित् कस्यचिन्मुखे प्रविशति, अवाधरूपेण कण्ठदेशादधोवतरति च तदा तस्य जीवनं सङ्कटापन्नं भवतीति जीवनपूर्वको वमनरूपः प्रयत्नो विचारावसरमलब्ध्वापि हठान्मक्षिकां बहिर्निस्सारयति। अयमेव वैशेषिकाणां जीवनपूर्वको व्यापारो मनोवैज्ञानिकैः सहजप्रतिक्रियासंज्ञया अभिधीयते। अस्याः प्रतिक्रियाया वैशिष्ट्यमिदं यदियं सदा समरूपैव भवति। अभ्यासादपि तत्र परिवर्तनं न सम्भवति। अस्यां मस्तिष्कस्योपयोगो नैव भवति। प्राणिविज्ञानिभिर्मण्डूकस्य मस्तिष्कं शरीरादपसार्य पादौ यदा सूच्या भेदितस्तदापि तेन पादः इतस्ततः क्षिप्तः। तेन स्पष्टं यन्मस्तिष्काभावेऽपि सहजाप्रतिक्रियाः सम्भवन्ति। अत एव विचारानपेक्षिणी क्रियेयं निगद्यते।

2) <u>उद्वेगात्मिका प्रतिक्रिया</u> – सहजा प्रतिक्रियावदेवोद्वेगात्मिका प्रतिक्रियाऽपि विचारानपेक्षिणी भवति। परं सहजाप्रतिक्रिया नियता भवति, एकस्मिन् पुरुषे समानपरिस्थितिषु समानाकारैव प्रतिक्रिया जायते। परमुद्वेगात्मिकाः प्रतिक्रियाः सहजप्रतिक्रियावन्नैव समानाकाराः। तुल्येऽपि निमित्ते कालभेदेनैकस्मिन्नपि पुरुषे क्रियेयं भिन्नरूपेणावलोक्यते। कदाचिदसह्यायां वेदनायामुद्वेगकारणे समुपस्थिते जनो निश्चितरूपेणगात्रविधूननं विलुण्ठनं वा समारभते। तस्य सैवानिश्चितरूपा क्रिया मनोवैज्ञानिकैः "उद्वेगात्मिका प्रतिक्रिया" इति नाम्ना निगद्यते। निमित्तसाम्येऽपि कालादिभेदत्वाद् भिन्नत्वाद् सहजप्रतिक्रियातो भिन्नतां भजते।

<u>हेतुपूर्विका विचारापेक्षिणी वा प्रतिक्रिया</u> – विचारप्रेरिता प्रतिक्रिया

सहजोद्वेगात्मकक्रियाभ्यो भिन्ना । तासु क्रियासु बाह्योत्तेजनायाः प्राधान्यं भवति, विचारापेक्षिण्यां क्रियायां च विचारस्य प्राधान्यम् । अस्यां प्रतिक्रियायां विचारो द्रुतमेव क्रियायां परिवर्तते । अयं कर्मविचारोऽत्यावेगात्मको भवति । क्रिया-विचारस्तथा प्रबलो जायते यथा विचारकस्तदनुसारेण कर्तुं विवशो भवति । तुङ्गशृङ्गे स्थितो जनो नीचैर्विलोक्य विचारयति "अहमस्माच्छृङ्गादधः पतिष्यामि" एवं विचारयन् एव स क्षिप्रमेव ततोऽपसरति । विलियम जेम्समहोदयेनोक्तम्[1] - यदा क्रियाविचारो विना तर्केण चिन्तनेन वा सद्यएव क्रियां जनयति, तदा तदुत्पन्ना क्रिया विचारापेक्षिणी विचारप्रेरिता वा निगद्यते । नाऽत्र विचारक्रिययोर्मध्येऽन्यस्य कस्यचिद् वस्तुनो ज्ञानमवशिष्यते विचारित एव कर्मणि कर्म सम्पद्यते ।" मित्रैर्वार्तालापं कुर्वन् जनः कपोले स्थितां मक्षिकां पश्यति हस्तेन च तामपसारयति, भूमौ पतितं रूप्यकमवलोक्य गृह्णाति वा । नात्रेच्छा स्पष्टरूपेण व्यज्यते । एवं प्रतीयते यद्वस्तुदर्शनमात्रेण तत्सम्बन्धिनी क्रिया विचारमात्रेण च कर्मसम्पन्नमभूत् । कानिचित् विचारप्रेरितानि कर्माणि निर्विचारानुकरणरूपाण्यपि भवन्ति । अनुकरणं तु तत्रानायासं सहजमिव प्रतीयते । यथा जनसम्मर्दे जना अन्यानुत्तेजितान् दृष्ट्वा क्षुब्धा भवन्ति करतालिकादिवादनं चावलोक्य करतालिकां वादयन्ति । बालकोऽन्यं रुदन्तं दृष्ट्वा रोदितुमारभते । न च ते जानन्ति इत्यत्र किं तेषां चेष्टायाः कारणमिति ।

38 <u>मूलप्रवृत्त्यात्मिका क्रियाः</u> - मानवस्य सर्वाण्यपि कार्याणि जन्मजातप्रवृत्ति सम्बन्धीनि, अर्जितप्रवृत्ति-सम्बन्धीनि वा भवन्ति । जन्मजाताः क्रियाः, सहजक्रियाः, मूलप्रवृत्तिश्चेति द्विधा विभज्यन्ते । जनसामान्येन सह क्रियाणां बाहुल्यं भवति, समुन्नतेषु च मूलप्रवृत्त्यात्मकानां क्रियाणां बाहुल्यम् । भारतीये न्यायदर्शनेऽपि[2] - "इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गानि" इति गौतमसूत्रे इच्छाद्वेषप्रयत्नशब्दैः क्रियात्मकस्याथवा प्रयत्नात्मकस्य मनोवृत्ति-

---

1. William James : Principal of Psychology.
2. न्यायसूत्रम्, 1.1.10

-रुल्लेखो दृश्यते । मैक्डूगल महोदयस्य मूलप्रवृत्तिविषयकं मतमिदमुपन्यस्यते[1] -

मूलप्रवृत्तिरूपा काचिद्विशिष्टा प्रकृतिप्रदत्ता शक्तिः प्राणिनोऽवधानं कञ्चित्पदार्थविशेषं प्रत्याकर्षति तस्योपस्थितौ च प्राणिनि कस्यचित् संवेग-विशेषस्यानुभूतिमुत्पादयति, कस्मिंश्चित् कार्यविशेषे च तं योजयति, इति । एषा च जन्मजाता प्रवृत्तिः । मूलप्रवृत्तिजा क्रिया आत्मरक्षणाय जातिरक्षणाय च भवति । मानसिकी प्रक्रियायामस्यां ज्ञानवेदनाचेष्टानां च समावेशो भवति । सा च प्राणिनां वंशानुक्रमेण वाप्यते । मूलप्रवृत्तिसंस्काराः मुख्यरूपेण क्रियात्मकाः सन्तोऽपि ज्ञानवेदनासमाना भवन्ति । मानवस्य क्रियात्मिकाः प्रवृत्तय एव तत्सम्पादनार्थं प्रेरयन्ति । मार्गे गच्छतः पदं यदा रज्जोपरि पतति तदा स तां सर्पोऽयमिति मत्वा भीतः सन् पलायते । प्राणरक्षायां जन्मजाता मूलप्रवृत्तिरेव पलायने हेतुः । अनयैव प्राणरक्षारूपया मूलप्रवृत्त्या घातकान् हिंसकान् वा पशूनवलोक्य अस्माकं मनसि भयसंवेग उत्पद्यते । तेन प्रेरिताश्च वयं तस्मात् स्थानात् दूरं पलायितुमुपक्रमामहे ।

पाश्चात्यमनोविज्ञानग्रन्थेषु सर्वेष्वेव मूलवृत्तीनां वर्णनं दृश्यते परं मैक्डूगल महोदयेन तासां विशेषतः सविस्तरं वर्णनं कृतम् तन्निरूपणेन प्रतीयते यन्मूलप्रवृत्तिषु ज्ञानात्मका क्रियात्मका भावात्मकाश्च त्रयोऽपि मनोव्यापारांशाः सम्मिलिता भवन्ति ।

साङ्ख्यतत्त्वकौमुदीकारेण वाचस्पतिमिश्रेण अन्तःकरणचतुष्टयस्य युगपद्वृत्तिं दर्शयता तत्सदृशमेवोदाहरणान्तरं प्रदत्तम्[2] - यदा सन्तमसान्धकारे विद्युत् सम्पातमात्राद् व्याघ्रमभिमुखमतिसन्निहितं पश्यति तदा निश्चयेन चत्वारोऽप्यन्तःकरण मनोव्यापारा आलोचन-संकल्प-अभिमान-अध्यवसायाख्याः युगपदेव प्रादुर्भवन्ति यतस्तत उत्प्लुत्य तत्स्थानादेकपदे अपसरति । इति ।

एतदतिरिक्तं मैक्डूगलमहोदयेन मूलप्रवृत्तीनां चतुर्दश भेदा व्याख्याताः । यथेयं भीत्यात्मक-संवेग-संवलिता-पलायनप्रवृत्तिर्मूलप्रवृत्तिरभिधीयते एवं

---

1. Outline of Psychology : McDougall William.
2. साङ्ख्यतत्त्वकौमुदी, 30

क्रोधात्मक संवेग संवलिता युयुत्सा, वात्सल्यादि संवेगसंवलिताः शिशुरक्षादयश्च मूलवृत्तयः। मूलप्रवृत्तिभिः सहकस्यचिद् भावस्य सम्बन्धोऽपरिहार्य एव भवति, भाव सम्बन्ध रहिता वृत्तय मूलप्रवृत्तिपदेन नाभिधीयन्ते। यथा भोजनान्वेषण-रूपमूलप्रवृत्तिर्बुभुक्षया सम्बद्धा तथैव पलायनम् भयेन, युयुत्सा क्रोधेन, उत्सुकता आश्चर्येण, रचना सृजनसुखेन, संग्रहः स्वामित्वेन, विकर्षणं कृपाभावेन, शरणागतिः करुणया, कामवासना कामेन रत्या वा, शिशुरक्षा स्नेहेन, परस्पृहा एकाकीभावेन, आत्मख्यापनं उत्साहेन, विनयः आत्महीनतया, हास्यं च प्रसादेन सम्बद्धम्। एतासु हास्यातिमक्या मूलप्रवृत्त्यातिरिक्तं सर्वा अपि मूलप्रवृत्तयः सर्वेष्वेव प्राणिषु वर्तन्ते हासस्तु केवलं मानवेष्वेव लभ्यते। मैक्डूगल महाभागेन हि मूलप्रवृत्तयः प्रधानरूपेण, मनोभावाश्च गौणरूपेण प्रतिपादिताः। भारतीय-मनोवैज्ञानिकैस्तु प्राक्तने साहित्यशास्त्रे नवधा कुत्रचिच्च दशधा मनोवृत्तयः विभक्ताः। ताश्च साहित्यशास्त्रक्षेत्रे स्थायिभावशब्देन व्यवह्रियन्ते। यथा मम्मटः काव्यप्रकाशे -

> शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानकाः
> वीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः।
> निर्वेद स्थायिभावस्तु शान्तोऽपि नवमो रसः।

एवं नवरसनिरूपणं विधाय तेषां मूलभूता नव स्थायिभावा इत्थं प्रतिपादिताः -

> रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
> जुगुप्सा विस्मयश्चेति स्थायिभावाः परिकीर्तिताः।

एवं ये भावा भारतीयैः रसशास्त्रिभिः निरूपितास्त एव मैक्डूगल-महोदयेन मूलप्रवृत्ति सम्बद्धरूपेण प्रतिपादिताः केवलं बुभुक्षा, एकाकिता, संग्रह भावो रचनानन्दश्च चत्वारो भावास्तन्मतेऽधिकाः सन्ति। न हि ते रससम्बद्धा अत एव भारतीये रसशास्त्रे नैव निरूपिता। उभयोरेव विभागयोस्तुलनायां भारतीय मनोवृत्तिविभागो युक्ततरं प्रतिभाति।

---

1· काव्यप्रकाशः - मम्मटः, रस निरूपणम्।

च) मनोविज्ञानं दर्शनं च - दर्शनशास्त्रस्य मनोविज्ञानेन सह निकटस्थ: सम्बन्धो दृश्यते। दर्शनस्य ज्ञानमीमांसा तत्त्वमीमांसा चेति उभयमपि विषयजातं मनस्तत्त्वविषयकमेव। मन: कथं जानाति ? किं स्वरूपं ज्ञानम् ? इति तत्त्वस्य विचारो मनोविज्ञानस्य विषय:। मनोविज्ञाने ज्ञानस्याध्ययनं तत्त्वज्ञानरूपेण दर्शनशास्त्रे च तत्प्रमाण्यानुसन्धानरूपेण क्रियते। पूर्वं मनोविज्ञानं तत्त्वमीमांसाया एवाङ्गविशेष: स्वीक्रियते स्म। तस्मात्मनस्तत्त्वज्ञानरूपेणाधीयते स्म। आत्मन: स्वरूपव्यापारोद्देश्यानामध्ययनं मनोविज्ञानस्य लक्ष्यमासीत् परं साम्प्रतमनुभवो हि मनोविज्ञानस्याधाररूपेण स्वीक्रियते। इदं मनसश्चेतनाया वा विज्ञानम्। मानसिक प्रक्रियाणामध्ययनमस्य विषय:।

मनसो व्यापाराणामध्ययनं मनोविज्ञानस्य विषय दर्शनं च मन आत्मादीनां स्वरूपप्रतिपादकम्। दर्शनशास्त्रे मन:स्वरूपमात्मन: स्वरूपं च विशदं विवेचितं दृश्यते। वेदादारभ्य एव मन: स्वरूपविषये विवेचनं प्राप्यते विशद रूपेण। "यज्जाग्रतोदूरमुदैति नूनं....तन्मे मन: शिव संकल्पमस्तु" अपि च "मनोजविष्ठं" ज्योतिर्हृदयं आहिते यत्..."[1] इत्यादिषु मन्त्रेषु मन: स्वरूपं स्पष्टतया निरूपितमवलोक्यते। तत्रैव "वाङ् मे मनसिप्रतिष्ठिता मनो मे वाचि प्रतिष्ठितम्"[2] इत्यत्र वाचा प्राणेन च सह मनस: सर्जनं श्रूयते। प्राणमन्तरेण मनसो व्यापारो नैव सम्भवति वाचमन्तरेण च मनसो मननादिकं च नैव सम्भाव्यते। वेदसाहित्यानन्तरं दर्शनशास्त्रेष्वपि मन: स्वरूपं सर्वत्रापि दृश्यत एव। तत्र तार्किका मनस: प्रतिशरीरमेकत्वमणुत्वमनुमानसिद्धत्वं च स्वीकुर्वन्ति। यथा "आत्मेन्द्रियार्थ सन्निकर्षे ज्ञानस्य भावो भावश्च मनसो लिङ्गम्" "प्रयत्नायोगपद्यात् ज्ञानयोगपद्याच्चैकम्"[3] तदभावादणुमन:"[4] इत्यादीनि वैशेषिक सूत्राणि एतदेव प्रतिपादयन्ति।

प्राभाकरमीमांसकैरपि तार्किकमतवदेव मनसोऽणुत्वमन्तरिन्द्रियत्वं च

---

1. ऋग्वेद, 6.9.5-6
2. ऋग्वेद: - शान्तिपाठ, ऐतरेयोपनिषद्, 6.1
3. वैशेषिकसूत्रम्, 3.2.1-2
4. तत्रैव, 7.2.2

स्वीकृतम् । कुमारिलभट्टानुयायिन अपि मनसोऽन्तरिन्द्रियत्वमेवाङ्गी कुर्वन्ति ।[1]

जैनास्तु मनसः करणत्वेऽपि नेन्द्रियत्वमिति वदन्ति यथोक्तं तत्त्वार्थवृत्तौ[2] - "नेन्द्रियमनिन्द्रियम्···तदन्तःकरणं चोच्यते ।"

बौद्धानां मते "षण्णां अनन्तरातीतं विज्ञानं यद्धि तन्मनः" अनेन विज्ञानातिरिक्तं न किञ्चिन्मनो नाम तत्त्वमिति । उत्तरविज्ञानापेक्षया यदेवाव्यवहितं पूर्वं विज्ञानं तदेव मनः । तस्य तु मनसो न नित्यत्वमपितु क्षणिकत्वमेव । "नित्ये तु मनसि प्राप्ताः प्रत्यया यौगपद्यतः····।"[3] इत्यादिना मनसो नित्यत्वं निराकृतम् ।

साङ्ख्य दर्शने बुद्धेः मनसो विभुत्वमणुत्वं च निराकृतम् । "न व्यापकत्वं मनसः करणत्वादिन्द्रियत्वाद्वा" "न निर्भागत्वं तद्योगाद् घटवत्"[4] इत्यादि सूत्रैः प्रधान जन्यत्वेनानित्यत्वात् करणत्वाच्च बुद्धि मनसोर्न विभुत्वमणुत्वं वेत्युक्तम् । निष्कर्षतो मनोबुद्ध्यहङ्काराणामन्तःकरणानां जडत्वं परिच्छिन्नत्वमनित्यत्वं च साङ्ख्यानामभिमतम् ।

"साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः" इति न्येन योगदर्शनस्यापि बुद्धिमनसोः स्वरूपनिरूपणं साङ्ख्यवदेवास्ति ।

अद्वैतवेदान्ते च यथा[5] - तच्चात्मन उपाधिभूतमन्तःकरणं मनो बुद्धिर्विज्ञानं चित्तमिति चानेकधा तत्र-तत्राभिलप्यते । क्वचिच्च वृत्तिविभागेन संशयादिवृत्तिकं मन इत्युच्यते, निश्चयादि वृत्तिकं बुद्धिरस्ति । तच्चैवं भूतमन्तःकरणमवश्यमस्तीत्यभ्युपगन्तव्यम् । अनभ्युपगम्यमाने हि तस्मिन् नित्योपलब्ध्यनुपलब्धिः प्रसंगः स्यात् । आत्मेन्द्रियविषयाणामुपलब्धिसाधनानां सन्निधाने सति नित्यमेवोपलब्धिः प्रसज्येत् । अथ सत्यपि हेतुसमवधाने फलाभावस्ततोऽपि नित्यमेवानुपलब्धिः प्रसज्येत् । न चैवं दृश्यते····तस्मात् यस्यावधानानवधानाभ्यामु-

---

1. श्लोकवार्तिकम्, 4·83
2. तत्त्वार्थवृत्तिः, 1·14, 5·19
3. तत्वार्थसंग्रहः, पृ·631
4. साङ्ख्यसूत्रम्, 5·69-71
5. ब्रह्मसूत्रशाङ्करभाष्यः, 2·3·32

-पलब्ध्यनुपलब्धी भवतस्तन्मन: । तथा च श्रुति: -- "अन्यत्र मना अभूव नाश्रौषमिति, मनसा ह्येव पश्यति मनसा शृणोतीति च ।"

एवं दर्शन साहित्ये सर्वत्रैव मन: स्वरूपनिरूपणमुपलभ्यत एव । मन: अतिरिक्तं बुद्धिरहंकारादय , अन्येऽपि मनोविज्ञानविषयास्तत्र सम्यग् समालोचिता: सन्ति । मनोवृत्तीनां ज्ञान-भाव-प्रयत्नरूपाणां वर्णनं भारतीयदर्शन ग्रन्थेषु यथोचितं प्राप्यते । अत: दर्शनं मनोविज्ञानं चान्योऽन्य सम्बद्धं इत्यत्र नैवसंशयलेशोऽपि ।

न केवलं दर्शनशास्त्रं मनोविज्ञान सम्बद्धं प्रत्युत काव्यक्षेत्रेऽपि मनोविज्ञान-स्यापरिहार्यत्वमस्ति । काव्यं हि नाम कवे: कर्म, कवे: कल्पनाप्रसूतं वा । कवे: कल्पनायां मनोविज्ञानस्यानिवार्यता परमावश्यिकी । लोकानुरञ्जनत्वादेव काव्यं साफल्यं लभते । लोकानुरञ्जनं च लोकस्य मनोभावार्हतामपेक्षते । देश-काला-द्यनुरोधेन रचिता रचना लोके साफल्यं लभते । लोकस्य का रुचि: ? इत्यस्य ज्ञानं तु मनोविज्ञानेनैव सम्भाव्यते । कालिदासप्रभृतय: कवय: लोकानुरोधरचित-रचनाभिरेवामरत्वं प्राप्नुवन् । यत्र वैदिककाले वैदिकसंस्कृतप्राचुर्यमासीत् तथा च तत्कालविरचिता: रचना अपि वैदिकसंस्कृतोपेता: तत्कालिकसमाजप्रतिरूपा-श्चासन् पुन: लौकिक संस्कृत युगे प्राञ्जलया-

-संस्कृतभाषया मानवजीवनस्य कटुसत्योपेतया च गिरा कालिदासादि-भिरपूर्वं साफल्यमधिगतम् । सहृदयमनोवृत्त्यनुकूलं विरचितान्येवाभिज्ञानशाकुन्तलो-त्तररामचरितादीनि च नाटकानि अपूर्वां ख्यातिमप्राप्नुवन् । पश्चाच्च प्रतीकनाटकपरम्परायां मनोवैज्ञानिक तत्त्वान्येव पात्रत्वेन कल्पितानि दृश्यन्ते । तेषु नाटकेषु च प्रबोधचन्द्रोदयो नितरां मनोवैज्ञानिकां संज्ञां लेभिरे इत्यत्र नास्ति कस्यापि विपश्चितो विप्रतिपत्ति: ।

छ) **प्रबोधचन्द्रोदयस्य मनोवैज्ञानिकता** - (Psychology of Prabodhachandrodya)

प्रबोध एव चन्द्रस्तस्योदय: "प्रबोधचन्द्रोदय:" इति व्युत्पत्त्या प्रबोधचन्द्रोदयो ह्यन्त:करणभावविषयसम्बद्धोऽस्ति यतो हि प्रबोधो बोधो वान्त:करणधर्मविशेष एव । मनसो विज्ञानं मनोविज्ञानमिति व्युत्पत्त्याश्च मनसोऽन्त:करणत्वं सिद्धमेव । दर्शनशास्त्रेऽपि मनसोऽन्त:करणत्वं

स्वीकृतं दृश्यते । एवं नाटकस्यास्य नाम्नैव मनोवैज्ञानिकत्वं सिद्ध्यति । तार्किकादीनां मते सन्ति केचिदन्तःकरणधर्मा आत्मविशेषगुणाः प्रवृत्तिर्निवृत्ति-जीवनहेतुसंज्ञका ये साक्षादेव शरीरे चेष्टां जनयन्ति । त धर्मा एव प्रयत्नात्मका धर्मा अपि कथ्यन्ते । तत्रेच्छाद्वेषजन्येष्टप्राप्त्यनुकूलक्रियाजनकः प्रयत्नः प्रवृत्तिः द्वेषजन्योऽनिष्टपरिहारानुकूलक्रिया निवृत्तिजनकः प्रयत्नो निवृत्तिरुच्यते । सांख्ययोगवेदान्तादिमतेषु त्वेते प्रयत्नविशेषा ज्ञानेच्छादिवदन्तःकरणधर्मा आम्नाताः । आत्मनो निर्गुणत्वान्नात्मगुणाः । प्रबोधचन्द्रोदयस्याधारस्तु एतदेव । कविना प्रवृत्तिनिवृत्तिरूपप्रयत्नविशेषा मनसः पत्नीत्वेन स्वीकृताः। यथोक्तमिष्टप्राप्त्यनुकूलक्रियाजनकः प्रयत्नः प्रवृत्तिरिति न्यायमनुसृत्य कविना मनसः पत्न्याः प्रवृत्तेः मोहरूपपुत्रस्य कल्पना कृता यत्र सदैव आसक्त्या इष्टं प्रति प्रयत्नो भवत्येव । पुनश्च निवृत्तिरूप पत्न्या विवेकसंज्ञकपुत्रस्य कल्पना विहिता । विवेकेन ज्ञानेन वा मोक्षावाप्तिस्तु वा प्रबोधोदयः, तेनैवानिष्ट-परिहारानुकूलक्रियारूपप्रयत्नः संभाव्यते । एवं कवेः कथावस्तुपरिकल्पना मनोवैज्ञानिकी एव प्रतीयते । अग्रेऽपि नाटके प्रतीकपात्राणि मनोविज्ञानसिद्धान्त-सूचकान्येव सन्ति । प्रबोधोदय एव कवेरभिप्रेतः । तच्च कथं जायते । इत्यस्य मनोवैज्ञानिकं चित्रणं यथा[1] -

मा निन्याश्चिरविप्रयोगजनितासूयाकुलाया भवे-
च्छान्त्यादेरनुकूलनादुपनिषद्देव्या मया सङ्गमः ।
तूष्णीं चेद्विषयापास्य भवती तिष्ठेन्मुहूर्तं ततो
जाग्रत्स्वप्नसुषुप्तिधामविरहात्प्राप्तः प्रबोधोदयः ।।

उक्तिरियं मतिं प्रति विवेकस्य । शान्तिमधिगतो मानव एवोपनिषद्ज्ञानं प्रति चिन्तयति विवेकेन च ज्ञानं प्राप्तुं चेष्टते । मत्याः शान्तिमधिगते जाग्रत्स्वप्नसुषुप्त्यावस्थानन्तरं यदा तुरीयावस्था जायते तदैव प्रबोधोदयो भवति। मनोविकाररूपमोहस्य विनष्टे सति मनोवैराग्यभाजतामाप्नोति परमाशान्तिं-वाधिगच्छति । तदा अविद्यास्मितारागद्वेषाभिनिवेशसंज्ञकेषु पञ्चक्लेशेषु व्यपगतेषु

---

1. प्रबोधचन्द्रोदयः, 1.30

पुरुषस्तत्त्वावबोधाभिमुखो भवति । तथ्यमिदं कविना इत्थमुद्घाटितम्[1] -

"अस्तं गतेषु तनयेषु विलीनमोहे
वैराग्यभाजि मनसि प्रशमं प्रपन्ने ।
क्लेशेषु पञ्चसु गतेषु समं समीहां
तत्त्वावबोधमभितः पुरुषस्तनोति ।।"

प्रबोधोदये जाते अथवा ज्ञानप्राप्तौ पुरुष आत्मस्वरूपं जानाति । "सोऽहम् ब्रह्म" इत्यभिजानाति । लोकोऽयं चापरिच्छेद्यत्वादिन्त्यानित्यभिन्नत्वाच्चानिर्वचनीयतां भजते ।[2] एवं कवेः कथावस्तुकल्पना पात्रयोजना च नितरां मनोवैज्ञानिकतामधिगता ।

दृश्यते हि लोके मोहादहङ्कारलोभादीनामुत्पत्तिः। इन्द्रियार्थसन्निकर्षजन्यज्ञानादन्तरानुभूतिर्जायते । ज्ञानं बोधो वा वेदनां जनयति वेदना अनुभूतिर्वा चेष्टाया जननी । चेष्टा चेत् प्रवृत्त्यात्मिका तर्हि तत्र तत्प्राप्तौ मोहादिमनोभावा अवश्यम्भाव्याः । महामोहस्याहङ्कारादीनां पात्राणां विवेकक्षमाशान्तिसंतोषादीनां पात्राणां च चित्रणं नाटके मनोवैज्ञानिकरीत्या शोभनं दृश्यते । आकारैरिङ्गितैश्चेष्टाभिः भाषणेन वा कस्यचिदपि मनोवृत्तिर्ज्ञायते। यथा कस्यचिद्रक्तं मुखं, वक्रे भ्रुवौ, बद्धं मुष्टिं, रक्ते नेत्रे चर्विंतौ ओष्ठौ, गर्वोक्तिं च निशम्य "स क्रुद्धः" इति ज्ञायते । नाटकस्य कामक्रोधाहङ्कारादीनां पात्राणां चित्रणं कविना यथावत् तत्तन्मनोवृत्त्यानुकूलमेव कृतम्[3] । यथा कामः -

"मम जगदखिलं वरोरु नाज्ञामिदमतिलङ्घ्य धृतिं मुहूर्तमेति"

क्रोधो यथा[4] -

"अन्धीकरोमि भुवनं बधिरीकरोमि
धीरं सचेतनमचेतनतां नयामि ।
कृत्यं न पश्यति न येन हितं श्रृणोति
धीमानधीतमपि न प्रतिसंदधाति ।।"

---

1. प्रबोधचन्द्रोदयः, 6.1
2. तत्रैव, 6.21
3. तत्रैव, 1.13
4. तत्रैव, 2.29

अहंकारश्च यथा[1] -

"गौडं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढापुरी ।

- - - - - -

- - - - - -

प्रज्ञाशीलविवेकधैर्यविनयाचारैरहं चोत्तमः ।।"

एवमेव कामक्रोधलोभादिमनोवृत्तीनां जेतुमपि मनसोऽन्तःकरणवृत्तय एव समर्थाः । इत्यभिलक्ष्यैव जायमाने विवेकमहामोहसङ्घर्षे विवेकेन कामं जेतुं वस्तुविचारः, क्रोधं जेतुं क्षमा, लोभं जेतुं च सन्तोषो नियुक्तः । कामरूपमनोविकारस्य प्रधानमस्त्रं "नारी" इत्यस्ति । अतस्तस्यां जितायां कामविजयः स्वत एव । यथाह नाटकस्य चतुर्थेऽङ्के वस्तुविचारः[2]-

"दृढतरमपिधाय द्वारमारात्कथंचित्

स्मरणमपरिवृत्तौ दर्शने योषितां च ।

परिणतिविरसत्वं देहबीभत्सतां वा

प्रतिमुहुरनुचिन्त्योन्मूलयिष्यामि कामम् ।।"

एवमेव क्रोधविजिगीषया क्षमया उक्तिरपि पूर्णरूपेण मनोवैज्ञानिकी । यथा[3] -

"क्रुद्धे स्मेरमुखावधीरणमथाविष्टप्रसादक्रमो

व्याक्रोशे कुशलोक्तरात्मदुरितोच्छेदोत्सवस्ताडने ।

धिग्जन्तोरजितात्मनोऽस्य महती दैवादुपेता विपद्

दुर्वारेति दयारसार्द्रमनसः क्रोधस्य कुत्रोदयः ।।"

पुनश्च लोभं जेतुकामः सन्तोषो यथा[4] -

---

1. प्रबोधचन्द्रोदयः, 1.7

2. प्रबोधचन्द्रोदयः, 4.11

3. तत्रैव, 4.18

4. तत्रैव, 4.22

"मृत्युर्नृत्यति मूर्ध्नि शश्वदुरगी घोरा जरारूपिणी

\- - - - - - -

\- - - - - - -

सन्तोषामृतसागराम्भसि मनाङ्मग्नः सुखं जीवति ॥"

एवं कामक्रोधादीनां मनोविकाराणां निराकरणे वस्तुविचारक्षमादीनां परिकल्पनं कवेर्मनोवैज्ञानिकतां परिचाययति ।

अज्ञानोपेतमनसि पुत्रकलत्रादि विनाशे दुःखोत्पत्तिस्तु नैसर्गिकी एव । यावत्तत्र वैराग्योत्पत्तिर्नजायते तावत्तत्र ज्ञानोदयो न सम्भवति । ज्ञानाभावाच्च निर्वृत्ति नैवप्रसज्यते । नाटके स्वपुत्रकलत्रादीनां विनाशान्मन आत्मघातं चिकीर्षति, सङ्कल्पश्च तं निवारयति पुनश्च सरस्वती तमुपदिशति येन वैराग्योत्पत्तिर्जायते वैराग्यश्च तत् संसारस्य नश्वरतां क्षणभङ्गुरतामुपदिशति मनश्च तदुपदेशैर्निवृत्त्याभिमुखो भूत्वा शमदमादीन् स्वापत्यान् स्वीकरोति । निखिलमिदं घटनाचक्रं सुतरां मनोवैज्ञानिकीं सरणिमनुकरोति । पात्राणां कथनोपकथनेषु तेषां च घटनाक्रमेषु मनोवैज्ञानिकता स्पष्टतया दृश्यते । मोक्षावाप्तौ नैव मनसो निवृत्त्याभित्वमेवापेक्षते तत्र सरस्वत्या सदुपदेशाः "तत्त्वमसि" रूप महावाक्यार्थश्चापि अपरिहार्यः । कविना तदनुकूलमेव कथावस्तुनः परिकल्पनं कृतम् । काम-क्रोध-लोह-मोह-अहंकारादिषु पात्रेषु तत्तद् मनोभावचित्रणमक्षरशः सार्थकतामावहति ।

कविना अन्तःकरणस्य निसर्गविरुद्धवृत्तीनां चित्रणमतीव सजीवरूपेण प्राञ्जलतया च कृतम् नैव तत्र नाट्योक्तनियमा अप्युलङ्घिता, नैव च कथावस्तु-घटनाक्रमे विच्छेदोऽपि दृश्यते । अतः नाटकमिदं साहित्यक्षेत्रे मनोविज्ञानक्षेत्रे चोभयत्रैवपूर्णतामावहति इत्यत्र नैव काप्यातिशयोक्तिः ।

= = == = = = = =

# षष्ठोऽध्याय:

## मनोभावा: प्रतीकपात्राणि च

क) भावनिरूपणम्

ख) भावानां काव्यशास्त्रीया समीक्षा -

(1) विभाव: (2) अनुभाव: (3) व्यभिचारीभाव: (4) स्थायीभाव:।

ग) प्रतीकनाट्यपरम्परायां मनोभावानां स्थानम्, प्रबोधचन्द्रोदये च तेषां महत्त्वम् ।

घ) पात्राणां भेदा:, चरित्रचित्रणम्, वैशिष्ट्यं च -

1. रूपक पात्राणि - (1) विवेक: (2) वस्तुविचार: (3) क्षमा (4) सन्तोष:, (5) श्रद्धा (6) शान्ति: (7) मति: (8) करुणा (9) मैत्री (10) विष्णुभक्ति: (11) वैयासिकी सरस्वती (12) उपनिषद् (13) पुरुष: (14) महामोह: (15) काम: (16) क्रोध: (17) लोभ: (18) अहंकार: (19) दम्भ: (20) रति: (21) मिथ्या--दृष्टि: (22) विभ्रमावती (23) मन: (24) संकल्प: (25) वैराग्य: (26) निदिध्यासनम् (27) प्रबोध: ।

2. प्ररूपपात्राणि -

(1) चार्वाक: (2) कापालिक: (3) क्षपणक: (4) भिक्षु:

3. सामान्यपात्राणि

ङ.) मानसिकपात्राणां भेद: -

(1) सत्पक्ष: (2) असत् पक्ष:

च) प्रतीकपात्राणां मनोवैज्ञानिकी दार्शनिकी च दृष्टि: ।

= = = = = =

§क§ भावनिरूपणम् -

"भू" सत्तायां "भू" इति करणे धातुस्तथा च भावितं वासितं कृतमित्यर्थान्तरम् । लोकेऽपि च प्रसिद्धम् । अहो ! ह्यनेन गन्धेन रसेन वा सर्वमेव भावितमिति । तच्च व्याप्त्यर्थम् । [1]भरतमुनेर्मतानुसारं "मानवहृदये चित्तवृत्तिरूपेण विद्यमानादेव ते भावाः" इति कथ्यन्ते । तथा च - वागाङ्गसत्त्वोपेताः काव्यार्थान् भावयन्तीति मानवव्यापारहेतुत्वात् भावपदवाच्या । यथाह नाट्यशास्त्रे[2]- भरतः -

किं भवन्तीति भावः किं वा भावयन्तीति भावाः ।

उच्यन्ते वागाङ्गसत्त्वोपेतान् काव्यार्थान् भावयन्तीति भावाः ।।

नाट्यं हि नाम रससाधकम्, भावश्च तत्साधनम् । पृथिव्यां गन्धवत् प्राणिमात्रव्याप्तौ भावो मानवेष्वत्युत्कृष्टतया विद्यते । किं बहुना विना भावेन सृष्टेः कल्पनैव न सम्भाव्यते । यथाह नाट्यप्रसंगे भरतमुनिः[3]:-

त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् ।

नाना भावोपसम्पन्नं नानावस्थान्तरात्मकम् ।।

नाट्यप्रयोगप्रसंगे कवि-प्रयोक्ता-प्रेक्षकेषु त्रिष्वेव भावस्य व्याप्तिर्भवति। कविर्हि लोकचरितान्युद्भावयति तानि च स्वकाव्यकौशलेनाभिव्यज्य सर्वजनसंवेद्यं करोति । प्रयोक्ता अभिनेता वा निजवागाङ्गसत्त्वादिभिरभिनयैः कविकल्पितानां भावानामेव भावनं विदधाति साधारणीकृतभावनव्यापारेण प्रेक्षकेन च रसोऽनुभूयते । अनेनैव भावनव्यापारेण ते भावरूपेणाभिहिता भवन्ति । यथा[4] -

---

1. नाट्यशास्त्रम्, पृ.342
2. तत्रैव ।
3. तत्रैव, 1.107.112
4. तत्रैव, 7.1-2

विभावेनाहृतो योऽर्थो ह्यनुभावैस्तु गम्यते ।
वागाङ्गसत्त्वाभिनयैः स भाव इति संज्ञितः ।।
वागाङ्गमुखरागेन सत्त्वेनाभिनयेन च ।
कवेरन्तर्गतं भावं भावयन् भाव उच्यते ।।

पाश्चात्यकाव्यक्षेत्रेऽपि "भाषणकला" प्रसंगे अरस्तू-महाभागेन विभिन्नभावा विवेचिताः । तेन सामान्यतश्चतुर्दशभावा मनोवेगा वा स्वीकृताः[1] - ते च यथा - (1) क्रोधः (2) शमः (3) प्रेयस् (4) वैरम् (5) भयम् (6) विश्वासः (7) लज्जा (8) धृष्टता (9) दया (10) निर्दयता (11) करुणा (12) रोषः (13) ईर्ष्या (14) स्पर्धा चेति । अरस्तूमहोदयस्य भावविवेचनमिदं प्रारम्भरूपेणाङ्गीक्रियते ।

लोंजाइनस महाभागेन "उदात्तप्रतिष्ठा" काव्यक्षेत्रे कृता परमुदात्तस्य प्रतिस्तु भावएवाङ्गीकृतः । उदात्तस्य लक्ष्यमेव भावोद्बोधनम् इति तस्य सिद्धान्तः ।[2]

वर्डस्वर्थकालरिजादिभिः काव्ये कल्पनातत्त्वस्य स्थापना विहिता परं कल्पनायामपि भावतत्त्वस्य प्राधान्यमङ्गीकृतम् ।[3]

डा॰ आई॰ए॰ रिचर्ड्स् महोदयः काव्यगतविचाराणां लक्ष्यं भावोद्वेलनमेव मनुते । तन्मते काव्यकर्तृत्वप्रयोजनं भावानां भावात्मकदृष्टीनां चाभिव्यक्तिरेव, न तत्र किमपि प्रयोजनान्तरम् ।[4]

हडसनमहोदयोऽपि भावं काव्यस्य प्रधानतत्त्वेनाङ्गी करोति ।[5]

एवं न केवलं भारतीयकाव्यक्षेत्रे भावानां महत्त्वमपितु पाश्चात्यकाव्यक्षेत्रेऽपि तेषां तादृशमेव महत्त्वमभ्युपगतम् ।

---

1· अरस्तु का काव्यशास्त्र - डा॰ नगेन्द्र, पृ॰32
2· काव्य में उदात्त तत्त्व - डा॰ नगेन्द्र, भूमिका ।
3· Literary Criticism: Brooks, p.407.
4. Practical Criticism, p.184.
5. Introduction to the Study of Literature, Richards, p.66.

(ग) भावानां काव्यशास्त्रीया समीक्षा -

काव्यशास्त्रे भावो व्यापके विशेषार्थे च प्रयुज्यते । व्यापकार्थे रससमावेशो भवति विशेषार्थे च स अनभिव्यक्तो भवति । भावस्य परिपक्वावस्था एव रसो निगद्यते । यथाह विश्वनाथः -

सञ्चारिणः प्रधानानि देवादि विषयारतिः ।
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ।।
न भावहीनोऽस्ति रसो न भावो रसवर्जितः ।
परस्परकृता सिद्धिरनयोः रसभावयोः ।।[1]

आचार्य-शुक्लस्यमतानुसारं संवेदनायाः स्वरूपाभिव्यञ्जनमेव रसस्याभिप्रायः । डा॰ नगेन्द्र महाभागः स्वीकरोति यत् "रसस्य भावनं" एव भरतभावाभिप्रायः, येन रसो भाव्यते स एव रसः । स्थायिनः सञ्चारिणो विभावानुभावावपि च तत्रैवान्तर्भवन्ति ।[2]

एवं भावानां परिपक्वावस्था एव रसोऽस्ति इति निश्चीयते । प्रथितं रसस्य तत्राङ्ग चतुष्टयम् - विभाव-अनुभाव-संचारिणः-स्थायि भावाश्चेति । यथोक्तं नाट्यदर्पणेऽपि-[3]

स्थायीभावः श्रितोत्कर्षो विभावव्यभिचारिभिः ।
स्पष्टानुभावनिश्चेयः सुखदुःखात्मको रसः ।।

काव्यप्रकाशकारो मम्मटोऽपि यथाह[4] -

कारणान्यथकार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ।
विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः
व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ।।

------------------------------

1. साहित्यदर्पणम्, 3·260
2. रससिद्धान्तः, डा॰ नगेन्द्र; पृ॰218
3. नाट्यदर्पणम्, 3·7·109
4. काव्यप्रकाशः, 4·27-28

विभावानुभावव्यभिचारिणश्च रसोद्बोधका इति आचार्य-भरतेनापि यथोक्तम् -[1] "विभावानुभावव्यभिचारी संयोगाद्रसनिष्पत्तिः" इति । अत्र क्रमेण विभावानुभावव्यभिचारीणां स्थायीभावानां स्वरूपं निरूप्यते ।

1. विभावः -

विभावः कारणं निमित्तं हेतुरिति पर्याया: । यथाह भरतमुनिः-[2] "अथविभाव इति कस्मात् । विभावो हि विज्ञानार्थः विभाव्यन्तेऽनेन वागङ्गसत्त्वाभिनया इत्यतो विभावः । यथा विभावितं विज्ञातमित्यनर्थान्तरम् ।"

बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रया: ।
अनेन यस्मात्तेनायं विभाव इति संज्ञितः ।।

काव्यानुशासने च यथा[3] - वागाद्यभिनयसहिता: स्थायिव्यभिचारी लक्षणाश्चित्तवृत्तयो विभाव्यन्ते-विशिष्टतया ज्ञायन्ते-यैस्ते विभावा: ।

वासनारूपतयातिसूक्ष्मरूपेणावस्थितान् रत्यादीन् स्थायिनः विभावयन्ति आस्वादयोग्यतां नयन्ति इति विभावा: ।[4] अतः आचार्यवर्याणां मते विभावो रसज्ञापने हेतुरस्ति । विभावाश्रेण विभावस्य हेतुत्वात् वा रस आस्वाद्यते ।

शिंगभूपालेनाप्युक्तम्[5] - "तत्र ज्ञेयो विभावस्तु रसज्ञापनकारणम्" ।

एवं विभावा: वासनारूपेणातिसूक्ष्मतयावस्थितरत्यादिस्थायीभावान् विभावयन्ति आस्वादनयोग्यतां नयन्ति । इयं तावत्तेषां विशेषता - "चित्तवृत्तीनां बोधनं स्थायीभावानां च विभावनम्" विभावा द्विधा - आलम्बनविभाव उद्दीपनविभावश्चेति ।

"यमालम्ब्य रस उत्पद्यते स आलंबन विभावः"[6]

---

1. नाट्यशास्त्रम्, 6.32
2. काव्यप्रकाशः, 7.4
3. काव्यानुशासनम्, हेमचन्द्रः, पृ.88
4. काव्यप्रकाशटीका, पृ.86
5. रसार्णवसुधाकरः, 1.59
6. रसतरङ्गणी, द्वितीयतरङ्गः ।

यथा सीतां दृष्ट्वा रामस्य मनसि राममवलोक्य च सीताया मनसि रतिरुत्पद्यते उभयोर्दृष्ट्वा च सामाजिकेषुरसाभिव्यक्तिर्भवति अत: सीतारामादय: श्रृङ्गाररसे "आलंबनविभावा:" कथ्यन्ते ।

"यो रसमुद्दीपयति स उद्दीपन-विभाव:"[1]

चन्द्रकोद्याननिर्जनस्थानादिभि: रतिरुद्दीप्यते अतस्ते श्रृङ्गारस्य उद्दीपनविभावा निगद्यन्ते । एवमेवान्येषामपि रसानामालम्बनोद्दीपनादय: सम्भवन्ति । आलम्बनस्य चेष्टा-देशकालादय एवोद्दीपन विभावस्य विषया: । यथा श्रृङ्गारतिलके उक्तम्[2] - इतरत्कारणजातमुद्दीपनविभाव: स चतुर्विध: -

आलम्बनगुणश्चैव यच्चेष्टा तदलंकृति: ।
तटस्थश्चेति विज्ञेयश्चतुर्धोद्दीपन क्रम: ।।
आलम्बनगुणो रूपयौवनादिरुदाहृत: ।
तच्चेष्टा यौवनोद्भूता हावभावादिका मता: ।।
नुपूरांगदहारादि तदलंकरणं मतम् ।
मलयानिल चन्द्राद्यास्तटस्था परिकीर्तिता: ।।

पण्डितराजजगन्नाथेनाप्युक्तं यथा[3] - यस्याश्चित्तवृत्ते र्यो विषय: स तस्या आलम्बनम् । निमित्तानि च उद्दीपकानि इति बोध्यम् । अपि च- "अत्रैवालम्बना भावा: कथ्यन्ते रसभूमय:"[4] अनया शारदातनयोक्त्या प्रतीयते यदालम्बन-विभावो रसस्य भूमि स्वरूपोऽस्ति ।

2• अनुभाव: -

"अनुभाव्यतेऽनेनवागंगसत्त्वकृतोऽभिनय इति अनुभाव:" यथा[5] -

वागाङ्गाभिनयेनेह यत: स्वर्थोनुभाव्यते ।
शाखाङ्गोपाङ्गसंयुक्तस्त्वनुभावास्तत: स्मृत: ।।

अनुभाव्यते इत्यनेन साक्षात्क्रियतेऽनुभवगोचर: क्रियते वा इति गृह्यते । यथा[6] -

---

1• रसतरङ्गिणी- द्वितीयतरङ्ग:।
2• श्रृङ्गारतिलकम् - प्रतापरुद्रयशोभरणम्, पृ•159
3• रसगङ्गाधर:, पृ•33
4• भावप्रकाशनम्, शारदातनय; पृ•5
5• नाट्यशास्त्रम्, 7•5 [6] दशरूपकम्, 4•3

"अनुभावो विकारस्तु भावसंसूचनात्मक: ।
हेतुकार्यात्मनो सिद्धिस्तयो संव्यवहारत: ।।"[1]

सभ्रूविक्षेप कटाक्षादयो रसपोषकारिणो हि अनुभावा: स्थायिभावान् अनुभावयन्ति । तथा च - स्थायिव्यभिचारिलक्षणं चित्तवृत्तिविशेष-सामाजिकजनोऽनुभवनमनुभाव्यते-साक्षात्कार्यतेयैस्तैरनुभावै: कटाक्षभुजक्षेपादिभि: ।

अनुभावैर्हि हृदयस्थितानां भावानामभिव्यक्तिर्भवति । अथवा आन्तरिक भावानां व्यक्तौ बाह्यरूप एवानुभाव: कथ्यते ।

अनुभावस्य व्युत्पत्तिलभ्योऽर्थोऽपि यथा - 'अनु' पश्चाद् 'भाव' उत्पत्तिर्येषाम् अथवा अनु पश्चाद् भावो यस्य सोऽनुभाव इति । एते विभावाननुगच्छन्ति । विभावेन स्थायीभावस्योत्पत्त्यनन्तरमनुभावा: जायन्ते । अतोऽनुभावानां कार्यरूपत्वं सुतरां सिद्धम् । यथाह विश्वनाथ:-[2]

"उद्बुद्ध: कारणै: स्वै: स्वैर्बहिर्भावं प्रकाशयन् ।
लोके य: कार्यरूप: सोऽनुभाव: काव्यनाट्ययो: ।।"

एतदनुसारेणाङ्गादि व्यापारा ये लोके कार्यरूपेण प्रतिज्ञायन्ते त एव काव्ये अनुभावा इति कथ्यन्ते । अनुभावै: रत्यादि भावानामभिव्यक्ति-रनुभवश्च जायते ।

"अनु पश्चाद् भावो यस्य सोऽनुभाव: कार्यम्" इति साहित्य-कौमुद्यामत्युक्तम् । धनञ्जयो[3] भावसूचनात्मकोऽनुभावनात्मकश्च विकारोऽनुभाव: इति निर्धारयति । यथा-

स्थायिभावान् अनुभावयंत: सामाजिकान् ।
सभ्रूविक्षेपकटाक्षादयो रसपोषकारिण: अनुभावा: ।।"

पण्डितराजजगन्नाथोऽपि कार्यरूपोऽनुभाव इति प्रतिपादयति । यथा-[4] स्थायिभावानां यानि कार्यतयाप्रसिद्धानि तानि अनुभावशब्देन

---

1. काव्यानुशासनम्, पृ.88
2. साहित्यदर्पणम्, 3.132-133
3. दशरूपकम्, 4.3
4. रसगंगाधर:, पृ.33

व्यपदिश्यन्ते । 'अनु' पश्चाद् भाव: उत्पत्तिर्येषां, अनुभावयन्ति इति वा व्युत्पत्तिबलात् ।

भानुदत्तो रसतरङ्गिण्यां "विषयत्वेन उद्दीपनविभावत्वम्" इत्युक्त्वा रसस्यानुभावनत्वात् उद्दीपनविभावत्वेन तं गृह्णाति ।

एवं भरतधनञ्जयादय: अभिनयदृष्ट्या एव अनुभावान् लक्षितवन्त: । एते हि अनुभावमभिनयरूप वागाङ्गचेष्टाद्योतकमामनन्ति यै: रत्यादीनामभिव्यक्ति-जयते दर्शकस्य च भावविशेषस्य बोधो भवति । परं परवर्तीभिराचार्यैरनुभावस्य व्युत्पत्तिलभ्योऽर्थोऽपि गृहीत: । "अनु पश्चात् भाव उत्पत्ति:" इत्यस्मात् अनुभाव: । अत: स्थायी भावानुभावनात् कार्यरूपानुभावा इति तेषामभीष्टम् । यथा[1] -

"भावानां यानि कार्याणि नाट्यन्ते कुशलैर्नटै: ।
अनुभावा हेतवस्ते स्वहेत्वनुभवे यत: ।।"

अनुभावस्यभेदा: -

भरतेन "वागङ्गसत्त्वेनेह" इत्यनेनानुभावोऽपि वाचिक:, आङ्गिक: सात्त्विकश्चेति भेदेन त्रिधा विभक्त: । भानुदत्तेन रसतरङ्गिण्यामनुभावाश्चतुर्धा विभक्ता यथा[2] -"स चानुभाव: कायिकमानसाहार्यसात्त्विकभेदाच्चतुर्धा"। कायिकाभ्रूक्षेपादय: मानसा: प्रमोदादयश्चतुर्भुजत्वज्ञानादय आहार्या:, सात्त्विका रोमाञ्चादयश्च ।

शारदातनयमहोदयेन मनोरम्भानुभाव:, वागारम्भानुभाव:, बुद्ध्यारम्भानुभावश्चेति त्रिधा अनुभावो विभक्त: ।[3] शिंगभूपालेनापि पूर्वोक्तमेवमतं समर्थितम् परं मनोरम्भानुभाव: "चित्तारम्भानुभाव:" इतिकथितम् ।[4] रूपगोस्वामिना उज्ज्वलनीलमणिनामके ग्रन्थे अलंकार-उद्भास्करवाचिकश्चेत्यभिधानैरनुभावा गणिता: ।[5]

---

1. सरस्वतीकण्ठाभरणम् - भोजराज:, 7.1400
2. रसतरङ्गिणी - भानुदत्त:, पृ.49.
3. भावप्रकाशनम्, पृ.6
4. रसार्णवसुधाकर:, पृ.48
5. उज्ज्वलनीलमणि:, पृ.299

मनस अनुभावा मनोरंभानुभावा: कथ्यन्ते । शारदातनयस्य भावप्रकाशने मानसानुभावेषु भाव-हाव-हेला-शोभाकान्ति-दीप्ति:-माधुर्य-प्रागल्भ्य-धैर्य-औदार्यञ्चेते भेदा: प्रतिपादिता: । एवमेव गात्रारंभानुभावेषु लीला-विलासौ-विच्छित्ति:-विभ्रम:-किलकिञ्चित्-मोहायित-कुट्टमित-विब्बोक-ललितौ विहृतस्वेते परिगणिता: ।[1]

निष्कर्षत: कायिको वाचिक: सात्त्विक आहार्यश्चेति अनुभावस्य भेदव्यवस्था । आंगिकचेष्टाकटाक्षादय: कायिकानुभावा अन्त:करणवृत्त्योद्भूतप्रमोदादय मानसिकानुभावा: । कृत्रिमवेशरचना आहार्यानुभाव: कथ्यते । शरीरस्य नैसर्गिकाङ्गविकारश्च सात्त्विकानुभाव: कथ्यते ।[2] एषु सात्त्विकोऽनुभावोऽष्टधा विभज्यते । भरतमुनिना नाट्यशास्त्रेपृथक्रूपेण एतेषां गणना कृता ।[3] ते यथा 'स्तम्भ स्वेद-रोमाञ्च स्वरसादस्वरभंगो वा ।

वेपथु: वैवर्ण्यमश्रुप्रलयश्चेति ।" भरतमते समाहितमनस: सत्त्वनिष्पत्तिर्जायते । असमाहिते मनसि रोमाञ्चादयो नैवोत्पद्यन्ते दशरूपककारोऽप्याह यथा[4] -

"सत्त्वादेव समुत्पत्तेस्तच्च तद्भाव भावनम् ।

परगतदु:खहर्षादि भावनायामत्यन्तानुकूलान्त:करणत्वं सत्त्वम् ।।"

रसरत्नप्रदीपिकायामपि यथा[5] -

यद्यपि एते यथासंभवं सर्वेषु रसेषु व्यभिचरन्ति तथापि व्यभिचारिमत्त्वमनादृत्य सत्त्वमात्रसंभवा भवन्ति इति सात्त्विका: । रसार्णवसुधाकरेऽपि भरतस्यैव मतं समर्थितम् । यथा[6] -

सर्वेऽपि सत्त्वमूलत्वाद् भावा यद्यपि सात्त्विका: ।

तथाप्यमीषां सत्त्वैकमूलत्वाद् सात्त्विकप्रथा: ।।

---

1. भावप्रकाशनम्, पृ.8.13
2. काव्यदर्पणम्, पृ.59
3. नाट्यशास्त्रम् पृ. 95
4. दशरूपकम्, पृ.124-125
5. रसरत्नप्रदीपिका, पृ.10
6. रसार्णवसुधाकर-शिंगभूपाल:, 1.310

एवं भरतमतानुसारं सात्त्विकानुभावाननुमन्यमाना विद्वान्स-
स्तस्याष्टधा विभाजनं स्वीकुर्वन्ति ।

3. <u>व्यभिचारी-भावाः</u> -

"वि + अभि + √चर्" अर्थात् वि अभि इत्येतावुपसर्गौ √चर् इति गत्यर्थो धातुः । विविधमाभिमुख्येन रसेषु चरन्तीति व्यभिचारिणः ।[1] वागङ्गसत्त्वोपेताः प्रयोगे रसान् नयन्तीति व्यभिचारिणः । अत्रेह सञ्चरणशब्दस्य प्रयोगः "आनयन्" इत्यर्थेऽभवत् । अतो व्यभिचारिणः स्थायिभावान् परिपोषयन्ति रसावस्थां च प्राप्नुवन्ति । व्यभिचारेण च तेषामस्थिरता व्यज्यते । यथा अभिनवभारत्याम्[2]-

"दीपयन्तः प्रवर्तन्ते ये पुनः स्थायिनं रसम् ।
ते तु संचारिणो ज्ञेयास्ते न स्थायित्वमागताः ।।"

धनञ्जयमतानुसारेण जलधौ कल्लोला इव व्यभिचारिणः । ये च स्थायिनि तथैवोन्मग्न-निमग्ना भवन्ति यथा जलधौ वीचयः । ते पुनः सञ्चरणद्योतकत्वादेव "सञ्चारिभावाः" इत्यप्युच्यन्ते । यथोक्तम्[3]-

"विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिमग्नाः कल्लोला इव वारिधौ ।"

साहित्यदर्पणकारश्च यथा[4] - "

"विशेषाभिमुख्येन चरणाद्व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्भिदाः ।

शिङ्गभूपालः सर्वमतसंग्रहरूपेण व्यभिचारिभावस्य लक्षणमित्थं व्याख्यायि-
यथा[5]-

---

1. नाट्यशास्त्रम्, 7.27
2. अभिनवभारती, पृ.379
3. दशरूपकम्, 4.7
4. साहित्यदर्पणः, 3.140
5. रसार्णवसुधाकरः, द्वितीयो विलासः ।

व्यभी इत्युपसर्गौ द्वौ विशेषाभिमुखत्वयोः ।
विशेषाभिमुख्येन चरन्ति स्थायिनं प्रति ।।
वागंगसत्त्वयुक्ता ये ज्ञेयास्ते व्यभिचारिणः ।
सञ्चारयन्ति भावस्य गतिं संचारिणोऽपि ते ।।
उन्मज्जन्तो निमज्जन्तः स्थायिन्यम्बुनिधाविव ।
ऊर्मिवद्वर्द्धयन्त्येनं यान्ति तद्रूपतां च ते ।।[1]

संचारयति भावस्य गतिमिति संचारी विशेषेण आभिमुख्येन स्थायिनं प्रति चरति इति व्यभिचारी ।

उपर्युक्तविभिन्नाचार्यकृतव्यभिचारी भावस्य लक्षणेभ्यस्त्रयो विशेषता व्यभिचारीभावानां प्रतीयन्ते ।

1. स्थायीभावस्योपकारकत्वं दीपतत्वं रसावस्थाप्रापणं च ।
2. स्थायिना सह कल्लोलवारिधिवत् सम्बन्धः ।
3. सञ्चरणत्वाद् अस्थिरत्वं स्वाभाविकगुणत्वं चेति ।

भेदनिरूपणे सञ्चारिणः त्रयस्त्रिंशत् प्रकारकाः स्वीक्रियन्ते बहुशः, परं संख्यानिर्धारणविषये विदुषां वैमत्यमेवावलोक्यते । भरतमुनिनाऽपि निःसीमानः सञ्चारिणः स्वीकृताः । तदपि नाट्यशास्त्रे त्रयस्त्रिंशत् व्यभिचारिणः परिगणिता यथा -[2]

"निर्वेदग्लानिशङ्कास्तथासूया मदः श्रमः ।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ।।
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यम् निद्रापस्मार एव च ।।
सुप्तिविबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ।।
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ।।"

---

1. साहित्य कौमुदी, 4.7
2. नाट्यशास्त्रम्, 6.18-21

एवं नाट्यशास्त्रे त्रयस्त्रिंशद् व्यभिचारिण: प्रोक्ता: परं अस्थिर-गुणत्वाद् दुष्करमस्य संख्यासंधानम् । भानुदत्तेन छलमिति चतुस्त्रिंशतप्रकारको व्यभिचारी भाव: स्वीकृत: । आचार्य शुक्लश्च रसमीमांसायाम् चतुर्धा विभक्ति: सञ्चारिणम् यथा[1] -

{क} सुखात्मका: -

गर्व: औत्सुक्यं हर्ष आशा-मद-सन्तोष-चाञ्चल्य-मृदुता-उदासीनं चेति ।

{ख} दु:खात्मका: -

व्रीडाऽसूयाऽमर्षावहित्था त्रासो-विषाद:-शङ्का-चिन्ता-नैराश्यता मोह: आलस्यमुन्माद: सन्तोष:-ग्लानिरपस्मार-मरणं व्याधिश्चेति ।

{ग} उभयात्मका:-

आवेग:, स्मृति:, विस्मृति:, दैन्यम्, जडता, स्वप्न:, चित्तचाञ्चल्यं चेति ।

{घ} उदासीनात्मका: -

वितर्को, मति:, श्रमो, निद्रा, विबोधश्चेति ।

डा॰ राकेश गुप्त महाभागेनापि चतुर्धा विभक्ता सञ्चारिणस्तस्य हि विभाजनं मनोवैज्ञानिकीं सरणीमनुसरति ।

1} मनोविकाराश्रित त्रयोदशसञ्चारिण: - यथा -
निर्वेद-शंका-हर्ष-दैन्य-चिन्ता-त्रास:-असूया-अमर्ष:-गर्व:-व्रीडा-आवेग-विषाद:-औत्सुक्यं चेति ।

2} ज्ञानात्मकोऽनुभव: - धृति:, मति:, वितर्क:, अवहित्था च नैवेते मनोवेगा: ।

3} शारीरिक संवेदनमात्रा - ग्लानि: श्रम: आलस्य-मदमोहश्च ।

4} मानसिकोऽनुभव: - स्मृति:-स्वप्न:-निद्रा-विबोध-जडता-चपलता-अपस्मार:-व्याधि:-उन्माद:-मरणं चेति ।

---

1. रसमीमांसा- आ॰ रामचन्द्र शुक्ल: भावनिरूपणम् ।

4· स्थायी-भावा: -

"जात एव हि जन्तुरियतीभि: संविदभि: परीतो भवति न एव हि एतच्चित्तवृत्ति वासनाशून्य प्राणी भवति वासनात्मना सर्वजन्तूनां तन्मयत्वेन उक्तत्वात् ।"[1]

इति अभिनवभारत्यानुसारं स्थायिभाव: वासनारूपेण सर्वेष्वेव भवति । भरतोऽपि विषयेऽस्मिन्नुक्तवान्[2] -

"यदि काव्यार्थसंश्रितैर्विभावानुभावव्यञ्जितैरेकोनपञ्चाशद् भावै: सामान्यगुणयोगेनाभिनिष्पद्यन्ते रसास्तत्कथं स्थायिन एव भावा: रसत्वमाप्नुवन्ति । उच्यते - यथा हि समानलक्षणास्तुल्यपाणिपादोदरशरीरा: समानाङ्गप्रत्यङ्गा अपि पुरुषा: कुलशीलविद्याकर्मशिल्पविचक्षणत्वाद्राजत्व-माप्नुवन्ति तत्रैव चान्येऽल्पबुद्धयस्तेषामनुचरा भवन्ति तथा विभावानुभाव-व्यभिचारिण: स्थायिभावानुपाश्रिता भवन्ति इत्याश्रयत्वा-स्वामिभूता: स्थायिनो भावा: विभावानुभावव्यभिचारिणश्चानुचरा: अत एव कथ्यते -

-"यथा नराणां नृपति: शिष्याणां च यथा गुरु: ।
एवं हि सर्वभावानां भाव: स्थायी महानिह ।।"

साहित्यकौमुदीकार: स्थायिभावं सुराजेवविराजन्तं प्रचक्षते । यथा[3] -

"सुराजेव विराजते स: स्थायी भाव उच्यते"

प्रधानत्वादेव विरुद्धाविरुद्धभावैर्न नश्यते यथाह विश्वनाथ:[4] -

"अविरुद्धाविरुद्धा वा यं तिरोधातुमक्षमा: ।
आस्वादाङ्कुरकन्दोऽसौ भाव: स्थायीति सम्मत: ।।"

एवं स्थायीभावोऽन्यान् तथैवात्मसात् करोति यथा लवणाकरो नानाविधं संरिज्जमात्मभावंभावयति । यथोक्तम्[5] -

"आत्मभावं नयत्यन्यान् स स्थायी लवणाकर:"

---

1· अभिनवभारती, पृ· 282
2· नाट्यशास्त्रम्, अध्याय 6
3· साहित्यकौमुदी, 4·7
4· साहित्यदर्पणम्, 3·174
5· दशरूपकम्, 4·34

सरस्वतीकण्ठाभरणे च यथा[1] -

"चिरं चित्तेऽवतिष्ठन्ते सम्बध्यन्तेऽनुबन्धिभिः ।
रसत्वं ये प्रपद्यन्ते प्रसिद्धा स्थायिनोऽत्र ते ।।"

वाग्देवताऽवतारो मम्मटश्च[2] "अविच्छिन्नप्रवाहाः स्थायिभावाः" इत्यनेन रसे स्थायी भावानामविच्छिन्नतां स्वीकरोति । पण्डितराजजगन्नाथश्च[3]- "तत्र आप्रबन्धं स्थिरत्वादमीषां भावानां स्थायित्वम्" अनेन स्थायी भावस्य स्थैर्यं प्रतिपादयति ।

एवं ज्ञायते यत् रत्यादि भावा वासना रूपेण-मानवहृदि पूर्वमेव भवन्ति प्राप्त काले सुप्त इव इमे भावाः काव्यश्रवणेन नाटकदर्शनेन वा उद्बुध्यन्ते आनन्दरूपतां च भजन्ति इयमेवावस्था स्थायीभावस्य रसदशेति कथ्यते । शब्दान्तरेषु मनोविकार जनका हि भवन्ति स्थायिनः । उद्बुध्यन्ते च ते विकाराः काव्यस्य श्रवणेन दर्शनेन वा दृश्यकाव्यस्य । यदा किमप्यनुकूलः प्रतिकूलो वा विषयोऽनुभूयते इन्द्रियान्तरेण साक्षाद्वा दृश्यते तदा सहसैव तदनुरूपो विकारो जायते । संवेगरूपा हि भवति सा प्रतिक्रिया तेन ते विकाराः संवेगपदेनाऽप्यभिधीयते । मनोविज्ञानशास्त्रे तु त एव व्याख्यानविषया भवन्ति । संवेगानां मनोविज्ञानक्षेत्रे महत्त्वपूर्णं स्थानमस्ति । संवेगादुत्पद्यमाना विकारा अस्थायिनः स्थायिनश्च भवन्ति । अस्थायिनो विकाराश्चित्तवृत्त्यो मनोदशा ( Mood ) वा कथ्यन्ते । स्थायिनश्च स्थायिभावा भावना ( Sentiment ) इति । यदा कश्चिद् भावो मनसि क्रियासमभिहारेण प्रादुर्भवति, काचिदेकैव वा मनोदशा दीर्घकालं मनसि तिष्ठति, तदा कश्चिद्विशिष्टः स्थायिभावो जायते । एवं संवेगजन्याः स्थायिनो मनोविकाराः स्थायिभावा उच्यन्ते यदा कश्चिद्बालकं वारं-वारं कश्चित् सन्त्रासयति तदा तम्प्रति बालके घृणा, स्थायिभावतां प्रतिपद्यते । एवं

---

1. सरस्वती कण्ठाभरणम्, 5.19
2. काव्यप्रकाशः, पृ. 478
3. रसगङ्गाधरः, पृ. 138

यथाक्रमपि पुरुषं देशादिक्रमवेतनं पदार्थं वा प्रति मनसि स्नेह भावना क्रियासमभिहारेण उदेति चिरं चावतिष्ठते तदा तत्र स स्नेहः स्थायिभावत्वं प्राप्नोति । एवमेवान्येऽपि संवेगाः स्थायिभावतां प्रपद्यन्ते । इति

ग§ प्रतीकात्मकनाट्यपरम्परायां मनोभावानां स्थानं प्रबोधचन्द्रोदये च तेषां महत्त्वम्-

मानवेषु रूपकात्मकवर्णनस्य प्रवृत्तिः प्रायशोऽवलोक्यते । रूपकशैल्यां निजभावानामुद्बोधनं साफल्येन कर्तुं शक्यते । रूपकशैलीमाश्रित्य आलंकारिक-प्रयोगस्तु वैदिकसंहितास्वप्यवलोक्यते तत्र ह्यतिसूक्ष्मरहस्यान्यपि रूपकमाध्यमेन-व्यक्तानि दृश्यन्ते । ऋग्वेदस्यानुक्रमणिकायां सप्तममण्डलस्य मन्त्रद्रष्टा-वशिष्ठः श्रूयते । वशिष्ठ एवालोचकैरादिमो ऋषिरपि निर्धार्यते । तत्र च सप्तममण्डले मोह-क्रोध-मात्सर्य-काम-अभिमानाहंकारलोभादीनामलंकारिक रूपेणोलूक-शुशुलूकादयः रूपकात्मकं शैलीमाश्रयन्ते ।[1] निरुक्तेऽपि-[2]"विद्याहवै ब्राह्मणमाजगाम गोपायमाशेवधिष्टे" इत्यादिषु शैलीयमेवावलोक्यते । यजुर्वेदेऽपि[3] मनसोमूर्त कल्पनाप्रतीकात्मकशैलीं पुष्णाति ।

नाट्यसाहित्येप्रतीकात्मक नाटकपरम्परा नैव तादृशी महत्त्वपूर्णं स्थानं भजते तथापि प्राक्कालादेव क्षेत्रेऽस्मिन्कवयः कृतप्रयत्नाः दृश्यन्त एव । आदिमो नाटककारो भासो गण्यते तस्य त्रयोदशनाट्यकृतिषु बालचरिताभिधाने नाटके "शाप" "राज्यश्री" चेति पात्रद्वयस्य मूर्तपात्रवद् कल्पनाऽस्ति । पश्चात् ईशव्याः प्रथमशताब्द्यामश्वघोषस्य शारिपुत्रप्रकरणं गण्यते । उपलब्धशारिपुत्र-प्रकरणस्य अंशेभ्यो ज्ञायते यत्तत्रधृतिः दया-क्षमादयो मनोभावा मूर्तपात्ररूपेण चित्रिताः सन्ति अनेन प्रतीकात्मकनाट्यपरम्परायाः उद्भवोऽप्यङ्गीक्रियते यत्र तथागतसिद्धान्ता अश्वघोषेणरूपकमिषेण काव्यविषयीकृताः । परं परवर्ति -

-----------------------------

1· उलूकं यातुं शुशुलूकयातुं जहि श्वयातु मुत कोकयातुम् । -ऋग्वेदः - 7·104·22
सुपर्णयातुमुत गृध्रयातुं दृषदेव प्रमृण रक्ष इन्द्र ।।

2· निरुक्तम्, 42·4

3· यजुर्वेदः, अ· 34, मन्त्र 6

साहित्ये श्रीकृष्णमिश्रात् प्राक् नैव काऽपि नाट्यरचना अस्यां शैल्यां लिखिता प्राप्यते नैव चेतादृशमविकलं सकलं वा नाटकं यद्रूपकरचनापरं स्यात्। अतः श्रीकृष्णमिश्र एव प्रतीकात्मकनाट्यशैल्याः प्रवर्तकः स्वीकर्तुं शक्यते तस्य नाटकं प्रबोधचन्द्रोदयश्चास्याः शैल्याः प्रतिष्ठापकः। नाटकमिदं पूर्णरूपेण प्रतीकशैलीं पुष्णाति इत्यत्र न कस्यापि विप्रतिपत्तिः। अद्वैत-दर्शनमवलम्ब्य रचितं नाटकमिदं मानवमनसो विवेकमोहरूपस्यान्तर्द्वन्द्वस्यैव परिणामः। मानवमनसः सम्बद्धत्वात् मनोभावानां चित्रणं विश्लेषणं च नैसर्गिकमेव। अत्र सन्ति केचन कामक्रोधलोभतृष्णादम्भाहंकारादयः मनोभावाः प्रवृत्तिप्रयोजकाः, इतरे च वस्तुविचारक्षमासन्तोषशान्तिकरुणाप्रभृतयः मनोभावाः निवृत्तिप्रयोजका अन्योऽन्यप्रतिपक्षत्वेन च चित्रिताः। तत्र हि कविना एतेषां मनोभावानां यादृशं चित्रणं कृतमस्ति येन तानि रूपकपात्राण्यपि मूर्तवत् पुरत इवावलोक्यन्ते। यथा क्रोधस्योक्तिरियम् निभालनीया:[1]

> अन्धीकरोमि भुवनं बधिरीकरोमि
>
> धीरं सचेतनमचेतनतां नयामि।
>
> कृत्यं न पश्यति न येन हितं शृणोति
>
> धीमानधीतमपि न प्रतिसन्दधाति॥

अत्र हि वैदर्भीरीत्या कविना क्रोधरूपमनोभावस्य वास्तविकं स्वरूपं चित्रितम्। सत्यमेतत् यत् क्रोधाविष्टो मानवः अन्ध इव पश्यन्नपि नैव वस्तुतः पश्यति शृण्वन्नपि च नैव शृणोति। तस्य चेष्टा च यथोक्त-मेवानुसरति। एवमेव कामातुरस्य व्यवहारज्ञानं "काम" पात्रस्य वचनेषु व्यज्यते। यथा-[2]

> प्रभवति मनसि विवेको विदुषामपि शास्त्रसम्भवस्तावत्।
>
> निपतन्ति दृष्टिविशिखा यावन्नेन्दीवराक्षीणाम्॥

---

1. प्रबोधचन्द्रोदयम्, 2.29
2. तत्रैव, 1.13

अपि च[1] -

"सन्तु विलोकन भाषणविलासपरिहासकेलिपरिरम्भाः ।
स्मरणमपि कामिनीमलमिह मनसो विकाराय ।।"

दाम्भिकस्याहंकारान्वितस्य मानवस्वरूपं दम्भाहंकारपात्राभ्यां सम्यग्तया व्यज्यते । दाम्भिकः प्रायेण वाचालो भवति न किञ्चित् कुर्वाणोऽपि आत्मानं बहुमन्यते । नाटकस्य दम्भपात्रेण दम्भरूप मनोभावस्य साक्षात्प्रतीतिरर्जयते । यथा दम्भोक्तिः-[2]

सदनमुपगतोऽहं पूर्वमम्भोजयोनेः
सपदि मुनिभिरुच्चैरासनेषूज्झितेषु ।
सशपथमनुनीय ब्रह्मणा गोमयाम्भः
परिमृजितनिजोरावाशु संवेशितोऽस्मि ।।

अहंकारोऽपि यथा[3] -

"अरे क इव वासवः कोऽत्रपद्मोद्भवो
वदप्रभवभूमयो जगति का मुनीनामपि ।
अवेहि तपसो बलं मम पुरन्दराणां शतं
शतं च परमेष्ठिनां पततु वा मुनीनां शतम् ।।"

अहंकारग्रस्तो मानव आत्मश्लाघापरः सन्नैवान्यस्य हितमपि मनुते, आत्मानं च सर्वश्रेष्ठमङ्गीकरोति इत्यस्य दर्शनमुपर्युक्ताहंकारवचनेन प्रतीयत एव। तृष्णायाः लोभस्य चेयत्ताऽपि कविना चारु रूपेण चित्रिता । लोभः खलु पापस्य मूलम् । स एव पापं जनयति । नैव तत्र शमस्य स्थानमस्ति । तृष्णायाः लोभस्य च इयत्तैव नास्ति । भावोऽयमेव कविना इत्थं प्रकटितः-[4]

---

1. प्रबोधचन्द्रोदयम्, 1.16
2. तत्रैव, 2.10
3. तत्रैव, 2.11
4. तत्रैव, 2.32

"क्षेत्रग्रामवनादिद्रपत्तनपुरद्वीपक्षमामण्डल-
प्रत्याशायतसूत्रबद्धमनसां लब्धाधिकं ध्यायताम् ।
तृष्णेदेवि यदि प्रसीदसि तनोष्यङ्गानि तुङ्गानि चे-
त्तद्भोः प्राणभृतां कुतः शमकथाब्रह्माण्डलक्षैरपि ।।"[1]

क्रोधं जेतुं नियुक्तः क्षमा शान्तिरूपमनोभावस्य यथार्थं चित्रणं प्रस्तौति । लोभरूपमनोभावः सन्तोषेणान्तर्हितो भवति अतः सन्तोष एव विवेकेन कार्येऽस्मिन् नियुक्तः । सन्तोषश्च लोभाचरणं गर्हन्[2] सन्तोषामृतसागराम्भसिमनाङ्मनन: सुखेन जीवति[3] इति सिद्धान्तमनुमोदयति ।

पुत्रकलत्रादि मरणजन्यशोको निश्चयेन अरुन्तुदो भवति । परं व्यामोहोऽयं ममतावासनानिबन्धन एव । अत एवोक्तम्[4]-

मार्जारि भक्षिते दुःखं यादृशं गृहकुक्कुटे ।
न तादृङ्ममताशून्ये कलविङ्केऽथ मूषके ।।"

व्यामोहाम्बुनिधिमग्नस्य मनसः स्थितिरप्येतादृशी एवाऽऽसीत् तदा सरस्वत्या वैराग्यस्य चोपदेशा, मनः स्थिरीकर्तुं प्रयतते । तत्र वैराग्यस्योपदेशाः सरस्वत्याश्च नीतिवचनानि कस्यमनसि वैराग्यं नोत्पादयन्ति । यथा[5] -

"श्रियो दोलालोलाविषयजरसाः प्रान्तविरसा
विपद्गेहं देहं महदपि धनं भूरि निधनम् ।
बृहच्छोको लोकः सततमबलानर्थबहुला
तथाप्यस्मिन्घोरे पथि बत रता नात्मनि रताः ।।"

अपि च[6] -

---

1. प्रबोधचन्द्रोदयः, 4.16, 18
2. तत्रैव, 4.19-22
3. तत्रैव, 4.23
4. तत्रैव, 5.20
5. तत्रैव, 5.24
6. तत्रैव, 5.25

"पान्थानामिव वर्त्मनि क्षितिरुहां नद्यामिव भ्रश्यतां
मेघानामिव पुष्करे जलनिधौ सांयात्रिकाणामिव ।
संयोगः पितृमातृबन्धुतनय भ्रातृ प्रियाणां यदा
सिद्धो दूरवियोग एव विदुषां शोकोदयः कस्तदा ।।"

पूर्वोक्त प्रसंगे: स्पष्टतया मनोभावानां यथार्थचित्रणं प्रतीयते मानसिकानां भावनानां वास्तविकं चित्रणं तत्तत् प्रसंगेऽस्माकं पुरत इव स्थितो भवति यदा पठनं श्रवणं वाऽपि क्रियते ।

श्रीकृष्णमिश्रस्थापिता नूतनेयं शैली परवर्तीभिः कविभिरप्यनुकृता । अनेकानि च नाटकान्यस्यां शैल्यां लिखितानि । तेषु त्रयोदशशताब्द्यां "यशपाल" कवेः "मोहराजपराजयम्" नाटकमादिमं खलु । नाटकेऽस्मिन् कैश्चित् भावनात्मकपात्रैः जैनधर्मस्य स्थापना विहिता । प्रबोधचन्द्रोदयवत् जैनगुरुहेमचन्द्रस्य मोहराजस्य च द्वन्द्वं चित्रितम् । कविवर्णितमोहराज चरित्रं कृष्णमिश्रस्य महामोहमनुकरोति । अत्र मोहस्य मनोयोगस्य च मनोभावत्वेन[1] कल्पनाऽस्ति । विवेकानन्द-ज्ञानदर्पण-द्यूतकुमार,- मदन देवादयः प्रतीक पात्रत्वेन समायोजिताः ।

चतुर्दशशताब्द्यां वेंकटनाथस्य संकल्पसूर्योदयाभिधानं नाटकं विशिष्टाद्वैतत्वादस्य प्रतिपादकमस्यामेव शैल्यां महत्त्वपूर्णं स्थानं भजते । अत्रापि विवेकस्य महामोहस्य च नायकप्रतिनायक रूपेण कल्पनाऽस्ति । श्रद्धा-सुमतिः, विचारणा-काम-रति-क्रोधो-लोभःश्च प्रतीकपात्राणि सन्ति । संकल्पसूर्योदयोऽपि प्रबोधचन्द्रोदयमनुकुर्वन् प्रतीयते । अत्र हि कानिचिन्निदर्शनानि मनोभावानाम् यथा - कामः -[2]

"रागोपलिप्तदृष्टिः प्रलपति मुह्यति विघूर्णति स्खलति ।
युवतिमदिरामदान्धो युक्तायुक्तं न जानाति ।।"

---

1. मोहराजपराजयम्, पृ. 123
2. संकल्पसूर्योदयः, 4.45

क्रोधो यथा[1]-

"बिभर्तु विबुधेश्वरं क्षिपतु दानवानीकिनीं
भिनत्तु कुलपर्वतान् वनशतानि मृद्गातु वा ।
अयत्नविधृतक्षितिस्त्वकशेखरालंकृतः
किमद्भुतपदं भवत्ययममीभिरे रावणः ।।"

लोभो यथा[2] -

"लब्धं न मुञ्चति विलक्षमतिर्न भुङ्क्ते
धत्ते पुनः पुनरसौ महती क्षमायाम् ।
निद्रारसं न लभते महतां निधीनां
रक्षापिशाच इव सम्प्रति राजराजः ।।"

तृष्णा च[3] -

"कनककलधौतशैलप्रभृतिभिरपि हन्त पूरणैः क्षिप्तैः ।
तृष्णे भवति समृद्धं भूयो भूयस्तवोदरे कार्श्यम् ।।"

एवं नाटकेऽस्मिन् वर्णितं मनोभावानां चित्रणमपि मनोवैज्ञानिकं मनोभावानुकूलं चास्ति । वर्णनमिदं प्रायः श्रीकृष्ण मिश्रशैलीमनुकरोति ।

कवि कर्णपूरविरचितं "चैतन्यचन्द्रोदयम्" नाटकं महाप्रभुचैतन्यदेवस्य जीवनवृत्तान्तं प्रस्तौति । नाटकमिदमपि प्रतीकशैल्यामस्ति । यस्यामूर्तपात्रेषु भक्तिविरागकलि-अधर्मादीनां प्राधान्यमस्ति । अस्मिन्नपि अधर्मस्य मदस्य च वर्णनं प्रबोधचन्द्रोदयरीत्यैव कृतं दृश्यते । यथा[4] -

"मूकीकरोत्यलममूकमहो अनन्धमन्धीकरोति त्वबधिरं बधिरी करोति" इत्यादि वर्णनं प्रबोधचन्द्रोदयक्रोधवर्णनमिव[5] एव । अत्र हि कविना गङ्गा,

---

1. संकल्पसूर्योदयः, 4.48
2. तत्रैव, 4.50
3. तत्रैव, 4.49
4. चैतन्यचन्द्रोदयम्, 1.43
5. प्रबोधचन्द्रोदयः, 2.29

रत्नाकर -ब्रह्मनन्द- अद्वैत-प्रेम-भक्ति-मैत्र्यादयोऽपि पात्रत्वेनोपकल्पिताः सन्ति।

वादिचन्द्रसूरिविरचितं ज्ञानसूर्योदयाभिधाख्यं नाटकमस्यामेव शैल्यामस्ति यत्र जैनधर्मस्य दिगम्बरसिद्धान्तः प्रतिपादितः । चतुराङ्कोपेते नाटकेऽस्मिन्नपि प्रबोधचन्द्रोदयवदेव घटनाक्रमो दृश्यते । पात्राणि शैली कथावस्तु च पूर्णरूपेण प्रबोधचन्द्रोदयानुरूपमेवास्ति । अस्मिन् विवेक-मोह-दया-मति-काम-रति-अष्टशतीत्यादिनां मनोवैज्ञानिकं चित्रणमस्ति ।

ज्ञानसूर्योदयानन्तरं भूदेवशुक्लस्य धर्मविजयाख्ये नाटके अस्तेयदान-शौचादीनां मनोभावानां प्रयोगोऽस्ति । पुरञ्जनचरितम्- विद्यापरिणयम्-जीवानन्दश्चेति त्रीणि नाटकानि अष्टादशशताब्द्याः पूर्वार्धे लिखितानि । नैव तत्र मनोभावानामोल्लेखो विशेषतोऽवलोक्यते । परमष्टादशशताब्द्याः उत्तरार्धे लिखिते "मिथ्याज्ञानविडम्बनाऽभिधाने नाटके करुणादीनां मनोभावानामंशतो वर्णनमस्ति । मनोभावाश्रितं नाटकं "आनन्दरायमखि" विरचितं "विद्यापरिणयम्" उल्लेखनीयमस्ति यत्र दम्भमदहर्षनिभप्रवृत्ति-निवृत्तिश्रद्धादि मनोभावानां पात्ररूपेण कल्पना चरित्रचित्रणं च दृश्यते । नाटके शैवागमोक्तं मोक्षस्वरूपं तत्प्राप्त्युपायश्चदर्शितः । "जीवराजस्य अविद्यायाः मुक्तिः विद्ययासहपरिणय" एव कवेरभिप्रेतः । क्रोधरूपमनोभावस्य चित्रणं यथा तत्रैव[1] -

"कोपः स एष कुटिलभ्रुकुटीकरालं,
वक्त्रं दधद्रुमदिवासृगवेक्षणेन ।
उद्दण्डदण्डधरचण्डधराभटीकमभ्येति
विभ्रमविलास कथानभिज्ञः ।।"

अत्र हि क्रोधावेशे विद्यमान-मानवहावभाव-चेष्टादिकं स्पष्टत्येव व्यज्यते ।

लाभो यथा तत्रैव पुनः[2] -

-------------------------------

1. विद्यापरिणयम् - आनन्दरायमखिविरचितम्, 5.4

2. तत्रैव, 5.6-8

"एहि याहि यथाकामं नाहितं तेन किञ्चन्
देहि वाचमिमां नैवं ब्रूहि मां प्रीत्या त्वपि ।
पितरौ वा विपरीतौ जायतां वा सुतायुतम्,
मिलन्तु वीपरागाश्च मिथो दद्यां न किञ्चन ।।

अपि च -

"अभ्येतु धीरवपुषाधुरि राक्षसो वा,
दंष्ट्रा करालवदनः स्वयमन्तको वा ।
चेतो बिभेति न तथा मम्
दुर्निवारे दृष्टेयथार्थीन सपुस्तकदर्भपाणौ ।।"

इत्यादौ लोभीनामदानशीलत्वं सर्वस्वग्राहित्वं च यथार्थरूपेण चित्रितम् ।

दम्भस्य मनोवैज्ञानिकं वास्तविकं चचित्रणं यथा[1] -

"इन्द्रः कुबेरः इति ये महिता सुरास्ते,
बाह्यडुगणं निबिड्यन्ति निरन्तरं मे ।
एतेषु मे यदिह किञ्चिदुदञ्चितभ्रूः,
किं किं न सिध्यति जनस्यमदाश्रितस्य ।।"

एवमन्येऽपि हर्ष-मान-मद-निवृत्ति-प्रवृत्ति-विषय-वासनादयश्च मनोभावा मूर्तरूपे कल्पिता एतेषां वर्णनं चातीव नैपुण्येन सार्थकतया च कृतम् ।

प्रतीकात्मकपरम्परायां गोकुलनाथस्य "अमृतोदयम्" नाटकमपि गण्यते । पञ्चाङ्कोपेतं नाटकमिदं न्यायदर्शनोक्तपदार्थान् पात्ररूपेणास्माकं पुरतोऽवस्थाप्यते । नाटकेऽस्मिन्नपि प्रबोधचन्द्रोदयस्य प्रभावो दृश्यते । प्रबोधचन्द्रोदयस्य प्रबोधः गोकुलनाथेन "अपवर्गो निर्वाणं वा" कृतम्, सरस्वती-श्रद्धा-दिगम्बर-भिक्षु-कापालिक-शिष्यादि पात्राण्युभयत्र समानरूपेण सन्ति । अमृतोदयस्य युद्धभावनाऽपि प्रबोधचन्द्रोदयप्रभाविता प्रतीयते ।

-------------------------------

1. विद्यापरिणयम् - आनन्दरायमखिविरचितम्, 5.17

एतदतिरिक्तमपि "भावनापुरुषोत्तमः" "भर्तृहरिनिर्वेद" "जीवानन्दम्" पुरुजनचरितादीनां नाटकानामप्यस्यां श्रेण्यामेव गणना क्रियते । तेषु हि सामान्य विशेषरूपेण वा मनोभावानां वर्णनं दृश्यत एव । वस्तुतः अस्यां शैल्यां लिखितेषु नाटकेषु मनोभावानामभावस्त्वसम्भव एव । यतो हि कविभिराध्यात्मविषयमाहोस्विद् दार्शनिकमतमवलम्ब्यैव नाटक रचना क्रियते । उभयत्रैव मनोभावानां प्राधान्यं भवत्येव तदभावे च नैव सम्भाव्यते रचना साफल्यम् ।

§घ§ प्रबोधचन्द्रोदयस्य पात्राणां भेदाः, चरित्र चित्रणम् वैशिष्ट्यं च -

प्रबोधचन्द्रोदयस्य कथावस्तु वेदान्तस्य ज्ञानभक्तिसमन्वयसाधकम् । निखिलाऽपि कथा भावात्मिका आध्यात्मिका च । अतः अस्य पात्राण्यपि भावतत्त्वमादधाना विभिन्नमतावलम्बिनः सन्ति । अमूर्तभावास्तत्र मूर्तरूपत्वेनोपवर्ण्यन्ते, विशेषतः दार्शनिकमतं सिद्धान्तो वाऽपि मूर्तपात्रत्वेनावतार्यते क्वचिच्च तत्पुरस्कर्ताऽपि पात्रत्वमुपयाति । एवं तानि पात्राणि रूपकात्मकत्वात् "रूपकपात्राणि" इत्यभिधीयन्ते । रूपकशब्दस्य व्याख्या तु प्रपञ्चितपूर्वा । तदतिरिक्तं कानिचित् पात्राणि विभिन्नमतावलम्बीनि मतवैशिष्ट्यप्रतिपादकान्यपि सन्ति तानि च प्ररूपपात्रत्वेन पुरतोऽवस्थितान्यवलोक्यन्ते येषु तत्तन्मतवैशिष्ट्यं प्रतिबिम्बितमभूत् । अतस्तानि पात्राणि "प्ररूप पात्राणि" इत्यभिधीयन्ते । "कस्यचिन्मतविशेषवैशिष्ट्ययुक्तं चरित्रं पात्रं वा "प्ररूप" § Typical § इति कथ्यते ।"[1]

---

1. Type-(taip) a person, thing, event etc. considered as an example of a class, group or quality; a characteristic specimen. Abraham Lincoln was a fine type of American patriotism (of the American patriot) 2.(c) a class or group having common characteristics, as men of the Nordictype. A cowardly buldog is not true to type. Typical (adj.) Serving as a type characteristic. Abraham Lincoln was a typical American patriot.

   - Advanced Learner's Dictionary of Correct English by A.S. Harnby & H. Wakefield.

रूपक प्रुरूपपात्रातिरिक्तं सामान्य पात्राण्यपि नाटकेऽस्मिन्नीक्ष्यन्ते । इत्थं प्रबोध चन्द्रोदयस्य पात्राणि त्रिषु श्रेणीषु विभज्यन्ते -

क॰ रूपक-पात्राणि ।

ख॰ प्ररूप-पात्राणि ।

ग॰ सामान्य-पात्राणि ।

क॰ रूपक पात्रेषु अधोनिर्दिष्टानि समाहर्तुं शक्यते - ॰1॰ विवेक: ॰2॰ वस्तुविचार:, ॰3॰ क्षमा ॰4॰ सन्तोष: ॰5॰ श्रद्धा ॰6॰ शान्ति: ॰7॰ मति: ॰8॰ करुणा ॰9॰ मैत्री ॰10॰ विष्णु भक्ति: ॰11॰ वैयासिकी सरस्वती ॰12॰ उपनिषद् ॰13॰ पुरुष: ॰14॰ महामोह: ॰15॰ काम: ॰16॰ क्रोध: ॰17॰ लोभ: ॰18॰ अहंकार: ॰19॰ दम्भ: ॰20॰ रति: ॰21॰ मिथ्यादृष्टि: ॰22॰ विभ्रमावती ॰23॰ मन: ॰24॰ संकल्प: ॰25॰ वैराग्य: ॰26॰ निदिध्यासनम् ॰27॰ प्रबोधश्चेति ।

ख॰ प्ररूप-पात्राणि -

॰1॰ चार्वाक: ॰2॰ भिक्षु: ॰3॰ क्षपणक: ॰4॰ कापालिक: ॰5॰ वटु: ॰6॰ शिष्यश्च ।

ग॰ सामान्य-पात्राणि -

॰1॰ सूत्रधार: ॰2॰ सारथि: ॰3॰ प्रतिहारी ॰4॰ दौवारिकश्च ।

॰क॰ रूपक-पात्राणि -

1. विवेक: -

"सम्भूत: प्रथममहेश्वरस्य सङ्गान्मायाया मन इति विश्रुतस्तनुज: ।
त्रैलोक्यं सकलमिदं विसृज्य भूयस्तेनाथो जनितमिदं कुलद्वयम् ।।"[1]

तस्य च प्रवृत्तिनिवृत्तिद्वे धर्मपत्न्यौ । तयो: प्रवृत्त्यां समुत्पन्नं महामोहप्रधानमेकं कुलम्। निवृत्त्यां च द्वितीयं विवेक प्रधानमिति ।

---

1. प्रबोधचन्द्रोदय:, 1.17. गद्यभागश्च तत्रैव ।

अनेन ज्ञायते यद् विवेको मनसो निवृत्तामुत्पन्न: पुत्रोऽस्ति। अनयैव कामस्योक्त्या विवेककुलस्यपरिचय: सम्यकरूपेण प्राप्यते। नाटकस्य प्रथमाङ्के निजपत्न्या मत्या सह विवेक: रङ्गमञ्चमुपस्थित्य विवेकं गर्हयन्तं कामं प्रति इत्थं भणति:- [1] "प्रिये, श्रुतं त्वयास्य दुर्विनीतस्य कामवटोर्मदविस्फूर्जितं क्वो यदस्मानेव पापकारिण इत्याक्षिपति - पश्य -

"असावहङ्कारपरैर्दुरात्मभिर्निबध्य तै: पापशठैर्मदादिभि:।
चिरं चिदानन्दमयो निरञ्जनो जगत्प्रभुर्दीनदशामनीयत।।
त एते पुण्यकारिणो वयं तु तन्मुक्तये प्रवृत्ता: पापकारिण:
इत्यहो जितं दुरात्मभि:।"

उपर्युक्तकथनै: प्रतीयते यद्विवेकस्य साध्यो ब्रह्मणो मुक्ति:, यश्च कामादिभि: दुरात्मभि: स्वायत्तीकृत्य दीनतामप्राप्यत। यद्यपि परमेश्वर: सहजानन्द सुन्दरस्वभावो नित्यप्रकाश: प्रस्फुरत्सकलत्रिभुवन प्रचारश्चास्ति तथापि तस्य महामोहसागरे निबन्धनं कथम्। इति प्रश्ने विवेको वेदान्त-सिद्धान्तमनुमोदयन् कथयति [2] -

"सततधृतिरप्युच्चै: शान्तोऽप्यवाप्तमहोदयोऽ-
प्यधिगतनयोऽप्यन्त: स्वच्छोऽप्युदीरितधीरपि।
त्यजति सहजं धैर्यं स्त्रीभिप्रतारितमानस:
स्वयमपि यतो मायासङ्गात्पुमानिति विश्रुत:।।"

अद्वैतवेदान्तदर्शने सिद्धान्तोऽयम् यथा पञ्चदश्याम् [3] -

"चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता।
तमोरज:सत्त्वगुणा प्रकृतिर्द्विविधा च सा।।
सत्त्वशुद्ध्यविशुद्धिभ्यां मायाऽविद्ये च ते मते।
माया बिम्बो वशीकृत्य तां स्यात् सर्वज्ञ: ईश्वर:।।

---

1. प्रबोधचन्द्रोदय:, 1.24
2. तत्रैव, 1.25
3. पञ्चदशी, 1.15-16

विवेक: ऋजु विनीतो मधुरस्त्यागी दक्ष: प्रियवदश्चास्ति।
मिथ्याभिमानग्रस्त: कामस्तमेव कुलक्षयप्रवर्तकं पापकारिणं च प्रचक्षते तच्छ्रुत्वाऽपि विवेको नैव प्रतिवदति प्रत्युत यथार्थतामुद्घाटयन् एवं कथयति -

"गुरोरप्यवलिप्तस्य कार्याकार्यमजानत: ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ।।"[1]

इति पौराणिकीं गाथां पुराणविद उदाहरन्ति । अनेन चास्माकं जनकेनाहङ्कारमनुवर्तिना जगत्पति: पितैव तावद्बद्ध: । मोहादिभिश्च स एव बन्ध: सुदृढतां नीत: ।" इत्यादिभिरुक्तिभि: विवेकस्यमधुरताविनयं शास्त्रज्ञता च व्यज्यते । पुनश्च उपनिषद्देव्यास्तर्कादिविद्याभ्यस्त्रासं विज्ञाय "पुमानकर्ता कथमीश्वरो भवेत्" इत्यादिकं च श्रुत्वा स पुनस्तर्कमुपस्थापयति यथा[2] - "अहो धूमान्धकारश्यामलितदृशो दुष्प्रज्ञत्वं यज्ञविद्याया: येनैवं कुतर्कोपहता -

"अय: स्वभावादचलं बलाच्चलत्यचेतनं चुम्बकसन्निधाविव तनोति विश्वेक्षितुरी-
क्षितेरिता, जगन्ति मायेश्वरतेयमीशितु:।"

अपि च -[3]

स्वभावलीनानि तमोमयानि प्रकाशयेद्यो भुवनानि सप्त ।
तमेव विदित्वातिमृत्युमेति नान्योऽस्ति पन्था भवमुक्तिहेतु: ।।"

"सम्भूत: प्रथममहेश्वरस्य सङ्गान्मायाया मन:" इत्यादिभिर्विवेकस्य प्रख्यातवंशत्वं तु प्रसिद्धमेव । निजकुलश्रेष्ठत्वं तु तस्य तस्य प्रधानरिपुणा कामेनापि प्रतिपादितम् । यथा आगन्तं विवेकमवलोक्य काम: रतिं कथयति[4]- "प्रिये अयमस्माकं कुले ज्यायान् मत्या देव्या सह विवेक इत एवाभिवर्तते । य एष: -

"रागादिभि: स्वरसचारिभिरात्तकान्ति-
-निर्भर्त्स्यमान इव मानधन: कृशाङ्ग: ।

---

1. प्रबोधचन्द्रोदय:, 1·22
2. तत्रैव, 6·16
3. तत्रैव, 6·17
4. तत्रैव, 1·23

मत्या नितान्तकलुषीकृतया शशाङ्कः
कान्त्येव सान्द्रतुहिनान्तरितो विभाति ।।"[1]

महामोहेन सह प्रवर्तमाने युद्धे स स्ववीरानतीव कौशल्येन नियोज्यति । तेन कामं जेतुं वस्तुविचारो नियुक्तः क्रोधस्य विजयाय क्षमा, लोभाय सन्तोषश्च नियुक्तः । अनेन विवेकस्य प्रज्ञता मनोवैज्ञानिकता च स्पष्टतया द्योत्यते । नैवैतत् परमुपनिषदोक्त कुमारिलस्वामिनोक्तिं -

"एकः पश्यति वैष्टतानिजगतामन्यस्तु मोहान्धधीः...."

इत्यादिकं वाक्यार्थं क्षिप्रमेवावबुध्य तं प्रशंसयन् इत्थं भणति - यथा -

"साधु कुमारिलस्वामिन्, साधु प्रज्ञोऽस्या युष्मान् -

"द्वौ तौ सुपर्णौ सयुजौ सखायौ समानवृक्षं परिषस्वजाते ।

एकस्तयोः पिप्पलमत्ति पक्वमन्यस्त्वनश्नन्नभिचाकशीति ।"

पुनश्च - भ्रमः शीत करान्तरिक्षनगरस्वप्नेन्द्रजालादिवत्"[2]- तथा च "शान्तं ज्योतिः कथमनुदितानस्तनित्यप्रकाशम्"।[3] इत्यादिभिरपि विवेकस्य कुशाग्रताद्योत्यते । एतदतिरिक्तं अन्ते पुरुषोऽपि वाक्यार्थमवगन्तुं विवेकं प्रार्थयति विवेकश्च तमित्थमुपदिशति[4] -

"एषोऽस्मीति विविच्य नेतिपदतश्चित्तेन सार्धं कृते
तत्त्वानां विलये चिदात्मनि परिज्ञाते त्वमर्थे पुनः ।
श्रुत्वा तत्त्वमसीति बाधितभवध्वान्तं तदात्मप्रभं
शान्तं ज्योतिरनन्तमन्तरुदितानन्दः समुद्द्योतते ।।"

युद्धस्य कृते प्रस्थानात्प्राक् रथादवतीर्य आदौ "स्वाभीष्टसिद्धये भगवन्तं नमस्यामः" इत्यादिपञ्चमाङ्कोक्तवचनैः विवेकस्यधार्मिकता परिलक्ष्यते ।

---

1. प्रबोधचन्द्रोदयः, 6.20
2. तत्रैव, 6.22
3. तत्रैव, 6.23
4. तत्रैव, 6.27

उपर्युक्तविवेकचरित्रचित्रणेन स्पष्टं भवति यद् विवेक एव नाटकस्य नायकपदार्हो नैवान्य:, यतोहि स एव आद्यान्तं परोक्षापरोक्षरूपेण वा रङ्गमञ्चमुपस्थित्य प्रबोधोदये कृतप्रयत्नो दृश्यते । अन्ते च स्वाभीष्टे साफल्यमधिगच्छति । अपि च दशरूपकोक्तनायक लक्षणान्यपि तस्मिन्न दृश्यन्ते । यथाह दशरूपककारो नायक लक्षणम्[1] -

नेता विनीतो मधुरस्त्यागी दक्ष: प्रियंवद: ।
रक्तलोक: शुचिर्वाग्मी रूढवंश: स्थिरो युवा ।।
बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वित: ।
शूर: दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिक: ।।

विवेके उपर्युक्त नायकगुणा अक्षरश: मिलन्ति अत: स एव नायक-पदमधिरोहति, इत्यत्र नैव सन्देहावसर: ।

2. वस्तुविचार: -

वस्तुविचारो विवेकस्य सेवकोऽस्ति विवेकस्तं कामं जेतुं नियुङ्क्ते । "तत्र कामस्तावत्प्रथमो वीरो वस्तुविचारेणैव जीयते तमेव तावद्विजयार्थमादिशामि" इति विवेकवचनेन ज्ञायते । वस्तुविचार: स्वामिभक्तानुचरो विवेकाज्ञां शिरोधार्यात्मानं कृतकृत्यमनुभवति । यथा - " धन्योऽस्मि येनस्वामिपादेनाहमेवं सभावित:" इत्युक्तितस्तस्य स्वामिभक्तिं परिचाययति । कामं जेतुं स: शस्त्रसन्धानं नैवापेक्षते । "कथा शास्त्रविद्यया भवान्कामं जेष्यति" इति विवेकप्रश्ने स भणति[2] -

आ: पञ्चशर: कुसुमधन्वा कामो जेतव्य इत्यात्रापि शस्त्रग्रहणापेक्षा ? पश्य -

"दृढतरमपिधाय द्वारमारात्कथंचित्
स्मरणमपरिवृत्तौ दर्शने योषितां च ।

---

1. दशरूपकम्, 2.1-2
2. प्रबोधचन्द्रोदय:, 4.11

परिणतिविरसत्वं देहबीभत्सतां वा

प्रतिमुहुरनुचिन्त्योन्मूलयिष्यामि कामम् ।।"[1]

अपि च -

विपुलपुलिनाः कल्लोलिन्यो नितान्तपतज्झरी-

मसृणितशिलाः शैलाः सान्द्रद्रुमा वनभूमयः ।

यदि शमगिरो वैयासिक्यो बुधैश्च समागमः

क्व पिशितवसामय्यो नार्यस्तथा क्व च मन्मथः ।।"

नारीति नाम प्रधानमस्त्रं कामस्य । तेन तस्यां जितायां तत्सहायाः सर्व एव विफलारम्भा भङ्गमासादयिष्यन्ति । तथाहि-[2]

"चन्द्रश्चन्दनमिन्दुधाममधवलारात्रिर्द्विरेफावली-

झङ्कारोन्मुखरा विलासविपिनोपान्ता वसन्तोदयः ।

मन्द्रध्वानघनोदयाश्च दिवसा मन्दाः कदम्बानिलाः

शृङ्गारप्रमुखाश्च कामसुहृदो नार्यां जितायां जिताः ।।"

ततः[3] -

"सोऽहं प्रकीर्णैः परितो विचारैः

शरीरवोन्मथ्य बलं परेषां ।

सैन्यं कुरूणामिव सिन्धुराजं

गाण्डीवधन्वेव निहन्मि कामम् ।।"

वस्तुविचारः कामस्य प्रधानमस्त्रम् नारीं "नारीतिनिरयो नाम्ना कृतः" इत्यादिभिरुक्तिभिर्गर्हीत । कामगर्हन् स भणितः यथा[4] -

"अहो निर्विचारसौन्दर्याभिमानवर्धिष्णुना कामहतकेन वञ्चितं जगत् । अथवा दुरात्मना महामोहनेव । तथाहि -

---

1. प्रबोधचन्द्रोदयः, 4.12
2. तत्रैव, 4.13
3. तत्रैव, 4.14
4. तत्रैव, 4.8

"कान्तेत्युत्पललोचनेति विपुलश्रोणीभरेत्युन्नत-
पीनोत्तुङ्गपयोधरेति सुमुखाम्भोजेति सुभ्रूरिति ।
दृष्ट्वा माद्यति मोदतेऽभिरमते प्रस्तौति विद्वानपि
प्रत्यक्षाशुचिपुत्तिकां स्त्रियमहो मोहस्य दुश्चेष्टितम् ।।"

नारीस्वरूप विषये अपरं निदर्शनं यथा वस्तुविचारो कथितवान्
यथा[1] - "वाह्यन्त:परिपश्यता तु निरयो नारीति नाम्ना कृत:"
अपि च[2] -

"बालामामियमिच्छतीन्दुवदना सानन्दमुद्वीक्षते
नीलेन्दीवरलोचना पृथुकुचोत्पीडं समाश्लिष्यति ।
अरे मूढ - का त्वामिच्छति का च पश्यति त्वशौमांसास्थिभिर्निर्मिता
नारीं वेद न किंचिदत्र स पुन: पश्यत्यमूर्त: पुमान् ।।

उपर्युक्त वस्तुविचारस्य नारी निन्दापरकवचनै: ज्ञायते यत् स कामं जेतुं पूर्णतया मनोवैज्ञानिकीं पद्धतिमनुसरति । वस्तुत: कामस्य मूलकारणत्वेन "नारी" एव निगद्यते । "कारणे विनष्टे कार्यविनष्टम्" इति न्यायेन नारीषु वैराग्योत्पत्तौ कामोत्पत्तिरेव न सम्भाव्यते कामविजयस्तु नैसर्गिक एव । अनयैव मनोवैज्ञानिकयोजनया वस्तुविचार: स्वायासे साफल्यमधिगच्छति विवेकस्य कार्यं च सम्पादयति ।

3· <u>क्षमा</u> -

विवेकस्य सेविका क्षमा क्रोधं विजेतुं क्षमते । क्षमा अनायासेनैव क्रोधस्य प्रचण्डज्वालां शाम्यति । क्षमानये ये वीरा: क्रुद्धरिपोरधिक्षेपवचनैर्न विक्षुभ्यन्ति ते सिन्धुरिव गम्भीरा: अनवगाहनीयमनसो भवन्ति । यथाह - क्षमा[3] -

---

1· प्रबोधचन्द्रोदय:, 4·9

2· तत्रैव, 4·10

3· तत्रैव, 4·15

क्रोधान्धकारविकटभ्रुकुटीतरङ्ग-
भीमस्य सान्ध्यकिरणारुणरौद्रदृष्टेः ।
निष्कम्पनिर्मलगभीरपयोधिधीरा
वीराः परस्य परिवादगिरः सहन्ते ॥[1]

क्षमा खलु आत्मश्लाघापरोऽपि दृश्यते । विवेकेन क्रोधं विजेतु-माहूयमाना सा सश्लाघमात्मानं निर्वर्ण्य इत्थं भणति - अहो, अहम् -

कलमो न वाचां शिरसो न शूलं
न चित्ततापो न तनोर्विमर्दः ।
न चापि हिंसादिरनर्थयोगः
श्लाघ्या परं क्रोधजयेऽहमेका ।"[2]

एभिर्वचनैः क्षमाया आत्मश्लाघा 'अहं भावो' वा व्यज्यते । तथाऽपि सा विवेकाज्ञया स्वकार्यमतीव नैपुण्येन सम्पादयति । क्रोधविजयोपाये पृष्टे-निर्दिशति क्षमा क्रोधविजयोपायम् यथा -

"क्रुद्धेस्मेरमुखावधीरणमथाविष्टे प्रसादक्रमो
व्याक्रोशे कुशलाविकतरात्मदुरितोच्छेदो त्सवस्ताडने ।
धिग्जन्तोरजितात्मनोऽस्य महती दैवादुपेताविपद्
दुर्वारेति दयारसार्द्रमनसः क्रोधस्य कुत्रोदयः ।"

क्षमया प्रोक्तः क्रोधविजयोपायो नितरांश्लाघनीयः । उपायोऽयमपि मनोवैज्ञानिकः । क्रुद्धे सति प्रोक्तरीत्या वर्तनेन तस्य प्रचण्डोऽपि क्रोधः शाम्यत्येव । एवं क्षमाऽपि क्रोधमचिरादेव महिषं कात्यायनीव विजित्य तेन सहैव हिंसापारुष्यमानमात्सर्यादीनपि पराभूय विवेकस्य मनोरथं साधयति ।

---

1. प्रबोधचन्द्रोदयः, 4.16
2. तत्रैव, 4.18

4. सन्तोष: -

सन्तोषोऽपि विवेकस्य शक्तिमत्तर: सैनिक: । विवेकस्तं लोभं जेतुं नियुङ्क्ते । लोभस्य व्यामोहो निश्चयेनदुरुच्छेद्य: । तदैव मानव: पुनर्पुनर्प्रतिहन्यमानमनोरथोऽपि नैव विरमति लोभस्य प्रत्याशा न नश्यति । लोभस्य उक्तिर्यथा[1] -

"समारम्भा भग्ना: कति कति न वारांस्तवपशो
पिपासोस्तुच्छेऽस्मिन्द्रविणमृगतृष्णार्णवजले ।
तथापि प्रत्याशा विरमति न ते मूढशतधा
विदीर्णं यच्चेतो नियतमशनिग्रावघटितम् ।।"

लोभस्य चेष्टैव चेतसि चमत्कारमातनोति । यथा[2] -

"लभ्यं लब्धमिदं च लभ्यमधिकं तन्मूललभ्यं ततो
लब्धं चापरमित्यनारतमहो लब्धं धनं ध्यायसि ।
नैतद्वेत्सि पुनर्भवन्तमचिरादाशापिशाची बलात्
सर्वग्रासमियं ग्रसिष्यति महालोभान्धकारावृतम् ।।"

अपि च -

धनं तावल्लब्धं कथमपि तथाप्यस्य नियते
व्यये वा नाशे वा त्वं सति वियोगोऽस्त्युभयथा ।
अनुत्पाद: श्रेयान्किमु कथय पथ्योऽथ किलयो
विनाशो लब्धस्य व्यथयतितरां न त्वनुदय: ।।"

एवं सन्तोषमते मानवस्य प्राप्त्याशा कदापि न नश्यति । तस्योक्ति: "तृष्णा न जीर्णा वयमेव जीर्णा:" इत्याभाणकं समर्थयति । शतीसहस्रमिच्छतीत्यादिष्वपि लोभस्य अप्राप्यत्वं समुचितम् । एतादृशस्य लोभस्य विनाशाय सन्तोष एव समर्थ: । तन्मते - "सन्तोषामृतसागराम्भसि मनाङ्मग्न: सुखं जीवति ।"[3] सन्तोषस्य भाव एव लोभस्य जेतृत्वम् । सन्तुष्टे मनसि प्राप्त्याशा

---

1. प्रबोधचन्द्रोदय:, 4.20
2. तत्रैव, 4.21-22
3. तत्रैव, 4.23

नैव भवति । "सन्तोष एव पुरुषस्य परमं निधानम्" उक्तिरियं प्रसिद्धैव । एवं सन्तोषः रावणं दाशरथिरिव विजयते । लोभं प्रति सहानुभूतिस्तस्य सहृदयतां व्यनक्ति । लोभान्वितस्य मानवस्य यथार्थं चित्रणं प्रस्तुतं लोभेन । प्राप्त्याशा निराकरणमेव लोभप्रतीकार इति मनोवैज्ञानिकीं पद्धतिमाश्रित्य तेन दुर्जेयः पापमूलको लोभो विजितः ।

5. **श्रद्धा -**

नाटकस्य स्त्रीपात्रेषु श्रद्धा उल्लेखनीया । सात्त्विकी श्रद्धा विष्णु-भक्तेः सहचरी शान्तेश्च जनन्यस्ति । शान्तिश्च तस्याः प्रियतमा । तृतीयाङ्के शान्तेरुक्तिरियम् यथा[1] -

"मामनालोक्य न स्नाति न भुङ्क्ते न पिबत्यपः ।
न मया रहिता श्रद्धा मुहूर्तमपि जीवति ।।"

अनेन श्रद्धायाः शान्तिं प्रति स्नेहं व्यज्यते । श्रद्धा एव विवेकोपनिषद्-संगमे मुख्या इत्यनुमन्यमानो महामोहश्चिन्ताकुलो मिथ्यादृष्टिं प्रार्थयति[2] -

"प्रतिकूलामकुलजां पापां पापानुवर्तिनीम् ।
केशेष्वाकृष्यतां रण्डां पाषण्डेषु निवेशय ।।"

श्रद्धां प्रति महामोहस्य चिन्तैव तस्या महत्त्वं परिचाययति । एवमेव "न खलु तादृश्यः पुण्यमय्यः सत्यः एतादृशीमसम्भावनीयां विपत्ति-मनुभवन्ति" करुणाया उक्तिरियमपि श्रद्धाया महत्तां द्योतयति ।

नार्योचितभीरुता श्रद्धायाआचरणे स्पष्टतयाऽवलोक्यते । चतुर्थाङ्के "मे मनः कदलिकेवाद्याप्यहो वेपते" इत्यादिभिः स्वयमेव स्वभीरुतां व्यनक्ति। तथा च पूर्ववृत्तान् स्मारं स्मारं सा मूर्च्छामधिगच्छति । भयाक्रान्तहृदया सा स्वसखीमैत्रीमपि न पश्यति । सा एका आज्ञाकारिणी सहचरी अस्ति विष्णुभक्त्याः सन्देशानतीवकौशल्येन निर्वहति । विवेकस्य विजयसन्देशमपि

---

1. तत्रैव, 3.2
2. तत्रैव, 2.38

विष्णुभक्तिंप्रति सैव निर्वहति । ज्ञात्वृतान्ता विष्णुभक्तिश्च मन: शान्त्वयितुं सरस्वतीं प्रेषयति । तत्त्वाववोधप्रवृत्तस्य पुरुषस्य कृते विवेकमपि सैव आनयति । एवं श्रद्धा पुरुषमनोरथसिद्ध्ये प्रबोधोदये च पूर्णतया साहाय्यं सम्पादयति । सात्त्विकी श्रद्धातिरिक्तं तामसी श्रद्धा बौद्धजैनयो: सहचरी रूपेण राजसी श्रद्धा च कापालिकसोमसिद्धान्तानुयायिनां च सहचरी-रूपेण तामसी राजसीति द्वे श्रद्धे चित्रिते । तयोः क्रियाव्यूहोऽपि गुणानुरूप एवास्ति ।

6• शान्ति: -

श्रद्धाया: पुत्रीत्वेन शान्तेश्चित्रणं नाटके दृश्यते । जननीं श्रद्धां प्रति तस्या: स्नेहो ऽनुकरणीय: । तद्वियुक्ता सा भृशं रोदिति मैत्रीसाहाय्येन च सर्वत्र तामान्वेषयति । तस्या विलापस्य निदर्शनं यथा -

"मात:! मात:! क्वासि । देहि मे प्रियदर्शनम् । तत: -

"मुक्तातङ्ककुरङ्गकाननभुव: शैला: स्रवन्निर्झरा:

पुण्यान्यायतनानि संततपोनिष्ठाश्च वैखानसा: ।

यस्या: प्रीतिरमीषु सात्रभवती चण्डालवेश्मोदरं

प्राप्ता गौ: कपिलेव जीवति कथं पाषण्डहस्तंगता: ।

"तद्विना श्रद्धया मुहूर्तमपि शान्तेर्जीवितं विडम्बनमेव । तस्सखि करुणे, मदर्थं चितामारचय । यावदचिरमेव हुताशनप्रवेशेन तस्या: सहचरी भवामि" उपर्युक्तवचनै: शान्ते: श्रद्धां प्रतिअनन्य: स्नेह: द्योत्यते । श्रद्धामन्विष्यमाना शान्ति: विभिन्नदेवालयेषु पाषण्डालयेषु च भ्रमति तत्र विभिन्नमतानुयायिनां दिगम्बर-बौद्ध-कापालिकादींश्च परिचिनोति । तेन शान्तेः तत्कालिकमतज्ञता प्रतीयते । अन्ते सा क्षपणकमुखात् - "सा विष्णुभक्त्या सह महात्मनां हृदये वसतीति" ज्ञात्वा "सन्तोषमनुभवति सर्वं च वृतान्तं विष्णुभक्तिं प्रति निवेदयति । न केवलं श्रद्धान्वेषणमेव तत्कार्यमपितु काले-काले सा विवेकस्य विष्णुभक्त्याश्च सन्देशान् अपि निर्वहति । अन्ते च

---

1• प्रबोधचन्द्रोदय:, 3•1

प्रबोधोदये उपनिषद्विवेकयो: सायुज्यं सम्पादयति ।

7. मति: -

नाटकस्य प्रथमाङ्के विवेकेन सह वार्तालापं कुर्वती रंगमञ्चे समुपस्थिता मति:, नायकविवेकस्य प्रधानपत्नी अस्ति । कामस्य गर्वोक्तिं श्रुत्वा प्रबोधोत्पत्तिविषये ज्ञातुमिच्छति । विवेकश्चान्यस्त्रीसङ्गप्रश्ने लज्जानमितमस्तको भूत्वा नैव प्रत्युत्तरयति तदा सा - "आर्यपुत्र, अन्यास्ता: स्त्रियो या: स्वरसप्रवृत्तस्य वा धर्मार्थव्यापारप्रस्थितस्य वा भर्तुर्हृदयस्थितं विघ्नन्ति" इत्युक्त्या तं प्रेरयति । येन तस्या: स्वामिभक्ति: सहृदयता धर्मज्ञता च ज्ञायते ।"नायकस्यभार्या अथवा प्रधानकार्यनिष्पादयित्री नायिका भवति" इति नये मतिरस्य नाटकस्य नायिकाऽपि कथयितुं शक्यते । प्रबोधचन्द्रोदयनाटकस्य स्त्रीपात्रेषु मति-उपनिषद्-विष्णुभक्तयश्च प्रमुखपात्राणि सन्ति । एषु विष्णुभक्ति: प्रबोधोदये कृतसहाय्या रङ्गमञ्चमनुपस्थिताऽपि सर्वं कार्यं सम्पादयति परं नाट्यपरम्परानुरोधेन ज्ञायते यत् सा पताकारूपकथानकस्य नायिका भवितुमर्हति नैव नाटकस्य । अपरा उपनिषद् देव्यपि नाटकस्य-अपरा महिषी परं सा नाटकस्य षष्ठाङ्के रङ्गमञ्चे उपस्थित्य प्रबोधोदये विवेकस्य सहायतां विदधाति । अपरतश्च सा मत्या: सपत्नी विवेकेन च कार्यनिर्वहणार्थमेवाकारिता: । मतिस्त्वाद्यन्तं कथानकं निर्वहति । तदाज्ञयैव विवेक: प्रबोधोदये प्रवृत्तोभवति अत: मतिरेव नाटकस्य नायिका निश्चीयते ।

8. करुणा -

करुणा शान्ते: सखीत्वेन नाटके चित्रिता । निसर्गोदारस्वरूपा करुणायुता च करुणा विपद्काले शान्ते: कार्यं निष्पादयति । अग्निं प्रविश्यमानां शान्तिं वारयति श्रद्धान्वेषणे च तां प्रेरयति । स्वसखीशान्त्या दु:खेन दु:खिता, तस्या: चिन्तायां च चिन्तिता परं नैव धैर्यं त्यजति । श्रद्धामन्विष्य शान्तिश्रद्धयो: संयोगं विदधाति । एवं सहृदया हितैषिणी च श्रद्धा नाटकस्य कथानके सहायिका भवति ।

9. मैत्री -

मैत्री-मुदिता-उपेक्षादय भगिन्य:। ताश्च विष्णुभक्तिं प्रतिस्वनिष्ठां द्योतयन्ति,मैत्री स्वभगिनीभि: सह महामोहस्य विनाशाय सज्जन हृदयेषु निवसति। श्रद्धां स्निह्यति, श्रद्धाया सुरक्षां निशम्य च आह्लादयति। मैत्री-प्रेरिता श्रद्धा कृत्येषु प्रवर्तते। एवं मैत्री अपि करुणावत् कथानके सहायिका वर्तते।

10. विष्णुभक्ति: -

शान्तिश्रद्धान्वितविष्णुभक्त्या: प्रभावोऽत्यधिको भवति कलिकाले दुष्कर्मभि-र्व्यभिचारैश्च विष्णुभक्तेरनुयायी कदापि विकृतो नैव भवति। कलिकालस्य दुष्कर्मनाशने सैव क्षमते। यथाह चार्वाको नाटकस्य द्वितीयाङ्के-[1]

"अस्ति विष्णुभक्तिर्नाम महाप्रभावा योगिनी। सा तु कलिना यद्यपि विरलप्रभावाकृता तथापि तदनुगृहीतान्वयमालोकयितुमपि न प्रभवाम:। तदत्र देवेनावधातव्यमिति"।

प्रबोधोत्पत्तिरूपकार्यनिष्पत्त्यै प्रथमं कारणं तावद् विष्णुभक्तिरेवास्ति। श्रद्धाविष्णुभक्त्यपि चेन्निष्कामोधर्मोऽपि अभूत्तर्हि विवेककार्यं 'प्रबोधो-त्पत्तिरूपकं' निष्पन्नमेव। यथाह कापालिक: -[2]

"मूलं देवी सिद्धये विष्णुभक्ति-
स्तां च श्रद्धानुव्रतासत्त्वकन्या।
कामान्मुक्तस्तत्र धर्मोऽप्यभूच्चेत्-
सिद्धं मन्ये तद्विवेकस्य कृत्यम्।।"

महामोहोऽपि विष्णुभक्त्या वृतान्तं श्रुत्वा भयमनुभवति तां च दुरुच्छेद्यां वेत्ति। यथा[3] -

---

1. प्रबोधचन्द्रोदय:, द्वितीय अङ्क:, पृ. 85
2. तत्रैव, 3.26
3. तत्रैव, पृ.85

"महामोहः - (सभयमात्मगतम्) आः, प्रसिद्धमहाप्रभावा सा योगिनी स्वभावाद्विद्वेषिणा अस्माकं दुरुच्छेद्या सा । विष्णुभक्त्या साहाय्येनैव विवेकः शत्रून् जयति । आत्मा च निर्द्वन्द्वो भूत्वा मोक्षं प्राप्नोति । यथोक्तं पुरुषेण नाटकस्यान्ते -

सर्वथा कृतकृत्योऽस्मि भगवत्या विष्णुभक्तेः प्रसादात् सोऽहमिदानीम् -

"शान्तो व्यपेतभयशोककषायमोहः

स्वायंभुवो मुनिरहं भवतोऽस्मि सद्यः ।"

अपि च - पुरुषः - "देव्या विष्णुभक्तेः प्रसादात्किं नाम दुष्करम् । अतः परमपि किं प्रियमस्ति । यतः -

"प्रशान्ताराति गमद्विवेकः कृतकृत्यताम् ।

नीरजस्के सदानन्दे पदे चाहं निवेशिता ः ।।"[1]

इत्थं कविना विष्णुभक्तेश्चित्रणं नाटके अत्युत्तमस्वरूपेण कृतमस्ति । आद्योपान्तं सा विवेकसाधने कृतप्रयत्ना दृश्यते । विवेकमहामोहसंग्रामेऽपि सा विवेकं प्रति चिन्ताकुला भवति । मोहराजपराभवं नैव विष्णुभक्तेर- भीष्टमपितु प्रबोधोदय एव तस्याः साध्यम् । अत एव युद्धानन्तरं महामोहस्य निलीनत्वं ज्ञात्वा चिन्ताकुला इत्थं भणति:-[2] "अस्ति तर्हि महानवशेषः प्रहरणीयश्चासौ यतः -

"अनादरपरो विद्वानीहमानः स्थिरां श्रियम् ।

अग्नेः शेषमृणाच्छेषं शत्रोः शेषं न शेषयेत् ।।"

एवं कविना विष्णुभक्तिःपरमपदसाधिका स्वरूपावाप्तिलक्षणा च चित्रिता ।

---

1. प्रबोधचन्द्रोदयः, 6.32-33

2. तत्रैव, 5.11

11. वैयासिकी सरस्वती -

श्रीकृष्णमिश्रेण वैयासिकी सरस्वती वैराग्योत्पत्तिहेतुत्वेन स्वीकृता। अपत्यव्यसनखिन्नस्य मनसः प्रबोधनाय मनसि वैराग्योत्पत्त्यै च विष्णुभक्त्या नियुक्ता सा स्वकार्यं निष्पादयति। तन्मते स्नेहः सर्वानर्थप्रभवः। नित्यमनित्यवस्तुदर्शिनो न पश्यति शोकावेगम्। यतः -

"एकमेव सदा ब्रह्मसत्यमन्यद्धि कल्पितम्।
को मोहस्तत्र कः शोक एकत्वमनुपश्यतः॥"[1]

अपि च[2] -

"भूत्वाकल्पशतायुषोऽम्बुजभवः सेन्द्राश्चदेवासुरा
- - - - - - - - -
- - - - - - - - -
सिन्धोः फेनसमेगतेवपुषि यत्पश्चात्मके कःचताम्"

तथा च[3] -

"उत्पन्ते विषवल्लिबीजविषमाः क्लेशाः प्रियाख्या नरै-
स्तेभ्यः स्नेहमया भवन्ति न चिराद्वज्राग्निगर्भाङ्कुराः।
येभ्योऽमी शतशः कुकूलहुतभुग्दाहंदहन्तः शनै
र्देहं दीप्तशिखासहस्रशिखरा रोहन्ति शोकद्रुमाः॥"

ममता वासना निबन्धनोऽयं व्यामोहः। यथा[4] -

"मार्जारभक्षिते दुःखं यादृशं गृहकुक्कटे।
न तादृङ्ममताशून्ये कलविङ्केऽथ मूषके॥"

तत्सर्वानर्थबीजस्य ममत्वस्योच्छेदे यत्नः कर्तव्यः। मोहस्यैव विलसितमेतद्यत् स्वदेहोत्पन्नेऽपि यूकादौ ममत्वाभावात्तन्निःसारणे ग्लानिमकुर्वन्तो जनाः पुत्रादीनां विषयेममत्वाभिमानादात्मानं परिपीडयन्ति। वस्तुतः[5]-

---

1. प्रबोधचन्द्रोदयः, 5.15
2. तत्रैव, 5.14
3. तत्रैव, 5.16
4. तत्रैव, 5.20
5. तत्रैव, 5.22

"असारे संसारे विरसपरिणामे तु विदुषां
वियोगो वैराग्यं द्रढयति वितन्वञ्छमसुखम् ।"

पूर्वोक्तवैराग्योत्पादकोपदेशैः वैयासिकी सरस्वती मनसि वैराग्यमुत्पाद्य कृतकृत्या भवति । तन्मतेर्मन एव मनुष्याणां कारणं बन्धमोक्षयोः। यथा निर्मले आदर्शे रविभाति तथैव निर्मलान्तःकरण एवात्मा प्रतिभाति । मनसि विषयनिवृत्ते सत्यात्माऽपि विषयसम्बन्धराहित्येन बन्धमुक्तः स्व-स्वरूपेण प्रकाशते । मनःशान्त्यै विष्णोरूपासना अपरिहार्या वर्तते । ग्रीष्मे यथा कश्चित् सूर्यांशुतप्तः सुशीतं ह्रदं प्रविश्य सुखमनुभवति तथैव साकारोपासनया चित्तशुद्धिं विधाय पश्चान्निराकारे मनः सुखं प्रवेश्य स्वरूपावाप्तिलक्षणां शान्तिमधिगत्य जनः सुखमनुभवति । यथोक्तम्[2] -

"नित्यं स्मर जलदनीलमुदारहार-
केयूरकुण्डलकिरीटधरं हरिं वा ।
ग्रीष्मे सुशीतमिव वा ह्रदमस्तशोकं
ब्रह्मप्रविश्य भज निर्वृतिमात्मनीनाम् ।।"

सरस्वत्या उपदेशा नितरां ग्राह्याः । कविना अतीवनैपुण्येन मनसो मिषेण जनसमान्य उपदिष्टः ।

12. उपनिषद् -

विवेकस्य द्वितीया भार्या उपनिषद् दर्शनशास्त्रज्ञा पतिव्रता चास्ति । सा खलु प्रबोधस्य जननी । नाटकस्य प्रारम्भे रतिकामयोः संभाषणे पश्चाच्च मतिविवेकयोर्वार्तालापेन अस्याः परिचयं प्राप्यते । यथाह विवेको मतिं प्रति तत्र[3] -

---

1. प्रबोधचन्द्रोदयः, 5.33
2. तत्रैव, 5.31
3. तत्रैव, 1.30

"मा निन्या श्चिर विप्रयोगजनितामूयाकुलाया भवे-
च्छान्त्यादेरनुकूलनादुपनिषद्देव्या मया सङ्गम: ।
तूष्णीं चेद्विषयानपास्य भवती तिष्ठेन्मुहूर्तं ततो
जाग्रत्स्वप्नसुषुप्त्यामविरहात्प्राप्त: प्रबोधोदय: ।।"[1]

अनेन ज्ञायते यदुपनिषद् देवी विवेकवियुक्ता, तया सह विवेक-सङ्गमे प्रबोधचन्द्रोत्पत्ति भविष्यति । निजवियोगानुक्रोशे उपनिषदपि स्वसखीं शान्तिं प्रति वदति यथा - "सखि, कथं तथा निरनुक्रोशस्य स्वामिनो मुखमालोकयिष्यामि । येनाहमितरजनयोषेव सुचिरमेकाकिनी परित्यक्ता ।" एवं तस्या मनसि विवेकं प्रति आक्रोशोऽप्यस्ति परं विदित-वृत्तान्ता सा प्रसीदति । स्वामिनं पुरतो गत्वा च वियोगवृत्तान्तं निवेदयति । यज्ञविद्या तर्कविद्या-मीमांसादिभिर्निराकृता दण्डकारण्ये प्रविष्टा सा गीताश्रमं प्राप्नोति । सुतां गीतां प्राप्य तत्र कालं यापयति । अनुभूत-कष्टापि सा प्राप्तविवेका पुरुषाय "तत्त्वमसि" इत्युपदिशति तन्मते परमेश्वरादभिन्नोऽपि जीवोऽनादिमायावशात्तथैव भिन्न इव प्रतीयते यथैकमपि सूर्यबिम्बं तरङ्गवशाद् द्विधाप्रतीयते । यथोक्तम् -

"असौ त्वदन्यो न सनातन: पुमान्, भवान्न देवात्पुरुषोत्तमात्पर: ।
स एव भिन्नस्त्वदनादिमायया द्विधेव बिम्बं सलिले विवस्वत: ।।"

पूर्वोक्तमेवार्थं विवेक: पुरुषाय वाक्यार्थपुरस्सरमित्थं निवेदयति "तत्त्वमसि" इति महावाक्यार्थो यथा[2] -

"एषोऽस्मीति विविच्यनेतिपदतश्चित्तेन सार्धं कृते
- - - - - - - - - - - - - - ।
- - - - - - - - - - - - - -
शान्तं ज्योतिरनन्तमन्तरुदितानन्द: समुद्द्योतते ।।"

इत्थं तत्त्वज्ञानमुपदिश्य विष्णुभक्तिरादेशेनसङ्कर्षणशक्त्या विद्यां मनसि निवेश्य प्राप्तप्रबोधस्य विवेकस्य लक्ष्यं साधयति । एवमुपनिषद् देवी-नानादर्शनशास्त्रज्ञा तत्त्वज्ञानोपकर्त्री चेयं विशिष्टचरित्रयुतायोषित् ।

---

1. प्रबोधचन्द्रोदय:, 6.25
2. तत्रैव, 6.27

13. पुरुषः -

पुरुष आत्मनः प्रतीकोऽस्ति । नाटकाध्ययनेन ज्ञायते यन्मायावशात् पुरुषो नैवात्मानं परिचिनोति । विष्णुभक्ति प्रसादेन स ज्ञानं प्राप्य तां प्रति स्वकृतज्ञतां व्यनक्ति- यथा -

पुरुषः (विचिन्त्य । सहर्षम्) अहो माहात्म्यं देव्या विष्णुभक्ते - र्यत्प्रसादान्मया -

"तीर्णाः क्लेशमहोर्मयः परिहृता भीमाममत्वभ्रमाः

शान्ता मित्रकलत्रबन्धमकरग्राहग्रहग्रन्थयः ।

क्रोधौर्वाग्निरपाकृतो विघटिता स्तृष्णालताविस्तरा

पारेतीरमवाप्तकल्पमधुना संसारवारांनिधेः ।।"[1]

एवमेव ज्ञानवृद्धं विवेकमपि पुरुषः पितृवन्मनुते तस्य अभिवादनं च प्रकमविरुद्धं कथयति । "ज्ञानवृद्धतया भवानेवास्माकमुपदेशदानेन पितृभावमापन्नः। कुतः -[2]

पुरा हि धर्मध्वनि नष्टसंज्ञा

देवास्तमर्थं तनयानपृच्छन् ।

ज्ञानेन सम्यक्परिगृह्य चैतान्

हे पुत्रकाः संशृणुतेत्यवोचन् ।। इत्यादिभिः -

प्राचीननिदर्शनं दत्त्वा पुरुषो विवेकमपि "तद्भवान्पितृत्वेनास्मासु वर्तता- मित्येव एव धर्मः" इति प्रार्थयति ।

विवेकवदुपनिषद्देव्यपि यदा पादवन्दनायागता तदा पुरुषस्तां वारयन् - "मातैयमस्माकं तत्त्वावबोधोदयेन तदेषैवास्माकं नमस्या" इत्युक्त्वा तां मातृत्वेन स्वीकृत्य भणितः, यन्माता उपनिषच्च द्वे प्यादरणीये, तथापि मात्रापेक्षयोपनिषत् प्रकृष्टतरा, यतो माता संसारपाशेन दृढं निबध्नाति, किन्तूपनिषत्संसारपाशं छिनत्ति । यथाहपुरुषः-[3]

---

1. प्रबोधचन्द्रोदयः, 6.8
2. तत्रैव, 6.10
3. तत्रैव, 6.11

"अनुग्रहविधौ देव्या मातुश्च महदन्तरम् ।
माता गाढं निबध्नाति बन्धं देवी निकृन्तति ।।"

पुनश्च तां - "अम्ब कथ्यताम् । क्व भवत्या नीता एते दिवसाः ।" इत्युक्त्वा तस्याः क्षेमं पृच्छति। अनेन पुरुषस्य कृतज्ञता धर्मज्ञता च स्पष्टमेव ज्ञायते । अन्ते च पुरुषेण- "कथमहमात्मा पुरुषः परमेश्वरः" इतिपृष्टे उपनिषद् देवी तं विवेकेन सह "तत्त्वमसि" महावाक्यार्थमुपदिशति । पुरुषश्च प्रबोधोदयं प्राप्य सानन्दं "अहो, विघटिततिमिरपटलं प्रभातं संजातम्" इत्यमनुभवति । ज्ञानोदये सतिपराभिन्नो जातः पुरुषो यथाह[1]-

मोहान्धकारमवधूय विकल्पनिद्रा-
मुन्मथ्य कोऽप्यजनि बोधतुषाररश्मिः ।
श्रद्धाविवेकमतिशान्तियमादिकेन
विश्वात्मकः स्फुरति विष्णुरहं स एषः ।

अपि च - सर्वथा कृतकृत्योऽस्मि भगवत्या विष्णुभक्त्याः प्रसादात् । सोऽहमिदानीम्[2] -

"सङ्गं न केनचिदुपेत्य किमप्यपृच्छन्
गच्छन्नतर्कितफलं विदिशं दिशं वा ।
शान्तो व्यपेतभयशोककषायमोहः
स्वायं भुवो मुनिरहं भवितास्मि सद्यः ।।"

इत्थं पुरुषो विष्णुभक्तरूपनिषद् विवेकस्य चानुग्रहेन मोक्षमवाप्नोति ।

14· महामोहः -

महामोहो मनसः प्रवृत्त्यां समुत्पन्नो मनसः प्रियतमः पुत्रोऽस्ति । विवेकस्य प्रतिपक्षिकथानकस्य च प्रतिनायकः सम्राट्पदविभूषितो महामोह आस्तिकनिन्दको, नास्तिकप्रशंसको हिंसारतो लम्पटः कामी चास्ति ।

---

1· प्रबोधचन्द्रोदयः, 6·30

2· तत्रैव, 6·31

तन्मते[1] - "देहव्यतिरिक्त आत्मास्ति, स च, स्वर्गं गतः इह जन्मनि कृतकर्मणां फलानि भुङ्क्ते, इति बुद्धिस्तथा, यथा कश्चिदत्यन्तासतो गगनतरोः कुसुमात् फलोदयाशां कुर्यात् । इदं च स्वकल्पनाविनिर्मितपदार्थावष्टम्भेन जगदेवं दुर्विदग्धैर्वञ्चयते । तथाहि[2] -

यन्नास्त्येव तदस्ति वस्त्विति मृषा जल्पद्भिरेवास्तिकै

र्वाचालैर्बहुभिस्तु सत्यवचसो निन्द्याः कृता नास्तिकाः ।

हंहो पश्यत तत्त्वतो यदि पुनः शिछन्नादितो वर्ष्मणो

दृष्टः किं परिणामलोपपतितचैतन्यो जीवः पृथक्केरपि ।।"

अयं भावो यत् संहतान्येव पृथिव्यादिभूतानि संयोगविशेषमहिम्ना चेतन्यन्ते, न तु तेभ्योऽतिरिक्तः कोऽप्यस्ति चेतन आत्मा । न केनापि छिन्नाद् देहान्निर्गच्छन् कदापि स दृष्टः, तत्कथमात्मसत्ता ग्राह्या ? इति ।

इत्थमास्तिकं निन्दयन् सश्लाघं लोकायतं प्रशंसति[3] - "सर्वथा लोकायतमेव शास्त्रं यत्र प्रत्यक्षमेव प्रमाणं, पृथिव्यप्तेजवायवस्तत्त्वानि, अर्थकामौ पुरुषार्थौ भूतान्येव चेतन्यन्ते । नास्ति परलोकः । मृत्युरेवापवर्गः । तदेतदस्मदभिप्रायानुबन्धिना वाचस्पतिना प्रणीय चार्वाकाय समर्पितम् । तेन च शिष्योपशिष्यद्वारेणास्मिल्लोके बहुली कृतं तन्त्रम् ।" एवं महामोहो लोकायतं प्रशंसति चार्वाकमुखाच्चास्यैव मतस्य प्रशंसां[4] निशम्य - "अये, चिरेण खलु प्रमाणवन्ति वचनानि कर्णसुखमुपजनयन्ति" इत्युक्त्वा चार्वाकं मित्रवत् सत्कृत्य तस्मै च साधुवादं प्रयच्छति । तन्मुखादेव विष्णुभक्तेर्महिमानं विदित्वा कामक्रोधलोभमात्सर्यादीन् तन्निग्रहीतुमादिशति । धर्ममुच्छेत्तुं कामं, शान्तिं च निग्रहीतुं क्रोधलोभतृष्णादीन् प्रेषयति । तथा च श्रद्धाया विनाशाय विलासिनीं विभ्रमावतीं मिथ्यादृष्टिं च नियोजयति । महामोहः स्वानुचराणां

---

1. प्रबोधचन्द्रोदयः, 2.16
2. तत्रैव, 2.17
3. तत्रैव, पृ.76
4. तत्रैव, 2.19-23

भीरुत्वं कदापि न सहते तदर्थं स योग्यान् कर्मकरान् नियुङ्क्ते । एवं तस्य निखिलमपि चेष्टितं विवेकोच्छेदनमस्ति । स खलु लम्पटो विलासी च । विभ्रमावतीमिथ्यादृष्टिभ्यां स्त्रीपात्राभ्यां तस्य वार्तालापं मिथ्यादृष्ट्या सह तस्य शृङ्गारिकव्यवहारश्च[1] तस्य विलासितां परिचाययति ।

दुश्चरित्रो महामोहो विवेकात् पराजितः कातरवत्पलायते च । येन केनापि कपटव्यवहारेण मनः स्वायत्तीकृत्य पुनः शक्तिं च कांक्षते । परमन्ते विवेकेन तिरस्कृतः पलायत एव ।

15. काम: -

महामोहस्य प्रधानवीरः कामो महामोहवदेव लम्पटो विलासी मद्यपश्चास्ति । नाटकस्य प्रारम्भ एव रत्या सह कामोऽस्माकं पुरत आगच्छति । सूत्रधारस्य "विवेकेनैव निर्जित्य कर्णं मोहमिवोर्जितम्" उक्तिं श्रुत्वा सः "आः! पाप! शैलूषाधम कथमस्मासु जीवत्सु स्वामिनो महामोहस्य विवेकसकाशात्पराजयमुदाहरसि" इत्थं गर्वेणोद्घोषयन् रङ्गमञ्चे समुपस्थितः । तस्य पूर्वोक्तवचनैरेव तस्य मिथ्याभिमानोऽभिव्यज्यते । कामस्य विलासिता यथा सूत्रधारशब्देषु[2] -

"उत्तुङ्गपीवरकुचद्वयपीडिताङ्गमालिङ्गितः पुलकितेन भुजेन रत्या ।
श्रीमान् जगन्ति मदयन्नयनाभिरामः कामो मदघूर्णितनेत्रपद्मः ।।"

इत्यनेन तस्य विलासशीलतां प्रथते । एवमन्यत्रापि "रत्याः स्पर्शसुख-मभिनीय स्वगतं कामः[3] -

"स्फुरद्रोमोद्भेदस्तरलतरताराकुलदृशो
भयोत्कम्पोत्तुङ्गस्तनयुगभरासङ्गसुभगः ।
अधीराक्ष्या गुञ्जन्मणिवलयदोर्वल्लिरचितः
परीरम्भो मोदं जनयति च संमोहयति च ।।"

---

1. प्रबोधचन्द्रोदयः, पृ. 106, श्लोक 2.36-37
2. तत्रैव, 1.10
3. तत्रैव, 1.20

काम एव विवेकमहामोहस्य कुलपरिचयं ददाति तयोश्च एकामिषप्रभवं वैरं दर्शयति । विवेकेन सहतस्य नैसर्गिको द्वन्द्वस्तथापि समागते मत्यासह विवेके "अयमस्माकं कुले ज्यायान् मत्या देव्या सह विवेक इत एवाभिवर्तते" इत्युक्त्वा तस्मात्स्थानान्निस्सरति । यद्यपि नारीरूपेणास्त्रेण जगज्जेतुं सक्षम: कामस्तथापि वस्तुविचारेण निर्जित: । तस्य चरित्रे स्वामिनिष्ठा- कर्तव्य- परायणताद्य गुणा: श्लाघनीया: । कविना कामपात्रेणमानवस्य कामभावनाया नैसर्गिकं चित्रं प्रस्तुतम् ।

16· <u>क्रोध: -</u>

अन्धीकरोमि भुवनं बधिरी करोमि
धीरं सचेतनमचेतनतां नयामि ।
कृत्यं न पश्यति न येनहितं श्रृणोति
धीमानधीतमपि न प्रतिसंदधाति ।[1]

महामोहानुचरस्योक्तिरियं क्रोधस्य चरित्रपरिचायिका । क्रोधावेशेनैव इन्द्र-महेश्वर-विश्वामित्रादयोऽपि पापाचारिण अभूवन् का कथा मानवानाम् ? हिंसा क्रोधस्याधाङ्गिनी हिंसान्वित: क्रोध: पितुर्वधमपि कर्तुं क्षमते । यथाह क्रोध:[2] -

"केयं माता पिशाची क इव हि जनको भ्रातर: केऽत्रकीटा
वध्योऽयं बन्धुवर्ग: कुटिलविटसुहृद्वेष्टिता ज्ञातयोऽमी ।
{हस्तौनिष्पीड्य} आगर्भं यावदेषां कुलमिदमखिलं नैवनि:शेषयामि
स्फूर्जन्त: क्रोधवह्नेर्न दधति विरतिं तावदङ्गे स्फुलिङ्गा: ।।"

क्रोधावेशेन मानवो हितैषिणां कृत्याण्यपि संशयत्वेनानुपश्यति सर्वनाश एवास्यपरिणतिरत्र नैव सन्देह: । भक्तिं हन्तुकाम: क्रोधो हन्ते क्षमया जीयते । परं नाटके क्रोधमिषेण मानवस्य क्रोधनाम्नी विशिष्टा भावना सुष्ठुतया चित्रिता ।

---

1· प्रबोधचन्द्रोदय:, 2·29

2· तत्रैव, 2·33

17. लोभः -

सन्तोषद्वेषी लोभो महामोहस्यैव सेवकः । लोभिनो जनाः स्वार्थसाधनसंसक्ता नैव कदापि शान्तिं सन्तोषं वाऽधिगच्छन्ति । लोभवशात् मानवस्य प्राप्त्याशा कदापि न शाम्यति । धनाकाङ्क्षया नानाकष्टान् सहते परं तृष्णाया लोभस्य वा क्षयो नैव जायते । लोभोक्तिषु यथा[1] - "अये, मदुपगृहीता मनोरथसरित्परम्परामेव तावन्न तरिष्यन्ति किं पुनः शान्त्यादीं-श्चिन्तयिष्यन्ति । पश्य, पश्य, सखे तृष्णे -

सन्त्येते मम दन्तिनो मदजलप्रम्लानगण्डस्थला

वातव्यायतगामिनश्च तुरगा भूयोऽपि लप्स्ये परान् ।

एतल्लब्धमिदं लभे पुनरिदं लब्धाधिकं ध्यायतां

चिन्ताजर्जरचेतसां बत नृणां का नाम शान्तेः कथा ?"

वस्तुतो लोभावेशे तत्तद्वस्तुषु लब्धेष्वपि ततोऽप्यधिकलाभचिन्ताग्रस्तमनसो नराः कथमपि शान्तिं चिन्तयितुं न प्रवर्तन्ते । तृष्णा लोभस्य क्रोधस्य हिंसावदनुगामिनी । या च कोटिसंख्यकब्रह्माण्डमप्यात्मसात् कर्तुं[2] क्षमते । यथोक्तम् -

"क्षेत्रग्रामवनाद्रिपत्तनपुरद्वीपक्षमामण्डल-

प्रत्याशायतसूत्रबद्धमनसां लब्धादिकं ध्यायताम् ।

तृष्णे देवि यदि प्रसीदसि तनोष्यङ्गानि तुङ्गानि चेत्

तद्भोः प्राणभृतां कुतः शमकथा ब्रह्माण्डलक्षैरपि ।।"

लोभो महामोहस्यादेशेन सन्तोषशान्त्यादीन् निग्रहीतुं प्रयतते । परं विवेकानुचरेण सन्तोषेण लोभस्य प्रतीकारो क्रियते । लोभश्च पराजयसमनुभवति । परं तद्व्याजेन लोभतृष्णयोः यथार्थस्वरूपमस्माकं पुरतः साक्षादिवावभासते ।

---

1. प्रबोधचन्द्रोदयः, 2.30

2. तत्रैव, 2.32

18. अहंकारः -

महामोहस्यापरोऽनुचरो अहंकारो नाटकस्य द्वितीयाङ्केऽस्माकं पुरत आगच्छति । वाराणसीं भ्रमन् दम्भो भागीरथीमुत्तीर्य गच्छन्तं पथिनं पश्यति । यश्च -

"ज्वलन्निवाभिमानेन ग्रसन्निव जगत् त्रयीम् ।
भर्त्सयन्निव वाग्जालैः प्रज्ञयोपहसन्निव ।"

एष एव अहंकारो यश्च निखिलमपि विश्वं मूर्खबहुलं मनुते । यथाह-
अहंकारः[1] - "अहोमूर्खबहुलं जगत् । तथाहि -
"नैवाश्रावि गुरोर्मतं न विदितं कौमारिलं दर्शनं
तत्त्वं ज्ञातमहो न शालिकगिरा, वाचस्पतेः का कथा ।
सूक्तं नापि महोदधेरधिगतं महाव्रती नेक्षिता
सूक्ष्मा वस्तुविचारणा नृपशुभिः स्वस्थैः कथंस्थीयते ।।

एवं स वेदान्तीन्[2], पाशुपतान्[3], भास्करमतानुयायीन् च गर्हन् दम्भाश्रमं प्राप्नोति । तत्र च दम्भानुचरेण वटुना वार्यमाणः स्वकीयं कुल-परिचयादिकं ददाति । यथा[4] -

"गौडं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढापुरी
भूरिश्रेष्ठकनामधाम परमं तत्रोत्तमो नः पिता ।
तत्पुत्राश्च महाकुला न विदिताः कस्यात्र तेषामपि
प्रज्ञाशीलविवेकधैर्यविनयाचारैरहं चोत्तमः ।।"

अपि च -

"नास्माकं जननी तथोज्ज्वलकुला सच्छोत्रियाणां पुन-
र्व्यूढा काचन कन्यका खलु मया तेनास्मि ताताधिकः ।।
अस्मच्छ्यालभागिनेयदुहिता मिथ्याभिशप्तायत-
स्तत्संपर्कवशान्मया स्वगृहिणी प्रेयस्यपि प्रोज्झिता ।।"

---

1. प्रबोधचन्द्रोदयः, 2.3
2. तत्रैव, 2.4
3. तत्रैव, 2.5
4. तत्रैव, 2.7-8

एवं सगर्वेण स्वीकीयं परिचयं दत्त्वा दम्भस्य च परिचयं प्राप्य महामोहस्य कार्यविषये मन्त्रयति । दम्भमुखाच्च विद्याप्रबोधोदयजन्मभूमि-वाराणसी विषये महामोहस्य विचारानवगत्य[1] अहंकारः कथयति[2] -

यद्यप्येवमशक्यप्रतीकारएवायमर्थः । यतः -

"परमविदुषां पदं नराणां पुरविजयी करुणाविधेयचेताः

कथयति भगवानिहान्तकाले भवभयकातरतारकं प्रबोधम् ।।"

अयं भावो यदत्र काश्यां परकारुणिको भगवान् महादेवो ब्रह्मज्ञान-रहितेभ्योऽपि प्राणिभ्यस्तन्मुमूर्षावस्थायां मुक्तिपदं तारकमन्त्रमुपदिशति येन ते सद्य एव जन्म मरण रहिता मुक्ता भवन्ति । अनेनाहंकारस्य भयं प्रतीयते । तथापि स महामोहस्य कार्यान्न विरमति ।

19. दम्भः -

"मृद्बिन्दुलाञ्छितललाट-भुजोदरोरः-

कण्ठोष्ठपृष्ठचिबुकोरुकपोलजानुः ।

चूडाग्रकर्णकटिपाणिविराजमान-

दर्भाङ्कुरः स्फुरितमूर्त इवैष दम्भः ।।"[3]

अहंकारोक्तश्लोकेनानेन दम्भस्य परिचयं मिलति । तृष्णालोभयोरपत्यो-न्नृतस्य च जनको दम्भो नाटके महामोहस्य दासत्वेन चित्रितः । यश्च वाराणस्यां चतुर्णामप्याश्रमाणां निःश्रेयसविघ्नार्थं नियुक्तः । तेन च स्वल्पेनैव कालेन भूयिष्ठा वाराणसी वशीकृता । स्वामिनो निर्दिष्ट आदेशश्च संपादितः। तदनुजीविनो धूर्ताः निशि वेश्यागृहं गत्वा तदुच्छिष्टमद्यं पीत्वा यथेच्छं सुरतं कुर्वन्ति, दिवा कञ्चपटुत्यात्मनः स्वरूपं गोपयित्वा आत्मानं सर्वज्ञान् दीक्षितान्, अग्निहोत्रिणः, ब्रह्मज्ञान्-तापसान् प्रख्याप्य लोकं प्रतारयन्ति ।[4]

---

1. प्रबोधचन्द्रोदयः, पृ. 69
2. तत्रैव, 2.13
3. ~~वही~~ तत्रैव, 2.6
4. तत्रैव, 2.1

आत्मानं सर्वोत्कृष्टं मन्यमानो दम्भो अन्यस्य वाताहतप्रस्वेदकणिकास्पर्शमपि न सहते।[1] दम्भो मिथ्याभिमानी आत्मश्लाघी च । तस्यातिशयोक्तिपूर्णात्म-प्रशंसा यथा तन्मुखेनैव[2] -

सदनमुपगतोऽहं पूर्वमम्भोजयोनेः

सपदि मुनिभिरुच्चैरासनेषूज्झितेषु ।

सशपथमनुनीय ब्रह्मणा गोमयाम्भः

परिमृजितनिजोरावाशु संवेशितोऽस्मि ।।

अर्थात् पूर्वमहं ब्रह्मलोकं गतः । ममागतं दृष्ट्वा महामुनयः स्वासनेभ्य उत्थाय मम सत्कारमकुर्वन् । ब्रह्मा च स्वोत्सङ्गं स्वतः पवित्रमपि मदुपवेशनायोग्यं विचार्य गोमयेन जलेन च प्रक्षाल्य तत्र शपथ-पूर्वकमनुनयं च कृत्वा मां सादरं समुपावेशयत् ।

उक्तिरियं नितरां दम्भस्य मिथ्याभिमानं द्योतयति । अहंकारोऽपि तच्छ्रुत्वा स्वगतमेव "अहो, दाम्भिकस्य ब्राह्मणस्यात्युक्तिः" इत्युक्त्वा पूर्वोक्तमेवानुमोदति ।

अतः कथयितुं शक्यते यन्नाटकोक्त दम्भस्य चरित्रमाडम्बरपूर्णमति-शयोक्तिपूर्णं चास्तीति किमत्र चित्रम् ।

20. रतिः -

कामस्य भार्या रतिः कामवदेव शृङ्गारप्रियोद्दत्यशालिनी च । कामेनालिङ्गितैव सा रङ्गमञ्चे आगच्छति । सूत्रधारः - उत्तुङ्गपीवर-कुचद्वयपीडिताङ्गम ....[3]" इत्यादिना कामश्च - "स्फुरद्रोमोद्भेदः[4] ..... इत्यादिना रत्या सौन्दर्यं व्यज्यते । अनेन ज्ञायते यत् सा सौन्दर्यस्य प्रतिमूर्ति-रेवास्ति। स्त्रीसुलभकातर भावं तस्यामवलोक्यते । कामस्य - अत्रास्माकं कुले कालरात्रि-कल्पा विद्या नाम राक्षसी समुत्पत्स्यत्" इत्युक्तो "राक्षसी" शब्द श्रवण समकालमेव

---

1. प्रबोधचन्द्रोदयः, द्वितीयाङ्कः, पृ. - 61.
2. तत्रैव, 2.10
3. तत्रैव, 1.10
4. तत्रैव, 1.20

सा वेपते । भर्तारं कामं चालिङ्गति । परं समुत्पन्ने काले सा कामं यथोचितं परामृशति । यथा - "आर्यपुत्र । महासहायसमुत्पन्नः शङ्कितव्यो-ऽरातिः । यतोऽस्य यमनियमप्रमुखा अमात्या महाबलाः श्रूयन्ते ।"[1] एवमेव विवेकमहामोहवैरं विदित्वा तत्प्रतीकारोपायानपि कामेन सह परामृशति । नाटककारेण रतेश्चरित्रं कामस्य सहायतार्थमेव कल्पितम् । रतिकामयोरन्यत्रापि एकत्रभावनमवलोक्यते । सा तु कामपत्नीत्वेन प्रसिद्धैव । तथापि नाटके तस्याः कामेन सह वार्तालापेन कथानकस्य परिवर्धने साहाय्यं भवति ।

## 21• मिथ्यादृष्टिः -

महामोहस्यकुले मिथ्यादृष्टिरभिधाना नारी वारविलासिनीव सर्वैरपि ईहमाना सर्वप्रसिद्धा चास्ति । सा स्वयमेव वक्ति यथा[2] - "सखि, एकवल्लभापि या स्त्री भवति तस्या अपि निद्रा दुर्लभा । किं पुनरस्माकं सकललोकवल्लभानाम् । विभ्रमावत्याश्च "के के पुनः प्रियसख्या वल्लभाः" इति पृष्टे तां प्रत्युत्तरयति - "सखि, प्रथमं महाराजः {महामोहः} अत उपरि कामः, क्रोधः, लोभः, अहंकारश्च । अथवालं विशेषेण । अस्मिन्नकुले यो जातो बालः स्थाविरो युवापि हृदयनिहितया मया विना रात्रिदिवसान्नाभिरमते ।" महामोहस्य तां प्रति विशेषानुरागो दृश्यते ।

"श्रोणीभार भरालसादर[3] •••••" तथा च "दलितकुचनत्र[4] - इत्यादिभिस्तस्य स्नेहातिरेकोऽवलोक्यते । किं बहुना महामोहस्तां स्वचित्तभित्तौ शालभञ्जीव राजमानां पश्यति । यथा[5] - स्मर्यते सा हि वामोरु या भवेद्धृदयाद्बहिः । मच्चित्तभित्तौ भवती शालभञ्जीव राजते ।।"

---

1• प्रबोधचन्द्रोदयः, पृ• 24

2• तत्रैव, पृ• 101

3• तत्रैव, 2•34

4• तत्रैव, 2•35

5• तत्रैव, 2•37

महामोहस्य वल्लभेयं तस्य विश्वसनीया सहायिका वर्तते । तां च महामोह: शान्तिं श्रद्धां च निग्रहीतुमादिशति । सा च तस्याज्ञां शिरोधार्य तत्कार्यं सम्पादयति ।

एवं मिथ्यादृष्टेश्चरित्रं गणिकाचरित्रवदेवनाटकेऽवलोक्यते ।

22. विभ्रमावती -

महामोहस्यापरा सेविका विभ्रमावती मिथ्यादृष्ट्या: सहचरी अप्यस्ति नैव नाटके तस्याधिकं कार्यम् । महामोहस्याज्ञया सा विलासिनीं मिथ्यादृष्टिमानयति । तत्र तस्या मिथ्यादृष्ट्या सह अत्यल्पवार्तालापेनैव तस्याश्चरित्रगुणा ज्ञायन्ते । तया सह कुशलाधिवक्तावद् वार्तालापं विदधाति स्वकीयवाक्पाटवेन च मिथ्यादृष्ट्यारन्त:रहस्यानप्युद्घाटयति । यथा निदर्शनमत्र -

मिथ्यादृष्टि: - सखि, चिरदृष्टस्य महाराजस्य कथं मुखं प्रेक्षिष्ये न खलु मां महाराज उपालप्स्यते ।

विभ्रमावती - सखि त्वन्मुखदर्शनात्मानमेव महाराजो न वेत्स्यति कुत उपालप्स्यते ।

मिथ्यादृष्टि: - सखि किं मामलीकसौभाग्यैं सभाव्य विडम्बयसि ।

विभ्रमावती - सखि, साम्प्रतमेव प्रेक्षिष्येऽलीकत्वं सौभाग्यस्य । अन्यच्च निद्राघूर्णाकुले प्रियसख्या लोचने पश्यामि । तर्हि किं खलु प्रियसख्या लोचनस्य विनिद्रताया: कारणम् ।

मिथ्यादृष्टि: - सखि एकवल्लभापि या स्त्री भवति तस्या अपि निद्रा दुर्लभा । किं पुनरस्माकं सकललोकवल्लभानाम् ।

विभ्रमावती - के के पुन: प्रियसख्या वल्लभा: ।

मिथ्यादृष्टि: - सखि, प्रथममहाराज: अत उपरिकाम:....... मया विना रात्रिदिवसान्नाभिरमते ।

विभ्रमावती - नन्वस्य कामस्यरति:, क्रोधस्य हिंसा, लोभस्य तृष्णा प्रियतमेति श्रूयते । तासां कथं प्रियतमान्नित्यं रमयन्तीर्ष्यां न संजनयसि ।

---

1. प्रबोधचन्द्रोदय:, पृ. 100-103

मिथ्यादृष्टिः - सखि, ईर्ष्येति कथं भण्यते । ता अपि मया विना मुहूर्तमपि न तुष्यन्ति ।

विभ्रमावती - सखि, अत एव भणामि त्वत्सदृशी सुभगास्यां पृथिव्यां नास्ति, यस्याः सौभाग्यमहर्द्धिविधुरित हृदयाः सपत्न्यः प्रसादं प्रतीच्छन्ति । सखि, अन्यद्भणामि एवं निद्राकुलनयनविसंस्थुलस्खलच्चरणनूपुर-झङ्कारमुखरया गत्या महाराजं संभावयन्ती शङ्कितहृदयं करिष्यतिप्रियसखी-तितर्कयामि ।" पूर्वोक्त प्रसङ्गेन स्पष्टं भवति यद् विभ्रमावती वाग्जाल-विनियोजने कुशलाऽस्ति । एवं सा एका निपुणा दासी सन्देशवाहिका वा अस्तीति ।

23· मनः -

प्रबोधचन्द्रोदयस्यप्रमुखपात्रेषु मनो ऽप्यन्यतमम् । "सम्भूतः प्रथमम-ईश्वरस्यसङ्गान्मायायां मन इतिविश्रुततनुजः ।

तस्य च प्रवृत्तिनिवृत्तीद्वेधर्मपत्न्यौ", तयोः प्रवृत्त्यां समुत्पन्नं महामोहप्रधानमेकं कुलम् निवृत्त्यां च द्वितीयं विवेकप्रधानमिति" ।

कामस्यानया उक्त्या मनसः कुलस्यपरिचयं मिलति । पुत्रद्वयस्यापि मनो महामोहं प्रति अतिशयेन स्नेहयुतमस्ति । प्रवृत्तिकुलंप्रतिमनसः स्नेहो विशेषेण तदावलोक्यते यदा विवेकविजयानन्तरं प्रवृत्तिकुलवधं निशम्य तद्वियोगे प्राणान् त्यक्तुमुद्यतो भवति । यथा मनसो विलापम् -(सास्त्रम्)मनः - "हा पुत्रकाः, क्वगताःस्थ । दत्तं मे प्रियदर्शनम् । भो, भोः, कुमारकाः रागद्वेषमदमात्सर्यादयः, परिष्वजध्वं माम् । सीदन्तिमामङ्गानि । हा ! न कश्चिन्मां वृद्धमनाथं संभावयति । क्वगता असूयादयः कन्यकाः आशातृष्णा-हिंसाद्या वा स्नुषाः । कथं ता अपि मन्दभाग्यस्य मे समकालमेव दैवहत-केनापहृताः"।

"विसर्पतिविषाग्निवद्दहतिमर्म मर्मविधा-

स्तनोति भृशवेदनाः कषति सर्वकार्श्यं वपुः ।

---

1· प्रबोधचन्द्रोदयः, पृ·210

विलुम्पति विवेकितां हृदि च मोहमुन्मीलय-
त्यहो ग्रसति जीवितं प्रसभमेव शोकज्वरः ।।[1]

अपि च – हा प्रिये, क्वासि देहि मे प्रतिवचनं । ननु देव,

"स्वप्नेऽपि देव रमसे न विना मया त्वं
स्वापे त्वया विरहितो मृतवद्भवामि ।
दूरीकृतासि विधिदुर्ललितैस्तथापि
जीवत्यवेहि मम इत्यसवो दुरन्ताः ।।[2]

"अलमस्माकमतः परं जीवितेन । सङ्कल्प्य चितामास्थाय । यावदनल-प्रवेशेन शोकानलं निर्वापयामि ।" अनेन मनसः प्रवृत्तिकुलं प्रति प्रवृत्तिं प्रति च अतिशयः स्नेहः स्पष्टतया व्यज्यते ।

एतादृशस्यापत्यव्यसनखिन्नस्यमनसः प्रबोधाय विष्णुभक्त्या सरस्वती प्रेषिता । सा च नानाविधैर्वैराग्योत्पादकैर्निजोपदेशैः मनः सान्त्वयति । तदुपदेशैर्मनसि वैराग्योत्पत्तिर्जायते । उत्पन्नवैराग्यदर्शनात् प्रशान्तस्तस्य शोकावेगः । पुनश्च सरस्वत्योक्त सकारोपासनया चित्तशुद्धिं विधाय निराकारे च पुंसं प्रविश्य स्वरूपावाप्तिलक्षणां शान्तिमधिगच्छति । तदा हि मनसो ये वनितादयः पूर्वं मनोज्ञाः प्रतीयन्ते स्म त एव ज्ञानोदये वैराग्यं जनयन्ति । यथाह मनः[3] – सम्प्रति हि –

"नार्यस्ता नवयौवना मधुकरव्यवहारिणस्ते द्रुमाः
प्रोन्मीलन्नवमल्लिकासुरभयो मन्दास्त एवानिलाः ।
अद्योदात्तविवेकमार्जिततमः स्तोमव्यलीकान्पुन-
स्तानेतान्मृगतृष्णिकार्णवमयः प्रायान्मनः पश्यति ।।"

इत्थं मनः सरस्वत्यादेशेन निवृत्तिं पत्नीत्वेन विवेकशमदमादीन् च-पुत्रत्वेन मन्यमानः परमं पदं प्राप्नोति ।

---

1. प्रबोधचन्द्रोदयः, 5.12.
2. तत्रैव, 5.13
3. तत्रैव, 5.32

24. संकल्पः -

अतिसूक्ष्मरूपेण सङ्कल्प-रूप-पात्रस्य परिचयो नाटके प्राप्यते । सन्ततिविनाशदुःखितं मनः सङ्कल्पः सान्त्वयति । यावत् सरस्वती तत्रागत्य मनः समाश्वासयति तावत् सङ्कल्पेन मनो निरुद्ध्यते ।मनो यदापि आत्मघातं चिकीर्षति । सङ्कल्पस्तन्निवारयतीति मनसो जीवनस्य संकल्पनमेव संकल्पस्य संकल्पत्वम् ।

25. वैराग्यः -

सरस्वत्या उपदेशैः शोकाकुले मनसि वैराग्यमुत्पद्यते । एवं मनोजन्यत्वाद् वैराग्यो मनसोऽपत्यम् । तद्दर्शनादेव मनसः शोकावेगः प्रशमति । वैराग्यनये अस्थिमांसमज्जासृक्संघाते त्वचावृतेऽस्मिन् देहे वृथा रागः । एतादृशो मांसमज्जासृक्संघातस्वरूपो वपुरयं चेत्चर्मावृतो न भवेत्तर्हि मांसलुब्धैः गृध्रादिभिः नूनं भोज्यः । अपि च श्रियश्चपला विषयजरसाश्चावसाने दुःखदा एव वपुरयं च विपद्गेहं, लोकोऽयमतिशयशोकपूर्णः स्त्रियादयश्च सर्वानर्थकारणमेव । एतादृशे सत्यपि जनास्तत्रैव संसक्ताः नैव परब्रह्माणि संसक्ता भवन्तीति महत्कष्टम् ।[1] शोकावेगो व्यर्थमेव । यतो हि मार्गे पथिका मिलन्ति तदनन्तरं वियुज्यन्ते, नद्यां पतिता वृक्षाः पयःपूरेणोह्यमानाः परस्परं मिलन्ति स्वल्पेनैव कालेन पुनर्वियुज्यन्ते, व्योम्नि मेघा मिलन्ति ततो वियुज्यन्ते, तथैव संसारेऽस्मिन् पितृमातृबन्धुतनयादि प्रियजनानां संयोगो वियोग एव पर्यवस्यति, तस्मादुपस्थिते वियोगे तत्त्वविदो न शोकं कुर्वन्ति ।[2]

एवं वैराग्यस्योपदेशा मनो निवृत्त्यभिमुखं नयन्ति । विवेकस्य च कार्यं सिद्ध्यति ।

---

1. प्रबोधचन्द्रोदयः, 5.23-24
2. तत्रैव, 5.25

26• निदिध्यासनम् -

मनसो निश्चलध्यानावस्था एव निदिध्यासनं निगद्यते । यत्र विकारादीनां परित्यागः सात्त्विकस्य च चिन्तनं भवति । प्रबोधचन्द्रोदये निदिध्यासनं पुरुषे प्रविष्टुं रङ्गमञ्चे समागच्छति । यदा जीवात्मा निदिध्यासनार्हो भवति तदैव उपनिषद्विवेकयोस्सन्देशो हृदयंगमो भवति । जीवात्मा यदा सात्त्विकनिदिध्यासने निलीयते तदैव प्रबोधोदयो जायते । "निदिध्यासनं पुरुषो विशति पुरुषः ध्यानं नाट्यति ।"[1] एवं निदिध्यासनमात्मनि प्रबोधोदये सहायकमाध्यमेन अस्ति । एतच्च योगशास्त्रस्य मुख्या प्रक्रियाऽप्यस्ति नाटकेऽस्मिन् निदिध्यासनातिरिक्तं यमनियमशमदमादमयादीन्यपि योगशास्त्राङ्गानि विवेकस्य सहायकत्वेन वर्णितानि । करुणा-मैत्री-मुदिता-उपेक्षा-ऋतम्भरादीनामपि वर्णनं प्राप्यते । अनेन कवेः योगशास्त्रज्ञता, साधनामार्गे योगशास्त्रमहत्ता च प्रतीयते ।

27• प्रबोधः -

मानवो यदा शान्तिं प्राप्नोति तदा विवेकेनोपनिषद्ज्ञानं चिन्तनविषयतामधिगच्छति । विवेकज्ञानं प्राप्य मानवस्तदा तज्ज्ञानं ग्राह्यं कर्तुं चेष्टते पुनः मतिर्यदा विषयानपास्यशान्तिमधिगच्छति तदा जाग्रत्स्वप्नसुषुप्त्यवस्थानन्तरं तुरीयावस्थायां प्रबोधोदयो भवति । यथा उक्तम्- प्रबोधचन्द्रोदये[2] विवेकः -

"मानिन्याश्चिरविप्रयोगजनितासूयाकुलाया भवे-
च्छान्त्यादेरनुकूलनादुपनिषद्देव्या मया संगमः ।
तूष्णीं चेद्विषयानपास्य भवती तिष्ठेन्मुहूर्तं ततो
जाग्रत्स्वप्नसुषुप्तिधामविरहात्प्राप्तः प्रबोधोदयः ।।"

मोहस्यास्तंगते पुत्रकलत्रादिवासनाविरहितं -

---

1• प्रबोधचन्द्रोदयः, पृ•273•

2• तत्रैव, 1•30

मन: वैराग्यमाप्नोति परां शान्तिं वाधिगच्छति । तदा नानाक्लेशविहीन आत्मा तत्त्वाववोधधिगच्छति । यथोक्तम् -

अस्तंगतेषु तमसेषु विलीनमोहे
वैराग्यभाजि मनसि प्रशमं प्रपन्ने ।
क्लेशेषु पंचषु गतेषु समं समीहा
तत्त्वाववोधमभित: पुरुषस्तनोति ।

प्रबोधोदये जाते च त्रैलोक्यमीदृक्तया इदन्तया च परिच्छेत्तुमशक्यतया नित्यानित्यभिन्नत्वेनानिर्वचनीयं जायते । यथाह प्रबोधोदय: -

"किं वाप्तं किमपोहितं किमुदितं किं वा समुत्सारितं
स्यूतं किं नु विलायितं नु किमिदं किञ्चिन्न वा किञ्चन ।
यस्मिन्नभ्युदिते वितर्कपदवीं नैव समारोहति
त्रैलोक्यं सहजप्रकाशदलितं सोऽहं प्रबोधोदय: ।।"

एवं असारेऽस्मिन् संसारे मोहाज्ञानाविद्यामायादीनां विनाशे ब्रह्मानन्दानुभूतिरेव प्रबोधोदय: ।

एवं प्रबोधचन्द्रोदये प्रतीकपात्राणां रूपकमुखेन वर्णनमधिगम्यते । तत्रापि कानिचित् भावरूपेण चित्रितानि कानिचिच्च सैद्धान्तिकरूपेण । भावतात्त्विक-पात्रेषु मनस्तत्त्वस्थानां मनोभावानां विवेक-महामोह-काम-क्रोध-लोभ-हिंसा सन्तोष-तृष्णादीनां वर्णनं मनोवृत्त्यनुकूलमेव प्राप्यते । तत्तन्मनोभावानां चित्रणे कविनापूर्णबुद्धिकौशलं प्रदर्शितम्, तत्रापूर्वं साफल्यं चाधिगतम् अनेनैव नाटकमिदं प्रतीकनाटकपरम्परायामतिशेते इत्यत्र नैव कस्यापि विपश्चितो विप्रतिपत्ति: ।

-------------------------------

1. प्रबोधचन्द्रोदय:, 6.1

§2§ प्ररूपपात्राणि -

प्ररूपपात्रेषु चार्वाक - क्षपणक - भिक्षु - कापालिक - वटु-शिष्यश्च सन्ति । यानि मतविशेष प्रतिपादकत्वेन प्ररूपनाम्नाभिधीयन्ते ।

1. चार्वाक: -

प्रबोधचन्द्रोदये महामोहो लोकायतं प्रशंसति । समानमिदं च तन्मतं-मनुते । तदा चार्वाकेत्यभिधानकंपात्रं रङ्गमञ्चे आगत्य स्वमतंपरिचाययति । तन्मते "लोकायतमेव शास्त्रं यत्र प्रत्यक्षमेव प्रमाणं, पृथिव्यप्तेजोवायवस्तत्त्वानि, अर्थकामौ पुरुषार्थौ भूतान्येव चेतन्यन्ते । नास्ति परलोक: । मृत्युरेवापवर्ग: । दण्डनीतिरेव विद्या अत्रैववार्तान्तर्भवति । धूर्तप्रलापस्त्रयी । यतोहि -

"स्वर्ग: कर्तृक्रियाद्रव्यविनाशे यदि यज्वनाम् ।
तत्तो दावाग्निदग्धानां फलं स्यात् भूरि भूरुहाम् ।।

अपि च -

निहतस्य पशोर्यज्ञे स्वर्गप्राप्तिर्यदीष्यते ।
स्वपिता यजमानेन तत्र कस्मान्न हन्यते ।।

अपि च -

मृतानामपि जन्तूनां श्राद्धं चेत्तृप्तिकारणम् ।
निर्वाणस्य प्रदीपस्य स्नेह: संवर्धयेच्छिखाम् ।।" [1]

"दु:खमिश्रतं संसारसुखं परिहरणीयम्" इति कथनं दुर्बुद्धिविलसितमेव नरपशूनाम् । यत: [2] -

त्याज्यं सुखं विषयसंगमजन्म पुंसां
दु:खोपसृष्टमिति मूर्खविचारणैषा ।
व्रीहीन्जिहासति सितोत्तमतण्डुलाढ्यान्
को नाम भोस्तुषकणोपहितान्हितार्थी ।।"

---

1. प्रबोधचन्द्रोदय:, पृ.77, 2.19-21

2. तत्रैव, 2.23

एवं लोकायतं प्रतिपादयन् चार्वाको महामोहं प्राप्नोति महामोहश्च तं "अये कले, भद्रमव्याहतम्" इत्युक्त्वा चार्वाकात् तत्कृत्यं पृच्छति । चार्वाकश्च कुरुक्षेत्रतीर्थस्यवृत्तान्तं निवेदयति । यथा - देव,

"व्यतीत्यवेदार्थपथः प्रथीयसीं, यथेष्टचेष्टां गमितो महाजनः ।
तदत्र हेतुः कलिनं नाचाप्यहं, प्रभो प्रभावो हि तनोति पौरुषम् ।।

ततोत्तरापथिकाः पाश्चात्याश्च त्रयीमेव त्यक्ता शमदमादीनां का कथा ? अन्यत्रापि प्रायशो जीविकामात्रफलैव त्रयी । यथाह्याचार्यः -

"अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम् ।
प्रज्ञापौरुषहीनानां जीविकेति बृहस्पतिः ।।"

तेन कुरुक्षेत्रादिषु तावद्देवेन स्वप्नेऽपि विद्याप्रबोधोदयो नाशङ्कनीयः"। पूर्वोक्त रीत्या स्वकृत्यं निवेद्य विष्णुभक्तिं प्रति तं सचेतयति । तस्योक्तिरियं यत् "लघीयस्यापि रिपौ नानवहितेन जिगीषुणा भवितव्यम्" तस्य कार्यविधानतां द्योतयति ।

एवं कृष्णमिश्रेण नाटके चार्वाको महामोहस्य कलेश्च सहचरत्वेनोल्लिखितः। कलेःसाहचर्याद् मतमिदं भ्रष्टत्वेन व्यभिचारित्वेन च आक्षिप्यते । अनेन "मतमिदमज्ञानाधर्मयोः साधनमेव" इत्यपि व्यज्यते ।

2. कापालिकः -

सोमसिद्धान्तानुयायी कापालिको नाटकस्य तृतीयाङ्के रङ्गमञ्चे आगत्य स्वमतं प्रतिपादयति । स कथयति यत् सोमसिद्धान्तावलम्बिनो नरास्थिमालाकृतभूषणाः श्मशाननिवासशीला नृकपालभोजनाश्च भवन्ति । एते हि योगाञ्जनशुद्धचक्षुषा सकलमपिसंसारं ईश्वरादभिन्नं पश्यन्ति । यथाह कापालिकः -[2]

---

1. प्रबोधचन्द्रोदयः, 2.25-26
2. तत्रैव, 3.12

नरास्थिमालाकृतचारुभूषणः श्मशानवासी नृकपालभोजनः ।
पश्यामि योगाञ्जनशुद्धचक्षुषा, जगन्मिथो भिन्नमभिन्नमीश्वरात्।[1]

अपि च धर्मं तावदस्माकमवधारय -

"मस्तिष्कान्त्रवसाभिघूरितमहामांसाहुतीर्जुह्वतां
वह्नौ ब्रह्मकपालकल्पितसुरापानेन नः पारणा ।
सद्यः कृत्तकठोरकण्ठविगलत्कीलालधारोज्ज्वलै-
रर्च्यो नः पुरुषोपहारबलिभिर्देवो महाभैरवः ।।"

धर्मस्यास्य महिमा च यथा -[2]

"हरिहरसुरज्येष्ठश्रेष्ठान्सुरानहमाहरे
वियति वहतां नक्षत्राणां रुणध्मि गतीरपि ।
सनगनगरीमम्भः पूर्णां विधाय महीमिमां
कलय सकलं भूयस्तोयं क्षणेन पिबामि तत् ।।"

मोक्षविषये कापालिकस्येयंमान्यता यथा -[3]

"दृष्टं क्वापि सुखं विना न विषयैरानन्दबोधोज्झिता
जीवस्य स्थितिरेव मुक्तिरुपलावस्था कथं प्रार्थ्यते ।
पार्वत्याः प्रतिरूपया दयितया सानन्दमालिङ्गितो
मुक्तः क्रीडति चन्द्रचूडवपुरित्यूचे मृडानीपतिः ।।"

क्षपणकः सोमसिद्धान्तस्य महिमानं "कृत्यमेतदैन्द्रजालिकमिति" कथयित्वा निन्दति । स्वमतनिन्दां निशम्य कापालिकः खड्गेन तं हन्तुमुद्यतो भवति । अन्ते च राजसीश्रद्धया भिक्षुकं क्षपणकं च स्वायत्तीकरोति । अनेन तस्य निर्भयता हिंसकप्रवृत्तिश्च द्योत्यते ।

कृष्णमिश्रेणापि तस्य रक्तपानादिवीभत्सानि हिंसायुतानि कृत्यानि क्षपणकादिनामाक्षेपैः निन्दितानि। राजसीश्रद्धायाकृत्यान्यपि व्यभिचारान्वितानि सन्ति । एवं कविना सिद्धान्तोऽयमपिगर्हित एव ।

---

1. प्रबोधचन्द्रोदयः, 3.13
2. तत्रैव, 3.14
3. तत्रैव, 3.16

3. <u>क्षपणकः -</u>

"ॐ नमोऽर्हद्भ्यः । नवद्वारपुरीमध्ये आत्मा दीप इव ज्वलति । एष जिनवरभाषितः परमार्थोऽयं मोक्षसुखदः । अरे रे श्रावकाः शृणुध्वम् -

"मलमयपुद्गलपिण्डे सकलजलैरपि कीदृशी शुद्धिः ।

आत्मा विमलस्वभावः ऋषिपरिचरणैर्ज्ञातव्यः ।।"

ऋषिपरिचरणं च यथा -

"दूरे चरणप्रणामः कृतसत्कारं च भोजनमिष्टम् ।

ईर्ष्यामलं न कार्यं ऋषीणां दारान् रममाणानाम् ।।"[1]

पूर्वोक्तरीत्या जैनसिद्धान्तमुद्घोषयन् क्षपणकः" रङ्गमञ्चे आगच्छति। तामसीश्रद्धाप्रियः क्षपणको विलासशीलो भीरुश्च प्रतीयते । कापालिको यदा खड्गमुद्यच्छति तदा क्षपणकः सभयम् "महाभाग, अहिंसा परमो धर्मोऽस्ति" इत्युक्त्वा भिक्षोरङ्कं प्रविशति । पुनश्च सः प्रथमं भिक्षु राजसीश्रद्धास्पर्शाद् वारयति तदा स्वयमेव तामालिङ्ग्य स्पर्शसुखमनुभूय तां प्रशंसति । यथा[2] -

क्षपणकः (सरोमाञ्चम्) अहो अर्हन् । अहो अर्हन् । कापालिन्याः स्पर्शसुखम् । सुन्दरि, देहि देहि पुनरप्यङ्कपालीम् । (स्वगतम्) अरे, महान् खल्विन्द्रियविकार उपस्थितः । तर्हि अस्ति कोऽप्युपायः किमत्र युक्तम् भवतु पिच्छिकया छादयिष्यामि ।

अयि पीनघनस्तनशोभने परित्रस्तकुरङ्गलोचने ।

यदि रमसे कापालिकीभावैः श्रावकाः किं करिष्यन्तीति ।।

अहो कापालिकदर्शनमेवैकं सौख्यमोक्षसाधनम् । भो कापालिक, अहं त्व साम्प्रतं दासः संवृतः । मामपि महाभैरवानुशासने दीक्षय । एवमेव स कापालिकादेशेन सुरामपि पिबति सुरापानं च प्रशंसति । यथा[3] -

"भिक्षुः क्षपणकाय चषकमुपनयति" क्षपणकश्च पीत्वा

---

1. प्रबोधचन्द्रोदय, पृ. 117, श्लोक-3.5-6

2. तत्रैव, पृ. 141, श्लोक 3.19

3. तत्रैव, पृ. 145

"अहो सुराया मधुरत्वम्, अहो स्वादः, अहो गन्धः, अहो सुरभित्वम्। चिरं खलु अर्हदनुशासने निपतितः प्रतिवञ्चितोऽस्मीदृशेन सुरारसेन।"[1] इत्यादिकम् भणति। अनेन प्रकारेण न केवलं क्षपणकः सुरापानं कापालिकी सेवनं च करोति प्रत्युत स निजधर्मं परित्यज्य सोमसिद्धान्तमप्यङ्गी करोति कापालिकस्य दासत्वं चापि स्वीकरोति।

कविना क्षपणकस्य जैनसिद्धान्तोऽपि पूर्वोक्तरीत्या स्वालोचनाविषयी कृतः प्रथमं बौद्धमतानुयायी भिक्षुः सिद्धान्तस्यास्य आलोचनां विदधाति। पुनश्च क्षपणकस्य व्यभिचारं निरूप्य कविना सिद्धान्तोऽयं न्यक्कृत एव इत्यत्र नैव सन्देहावसरः।

4· <u>भिक्षुः</u> -

भिक्षुरपि नाटकस्य तृतीयाङ्के बौद्धधर्ममुपदिशति। यथा[2] - भो, भो उपासकाः भिक्षवश्च, श्रूतां भगवतः सुगतस्य वाक्यामृतम्। (पुस्तकं वाचयति) पश्याम्यहं दिव्येन चक्षुषा लोकानां सुगतिं दुर्गतिं च क्षणिकाः सर्वे संस्काराः। नास्त्यात्मा स्थायी। तस्माद् भिक्षुषु दाराना उत्क्रमन्तु नेर्ष्यितव्यम्।" चित्तममलं तदीर्ष्यानाम्। अस्मत्संतति पतितः कश्चिद् विज्ञानलक्षणः समुच्छिन्नवासनो मोक्ष्यते।" एवमितिसंक्षेपेण भिक्षुणा बौद्धमतं प्रतिपादितम्। पुनश्च क्षपणकभिक्षो वार्तालापेन अस्य मतस्य परिचयं मिलति। परं तत्रापि अन्योऽन्य माक्षिप्तवतावेव। प्रकारान्तरेण कविना क्षपणकमाध्यमेन सौगतस्य विज्ञानवादस्य निन्दा एव कृता। भिक्षुरपि चान्ते राजसी श्रद्धायां रममाणो मद्यपो भवति सुगतधर्मं विहाय च कापालिकधर्ममनुवर्तते।

वटुः[3] -

दम्भाश्रमे दम्भस्य शिष्यत्वेन स्थितो वटुः नवागन्तुकान् आश्रमस्य

---

1· प्रबोधचन्द्रोदयः, 3·11

2· तत्रैव, पृ·123

3· द्रष्टव्यः प्र·च·-द्वितीयाङ्क प्रारम्भे, पृ·61·

नियमादिकमुपदिशति । गुरोः दम्भस्याज्ञां चातीव नैपुण्येनावहति । वटुः स्वामीङ्गितमात्रज्ञो निपुणः कुशाग्रधी, वाक्पटुश्चास्ति। आश्रम-प्राप्ताहङ्कारस्य प्रथमं कुलशीलादिकं पृच्छति । दम्भस्येङ्गितैरेव तस्याभिप्रायं ज्ञात्वा अहंकारं पादप्रक्षालनार्थं कथयति । स्वामिनं तस्य धर्मं च मुक्तकण्ठेन प्रशंसति । दम्भमतानुयायी वटुरपि स्वामिनमनुकरोति ।

5\. शिष्यः -

नाटकस्य द्वितीयाङ्के चार्वाकेन सह शिष्योऽपि रङ्गमञ्चे उपस्थितो भवति । यश्च चार्वाकेण सह तद्धर्मविषये विविधान् प्रश्नान् पृच्छति । चार्वाकश्च तस्य युक्तीन् समाधाय तं प्रत्युत्तरयति । शिष्यस्य प्रश्नेषु वेदान्तस्य प्रभावो दृश्यते परमनुचरत्वात् स स्वामिनमेवानुकरोति ।

एवं पूर्वोक्तप्रकारेण ज्ञायते यत्कवेः कृष्णमिश्रस्य प्रस्प पात्रेष्वपि प्रतीकपात्रवत् सजीवता अस्ति । तत्तत्पात्रैश्च मुक्तकण्ठैः स्वधर्मस्य प्रतिपादनं विहितम् । विभिन्नधर्मप्रतिपादकत्वादेव एषां गणना प्रस्पपात्रश्रेण्यां कृता । इति ।

{3} सामान्य-पात्राणि -

व्याकृतानि प्रस्पपात्राणि निर्वहन्ति हि ते नाटके विशिष्ट-भूमिकाम् । इदानीं सामान्यपात्राणि व्याचक्षन्ते न तान्यन्तरा कथावस्तु प्रसरति । लब्धावसरा वा भवितुमर्हन्ति, पात्राण्येतानि नूनं महनीयं स्थानं भजन्ते । एषु पात्रेषु सूत्रधारो मुख्य । नायन्ते नट्या सह नाटकस्य महत्त्वं नाटककारस्य परिचयं नाटकस्याभिनयोपयोगितां च वाचयति । "सूत्रं प्रयोगानुष्ठानं धारयतीति सूत्रधारः" इत्यनुसारेण नाट्योपकरणादीनां सूत्रत्वात् सूत्रधारो नाटकीयकथासूत्रस्य प्रथमः सूचकः । एवं काव्यार्थस्थापनात् सूचनाद् वा स्थापकोऽपि निगद्यते । दशरूपकानुसारं स स्थापको वस्तु बीजं मुखं पात्रं वा सूचयित्वा कथावस्तु स्थापयति । दिव्यं वस्तु दिव्यो भूत्वा

-----

1\. दशरूपकम्, 3.3

मर्त्यं च मर्त्यरूपो भूत्वा मिश्रं च दिव्यमर्त्ययोरन्यतरो भूत्वा सूच्यते ।
यथोक्तं दशरूपके[1] -

"दिव्यमर्त्ये स तद्रूपो मिश्रमन्यतरस्तयोः ।
सूचयेद्वस्तु बीजं वा मुखं पात्रमथापि वा ।।"

एवं सूत्रधारः कुत्रचित् वस्तुसूचनां कुत्रचिच्च बीजं मुखमथवा पात्रं सूचयित्वा नाटकस्य कथासूत्रं योजयति । प्रबोधचन्द्रोदये यथा सूत्रधारः[2] -

"विवेकेनेव निर्जित्य कर्णं मोहमिवोर्जितम् ।
श्रीकीर्तिवर्मनृपतेर्बोधस्येवोदयः कृतः ।।"

अत्र सूत्रधारस्योक्तौ मोहे विवेकस्य जयं निर्दिश्यते । तद्वाक्यं श्रुत्वेव कामः {पात्रविशेषः} प्रविशति अनेन कथोद्घातामुखाङ्गं निरूपितम् ।
यथाह विश्वनाथः साहित्यदर्पणे[3] -

सूत्रधारस्य वाक्यं वा समादायार्थमस्यवा
भवेत् पात्र प्रवेशश्चेत्कथोद्धातः स उच्यते ।

दशरूपकेऽपि[4] -

"स्वेतिवृत्तसमं वाक्यार्थं वा यत्र सूत्रिणः ।
गृहीत्वा प्रविशेत्पात्रं कथोद्घातो द्विधैव सः ।।"

अनेन प्रकारेण सूत्रधारस्य वाक्यार्थं समादाय कामस्य प्रवेशात् प्रबोधचन्द्रोदये कथोद्घाताख्यमामुखं निरूपितमिति निश्चप्रचम् । मर्त्यरूपेणोपस्थितः सूत्रधारो ऽभिनयकलानिष्णातः साहित्यतत्त्वज्ञश्च । नाटकस्योद्देश्यादिकं निरूप्य स नट्या सहैव निर्गच्छति । एवं सूत्रधारनट्योः नाटके सामान्यपात्रत्वेनपरिचयः प्राप्यते । तस्य कथनेनैव ज्ञायते यत् कीर्तिवर्मणः

रिपवो गोपालसहाय्येन क्षयं गता । चिरकालाद्युद्धे प्रवृत्ताश्च गोपालादयो ऽधुना कीर्तिवर्मणः सभायां शान्तरसप्रधाने

---

1. दशरूपकम्, 3.3
2. प्रबोधचन्द्रोदयः, 1.9
3. सा.द.परि. 6, पृ.176
4. दशरूपकम्, 3.9

प्रबोधचन्द्रोदयाख्यं श्री कृष्णमिश्र रचितं नाटकमभिनेतुकामा: सन्ति तेन च ते आत्मानं विनोदयितुमिच्छन्ति ।

सामान्यपात्रेष्वेव महामोहस्य द्वारपालस्य विवेकस्य च द्वारपालिका "प्रतीहारी" तथा च विवेकस्यांगरक्षक: सूतश्च पारिपार्श्वकादयोऽपि सन्ति । एतानि पात्राणि हि स्व-स्व स्वामिनमेवानुकुर्वन्ति । यद्यपि नैव तेषां विशिष्टा भूमिका तथापि काले-काले ते स्वकर्तव्यं परिपालयन्त: कथावस्तु निर्वहन्ति । अत: कथयितुं शक्यते यन्नाटके पात्रकल्पना नाट्यकथावस्तु-दृष्ट्यैवास्ति नैव कुत्रापि निरर्थका पात्रयोजना दृश्यते ।

एवं नाटके त्रिविधैव पात्राणां योजना कविना नाट्योक्तदिशा कृता । विभिन्नपात्रै: कथावस्तुना च तत्कालिकी सामाजिकी-राजनैतिकी धार्मिकी अवस्थाऽपि स्पष्टी भवति । इति तु निर्विवादरूपेण सिद्धमेव यत् कृष्णमिश्रस्य काल: राजनैतिकयुद्धानां सामाजिकधार्मिकपतनस्य च काल आसीत् । नाटकाध्ययनेन ज्ञायते यत्तत्काले बौद्धजैन-शैव-वैष्णव-अद्वैतादि मतेषु वैमनस्यमासीत् । राजनैतिकयुद्धानां वर्णनं नाटकस्य प्रस्तावनायामेव मिलति । नाटकस्य कथावस्त्वपि विवेकमहामोहसम्राटद्वयस्य युद्धमाटीकते । युद्धस्य वर्णनं सेनाया: परिचयमपि नाटकेऽवलोक्यते ।[1] द्वितीयाङ्के सम्राटमहामोहस्य स्वागतायोजनं तत्कालिकसम्राजां समादरप्रथां परिचाययति ।[2]

सामाजिकदृष्ट्यापर्यवेक्षणेन ज्ञायते यत्तस्मिन् काले गुरो: स्थानं महनीयं आसीत् । स्त्रिय भर्तारं आर्यपुत्रसंज्ञया सम्बोधयन्ति स्म । अतिथि-सत्कारं श्रेष्ठं मन्यते स्म । सामाजिका:कर्तव्यापेक्षया भाग्याश्रिता आसन् ।

"प्राय: सुकृतानामर्थे देवा यान्ति सहायताम् ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ।।"[3]

---

1. प्रबोधचन्द्रोदय:, 4.23
2. तत्रैव, 2.15
3. तत्रैव, 4.7

अनेन सुकर्मभिरेव पुण्यप्राप्तिर्भवति इत्यस्याशयस्याभासो मिलति ।

जननी वियोगदुःखितायाः शान्तेश्चिताप्रवेशोद्योगेन मनसश्चापत्यादि-वियोगे प्राणोत्सर्गाभ्यासो जायते यत्तत्काले जना न केवलं पतिविरहेऽपितु पुत्रकलत्रादि वियोगेऽपि प्राणोत्सर्गं कुर्वन्ति स्म ।

धार्मिकव्यभिचारेण समाजे स्त्रीणाम् वशोपचिता । साध्वस्ता अभिसरन्ति स्म ।[1] कुलवधूनां समाजे समादर आसीत् । ताश्च विपत्तौ भर्तुः सहायतां विदधति स्म । धार्मिकाः साधव ब्राह्मणाश्चापि निशि वेश्यावेश्मसु विहरन्ति दिवा चात्मानं निगुह्य सर्वज्ञा अग्निहोत्रिणश्च भूत्वा प्रजां वञ्चयन्ति स्म ।[2] गौडप्रदेशेराढापुर्यां च दाम्भिकाः अहंकारिणश्च ब्राह्मणा निवसन्ति स्म उत्कलप्रदेशे च मदमानयोः प्रभाव आसीत् ।

एवं प्रबोधचन्द्रोदयनाटके तत्कालिक-राजनैतिक-सामाजिक-धार्मिकानां च परिस्थितीनां सम्यक् चित्रणं प्राप्यते । अनेनानुमीयते यत्तदानीं राजनैतिकक्षेत्रे राज्ञां सत्तासंघर्ष आसीत् सामाजिकानां जीवनं च धार्मिकपतनेनाव्यवस्थितमेवासीत् । धार्मिकसमाजे मतमतान्तराणां चारित्रिकं पतनम्, विष्णुभक्तेः प्रभावः उपनिषदपेक्षा गीतायाः मान्यता चासीत् । निष्कर्षतः कालोऽयं समाजस्य पतनकाल एवासीत् ।

## (2) मानसिकपात्राणां भेदः -

यदा हि मनसि सदसद्वृत्त्योरन्तर्द्वन्द्वरहर्निशं जायमानं दृश्यते, तथैव मानसपात्राणामपि द्विविधो विभागो युज्यते ।

1. सत्पक्षः ।
2. असत्पक्षः ।

तत्र सत्पक्षपात्रेषु नाटकस्य नायको विवेको वस्तुविचारः, क्षमा, सन्तोषः, शान्तिः, करुणा, श्रद्धा, मतिः, मैत्री, पुरुषश्च । असत्पक्षस्य नायको महामोहो नाटकस्यप्रतिनायकत्वेन चित्रितः । कामः क्रोध-हिंसा-लोभ-

---

1. प्रबोधचन्द्रोदयः, 3.6-9
2. तत्रैव, 2.1

तृष्णा-दम्भाहंकारोरति:-मिथ्यादृष्टि-विभ्रमावतीमनश्च तत्पक्षावलम्बिन: । नाटके मनोवृत्तिरूपपात्रै सह वेदान्तिक रूपक पात्राणामपि संघर्षश्चित्रित: । स्वाभीष्टपात्रचित्रणे कवे: प्रेय भावना अनाभीष्ट पात्रचित्रणे च हेयभावना दृश्यते येन कविना स्वाभीष्टानामभीष्टमतानां युगपदेव प्रतिपादनं कृतम् ।

च) प्रतीकपात्राणां मनोवैज्ञानिकी दार्शनिकी च दृष्टि: -

श्री कृष्णमिश्रस्य कृतिरियं प्रतीकात्मकशैल्यां लिखिता महनीयं स्थानं भजन्ते इति तु प्रागेव प्रतिपादितम् । नैवास्यां शैल्यामित: प्राक् एतादृशी नाट्यपरम्परा दृश्यते केषुचिदेव नाट्यकृतिषु प्रतीकपात्रयोजना दृश्यते परमपि संक्षेपेणैव । परमेकादश शताब्द्यां कविना "प्रबोधचन्द्रोदय:" नाटकं पूर्णरूपेणास्यामेव नूतनशैल्यां विरच्य नूतनविधाया प्रचलनं कृतम् । इत: प्राक् भास-कालिदास-अश्वघोष-भवभूति-प्रभृतय: प्रसिद्धा नाटककारा अभूवन् । तेषु अश्वघोषस्य शारिपुत्रप्रकरणे एव धृति-क्षमा-दयादि मनोभावानां नाटकस्यपात्रत्वेन प्रयोग उपलभ्यते । धृत्यादीनां वार्तालापेनास्यां एव शैल्या: पुटोऽवलोक्यते । परं नैव कृतिरियं पूर्णतया प्राप्यते । उपलब्धांशै: बाह्यप्रमाणैश्च ज्ञायते यदस्यामपि अंशत एवास्या: शैल्या: प्रयोग: । निखिलाऽपि कृति:रूपकात्मका स्यादित्यत्र संशय एव । पश्चाद् भवभूतेरु-त्तररामचरिते तमसा मुरला पृथ्व्यादि अमूर्तभावानां मानवीकरणं त्वस्ति परं प्रथमं तावन्नैवेतेमनोभावाअपरत्वचैतेषामपि तत्रांशरूपेणैव कविना प्रयोग: कृत: प्रसंगानुरोधात् । एतादृशी पात्रयोजना तु भासस्य बालचरिते "शाप-राज्यश्री" रूपेण कालिदासस्य अभिज्ञान-शाकुन्तले च वृक्ष वनदेव्यादि-रूपेणापि दृश्यते । परमेतत् तु अमूर्त भावानां मानवीकरणमात्रमेव नैव मनोभावानाम् । अत: कथयितुं शक्यते यत् शारिपुत्रप्रकरणानन्तरं प्रबोध-चन्द्रोदयएव मनोभावानां मानवीकरणमस्ति । यद्यपि कीथ प्रभृतय: केचन पाश्चात्या: स्वीकुर्वन्ति यत् कृष्णमिश्रात् प्रागपि परम्परेयं प्रचलिता आसीत् ।

या खलु श्रीकृष्णमिश्रेणपुनरुज्जीविता ।[1] परं प्रमाणाभावात् तेऽपि प्रबोधचन्द्रोदयस्यैव मौलिकतां स्वीकुर्वन्ति ।[2] श्रीकृष्णमिश्रेण प्रबोधचन्द्रोदये आध्यात्मिकदृष्ट्या अमूर्तभावानां रूपकत्वेन कल्पना प्रथमत एव कृताऽस्ति । नाटकाध्ययनेन ज्ञायते यन्न केवलमाध्यात्मिकक्षेत्रेऽपितु दर्शनक्षेत्रेऽपि तेन दार्शनिकं ज्ञानं नाट्यशैल्या सर्वजनसंवेद्यं कृतम् । प्रतीकपात्रयोजनया दुर्बोधा अपि दार्शनिका विषया अनायासेनैव बुद्धिपथमवतरन्ति । विभिन्नदर्शनशास्त्रेषु स्व-स्व मतानुसारेण दर्शनतत्त्वानां विवेचनं कृतमस्ति येन तेषां स्वरूपाव-बोधने जनसामान्य असमर्थमिव आत्मानमनुभवति परं यदा त एव दार्शनिक-सिद्धान्ता मतविशेषमंगीकृत्य पात्रत्वेन पुरतोऽवतार्यन्ते दार्शनिकसिद्धान्ताश्च व्याक्रियन्ते तदा अल्पधियोऽप्यनायासेनैव तानवगन्तुं क्षमन्ते ।

प्रबोधचन्द्रोदये अद्वैतदर्शनस्य प्रतिपादनं प्रतिष्ठापनं च कवेरभिप्रेतम् । अद्वैत वेदान्तेन सहैव लोकायत-बौद्ध-जैन-सोमसिद्धान्त -मीमांसादीनामपि सिद्धान्ता उल्लिखिताः । परं नैव एते सिद्धान्ताः कवेरभिप्रेता अतस्तान् विविच्य खण्डनं च विधाय अद्वैत सिद्धान्तस्य विष्णुभक्तेश्च समन्वयः साधितः। नाटकस्यमङ्गलाचरणपद्येनैव शांकरवेदान्तस्याभिव्यञ्जना भवति । पुनश्च "चिरं चिदानन्दमयो निरञ्जनो जगत्प्रभुः" "स्वयमपि यतो मायासङ्गात्पुमा-निति विश्रुतः" इत्यादिषु विवेकोक्तिषु प्रोक्तः परमेश्वरस्वरूपं शांकर-वेदान्तमनुसरति । अन्ते च "तत्त्वमसि" इति महावाक्यार्थं ज्ञात्वैव पुरुष आत्मानं वेत्ति परेश्वरादभिन्नमिव वात्मानं मनुते । प्रबोधोदयरूपा फलावाप्तिरपि तदैव जायते । अद्वैतदर्शने साधनचतुष्ट्यमपेक्षते । "ब्रह्मैव

-----------------------------

1. अश्वघोष - कीथ, पृ.84

'It must remain uncertain whether there was a train of tradition leading from Asvagosha to Krishna-misra or whether the later created a type of drama afresh, the former theory is more likely.'

2. Page-251 - "We can not say whether Krishnamisra's Prabhodhacandrodya was a revival of a form of drama, which had been practised regularly if on a small scale since Asvaghosa of whether it was a new creation as may easily have been the case."

सत्यम्" नान्यात्कमपि । ऐहिकामुष्मिक फलोपभोगान् प्रति वैरस्यम् । मनसो एकाग्रता । इन्द्रियनिग्रहो वेदान्तवाक्येषु आस्था तथा च मुमुक्षत्वम् । पूर्वोक्त साधन चतुष्ट्य सम्पन्नो अधिकारी एव "तत्त्वमसि" रूपमहावाक्योपदेशग्रहीता भवेत् । नाटककारेण नाटके पुरुषो विविधैरुपायै: प्रथममधिकारितां नीत: । तत्कृते मोहक्रोधलोभादीनां नाश: कृत: प्रवृत्त्यभिमुखं मनो वैयासिकीसरस्वत्या वैराग्येन च विषय विरसतां नीत:, अन्ते च विष्णुभक्त्यादेशेन "तत्त्वमसि" रूप: महावाक्योपदेश: प्रदत्त: । येन स: मोहान्धकारमवधूय "अहं च स:" इति ज्ञानाकारको भवति ।

लोकायतस्य प्रतिपादनं नाटकस्य द्वितीयाङ्के चार्वाक पात्रमुखेन बृहस्पति मतानुरोधेनाक्षरश: एवकृतम् । तृतीयाङ्के दिगम्बर-जैन-बौद्ध-सोमसिद्धान्तानां च परिचयो भिक्षु:-क्षपणक-कापालिक पात्रैरुपलभ्यते । एतेषां कथनोपकथनैस्तत्तत्सिद्धान्ता निश्चयेन हृदयंगमा भवन्ति । न्याय-तर्क विद्या-मीमांसादीनां दर्शनमतानामपि ज्ञानं नाटकस्य षष्ठाङ्के विवेकोपनिषत् कथोपकथनै: भवति । एवं कविना चार्वाक-बौद्ध-जैन-सोमसिद्धान्तादि दर्शसिद्धान्ता विस्तरेण न्याय-तर्क-विद्या-मीमांसादयश्च संक्षेपेन यथाप्रसङ्गं निरूपिता: परं तत्तद्दर्शनमतानां रहस्यानि नाटकोक्तदिशा स्मृतिपथमवतरन्ति इत्यत्र न कोऽपि संशय: ।

नाटकस्य कथावस्तुपरिकल्पना नितरां मनोवैज्ञानिकी । "मनस: प्रवृत्ति निवृत्तिश्च द्वे धर्मपत्न्यौ स्त: । तत्रप्रवृत्त्यां महामोहस्तत्कुलम्, निवृत्त्यां विवेकस्तत्कुलं च समुत्पन्नम्" इति सिद्धान्तपरिकल्पनं मनोवैज्ञानिकतां द्योत्यते । यतोहि प्रवृत्त्याभिमुखं भवविषयानुचिन्तयन् वा मनो महामोहाकुलं भवति । महामोहग्रस्ते मनसि काम-क्रोध-लोभादीनामुत्पत्तिस्तु नैसर्गिकी एव । अपरतश्च मनो निवृत्त्याभिमुखं भवेत्तर्हि तत्र विवेकोत्पत्ति विवेकाच्च वस्तुविचार-क्षमा-सन्तोषादीनामुत्पत्तिरेतैश्च परमपदप्राप्तिरिह नैसर्गिकी एव । पुनश्च विवेकमहामोहौ सहोदरौ, सहोदराणां चैकामिषप्रभवं वैरन्तु लोकेऽपि बहुत्रावलोक्यते । अतोऽत्रापि विवेकमहामोह सहोदराणां द्वन्दकल्पना मनोवैज्ञानिकी एव ।

कामक्रोधलोभादीनां चित्रणेऽपि कवेर्मनोवैज्ञानिकी बुद्धिरवलोक्यते। "अपि यदि विशिखाः शरासनं वा कुसुममयं····" इत्यादिषु कामोक्तिषु[1] कामीजनस्याचरणमेव दृश्यते।

अपि च "अन्धीकरोमि भुवनं बधिरीकरोमि"[2] इत्यत्र क्रोधस्य तथा च"मदुपगृहीता मनोरथा निरन्तरम्परामेव न तीरं यान्ति" इत्यादिषु लोभस्यवचनेषु-तत्तत्पात्राणां वास्तविकं चित्रणं प्रस्तूयते। हिंसारतः क्रोधी जनः पितरमपि न गणयति। तत्कृते मातृपितृवधोऽपि सुकरो भवति। अस्यैव भावस्य चित्रणं क्रोधोक्तिषु दृश्यते।[3] एवमेव दाम्भिका, अहंकारीणां च नैसर्गिकी मनोवृत्तीयं यत्ते प्रायशो बहुभाषन्ते सुहृदादीनां मधुरवचांस्यपि न शृण्वन्ति। नाटकस्य दम्भाहंकारपात्रयोरेतादृशमेव चरित्रचित्रणं कविना कृतम्। "सदनमुपगतोऽहं पूर्वमम्भोजयोनेः····" अरेक इव वासवः कथय कोऽत्र पद्मोद्भवो[4] ···· इत्यादिषु दम्भाहंकारोक्तिषु पूर्वोक्त-तथ्यस्यैवाभिव्यञ्जना भवति।

प्रवृत्ते संग्रामे उभयोरेव राज्ञोः सैनिकयोजनाऽपि मनोवैज्ञानिकता-मर्हति। यथा विवेकेन कामं जेतुं वस्तुविचारो नियुक्तः। नाम्ना एव ज्ञायते यत् स विचारशीलः परेषां मनोवृत्तिवेत्ता चास्ति। कामो हि स्त्रीरूपायुधेन लोकान् व्यामोहयति। नारी तस्य प्रधानमस्त्रमस्ति अतस्तस्यां विरतिरेव कामं जेतुमनिवार्या। निर्विचारसौन्दर्याभिमानवर्धिष्णुना कामहतकेन वञ्चितं जगत्। विचारशीलो नैव तथा प्रवर्तते विषयेषु यथा-निर्विचारः। विचारवतो वस्तुविचारस्य मते नारीति निरयो नाम्ना कृतः"। एवं नारीषु वैराग्यमुत्पाद्य वस्तुविचारः शस्त्राभावे एव कामं जयति। मन्ये क्रोधो मानवस्य प्रबलतमः शत्रुरस्ति भर्तृहरिणाऽप्य-नुमोदितम् यथा - "किमरिणा क्रोधोऽस्ति चेद्देहिनाम्" इत्यादिना परं

---

1. प्रबोधचन्द्रोदयः, 1.13
2. तत्रैव, 2.29
3. तत्रैव, 2.33
4. तत्रैव, 2.10-11

क्षान्तिकवचेनैवतत्प्रतिकारोपायोऽपि समर्थितः । प्रबोधचन्द्रोदयस्य क्रोधं जेतुं क्षमाया नियुक्तिरपि एतदेवानुमोदयति । "क्रुद्धे स्मरेमुखावधीरणमथाविष्टेप्रसादक्रमो...." इत्यादिषु क्रोधप्रतीकारोपायोऽपि मनोवृत्तेरनुकूलमेव । एवमेव लोभाय सन्तोष एवालम् । "सन्तोष एव पुरुषस्य परं निधानम्" इत्याभाणकमपि प्रसिद्धमेव । नाटके सन्तोषस्य "सन्तोषामृतमनाङ्मग्नः सुखं जीवति" इत्यादिना लोभविजयायासोऽपि मनोवैज्ञानिक एव । युद्धानन्तरस्वप्रियपुत्रकलत्रादिवियोगदुःखितस्य मनसः प्राणोत्सर्गायासस्तु स्वाभाविक एव । निश्चयेन प्रियविरहो ऽरुन्तुदो भवति । स्नेहस्य व्यामोह एवैतादृशः । स्नेहव्यामोहाकुलस्य विषयविरसतोपदेशोऽपरिहार्यः । कविना इत्यनुचिन्त्यैव सरस्वत्याः कल्पना कृता सरस्वती च निजोपदेशै- -र्मनसि वैराग्यं जनयति । वैराग्यदीक्षितं मनश्च निवृत्याभिमुखं भूत्वा विवेकात् "तत्त्वमसि" रूपमहावाक्यार्थमवबुद्ध्य परमं पदं प्राप्नोति । प्रबोधोदय रूपफलावाप्तिश्च सिद्धा भवति । एवं दृश्यते यत् कविना आद्योपान्तं निखिलमपि कथावस्तु मनोवैज्ञानिकरीत्यैव कल्पितम् अत नाटकमिदं मनोवैज्ञानिकनाटकपदवीं लभते इति निश्चितम् ।

= = = = = =

# सप्तमोऽध्यायः

## मनः, मुक्तिः, भक्तिश्च

कः मनः

दर्शनसाहित्ये मनसः स्वरूपम्

खः मुक्तिः

1. वैदिकसाहित्ये मोक्षस्वरूपम्
2. ब्राह्मणग्रन्थेषु मुक्तिः
3. आरण्यकेषु मुक्तिः
4. उपनिषत्साहित्ये मोक्षः
5. दर्शनेषु मोक्षः

प्रतीकात्मकनाट्यक्षेत्रे मोक्षस्थानम्

गः भक्तिः

1. भक्तेस्वरूपंमहत्त्वं च
2. भक्तेर्भेदाः
3. भक्तिदर्शनयोः समन्वयः
4. भक्तिज्ञानयोः समन्वयः
5. काव्यक्षेत्रे भक्तिः ।

= = = = = =

क) मन: -

अपारेऽस्मिन् संसारे मानवनामधेये जीवसमूहे अन्त:करणस्य प्राधान्यं नूनमेव स्वीकरणीयम् । इह संसारे सुखदु:खानां पुण्यपापानां शुभाशुभानां च मनोमूलत्वादभ्युदय साधनानां यज्ञादिनि:श्रेयससाधनानां च श्रवण-मनन-निदिध्यासनब्रह्मसाक्षात्काराणां मनोजन्यत्वात् धर्मार्थकाममोक्षरूपाखिलपुरुषार्थ-साधने मन:शब्दाभिधेयस्यान्त:करणस्य प्राधान्यं दृश्यते । अन्त:करणमिदं सामान्यत: श्रुति-स्मृतिपुराणादिषु मन:शब्देन विवक्षितम् । कुत्रचित् बुद्धिचित्तादिपर्यायशब्देन क्वचिच्च मनोबुद्धिचित्तादिविभागत्वेनैवास्य निरूपणं विद्यते । "यज्जाग्रतोदूरमुदैति दैवं प्रजानामि"त्याद्युक्त्वा ऋङ्मन्त्रा अनेकैर्मनोज्ञै: श्लोकैर्मनसो महिमानं कीर्तयन्ति, "तन्मेमन: शिवसंकल्पमस्तु"[1] इत्यादिभिर्यजुर्मन्त्राश्च मनस: शुभसंकल्पत्वं प्रार्थयन्ति । ऋग्वेदस्यानेकैप्राचीनमन्त्रा मनसो दूरगामित्वं ज्योतिषां ज्योतिरूपत्वं प्रजानामन्त:स्थितत्वं कालत्रयग्राहित्वं मानवस्य नेतृत्वं जविष्ठत्वादिकं चेति धर्म गुण व्यापारान् प्रतिपादयन्ति ।[2] कुत्रचिच्च ऋङ्मन्त्रेषु "शीर्षाणिक्रतुम्"[3] "शीर्षान्निन्द्रस्य क्रतवो"[4] इत्यादिषु शीर्षण्येव मस्तिष्के मनोव्यापारस्य क्रतोरवस्थानमुक्तम् । "चन्द्रमा मनसोजात:"[5] इतिपुरुषसूक्तमन्त्रे च विराट् रूपेण चन्द्रमसो मनोजन्यत्वं श्रूयते ।

केन-कठ-प्रश्न-छान्दोग्यादिष्वुपनिषत्सु असकृन्मनसो उल्लेख: स्वभावो धर्मादिनिरूपणं चावलोक्यते । "केनेषितं पतति प्रेषितं मन:"[6] इत्यादौ सामवेदीयस्य केनोपनिषद: प्रथम एव श्लोके स्पष्टतया मनस आत्मभिन्नत्वेन

---

1. शुक्लयजुर्वेद:, 34·1·6, 5·10
2. ऋग्वेद:, 6·9·5-6
3. तत्रैव, 2·16·2
4. तत्रैव, 8·96·3
5. तत्रैव, 10·90·13
6. केनोपनिषद:, 1·1

वर्णनमस्ति । पुनश्च "न वाग् गच्छति नमनो"[1] "यन्मनसा न मनुते येनाहुर्मनोमतम्"[2] इत्यादिषु आत्मनो मनो गम्यत्वं मनस आत्मप्रकाश्यत्वं च स्पष्टम् । बृहदारण्यक-कठादौ चात्मनो मनोबुद्धिगम्यत्वमभिहितम् यथा - "मनसैवानुद्रष्टव्यम्"[3] "आत्मा वा अरे द्रष्टव्यः"[4] । बहुशः मनः शब्दस्य प्रयोगो बुद्धिपर्यायरूपेणोपलभ्यते परं कठोपनिषदि बुद्धिः सारथिरूपेण मनश्चेन्द्रियनिग्रहरूपाश्वनियमने प्रग्रहरूपेण निर्देशोऽस्ति ।[5] तत्रैव "मनसस्तु परा बुद्धिः बुद्धेरात्मा महानपरः"[6] इत्युक्त्या मनसो बुद्धेरवरत्वेन निर्देशो वर्त्ते । एवमन्यत्रापि एतादृशः प्रयोगाउपलभ्यते परं सर्वत्र मनसोऽन्तःकरणत्वं स्वीकृतमेव ।

बृहदारण्यकोपनिषदि "मनो वाचं प्राणं तान्यात्मनेऽकुरुत्"[7] इत्युक्त्या वाचाप्राणेन च सह मनसः सर्जनं वर्ण्यते । नहि प्राणमन्तरेण मनसः सद्भावो व्यापारो वा सम्भवति, न वा मननादीनां शब्दानुविद्धत्वात् वाचमन्तरेण मनसो मननादिकं भवति । ऋग्वेदीय मन्त्रेऽप्युक्तम्[8] -

"वाङ्‌ मे मनसि प्रतिष्ठा, मनो मे वाचि प्रतिष्ठितम्" इति ।

1· दर्शनसाहित्ये मनसः स्वरूपम् -

(1।1) बौद्ध-दर्शने मनःस्वरूपम् -

ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च ।
मनोबुद्धिरिति प्रोक्तं द्वादशायतनं मनः ।।[9]

अनेन द्वादशायतनान्तर्गतं मनः बुद्धिव्यतिरिक्तत्वेनप्रतिपादितम्

---

1· केनोपनिषद्, 1·3
2· तत्रैव, 1·5
3· बृहदारण्यकोपनिषद्, 4·4·19
4· तत्रैव, 1·5·3
5· कठोपनिषद्, 1·3·3
6· तत्रैव, 1·3·10
7· बृहदारण्यकोपनिषद्, 1·5·3
8· ऋग्वेद-शान्तिमन्त्रेषु ऐतरेयोपनिषद्, 6·1
9· सर्वदर्शनसंग्रहः - बुद्धदर्शनम्

शान्तरक्षितेनापि तत्त्वसंग्रहे उक्तं यथा - "चक्षुराद्यतिरिक्तं हि मनोऽस्माभिरपीष्यते"[1] तथापि "न विज्ञानातिरिक्तं किञ्चित् मनो नाम तत्त्वम्" इति तेषामभिमतम् । यथोक्तम्[2] "षण्णां अनन्तरातीतं विज्ञानं यद्धि तन्मन:" इति । उत्तरविज्ञानापेक्षया यदेवाव्यवहितं पूर्वविज्ञानं तदेव मन इत्यर्थ: । उक्तं च शान्तरक्षितेनापि - "षण्णामनन्तरोद्भूतप्रत्ययो यो हि तन्मन:"[3] इति । लङ्कावतारसूत्रेऽपि[4] -

"चित्तं प्रत्ययसम्बद्धं प्रवर्तति शरीरिणाम् ।
प्रत्ययेभ्यो विनिर्मुक्तं न पश्यामि वदाम्यहम् ।।"

बौद्धास्तु सौत्रान्तिक-वैभाषिक-योगाचार-माध्यमिक भेदेन चतुर्धा भिन्ना । चतुरसंज्ञाभि: प्रसिद्धा बौद्धा यथाक्रमं सर्वशून्यत्व-बाह्यर्थशून्यत्व-बाह्यर्थानुमेयत्व-बाह्यर्थप्रत्यक्षत्वादानातिष्ठन्ते । यद्यपि भगवान्बुद्ध एक एव बोधयिता तथापि बौद्धव्यानां बुद्धि भेदाच्चातुर्विध्यम् ।

"नित्ये तु मनसि प्राप्ता प्रत्यया यौगपद्यत:"[5]

इत्यादिना तत्त्वसंग्रहवचनेन बौद्धैर्मनसो नित्यत्वं निराकृतम् । टीकाकारेण च तत्रैव उक्तम् -

"अन्यथा नित्यकारणत्वे सत्यविकलकारत्वात् क्रमोत्पत्तिर्विरुध्यते चेतसा"[6]।

बुद्धितत्त्वन्तु चित्तात्मकमान्तरसमुदायान्तर्गतमालय विज्ञान-प्रवृत्तिविज्ञान भेदभिन्नं क्षणिक रूपं सर्वसौगतसम्प्रदाय-प्रसिद्धम् । उक्तं च-[7]

"तत् स्यादालयविज्ञानं यद्भवेदहमास्पदम् ।
तत् स्याद प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेद् ।।"

अभिधर्मकोशे वसुबन्धुना "मन आयतनं चतत्"[8] इत्यनेन मनस इन्द्रियत्वं तस्य ज्ञानायतनत्वेन स्वीकृतम् । इन्द्रियत्वेऽपि "षण्णामनन्तरातीतं विज्ञानं

------------------------------

1. तत्त्वसंग्रह:, पृ.209
2. तत्रैव, 1.17
3. तत्रैव, 631
4. तत्रैव, 631
5. तत्त्वसंग्रह:, 632
6. तत्रैव टीकायाम् ।
7. सर्वदर्शनसंग्रह: - बौद्धदर्शनप्रसङ्गे
8. अभिधर्मकोश: 1.16

यदि तन्मन:"[1] इति कारिकानुसारेण तु प्रत्येकपूर्वविज्ञानमेवोत्तरविज्ञानापेक्षया मन इति न विज्ञानातिरिक्तं किञ्चिन्मनो नाम अस्तीति तेषां मतम् । चक्षुर्विज्ञानादीनां पञ्चानां यथा चक्षुरादय: पञ्च आश्रया: प्रसिद्धास्तथा षष्ठस्य मनोविज्ञानस्याश्रयप्रसिद्धार्थं सप्तधातुवर्गे मनसो ग्रहणम् इति "षष्ठाश्रयप्रसिद्ध्यर्थम्"[2] इत्यादिना तत्रैवोक्तम् । तत्रापि चक्षुरादीनां विषया: समकालीना भवन्ति षष्ठस्य मनोधातोर्विषयस्तु अतीतोऽपि भवतीत्युक्तम् - "चरमस्याश्रयोऽतीत: पञ्चानां सहजश्च"[3] इत्यादिना ।तथा "अनियतं मन:"[4] इत्यादिना यथा चक्षुरादिनियतविषयं न तथा मन इत्युक्तम् ।

लंकावतारसूत्रे च यथा[5] -

"चित्तं मनश्च विज्ञानं लक्षणार्थं प्रकल्पते ।
चित्तेन चीयते कर्म मनसा च विचीयते ।
विज्ञानेन विजानाति दृश्यं कल्पेति पञ्चभि: ।।"

(2) जैनदर्शने मन:-स्वरूपम् -

"इन्द्रियानिन्द्रियनिमित्तं देशत: सांव्यवहारिकमिति"[6]

इत्यादिना तथा च "इन्द्रियं चक्षुरादि अनिन्द्रियं मन:"[7] इत्यादिभि: जैना मनस: करणत्वेऽपि नेन्द्रियत्वमिति स्वीकुर्वन्ति । इन्द्रियाणां नियतैकैकविशेषगुणग्राहित्वनियमात् मनसस्तु सर्वार्थग्राहकत्वादनिन्द्रियत्वम् । इन्द्रियप्राणवत् मनसोऽपि द्रव्यभावभेदाद् द्वैविध्यम् । द्रव्यमनो हि द्रव्येन्द्रियवत् पुद्गलारब्धम् । भावमनस्तु अर्थग्रहणशक्तिव्यापाररूपम् ।

---

1. अभिधर्मकोश: - 1.17
2. तत्रैव, 1.16
3. तत्रैव, 1.44
4. तत्रैव, 1.43
5. लङ्कावतारसूत्रम्, पृ.46
6. परीक्षामुखसूत्रम् - माणिक्यनन्दी, 2.5
7. प्रमेयरत्नमाला, पृ.230

उक्तं यथा तत्त्वार्थवृत्तौ[1] भास्करनन्दिनानैन्द्रियमनिन्द्रियम् । .....
नेन्द्रियप्रतिषेधेनात्मनः करणमेव मनो गृह्यते तदन्तःकरणं चोच्यते । तस्य
बाह्येन्द्रियैर्ग्रहणाभावादन्तर्गतं करणमन्तःकरणमिति व्युत्पत्तेरिति । ...
मनोऽपि द्वेधा-भावमनो द्रव्यमनश्चेति । भावमनो लब्ध्युपयोगलक्षणं चेतनपर्यायः।
...द्रव्यमनश्च...गुणदोषविचारस्मरणादिप्रणिधानाभिमुखस्यात्मनोऽनुग्राहकाः
पुद्गला वीर्यविशेषावर्जनसमर्था मनस्त्वेन परिणता इति कृत्वा पौद्गलिकम् ।
"किं च, द्रव्यमनः पुद्गलकार्यं द्रव्यकरणत्वेन ज्ञानसाधनत्वाच्चक्षुरादिवदिति
युक्तिबलाच्चास्य पौद्गलिकत्वसिद्धिः ।"

सुखदुःखादिवदात्मापि "अनिन्द्रियजन्य मानसप्रत्यक्षविषयमेव" । यथाह
माणिक्यनन्दि[2]- "घटमहमात्मना वेद्मीति कर्मवत् कर्तृकरणक्रियाप्रतीतेरिति
कर्तुरात्मनोऽपि भवति प्रत्यक्षप्रतीतिर्मानसी । ज्ञानसुखादिकन्तु न ज्ञानान्तर-
ग्राह्यमपि तु स्वसंवेदनमेव ।

आत्मा स्वदेहपरिमाणएव । द्रव्यमनसो बन्धरूपत्वान्मोक्षदशायां
तदसत्त्वेऽपि भावमनसोऽवस्थानं तेषां सम्मतम् । ज्ञानन्तु स्वपराभासि
आत्मधर्म एव ज्ञानात्मनोरत्यन्तभेदाभेदो स्याद्वादे निराकृतौ । उक्तं च
सर्वदर्शनसमुच्चये हरिभद्रेण[3] - "ज्ञानादिधर्मेभ्यो भिन्नाभिन्नो" तथा
"चैतन्यलक्षणो जीवः" इति च ।

§3§ सांख्यमते मनःस्वरूपम् -

सांख्यमते चित्तापरनामधेयं मनः । प्रधानान्मूलकारणात्
बुद्धिमहत्तत्त्वम् बुद्धेरहंकारः, सात्त्विकादहंकारादुत्पन्नमान्तरमेकादशक-
मिन्द्रियमेव मनः । सांख्यसूत्रे "अध्यवसायो बुद्धिरिति"[4] प्रधानान्तःकरणस्य

---

1. तत्त्वार्थवृत्तिः, 1·14, 5·19
2. परीक्षामुखसूत्रम्, 1·8
3. सर्वदर्शनसमुच्चय, पृ·50
4. सांख्यसूत्रम्, 2·18

बुद्धेर्लक्षणम् । "कर्मेन्द्रियबुद्धीन्द्रियैरान्तरमेकादशकं"[1] मिति त्रैविध्यमिन्द्रि-याणां दर्शितम् । तत्र च "उभयात्मकं मनः"[2] अनेन सूत्रेण मनसः कर्मेन्द्रिय-ज्ञानेन्द्रियोभयात्मकत्वं प्रोक्तं तस्य हि उभयेन्द्रियप्रवृत्त्यधिष्ठानादुक्तम् । तत्र हि बुद्धेरहंकारस्य मनसश्च त्रयाणामेवान्तःकरणत्वमाम्नातम् । "त्रयाणां स्वालक्षण्यम्"[3] इत्यादिषु । त्रिषु च बुद्धेः प्राधान्यम्[4] सुखदुःखादीनां धर्माधर्मादीनां च बुद्धिधर्मत्वमेव[5] न तु आत्मधर्मत्वम् ।

"न व्यापकत्वं मनसः करणत्वात्"[6] अनेन सूत्रेण यथा बुद्धेः प्रकृति-जन्यत्वात् परिच्छिन्नत्वमनित्यत्वं च तथैव मनसोऽपि इति प्रतिपादितम् । चक्षुरादिव्यापारेषु यथा मनसः प्राधान्यं, मनोव्यापारे चाहंकारस्य तथैवाहंकारव्यापारे बुद्धेः प्राधान्यम् ।

इन्द्रियैस्तु चक्षुरादिभिरालोचनं नाम निर्विकल्पवृत्तिविशेषो जायते मनस्तु 'अयं घटः' इत्यर्थाकारं संकल्पं सविकल्पात्मकं करोति, अहंकारस्तु ममेदमनुकूलं प्रतिकूलं वा इति अभिमन्यते, बुद्धिस्तु ममेदं ग्राह्यमिति" निश्चिनोति इति तेषां व्यापारभेदः । इति वाचस्पतिमिश्रमतम् । अनित्यत्वादेव बुद्धेमनसोर्न विभुत्वमणुत्वं वा तयोर्हि प्रधानजन्यत्वाद् परिच्छिन्नत्वमनित्यत्वं च अनित्यत्वाच्च नैवाणुत्वं विभुत्वं वा सम्भाव्यते ।[7]

बुद्धेर्ज्ञानात्मिका "प्रमाण-विपर्यय-विकल्प-निद्रास्मृतयः" पातञ्जलसूत्रोक्ता वृत्तयः साङ्ख्यानामपि सम्मताः ।[8] । बुद्धेः प्राधान्यं साङ्ख्यकारिकायामीश्वरकृष्णेनापि "कृत्स्नं पुरुषार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति"[9]

---

1• साङ्ख्यसूत्रम्, 2•19

2• तत्रैव, 2•26

3• तत्रैव, 2•30

4• तत्रैव, 2•47

5• तत्रैव, 5•25

6• तत्रैव, 5•69

7• साङ्ख्यसूत्रम्, 5•69–71

8• पातञ्जलयोगसूत्रम्, 1•8; साङ्ख्यसूत्रम्, 2•33

9• साङ्ख्यकारिका, 36.

इत्यनेन प्रोक्तम् चैतन्यस्वरूपसंयोगादचेतनापि बुद्धिश्चेतनावतीव प्रतिभाति । यथोक्तम् - "तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्"।[1]

इत्थं मनोबुद्ध्यहंकाराणामन्तःकरणानां जडत्वं परिच्छिन्नत्वमनित्यत्वं च साङ्ख्यानामभिमतम् ।

(4) तार्किकाभिमतं मनःस्वरूपम् -

तार्किकमते मनसोऽणुपरिमाणत्वं युक्तिसिद्धम् । "युगपद्ज्ञानानुत्पत्तिर्मनसो लक्षणम्"[2] मिति गौतमसूत्रानुसारेण चाक्षुषरासनादिज्ञानानामयौगपद्यमेव तेषां मते मनसोऽस्तित्वे परिमाणत्वे प्रमाणम् । यथाह च वात्स्यायनो भाष्ये- "युगपच्च खलु घ्राणादीनां गन्धादीनां च सन्निकर्षेषु सत्सु युगपज्ज्ञानानि नोत्पद्यन्ते, तेनानुमीयते अस्ति तत्तदिन्द्रिय संयोगि सहकारि-निमित्तान्तरमव्यापि यस्यासन्निधेर्नोत्पद्यते ज्ञानं सन्निधेश्चोत्पद्यते । मनःसंयोगानपेक्षस्य हीन्द्रियार्थसन्निकर्षस्य ज्ञानहेतुत्वे युगपदुत्पद्येरन् ज्ञानानीति ।[3] तस्य मनसो व्यापित्वे पुनः युगपज्ज्ञानेन्द्रियसंयोगा ज्ञानयौगपद्यमेव स्याद्" इति तस्याणुत्वं सिध्यति ।[4] एतदेव गौतमीयन्यायसूत्राणि साधयन्ति । यथा ज्ञानायौगपद्यादेव प्रतिशरीरमेकत्वं, नित्यत्वं च "ज्ञानायौगपद्यादेकं मनः"[5] "यथोक्तहेतुत्वाच्चाणु"[6] इत्यादिभिरेतदेव प्रतिपादितम् ।

वैशेषिकदर्शने - "आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावो भावश्च मनसो लिङ्गम्"[7] "प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्चैकम्"[8] "तदभावादणु"[9]

---

1. साङ्ख्यकारिका, 20
2. न्यायसूत्रम्, 1.1.16
3. न्यायसूत्र भाष्य: - 1.1.16
4. न्यायमञ्जरी- जयन्तभट्ट: पृ.68
5. न्यायसूत्रम्, 3.2.57
6. तत्रैव, 3.2.60
7. वैशेषिकसूत्रम् 3.2.1
8. तत्रैव, 3.2.2
9. तत्रैव, 7.1.23

इत्यादीनि वैशेषिकसूत्राणि मनसोऽनुमानसिद्धत्वं प्रतिशरीरमेकत्वमणुत्वं चाहुः।
तत्रैव प्रशस्तपादभाष्ये मनसः सद्भावे प्रमाणं मनसो गुणादिकं च सविस्तारमेवमुक्तम् - "मनस्त्वयोगान्मनः। सत्यप्यात्मेन्द्रियार्थसान्निध्ये ज्ञानसुखादीनामभूतोत्पत्तिदर्शनात् करणान्तरमनुमीयते श्रोत्राद्यव्यापारे स्मृत्युत्पत्तिदर्शनाद्बाह्यैरिन्द्रियैरगृहीतसुखादिग्राह्यान्तरभावाच्चान्तःकरणम्। तस्य गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराः। प्रयत्नज्ञानायौगपद्यवचनादणुपरिमाणम्। अपसर्पणोपसर्पणवचनात् संयोगविभागौ। मूर्तत्वात् परत्वापरत्वे संस्कारश्च (वेगाख्यः) अस्पर्शवत्त्वाद् द्रव्यानारम्भकत्वम्। क्रियावत्त्वात् मूर्तत्वम्। साधारणविग्रहवत्त्वप्रसंगादज्ञत्वम्। करणभावात् पारार्थ्यम्, गुणवत्त्वाद् द्रव्यत्वम्। प्रयत्नादृष्टपरिग्रहवशादाशुसंचारि चेति।[1]

मनस्तु प्रतिशरीरमेकमेव, तथापि प्रत्यात्मनिष्ठत्वादनन्तम्, अर्थात् आत्मनामसंख्येयत्वान्मनसोऽपि असंख्यत्वमिति।[2] सामान्यगुणा एव संख्यापरिमाण-पृथक्त्व-संयोग-विभाग-परत्वापरत्व-संस्कारा मनःसमवेताः।[3] संस्कारस्तु मनसो वेगाख्य एव, भावनाया आत्मसमवेतत्वात्। विशेषगुणाभावाच्च मनसो न भौतिकत्वम् परं बाहिरिन्द्रियाणान्तु भौतिकत्वाद्विशेषगुणवत्त्वम्। बाहिरिन्द्रियाणां चक्षुरादीनां रूपरसादिनियतैकैकविषयग्रहणकरणत्वेऽपि अन्तरिन्द्रियस्य मनसः सुखदुःखाद्यान्तरपदार्थमात्रग्रहे एव करणत्वं रूपादि बाह्यपदार्थसाक्षात्कारे तु मनसः कारणत्वमात्रं न तु करणत्वमिति।[4]

(७) मीमांसकानां मतम् -

मीमांसकेषु प्राभाकरमीमांसका भाट्टमीमांसकाश्चेति मतद्वयम्। तत्र प्राभाकरमीमांसका तार्किकमतवदेव मनसोऽणुपरिमाणत्वमितिरिक्तद्रव्यत्वमन्तरिन्द्रियत्वं चाङ्गीकुर्वन्ति। यथोक्तं शालिकानाथेन प्रकरण

---

1. न्यायकन्दली, प्रशस्तपादभाष्यम् - श्रीधर, पृ.226
2. सप्तपदार्थी, पृ.19
3. तत्रैव, 1.1.15
4. न्यायमंजरी, पृ.67

पञ्चिकायाम्[1] - "मनसोऽभ्युपगमे च सकलात्मगुणोदय एव प्रमाणम् । बुद्धिसुखदुःखेच्छाप्रयत्नादृष्टसंस्काराणां नवानामपि वैशेषिकगुणानां मनःसंयोगे नैवोत्पत्ते"रिति । "सुखदुःखेच्छादेषप्रयत्नास्तु मानसप्रत्यक्षवेद्या"[2] इति च । "मनश्चान्तः शरीरं परमाणुपरिमाणम्, तत् खलु द्रव्यभूतं संयोगगुणभागित्येष्यते"[3] इत्यादिना प्राभाकरा अपि तार्किकवदेव मनसोऽणुपरिमाणत्वं स्वीकुर्वन्ति । प्राभाकरविजयेनन्दीश्वरेणाप्युक्तम्[4] - इदानीं मनः सद्भावोऽणुपरिमाणत्वं च साध्यते । बुद्ध्यादिकं तावत्कार्यम्, तस्यात्मसमवायित्वे असमवायिकारणत्वेन द्रव्यान्तर संयोग एवास्थेयः । तथाहि - बुद्धिकार्यं स्वसमवायिकारणद्रव्यान्तरसंयोगासमवायिकारणकं नित्यद्रव्यगता नित्यविशेषगुणत्वात् पार्थिवपरमाणुगतरूपादिवत् । तत् द्रव्यं मनः शब्दाभिधेयम्, तच्च नित्यमित्यास्थेयम्, इतरथा तस्यापि कारणकल्पनाप्रसंगात् नित्यं च द्रव्यमणुरूपं विभुरूपं वा भवति । तस्य च विभुत्वमयुक्तं संयोगाभावप्रसंगात् ।

कुमारिलभट्टानुगामिनश्च पूर्वमीमांसकाः[5] -

"मनसस्त्विन्द्रियत्वेन प्रत्यक्षाधीः सुखादिषु ।
मनसा संप्रयुक्तो हि तानात्मा प्रतिपद्यते ।।"

इत्यादिश्लोकवार्तिकानुसारेण सुखादिसाक्षात्कारकरणत्वेन मनसोऽन्तरिन्द्रियत्वं स्वीकुर्वन्त्येव अपितु विभुपरिमाणमस्पन्दं च मनः नाणुपरिमाणं चञ्चलं वा । ज्ञानस्यात्मविशेषगुणत्व भाट्टानामप्यभिमतम् । यथोक्तं श्लोकवार्तिके[6] - "विक्रिया ज्ञानरूपाऽस्य न नित्यत्वे विरोत्स्यते" इति । तार्किकाणामिव नैव ज्ञानस्य मानसप्रत्यक्षगम्यत्वमभिमतं तेषाम् ।

---

1. प्रकरणपञ्चिका - पृ॰330
2. प्रकरणपञ्चिका, पृ॰170
3. तत्रैव, पृ॰332
4. प्राभाकरविजयः, पृ॰30
5. श्लोकवार्तिक, 4·83
6. तत्रैव, 4·53

"बुद्धिव्यतिरिक्तं सुखादिपञ्चकं मानसप्रत्यक्षगम्यं, बुद्धिः पुनरर्थप्रकाशापर-नामधेयप्राकट्यान्यथानुपपत्तिप्रसूतार्थापत्तिगम्या" इत्युक्तं मानमेयोदये ।[1]

न च विभुत्वे मनसो दिगाकाशाद्यन्यतमत्वमेव स्यात्, किं द्रव्यान्तरत्वकल्पनेनेति वाच्यं, भट्टमते दिगाकाशादीनामपि प्रत्यक्षत्वाद् तदवगमे च मनसः करणभूतत्वात् तद्व्यतिरेकसिद्धिकरणत्वादेव च कर्तृरूपात्म-वैलक्षण्यसिद्धिरपि । इति ।

§6§ पतञ्जलयोगाभिमतं मनः-स्वरूपम् -

पतञ्जलिमतानुयायिभिर्योगाचार्यवर्यैः साङ्ख्यवद् बुद्धिमनसोः स्वरूपं निरूप्यते । "साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः" इत्युक्त्या साङ्ख्ययोगयोः प्रायशः एकमत्यमेव । परं योगे चित्तस्य §बुद्धेः§ विभुत्वमङ्गीकृतम् । गगनादिविषयग्राहित्वं चित्तस्य गगनादिवद् व्यापित्वं विना न सम्भवतीति विभुत्वं तस्य युक्तम् । योगभाष्ये व्यासेन यथोक्तम्-[2] "वृत्तिरेवास्य विभुनः संकोचविकाशिनीत्याचार्यः तच्च धर्मादिनिमित्ता-पेक्षमिति"।

विज्ञानभिक्षुणा च यथोक्तम्-[3] "धर्माधर्मवासनाश्रयतया प्रतिपुरुषमन्तःकरणं नित्यम्" तच्च नाणुः सम्भवति, योगिनां सर्वावच्छेदेन एकदा अखिल-साक्षात्कार सम्भवात्)नाप्यन्तःकरणं मध्यपरिमाणं सम्भवति, प्रलये विनाशेनादृष्टाधारताऽनुपपत्तेः । अतः परिशेषात्ऽन्तःकरणं विभुरेव सिध्यतीति ।"

पातञ्जलमते अन्तःकरणस्य बुद्धेः साङ्ख्यमतवदेव त्रिगुणात्मकत्वं तस्माच्च वृत्तिरूपेण परिणामित्वं ज्ञातृत्वादिकं च । एकादशेन्द्रियान्तर्गतं

---

1. मानमेयोदयः - पृ.248
2. योगसूत्रभाष्य, 4.10
3. योगसारः, पृ.4

मनोऽपि इन्द्रियैरालोचनानन्तरमयं घट: इत्याद्याकारं संकल्पनं करोति, बुद्धिस्तु हेयमुपादेयं वेति निश्चिनोतीति वाचस्पतिमतम् । विज्ञान भिक्षु मते इन्द्रियेणैव सविकल्पग्रहणमपि भवति, तदनन्तरं मनसा गुणदोषविचारणा, बुद्ध्या ह्यध्यवसायो निश्चयात्मिका । इति ।

§7§ तन्त्रमतं शैवमतं च -

जडाविक्तप्रधाना आत्मस्वरूपभूता चला चितिरेव मनो भवति । स्फुर्त्या आवरणनाश एव चितेश्चलनम् । एतादृशमनोरूपत्वमेवात्मनो जडाद् विशेष: । त्रिपुररहस्ये यथा -

"चिदात्मा केवल: स्वच्छ: स्वाच्छन्द्यान्मनआदिकम् ।
परिकल्प्य व्यवहरेत् दृश्यद्रष्ट्रादि भेदत: ।।"[1]

पुनश्च -

"तस्माद्राम । मनो नान्यदात्मैव मन उच्यते ।
चला चितिर्मनो नाम्नी निश्चलात्मस्वरूपिणी ।।
... आवृत्यभिहति: स्फुर्त्या चलनं राम वेत्ति: ।
आत्मनो हि मन: प्रोक्तं करणं ज्ञानकर्मणि ।
मनो यद्यात्मनो न स्याद्विशिष्यते जडात् कथम् ।।
इत्यादिना मनसो ज्ञानकरणत्वं स्वीकृतम् ।

चिदात्मस्वरूपस्य मनस: प्रकाशविमर्शरूपोऽवस्थाद्वयभेदश्चोक्त:[2]-

मनसस्तु द्विधावस्था प्रकाशामर्शभेदत: ।
बहिरर्थेषु विश्रान्तिर्या प्रकाश: स उच्यते ।
यस्तद्विचार: स्वस्मिन् वै स विमर्श उदाहृत: ।।
प्रकाशो निर्विकल्प: स्याद्वस्तूनामविभेदत: ।
विमर्श: शब्दसम्भेदादि भेदात् सविकल्पक: ।।"

एवं सविकल्पकनिर्विकल्पकभेदेन मनसो ज्ञानद्वैविध्यमेव उक्तम् । तथा

---

1• त्रिपुररहस्यतन्त्रम्, 18•70, 117•47

2• तत्रैव, 16•64-66

वेद्यविनिर्मुक्तं मन एव शुद्धात्मतत्त्वमिति बोध्यम् । उक्तं च[1] -

"तन्मनो वेद्यनिर्मुक्तं वित्तिरित्यभिधीयते" ।

काश्मीरीयशैवदर्शनेऽपि प्रायश एवमेव मनः स्वरूपमुक्तम् ।

(8) <u>रामानुजमतम् -</u>

रामानुजीयवेदान्तिनः "एकमेवान्तःकरणं मनः, तच्चान्तरिन्द्रियं साङ्ख्यमतवदेव सात्त्विकाहङ्कारोपादानकं परिच्छिन्नं च"[2] इत्यामनन्ति । परं साङ्ख्यनये उभयेन्द्रियमित्युक्तं रामानुजेन च मनः ज्ञानेन्द्रियमेवोक्तम् । ज्ञानद्वारैव कर्महेतुत्वान्न कर्मेन्द्रियम् । उक्तं च[3] - "स्मृत्यादिकरणमिन्द्रियं मनः । तच्च हृदयदेशवृत्तिभेदाद् बुद्ध्यहङ्कारचित्तादिशब्दवाच्यं बन्धमोक्षहेतुभूतं च ।" एकस्यैव मनसो वृत्तिभेदाद् बुद्धिचित्तादिव्यपदेशभेदः । यथा श्रीभाष्ये[4] - "अध्यवसायाभिमानचिन्तावृत्तिभेदान्मन एव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यते ।" रामानुजमते स्वप्रकाशज्ञानस्वरूपः ज्ञानगुणाश्रयश्चात्मा । तस्याणुत्वेऽपि धर्मभूतज्ञानस्य व्याप्तिसम्भवात् नैव सर्वशरीरव्यापिस्पर्शाद्युपलब्ध्यनुपपत्तिः । आत्मधर्मभूतज्ञानं तु सविकारद्रव्यमिति तस्यैवावस्थाभेदा इच्छा सुख-दुःखादिविकाराः स्मृति-संशयविपर्ययादिविकाराश्च सम्भवन्ति । तथा चाहुः[5] -

"इच्छाद्वेषप्रयत्नादिशब्दैर्धीरभिधीयते ।
अर्थभेदानुविद्धास्ते धीविशेषाः प्रकीर्तिताः ॥"

(9) <u>मनः-स्वरूपविषये अद्वैतवेदान्तमतम् -</u>

अन्तःकरणमेव सुखदुःखमोक्षादिसर्वव्यवहारकारणं यच्च वृत्तिभेदेन मनोबुद्धि-अहंकार-चित्तव्यपदेशभाग् भवति । व्यवहारमात्रस्यैवान्तःकरणवृत्ति-

---

1. त्रिपुररहस्यतन्त्रम्, 18.4
2. ब्रह्मसूत्ररामानुजभाष्य, 4.2.3
3. यतीन्द्रमतदीपिका, पृ.37
4. ब्रह्मसूत्ररामानुजभाष्य, 2.4.8
5. यतीन्द्रमतदीपिकाटीका - श्रीनिवास, पृ.98.

विशेषजन्मत्वात्" इत्यद्वैतवेदान्तिनां मतम् । तच्चान्तःकरणमहमित्याकारेण साक्षिप्रत्यक्षसिद्धम् ज्ञानेच्छाश्रयत्वात् अन्तःकरणवृत्तिभेदे अद्वैतवेदान्तिनः श्रुतिमनुप्रमाणयन्ति - यथा[1] - "कामः संकल्पो विचिकित्सा ह्रीर्धीर्भीरित्येतत् सर्वं मन एव"। अत्रधीरित्यनेन ज्ञानाख्या बुद्धिवृत्तिरुक्ता । "दृश्यते त्वग्र्यया बुद्ध्या"[2] "मनसैवेदमाप्तव्य"[3] - मित्यादिषु श्रुतिषु बुद्धेरेव मनःशब्देन व्यपदेशान्न तत्त्वभेदः । अपि तु अध्यवसायाभिमानस्मरणसंकल्परूपवृत्तिभेदादेकस्यैवान्तःकरणस्य बुद्ध्यहंकारचित्तमनोरूप व्यपदेशः ।

"तन्मनो कुरुत्"[4] "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च"[5] इत्यादिश्रुतिवचनैर्मनसो नित्यत्वं परिच्छिन्नत्वं च सिद्धम् । "अन्तराविज्ञानमयो क्रमेण तल्लिङ्गादिति चेन्नाविशेषा[6] इत्यत्रापि बुद्धिमनसोः भौतिकत्वमाह । तथा हि सूक्ष्मेभ्यो पंचीकृतपंचभूत सात्त्विकांशेभ्यो मिलितेभ्यः सत्त्वप्रधानमन्तःकरणं जायते इति वेदान्त मतम् । ज्ञानेन्द्रियैः सहितः सन्मनो मनोमयकोशोभवति । ज्ञानकरणत्वान्मनस्त्विन्द्रियमेव । तथैवोक्तं भारतीतीर्थेन - "श्रेयान्येकादशाक्षाणि तत्तत्कार्यानुसारतः" । ब्रह्मसूत्रे च यथा[7] -

"त इन्द्रयाणि तद्व्यपदेशादन्यत्रश्रेष्ठात्" इति सूत्रभाष्ये च मनः इन्द्रियत्वेन स्वीकृतम्[8]- "स्मृतौ त्वेकादशेन्द्रियाणीति मनोऽपीन्द्रियत्वेन श्रोत्रादिवत् संगृह्यते" इत्यादिना । एवमेव भामतीकारोऽपि मनस इन्द्रियत्वेनाङ्गीकरोति । विवरणाद्वैतब्रह्मसिद्धिवेदान्तपरिभाषाकारादिमते तु करणत्वेऽपि मनसो नेन्द्रियत्वम्, इन्द्रियत्वे अतीन्द्रियत्वाद-प्रत्यक्षत्वापत्तेः।

---

1. बृहदारण्यकोपनिषद्, 1.5.3
2. कठोपनिषद्, 1.3.12
3. तत्रैव, 2.1.11
4. बृहदारण्यकोपनिषद्, 1.2.1
5. मुण्डकोपनिषद्, 2.1.3
6. बृहदारण्यकोपनिषद्, 2.3.15
7. ब्रह्मसूत्रम् 2.4.17
8. ब्रह्मसूत्रशाबरभाष्य, 2.4.17

एवं मनस इन्द्रियत्वानिन्द्रियत्वस्वीकृतावपि तस्यान्तःकरणत्वं सर्वैरेवाद्वैतिभिः स्वीकृतम् । यथोक्तं पञ्चदश्याम्[1] -

मनो दशेन्द्रियाध्यक्षं हृत्पद्मगोलके स्थितम् ।
तच्चान्तःकरणं बाह्येष्वस्वातन्त्र्याद् विनेन्द्रियैः ।।
अक्षेष्वर्पितेष्वेतद् गुणदोषविचारकम् ।
सत्त्वं रजस्तमश्चास्य गुणा विक्रियते हि तैः ।।

तस्य च बहिरिन्द्रियप्रणाल्या विषयसम्बन्धाद्विषयाकारः परिणामो जायते । सत्त्वप्रधानत्वेन स्वच्छत्वाद् विषयाकारग्राहित्वमुपपद्यते । स एव परिणामो वृत्तिरुच्यते । यथोक्तं मधुसूदनेन[2] -

"गृह्णाति विषयाकारं मनो विषययोगतः ।
इति वेदान्तिभिः साङ्ख्यैरपि सम्यक् निरूपितम् ।।"

मनसोऽन्तःकरणत्वस्वीकरणे वेदान्तभाष्यकारस्य शंकरस्य मतं निभालनीयम्- यथा-[3] तच्चात्मन उपाधिभूतमन्तःकरणं मनो बुद्धिर्विज्ञानं चित्तमिति चानेकधा तत्र तत्राभिलप्यते । क्वचिच्च वृत्तिविभागेन संशयादिवृत्तिकं मन इत्युच्यते, निश्चयादिवृत्तिकं च बुद्धिरिति । तच्चैवम्भूतमन्तःकरणमवश्यमस्तीत्यभ्युपगन्तव्यम् । अन्यथा ह्यनभ्युपगम्यमाने तस्मिन् नित्योपलब्ध्यनुपलब्धिप्रसंगः स्यात् । आत्मेन्द्रियविषयाणामुपलब्धिसाधनानां सन्निधाने सति नित्यमेवोपलब्धिः प्रसज्येत् । अथ सत्यपि हेतुसमवधाने फलाभावस्ततोऽपि नित्यमेवानुपलब्धिः प्रसज्येत् । न चैवं दृश्यते । ··· तस्मात् यस्यावधानानवधानाभ्यामुपलब्ध्यनुपलब्धी भवतस्तन्मनः । तथा च श्रुतिः- अन्यत्र मना अभूवं नाश्रौषमिति, मनसा ह्येव पश्यति मनसा श्रृणोतीति च ।"

इत्थं प्राचीन भारतीय दार्शनिकाः सर्व एव स्पष्टतया निःशेषेन च मनः-स्वरूपनिरूपणे यत्नं कृतवन्तः । यद्यपि आधुनिके पाश्चात्ये मनोविज्ञाने मनसः स्वरूपनिरूपणे तादृशो यत्नः न कृतः, मनोव्यापाराणां व्यवहाराभिधेयानामेव

---

1. पञ्चदशी, 2·12-13
2. भक्तिरसायनम् 1·20
3. ब्रह्मसूत्रशाबरभाष्य, 2·3·32

तेषां मते मनोविज्ञानाख्यशास्त्रविषयत्वात्, अतीन्द्रियाणां दुर्ज्ञेयानां वा मनः-स्वरूपधर्माणां तेषां मते दर्शनशास्त्रविषयत्वात् तथापि फ्रायडप्रभृतीनामाधुनिकमनोवैज्ञानिकानामवचेतनाचेतनमन्तःस्तराणां स्वीकरणेनातीन्द्रियदुर्ज्ञेयमनःस्वरूपधर्माणामेवाङ्गीकाराद् भारतीयानां मनःस्वरूपनिरूपणे तादृशो महान् प्रयत्नः समर्थित एव । आत्मस्वरूपसाक्षात्कारस्यैव प्रायशो भारतीयदार्शनिकानां मते निःश्रेयसहेतुत्वात् मनोबुद्धिचित्ताद्यपरपर्यायस्य हृदयस्यैवान्तःकरणस्य शुद्धस्यात्मसाक्षात्काराधिष्ठानत्वादात्मसाक्षात्कारकरणत्वाच्च मनसः स्वरूपादिकं सविशेषमेवज्ञातव्यम् ।

(ख) मुक्तिः -

"दुर्लभं त्रयमेवैतत् दैवानुग्रहहेतुकम् ।
मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः ।।"

विद्वद्भिरुक्तमनुमोदितं च पद्यमिदं मुक्तेर्दुर्लभ्यत्वद्योतकम् । सुखेहा दुःखजिहासा च मानवमात्रस्य स्वभावः । परं विविधविषयरतो मानवो नैवं तथामुष्मिकेषु साधनेषु प्रयतते यथैहिकेषु । केचन एव धीरपदवाच्या श्रुत्युक्तैहिकमुपेक्ष्यामुष्मिकमनुचिन्तयन्ति । भारतीयदर्शनेषु नश्वरता दुःखहेतुत्वेनाङ्गीकृता । संसारोऽयमागमनप्रत्यागमनजन्ममरणादीनां केन्द्रत्वेनाम्नातम् । एतस्मादविद्याप्रपञ्चान्निवृत्तिरेव मोक्षो मुक्तिर्वा । वेद-पुराणेतिहासदर्शनेषु च परमपुरूषार्थ एव मोक्षो मन्यते । सर्वेष्वेव दर्शनशास्त्रेषु यद्यपि स्व-स्वज्ञानमीमांसानुसारं मोक्षः कल्पितस्तथापि दुःखाज्ञानमरणादिभ्यो मुक्तिर्हि मोक्षस्थितिरिति तु समेषां प्रेक्षावतां मतमस्ति । इयं हि मोक्षस्थितिरपि द्विधा कल्पिता । एकस्यामस्मिन्नेव जीवकाले अज्ञानमृत्युदुःखेभ्यो विनिर्मुक्तो जीवो 'जीवन्मुक्त' इति कथ्यते, अपरस्यां च सुखदुःखादीनामात्यन्तिकाभावे आगमनप्रत्यागमनाभ्यां विनिर्मुक्तो जीवो विदेहमुक्तिरवस्थामाप्नोति । इयमेव मोक्षावस्था सर्वैरीहिते स्वीक्रियते च ।

मुक्तेः मोक्षस्य वा स्वरूपम् -

(1) वैदिकसाहित्ये मोक्षस्वरूपम् -

कैवल्य-स्वात्मबोध-स्वरूपावाप्तिरित्यादिपदप्राप्तं मोक्षस्वरूपं वैदिक-

साहित्ये सम्यगुपलभ्यते । यद्यपि कीथप्रभृत्य: पाश्चात्यालोचका: प्रतिपादयन्ति यद्वेदेषु नैव मोक्षस्य मुक्तेर्वा स्पष्टोल्लेख:, ऐश्वर्यपरिपूर्ण-दीर्घकालिकं जीवनयापनं, यज्ञयागात्स्वर्गोपभोग एव तदानीं मानवध्येयमासीत्, तत्र यज्ञादीनां प्राधान्यत्वात् परं नैव तेषां मतमिदं समीचीनं प्रतिभाति, मोक्षस्य स्पष्टोल्लेखदर्शनात् । ऋग्वेदे यथा[1] -

"त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ।।"

यजुर्वेदे अपि[2] - "बन्धनादितो मुक्षीयमामुत" इत्यादिषु मुक्ते: प्रार्थना स्पष्टोल्लेखदर्शनात्।तथा चाज्ञानान्धकार मुक्तियाचनाऽन्यत्रापि[3] -

"अपध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान्"

इत्यादिषु अज्ञानपाशबन्धनान्मुक्तेरीहाऽस्ति ।

एवमेव[4] -

"उद्वयं तमस्परि ज्योति स्व: पश्यन्त उत्तरम् ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ।।"

तथा च[5] -

"यो न: पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा।
यो देवानां नामधा एक एव तं संप्रश्नं भुवना यन्त्यन्या ।।"

इत्यादिषु ऋचासु परमात्मनोऽवाप्ति: कामना मोक्षावस्थां द्योतयति। अविद्या खलु दु:खमूला भवबन्धहेतुश्च । तन्नाशाज्ज्ञानाप्तिरवस्थायामज्ञान-निवृत्ति: भवबन्धोच्छेदश्च सम्भाव्यते । यजुर्वेदे ज्ञानसायुज्येन मुक्ते: स्वरूपं यथा[6] -

---

1. ऋग्वेद:, 7.59.12
2. यजुर्वेद:, 3.60
3. ऋग्वेद:, 10.13.11
4. तत्रैव, 1.50.10
5. तत्रैव, 10.82.3
6. यजुर्वेद:, 32.11

"परीत्य भूतानि परीत्यलोकान् परीत्य सर्वाः प्रदिशो दिशश्च ।
उपस्थाय प्रथमजामृतस्यात्मनाऽऽत्मानमभि सं विवेश ।। "

एवमेव "तमेवविद्वान्विभाव मृत्यो, आत्मानं धीरमजिरं युवानम्" इत्यादिष्वाथर्वऋचासु चात्मज्ञानं परमानन्दस्वरूपतां ब्रह्मरूपतां च नयति इति प्रतिपादितम् । अनेन वेदेषु तत्र तत्र मुक्तेः स्वरूपस्य स्पष्टोल्लेखत्वान्नेव कीथादीनां मतं समीचीनं प्रतिभाति ।

§2§ ब्राह्मणग्रन्थेषु मुक्तिः -

ब्राह्मणसाहित्येऽपि मोक्षस्यात्मज्ञानस्य वा विवेचनं विशदरूपेणप्राप्यते । ब्राह्मणग्रन्था निखिला एवाध्यात्मोन्मुखा दृश्यन्ते यत्र विविधोपाख्यानैरात्मज्ञानं विविच्यते । आत्मज्ञानं, ब्रह्मज्ञानमथवा आत्मस्वरूपाववोधः प्रायशः सर्वत्रैव वर्णितं दृश्यते । यथा ऐतरेयब्राह्मणे[1] -"वयः सुपर्णा उपसेदुरिन्द्रमित्युत्तमया परिदधाति इति । प्रियमेधा ऋषयो नाम्धानः इति । ध्वान्तमूर्णुहीति येन तमसा प्रवृत्तो मन्येत तन्मसा गच्छेदय देवास्मात्तल्लुप्यते इति····मुमुग्ध्यस्मान्निधयेव बद्धानिति पाशा वै निधा मुमुग्ध्यस्मान्पाशादिव बद्धानित्येव तदाह ।"

शुक्लयजुर्वेदस्यशतपथब्राह्मणेनतत्रकर्मप्रसंगे आत्मतत्त्वं निरूपितम्[2] । अग्निरहस्यके दशमकाण्डेऽग्नि "आत्मा" रूपेणोपासितः । यथा -"स आत्मानमुपासीत । मनोमयम्प्राणशरीरम्भारूपमाकाशात्मानङ्कमरूपिणम्मनो जवसं सत्यसंकल्प सत्यधृतिं सर्वगन्धं सर्वरसं····इति ह स्माह शाण्डिल्यः एवमेतदिति। "

एवमेव तैत्तिरीयब्राह्मणे "सावित्रचयन प्रसंगे"[3] "अग्निचयनप्रसंगे"[4] च मोक्षस्य स्वरूपं वर्णितम् । तत्रैव "ब्रह्मजज्ञानं प्रथमपुरस्तात्" इत्यादिभिः ब्रह्मसूक्तऋचाभिः विशदरूपेणब्रह्मस्वरूपनिरूपणमथवा मोक्षावाप्तसाधनपुरस्सरं

---

1· ऐतरेयब्राह्मणः, 12·8
2· शतपथब्राह्मणः, 10·5·3
3· तैत्तिरीयब्राह्मणः, 3·10·9
4· तत्रैव, 3·11·8, 46

मोक्षमेव व्याख्यातम् । गोपथब्राह्मणे चारम्भतएव "ब्रह्म ह वा इदमग्र आसीत्... इदमहमविदम्" इत्यादौ ब्रह्मतत्त्वनिरूपणं स्पष्टरूपेणावलोक्यते ।

§3§ आरण्यकेषु मुक्ति: -

आरण्यकेषु विविधोपाख्यानसम्वादादिषु च ब्रह्मस्वरूपमात्मतत्त्व-निरूपणमवलोक्यते । तत्र हि "मधुविद्योपदेश:"[1] "प्रतर्दन-इन्द्र-सम्वाद:"[2] "वृहद्रथोपाख्यानादय:"[3] प्रसिद्धतमा: । "तद्योऽहं सोऽसौ योऽसौ सोऽहम्",[4] "पुरुषे त्वे वाऽविस्तरात्मा स हि प्रज्ञानेन सम्पन्नतमो विज्ञानं वदति... यात्स्येनामृतमीप्सत्येवं सम्पन्न:"[5] इत्यादौ ऐतरेयारण्यकोक्तिषु मुक्तिरेव-विविचिता । मैत्रायणी-आरण्यकोक्तब्रह्मस्वरूपं यथा[6] -

"तपसा प्राप्यते सत्त्वं सत्त्वात् प्राप्यते मन: ।
मनसा प्राप्यते ह्यात्मा यमाप्त्वा न निवर्तते ।।"

अपि च[7] - "ॐ ब्रह्मणोमहिमेत्येवैतदाह यस्तु युक्तोऽजस्रं चिन्तयति तस्माद्विद्यया देवत्वं देवेभ्यश्चेत्यक्षयपरिमितमनामयं सुखमश्नुते, य एवं विद्वाननेन त्रिकेण ब्रह्मोपास्तेऽथ ये: परिपूर्णोऽभिभूतोऽयं रथिश्च तैर्वैवमुक्तस्त्वात्मन्येव सायुज्यमुपैति ।"

§4§ उपनिषत्साहित्ये-

उपनिषदां तु परमं ध्येय एव ब्रह्मात्मनो: साक्षात्कारस्तत्रात्मस्वरूप विशदविवेचनात् । प्रो· विंटरनिट्जमहोदयेन निखिलोपनिषदिकदर्शनसार

---

1· शांखायायन-आरण्यक:, अध्याय-3
2· तत्रैव, अध्याय-5
3· मैत्रायणीआरण्यक, प्रपाठक-2
4· ऐतरेय आरण्यक, 2·3·1
5· तत्रैव, 2·3·3
6· मैत्रायणी आरण्यक-प्रपाठक-3
7· तत्रैव, प्रपाठक, 4·4

एकस्मिन्नेव वाक्ये निगदितः - यथा[1] - "निखिलं विश्वं ब्रह्मास्ति ब्रह्म च आत्मा" इति । एवमेव डायसनमहाभागोऽपि[2] "आत्मनो ब्रह्मणो वा स्वरूपप्रतिष्ठा औपनिषदिकचिन्तन सारांशः" इति मनुते ।

"आत्मा वा अरे द्रष्टव्यः....।"[3] "एष म आत्मान्तर्हृदये एतद्ब्रह्मैतमितः....।"[4] "ब्रह्मविद् ब्रह्मैव भवति"[5] "न च पुनरावर्तते न च पुनरावर्तते"[6] इत्यादिभिर्बहुत्रोपलब्धप्रसंगैस्तत्र पूर्वोक्तमतानां पुष्टिरपि जायते । भारतीयऋषिभिः पुरुषार्थ-चतुष्टयमङ्गीकृतम् । अर्थकामाभ्यामसंतुष्टा ऋषयो धर्ममनुवर्तन् आत्यन्तिकदुःखनिवृत्त्यै कृतप्रयत्ना आत्मनः साक्षात्कारे स्वाभीष्टमप्राप्नुवन् । आत्मज्ञानानन्तरं न किञ्चिदप्यवशिष्यते नित्यं शाश्वतमिदं तत्त्वं मोक्षत्वाय कल्पितमिति तेषामुद्घोषः । आत्मतत्त्व-जिज्ञासैवौपनिषदिक ऋषीणां परमो ध्येयः[7] -

येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके ।
एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः ।।

पुनश्च "येनाहं नामृतास्यां किमहं तेन कुर्यामि यदेव भगवान्वेदतदेव मे ब्रूहीति....।" इत्यादौ नचिकेतमैत्रेय्योरात्मतत्त्वजिज्ञासा औपनिषद-ऋषीणामात्मतत्त्वजिज्ञासा व्यनक्तिः । तेषां मते ज्ञानमेव मुक्तेरुपायः । 'प्रज्ञानेनेन माप्नुयात्'[8] यथा कठोपनिषदे यमः-

---

1. ए हिस्ट्री आफ इण्डियन लिटरेचर, खण्ड-1, पृ.215
2. आउटलाइनस् आफ इण्डियन फिलासफी, पृ.22
3. बृहदारण्यकोपनिषद्, 2.4
4. छान्दोग्योपनिषद्, 3.14
5. मुण्डकोपनिषद्, 3.2.9
6. छान्दोग्योपनिषद्, 8.15
7. कठोपनिषद्, 1.1.20
8. तत्रैव, 2.3.14

"यस्तु विज्ञानवान् भवति समनस्कः सदाशुचिः ।
स तु तत् पदमाप्नोति यस्माद् भूयो न जायते ।।"
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ।

एतदतिरिक्तं 'याज्ञवल्क्य-गार्गीसम्वादः, याज्ञवल्क्योपदेशश्च, भृगुवरुणसम्वादः' इत्यादयः सम्वादा उपनिषदामात्मतत्त्वनिरूपणं ज्ञापयन्ति ।

§5§ जैनदर्शने मुक्तेः-स्वरूपम् -

"सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्ते स बन्धः"[1] अनेन कर्मणा बद्धो जीव इति ज्ञायते बन्धापेक्षयामुक्तिरापेक्षवृत्तत्वात् आत्मा एव बन्धमोक्षयोरधिकारी । मुक्तेः पूर्वं च बन्धज्ञानमपेक्षितम् - यथोक्तम्[2] -

"मुक्तश्चेद् प्राग्भवेद् बन्धो नो बन्धो मोचनं कथम्
अबन्धे मोचनं नैव मुञ्चेरर्थो निरर्थकः ।।"

आर्हतदर्शने बन्ध एव भवदुःखहेतुत्वेनोक्तम् बन्धवशाज्जीवो जन्ममरणादि-दुःखपरम्परामनुभवति कर्माधीनत्वादनादिकालाद् बन्धनाभिभूतो नानाक्रिया-संसक्तोऽस्ति । कर्मप्रवाहनिमित्त्वादास्रवो व्यपदिश्यते । यथा[3] -

"सरसः सलिलावाहि द्वारमत्र जनैर्यथा ।
तदास्रवण हेतुत्वादास्रवो व्यवदिश्यते ।।"

आस्रवो द्रव्यास्रव-भावास्रवभेदेन द्विविधः । आस्रवोच्छेदएव जीवन्मुक्ता-ऽवस्था निगद्यते । यथा[4] -

रक्तो बध्नाति कर्माणि विमुक्तश्च विमुच्यते ।
एषो बन्धः समासो वै जीवानां नियतं विदुः ।।

मिथ्यात्वाविरतिप्रमादकषायाविकारा औदयिकपदवाच्या

---

1. तत्त्वार्थसूत्रम् 8.2-3
2. द्रव्यसंग्रहवृत्तिः, पृ. 101
3. तत्त्वार्थसारः, 4.3
4. समयसारः, पृ. 130

आत्मनश्चारित्रगुणविघातका भवन्ति ।

"जीवकर्मोभयोर्बन्धः स्यान्मिथः साभिलाषुकः ।

जीवकर्मनिबद्धो हि जीवबद्धं हि कर्म तत् ।।"[1]

आस्रवोभवहेतुः संवरश्चमोक्षकारणमिति । यथोक्तम् -[2]

"आस्रवो भवहेतुः स्यात् संवरो मोक्षकारणम्"

"आस्रव-निरोधः सम्वरः"[3] इति तत्त्वार्थसूत्रेऽप्युक्तम् । "गुप्तिः समितयोधर्माः परिषहजयस्तथा, अनुप्रेक्षाश्च चारित्रं सन्ति संवर हेतवः"[4] एवं गुप्तिसमित्यादिरक्षितो जीवोऽर्जितकर्माणि तपजपादिना सततं जीर्णतां नयति । अवस्थेयं "निर्जरा" इत्यार्हतैरभिधीयते । संवर-निर्जरा च आत्माशुद्धिकरणत्वात् जीवं संस्कुर्वतः अर्थात् 'अनयोः जीवात्मा शुद्धतामवाप्नोति'। यथोक्तम् -[5]

"भूत्यादर्श इवात्माऽयं तथा स्वच्छत्वमृच्छति" ।

"सम्यग्दर्शन-ज्ञान-चरित्राणि-मोक्षमार्गः"[6] अतः "मार्गो मोक्षस्य वै सम्यग्दर्शनादि त्र्यात्मकः"[7] । तत्त्वमोक्षस्वरूपं यथा -

"अभावाद् बन्धहेतूनां बन्धं निर्जरया तथा ।

कृत्स्नकर्मप्रमोक्षो हि मोक्ष इत्यभिधीयते ।।"

मुक्तिरियं च द्रव्यमुक्तिः भावमुक्तिभेदेन जिनैर्द्विधा उक्ता-द्रव्यमुक्तिर्यथा-[8]

"कृत्स्नेभ्यः कर्मजातेभ्यो विश्लेषे यश्चिदात्मनः ।

परमसद्ध्यानयोगेन द्रव्यमोक्षो स कथ्यते ।।"

परमोत्कृष्टध्यानयोगसक्तस्य सर्वकर्मविनिर्मुक्तात्मनः अवस्था द्रव्यमुक्तिर्भवतीति भावः ।

---

1. पञ्चाध्यायी, 2·204
2. सर्वदर्शनसंग्रहः, पृ·31
3. तत्त्वार्थसूत्रम्, 9·10
4. तत्त्वार्थसारः, 6·3
5. नेमिनिर्वाणम्, 15·74
6. तत्त्वार्थसूत्रम्, 1·1
7. तत्त्वार्थसारः, 8·2
8. वर्धमानपुराणम्, 16·73

भावमुक्तिश्च यथा तत्रैव[1] -

"सर्वेषां कर्मणां योऽत्र क्षयहेतुः शिवार्थिनः ।
परिणामोऽतिशुद्धः स भावमोक्षो जिनैर्मतः ।।"

मुक्तावस्थायां कर्ममलविहीन आत्मा सर्वदुःखक्षयात् सुखमनुभवति । अवस्थेयं च सिद्धिविनिश्चयकारिकायां[2] यथा -

"आत्मलाभं विदुर्मोक्षं जीवस्यान्तर्मलक्षयात् ।
नाऽभावं नाप्यचैतन्यं न चैतन्यमनर्थकम् ।।"

सर्वदर्शनसंग्रहेऽपि यथा[3] -

"गत्वा गत्वा निवर्तन्ते चन्द्रसूर्यादयो ग्रहाः ।
अद्यापि न निवर्तन्ते त्वलोकाकाशमागताः ।।" इति दिक् ।

§6§ बौद्धानां निर्वाणम् -

"वानतो निक्खन्तं ति निब्बानं" "वानो हि तृष्णा" अनेन "निर्गता तृष्णा इति निर्वाणम्" तृष्णानिर्गतस्य निर्वाणमस्तीति वा स्थविराणां मतम् । चित्तधर्मरूपातृष्णा षड्धा,-रूप-शब्द-गन्ध-रस-स्पर्श-धर्मतृष्णाः रूपेण, तन्निरोधाद् भवदुःखाभावम् । रागद्वेषादयस्तृष्णा हेतवः तृष्णाक्षयात्त्वादेतेषामपि क्षयं जायते । शीलं हि निर्वाणोपायमिति बुद्धाः । निर्वाणार्थं शीलमेवोत्तमो मार्गोऽस्ति । शीलप्रतिष्ठितो यतिः श्रद्धा-वीर्य-स्मृति-समाधि-प्रज्ञेन्द्रियरूप पञ्चेन्द्रियाणि भावयति । एतेषां महत्त्वं यथा[4] -

"श्रद्धयातरत्योघमप्रमादेनार्णवम् वीर्येण दुःखमत्येति"

प्रज्ञयापरिशुद्धयति, स्मृतिश्च सर्वार्थिका समाधिसमाहितो भिक्षुर्यथाभूतं विजानाति" पञ्चेन्द्रिय भाविताः पञ्चबला भवन्ति । विवेकवीर्य-स्मृति-समाधि-प्रज्ञाबलैश्चित्तमनास्त्रवत्वमाप्नोति । तदा भिक्षुः सप्तबोध्यङ्गाभ्यासेन ज्ञानं लभते निर्वाणाभिमुखमष्टांगिक-मार्गं चानुवर्तते ।

---

1. वर्धमानपुराणम्, 16.72
2. सिद्धिविनिश्चयकारिका, 7.19
3. सर्वदर्शनसंग्रहः, पृ.81
4. मिलिन्दप्रश्न, 2.16

सम्यग्दृष्टि:-सम्यक्संकल्प-सम्यक् वाक्-सम्यक् कर्म-सम्यक्-आजीव-सम्यक् प्रयत्न-सम्यक्स्मृति: - सम्यक्समाधिश्चेत्यष्टांगिको मार्ग: । अनेनानुवर्तनेन तृष्णा निरस्यते । स्कन्धानां चात्यन्तिकाभावाज्जीवो निर्वाणमधिगच्छति । तदवस्थायां जीवस्य लोप एव जायते नैव स पुनरावर्तते । यथोक्तं सौदरनन्दमहाकाव्ये[1] -

"दीपो यथा निर्वृत्तिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम्

दिशं न काञ्चिद् विदिशं न काञ्चित् स्नेहक्षयात्केवलं याति शान्तिं

तथा कृती निर्वृतिमभ्युतो नैवावनिं गच्छति नान्तरिक्षम्

दिशं न काञ्चिद् विदिशं न काञ्चित् क्लेशक्षयात् केवलमेति शान्तिम्।।

एवं बौद्धानां निर्वाणं नूनमेवकष्टसाध्यं तथापि सिद्धान्तस्यास्याष्टांगिको-मार्गोऽद्यापि बौद्धैरनुक्रियते ।

सौत्रान्तिकबौद्धा: - "यत् खल्वस्य दु:खस्याशेषप्रमाणं प्रतिनिसर्गो व्यन्तिभाव: क्षयो विरागो निरोधो व्युपशमोऽस्तंगम:, अन्यस्य च दु:खस्या-प्रतिसन्धिरनुत्पादो प्रादुर्भाव: । ... तत्...तृष्णाक्षयो विरागो निरोधो निर्वाणम्"[2] इति स्वीकुर्वन्ति ।

पद्मनाभमिश्रविरचितपदार्थधर्मसंग्रहसेतौ विभिन्नमतानुयायिनां बौद्धानां निर्वाणस्वरूपमित्थं कथितम्-यथा-[3]

"निर्विषयां चित्तसन्ततिं सौत्रान्तिकामुक्तिमाहु:"

"क्लेशशून्याचित्तसन्ततिर्मुक्तिरिति वैभाषिका:" ।

"चित्तवृत्तिनिरोधो मुक्तिरिति योगाचार:" ।

माध्यमिका शून्यवादिन: वा बौद्धा "सर्वशून्यम्" इत्युद्घोषयन् शून्यमात्र-तत्त्वं स्वीकुर्वन्ति । यथोक्तम्[4] -

"न सन्नासन्न सदसन्न चाप्यनुभयात्मकम् ।

चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदु: ।।"

"य: प्रतीत्यसमुत्पाद: शून्यतां तं प्रचक्ष्महे"[5] इत्यनेन शून्यतैव "प्रतीत्यसमुत्पाद"

---

1. सौदरनन्दमहाकाव्यं-अश्वघोष: - 16.28-29

2. स्फुटार्था, 2.55

3. पदार्थधर्मसंग्रहसेतु; पृ.26

4. माध्यमिककारिका - नागार्जुन, 1.7

5. तत्रैव, 28.18

पदेनाभिहिता । एवं बौद्धनये राग-द्वेषतृष्णाकर्मादि-बन्धबीजनिरोधेन निर्वाणावाप्तिरुक्ता । तत्कृते चाष्टांगिको मार्ग: समर्थित: । येनानुवर्तमानो मानवो निर्वाणपदं प्राप्य परमं सुखं लभते यतो हि निर्वाणं परमं सुखम् । धम्मपदे यथा -

आरोग्या परमालाभा सन्तुट्ठि परमं धनम् ।
विस्सास परमा ञाति निब्बाणं परमं सुखम् ।।

§7§ केवल्यस्वरूपमथवा साङ्ख्ययोगयोर्मोक्ष: -

"यत्साङ्ख्यै: प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं साङ्ख्यं च योगं च य: पश्यति स पश्यति ।
साङ्ख्ययोगौ पृथग्बाला: प्रवदन्ति न पण्डिता: ।।"

अनेन साङ्ख्ययोगयोरैक्यमवगम्यते । तत्र -

"सङ्ख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते ।
तत्त्वानि च चतुर्विंशत् तेन साङ्ख्या: प्रकीर्तिता ।।"

"अथ त्रिविधदु:खात्यन्तनिवृत्तिरत्यन्तपुरुषार्थ:" इत्यादिभि: साङ्ख्या कैवल्यनिरूपणे दु:खत्रयनिवृत्तिमपेक्षन्ते । आध्यात्मिकमाधिभौतिकमाधिदैविकं चेति-दु:खत्रयेष्वाध्यात्मिकं द्विविधं शारीरं मानसं चेति । वातपित्तश्लेष्मविपर्ययकृतं ज्वरादिकं शारीरम् । प्रियवियोगाप्रियसंयोगादिकं च मानसम् । आधिभौतिकं चतुर्विधभूतग्रामनिमित्तं मनुष्यपशुपक्षिसरीसृपदंशमशकयूकामत्कुणमत्स्यमकरग्राहस्थावरेभ्यो, जरायुजाण्डजस्वेदजोद्भिज्जेभ्य: सकाशादुपजायते । आधिदैविकं च शीतोष्णवातवर्षा-शनिनिपातादिकं दैवमधिकृत्योपजायते । एतादृशस्य दु:खत्रयस्यापघातोपाया अपि लोके संदृश्यन्ते परमैकान्तात्यन्तापघाताभावान्नैव समीचीनम् । अत: साङ्ख्यनये व्यक्ताव्यक्तज्ञविज्ञानोपाय एव श्रेयान् इति ।

अत: साङ्ख्ये "आत्यन्तिको दु:खत्रयाभाव: कैवल्यम्" इत्युक्तम् । तच्चकैवल्यं नैवजन्मैकलभ्यम् एतस्मात्प्रकृतिशरीरकं विहाय शरीरान्यमाश्रयतिपुरुष-विमोक्षाय । लब्धज्ञानं विदितस्वरूपौ प्रकृतिपुरुषौ अविद्यानाशे विवेकबुद्धिमधिगच्छत:।

---

1· साङ्ख्यकारिका, 1·2

यथोक्तं[1] -

"एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् ।
अविपर्ययाद्विशुद्धं केवलं उत्पद्यते ज्ञानम् ।।"

ज्ञानस्यावस्थेयं जीवन्मुक्ताऽवस्था न तु मोक्षावस्था यद्यपि तत्र तत्त्वज्ञानं भवत्येव परं यथा निवारितेऽपि वेगे पूर्ववेगवशाच्चक्रं भ्रमत्येव तथैव मुक्तोऽपि संस्कारवशाच्छरीरं धारयत्येव जीवः । "तिष्ठति संस्कारवशात् चक्रभ्रमवद्धृतशरीरः"[2] इति सांख्यकारिकायाम् ।

प्रारब्धकर्मसंक्षयात् - "प्रकृतिं पश्यति पुरुषः प्रेक्षकवदास्थितः स्वस्थः" इत्यवस्थायां विदेहमुक्तिः कैवल्यं वा यं प्राप्य नैव पुनरावर्तते जीवः । यथोक्तम्[3]-

प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ।

कैवल्यं चाष्टाङ्गयोगसाध्यमिति योगदर्शने कैवल्यायाष्टाङ्गिको योगः प्रशस्यते । यमनियमासनप्राणायामप्रत्याहारधारणाध्यान समाधयोऽष्टाङ्गानि ।[4] तपसा-स्वाध्यायेनेश्वरप्रणिधानेन च पञ्चक्लेशक्षयत्वात् चित्तवृत्तिनिरोधार्थं समाधीहा जायते । अष्टाङ्गिकयोगेन वैराग्योदये सति सम्प्रज्ञातासम्प्रज्ञात-समाधिभ्यां चित्तं दृढतामाप्नोति । त्रिविधदुःखविमुक्तः पुरुषः स्वच्छो ज्योतिर्मयः कैवली भूत्वा तिष्ठति इयमेव मुक्तिः कैवल्यं वा । यथोक्तं पतञ्जलिना-

"सत्त्वपुरुषयोः साम्ये कैवल्यमिति"।[5]

## (8) तार्किकानां मोक्षः -

न्यायदर्शने "आत्यन्तिकीदुःखनिवृत्तिः मोक्षः"।[6] इत्युक्त्वा परापरामुक्तिभेदेन द्विधा मुक्तिः प्रोक्ता । तत्त्वज्ञानेन सर्वदोषक्षयत्वादपरामुक्तिः जीवन्मुक्तिरपि कथ्यते । दोषक्षयत्वात् कर्मप्रवृत्तिनिरुद्धत्वाज्जन्ममरणाभावा-

---

1. सांख्यकारिका, 63
2. तत्रैव, 67
3. तत्रैव, 68
4. योगसूत्रम्, 2·2·9
5. तत्रैव, 3·55
6. न्यायसूत्रम्, 1·1·2

दात्यन्तिकदु:खनिवृत्तिर्जायते । अयमेवमोक्षोऽपवर्गो वा निगद्यते । यथोक्तं तर्कदीपिकायाम् - "चरमदु:खध्वंसो मोक्ष:" न्यायवार्तिकेऽपि "आत्यन्तिक दु:खाभाव:" (मोक्ष:) इति । न्यायवद् वैशेषिका अपि "तदभावे संयोगभावो-ऽप्रादुर्भावश्च मोक्ष:" इत्युद्घोषयन् । वैशेषिकसूत्रनये अदृष्टकर्मक्षयत्वे आत्मा-शरीर-सम्बन्धो वियुज्यते तेन च भवचक्राभाव: मुक्तानां वात्यन्तिकी विश्रान्ति: भवति, यत: कर्मफलोपभोक्तुमेव पुनर्जन्मापेक्षा । परं तत्त्वज्ञाने सति मिथ्याज्ञानस्य नैसर्गिकी विश्रान्ति: संचीयमानकर्मफलानुत्पत्तिश्च भवति आत्मशरीरसम्बन्धा-भावान्नैव पुनर्जन्मापेक्षा भवति, आत्यन्तिकदु:खाभावश्च जायते । अवस्थैयमेव मोक्षावस्था अस्तीति ।

(9) मीमांसोक्तमोक्ष-स्वरूपम् -

मीमांसाशास्त्रं वेदस्य कर्मभागविवेचनं, यत्र वेदविहितकर्मानुष्ठानमुपदिश्यते कर्माणि च काम्यनिषिद्धनैमित्तिकरूपाणि, त्रिविधकर्मणां फलं च स्वर्गावाप्तिर्मोक्षो वा । शरीरेन्द्रियविषयाबद्धोजीवोदु:खम——नादिकालादेवानुभवति । कर्मत्रया-नुष्ठानाच्चात्यन्तिकी निवृत्ति:, भवप्रपञ्च विमोक्षश्च जायते । "प्रपञ्च सम्बन्धविलयोमोक्ष:" इति । अथवा -"त्रिविधस्यापि बन्धस्यात्यन्तिको विलयो मोक्ष:"[1] इति भाट्टमीमांसका: । प्राभाकरमते - "आत्यन्तिकस्तु देहोच्छेदो मोक्ष:"[2] इति ।

(10) अद्वैत वेदान्ते मोक्षस्वरूपम् -

"ऋते ज्ञानान्न न मुक्ति:" इति शंकराचार्यवचनेन मोक्षार्थं ज्ञानमपेक्षते । यत: अविद्यया मायया अथवाअज्ञानेन एक एव परमेश्वर: कूटस्थनित्यो विज्ञान-धातुरनेकधा विभाव्यते मायाविवद् मानकश्च ब्रह्मभावच्युतो जीवभावमधिगत्य भवदु:खानि भुङ्क्ते । तत्त्वज्ञानमद्वैतनये "तत्त्वमसि" इति महावाक्यार्थमुद्बुध्य प्राप्यते तेन जीव: "अहं ब्रह्मास्मि, जीवो ब्रह्मैव" इत्याकारकज्ञानवान् भवति । नैव तदवस्थायां कर्मज्ञानापेक्षा । सैव मुक्तिर्मोक्षो वा । श्रुतिरपिप्रमाणयति यथा-[3]

---

1. शास्त्रदीपिका, पृ. 125
2. प्रकरणपञ्चिका, पृ. 156
3. अध्यात्मोपनिषद्, 63

"एकमेवाद्वितीयं नेह नानास्ति किञ्चन्" इति ।

एवमुपर्युक्तविवेचनेन ज्ञायते यत्सर्वमपि प्राचीनमर्वाचीनं वा साहित्यं मोक्षाभिमुखमेव । भिद्यन्ते साधनानि न पुनः साध्यम् । आत्यन्तिकदुःख-निवृत्तिरात्यन्तिकसुखावाप्तिश्च सर्वैरेवेष्यते, कुतः स्यात्शाश्वतं सुख-मित्यनुसन्धानं समानेव समेषां लक्ष्यम् । इति दिक् ।

नाट्यपरम्परायां मोक्षस्वरूपम् -

"प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते" इति सिद्धान्तमनुकृत्य निखिलस्यापि वस्तुजातस्य प्रयोजनं तु भवत्येव । चराचरात्मके विश्वस्मिन्नपि विश्वे नैव किमपि वस्तुजातं निष्प्रयोजनम् । काव्यरूपवस्तुनिर्माणपरम्परायामपि सिद्धान्तस्यास्यैवानुकृतिर्दृश्यते । यथापूर्वोक्तदर्शनशास्त्रस्य मोक्षसिद्धिरूपप्रयोजन-मवलोक्यते निखिलस्यापिदर्शनसाहित्यस्यतत्प्रतिपादकत्वात् तथैव काव्यसाहित्य-स्यापि किमपि प्रयोजनं भवत्येव इति जिज्ञासयामेव काव्यकर्तारस्तत्तत्काव्या-रम्भे स्व-स्व अभिलषितं काव्यप्रयोजनमनुबन्धचतुष्टयादिनिरूपणेन तत्प्रयोजनमपि प्रतिपादितवन्तः । यद्यपि दृश्यते तत्र वैमत्यमाचार्यवर्याणां विषयेऽस्मिन् तथापि चतुर्वर्गफलप्राप्तिरूप काव्य प्रयोजनं प्रायशः सर्वैरेवाङ्गीकृतम् ।

यथाह भामहः[1] -

"धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणात् ।।"

विश्वनाथश्च -

"चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ।।"[2]

अत एतदेव निश्चीयते यच्चतुर्वर्गरूपं प्रयोजनं यथा शास्त्राणां तथा काव्यस्यापि, भेदस्त्वयमेव यदेकत्र कटुकौषधवच्छास्त्रम विद्याव्याधिनाशनम्,

---

1. भामह - काव्यालंकारः, 1.2

2. साहित्यदर्पणम्, 1.2

अपरत्र च आह्लादामृतवत्काव्यमविवेकमदापहम् । अज्ञाननिवृत्तिः पुरस्सरं चतुर्वर्गफलप्रापणरूप प्रयोजनन्तु उभयत्रएव ।

काव्यस्य भेदोऽयं दृश्यकाव्यं नाट्यसंज्ञया अप्यभिधीयते । यच्च "संस्मार चतुरो वेदान्योगमास्थाय तत्त्ववित"[1] अनया नाट्यशास्त्रोक्त्या वेदचतुष्ट्यसंग्रहरूपात्मकः।पञ्चमवेद स्वरूपं नाट्यशास्त्रम् । अपि च तत्रैव-

एवं सङ्कल्प्य भगवान सर्ववेदाननुस्मरन् ।
नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसम्भवम् ।।
जग्राहपाठ्यमृग्वेदात्सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ।।"

तच्च नाट्यं धर्मार्थकामरूपं त्रिवर्गसाधनमिति मुनिवचनं प्रमाणम् । यथोक्तम्[2] -

"धर्म्यमर्थ्यं यशस्यं च सोपदेश्यं ससंग्रहम् ।
भविष्यतश्च लोकस्य सर्वकर्मानुदर्शकम् ।
सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्तकम् ।"

पुनश्च तत्रैव -

दुःखार्तानां श्रमार्तानां शोकार्तानाम् तपस्विनाम् ।
विश्रान्ति जननं काले नाट्यमेतद् भविष्यति ।।
धर्म्यं यशस्यमायुष्यं हितं बुद्धि-विवर्धनम् ।
लोकोपदेशजननं नाट्यमेतद् भविष्यति ।।
श्रुति-स्मृति-सदाचार परिशेषार्थकल्पनम् ।
विनोदजननं लोके नाट्यमेतद् भविष्यति ।।"

पूर्वोक्तनाट्यप्रयोजनैर्ज्ञायते यन्नाट्यं हि नाम लोकानुरञ्जनं रसोत्पादकं च । "रसो वै सः" इति श्रुतिवचनं परमसत्त्वमनुमोदयति । अपि च "रसो ह्येवं लब्ध्वाऽऽनन्दी भवति" इति श्रुति वचनं रसं परमानन्दप्रदायकम-

---

1. नाट्यशास्त्रम्, 1.13
2. तत्रैव, 1.14, 15

लौकिकानन्ददायकं च प्रमाणयति । आनन्दी ह्यानन्दावस्थायां भवबन्धमुक्तमिव आत्मानमनुभवति । एवं नाट्यस्य प्रयोजनं परोक्षरूपेण उत वा प्रकारान्तरेण मुक्तिरवस्थाप्रापणमपि द्योत्यति । अर्थात् परमानन्दोत्पादकत्वान्नाट्यमपि मोक्षसाधनमित्यत्र नैवसंशयः । नाट्यशास्त्रेऽप्युक्तं यथा -

"न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते ।।"[1]

अनेन कर्म-ज्ञानयोगसमन्वितं नाट्यशास्त्रमुक्तं ये च मोक्षाय प्राधान्ये-नापेक्षन्ते । अनेनापि नाट्यस्य मोक्षसाधकत्वप्रयोजनं द्योत्यते । एवं नाट्यं प्रामुख्येन रसोत्पादकं, रसश्च सत्त्वोद्रेकाद् ब्रह्मानन्द सहोदरो, नैव ब्रह्मानन्दरूतस्य ह्यस्थायित्वेन । रसस्यविशेषता यथा विश्वनाथमते[2] -

"सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः ।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ।।
लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ।।" इति ।

3. प्रतीकात्मकनाट्यक्षेत्रे मोक्षस्थानम् -

यद्यपि नाट्यसाहित्ये प्रतीकात्मकनाटकानां नैव काऽपि विशिष्टा परम्परा दृश्यते तथापि श्रीकृष्णमिश्रानन्तरमस्यां शैल्यां रचितानि नाटकानि स्वकीयमद्वितीयं स्थानं वहन्ति । यथा प्रागेवोक्तं यत्प्रतीकनाटकेषु प्रायशो दार्शनिकानामथवा मनोवैज्ञानिकानां तथ्यानां नाट्यशैल्या उद्घाटनं कृतमवलो-क्यते । तत्र च प्रबोधचन्द्रोदयाख्यमेकादशशताब्द्यां प्रणीतं नाटकमिदम् स्थानं भजते यत्र अद्वैतवेदान्तस्य विष्णुभक्त्याश्च समन्वयात्मकं चित्रणमस्ति प्रबोधोदयरूपफलावाप्तौ पर्यवसति कवेरायासः । अद्वैतवेदान्ताभिमतमुक्ति-

---

1. नाट्यशास्त्रम्, 1.116
2. साहित्यदर्पणः, 3.2,3

स्वरूपनिरूपणं कविना आद्योपान्तं व्याख्यातम् । विगतसकलहृदयमलः पुरुषः "तत्त्वमसि" इति वाक्यार्थमवबुध्य प्रबोधोदये सति "अहं स एषः" इत्यद्वैतोक्तं[1] परमात्मनः स्वरूपं व्यजानाति । यथा - "विश्वात्मकः स्फुरति विष्णुरहं स एषः" पुनश्च "स्वायम्भुवो-मुनिरहं भवितास्मि सद्यः" इत्यादिषु पुरुषोक्तिषु तस्य मोक्षावाप्तिः सम्सूच्यते । अत नाटकमिदं मोक्षावाप्तौ पर्यवसति इति निश्चप्रचम् ।

प्रबोधचन्द्रोदयानन्तरं यशःपालस्य मोहराजपराजये आर्हतदर्शनोक्ता निःश्रेयससिद्धिर्दुष्प्राप्या कविना प्रोक्ता । "शोच्यामिति दशां हहा गृहमपि त्यक्तं तथा स्वामिना"[2] इत्यादौ आर्हतदर्शनस्य काठिन्यं व्यज्यते । अन्ते च जैनदर्शनसम्मतमुक्तिमार्गसरण्या कविर्मोक्षसिद्धिं साधयति ।

"संकल्पसूर्योदयाभिधाना" नाट्यकृतिर्वेंकटनाथस्यास्ति या च रामनुजमतपरिपोषिका खलु । कृतिरियं भगवद्रामानुजमुनेरपि निबोदकं सिद्धान्तं व्यावृण्वन् मुमुक्षूणां महदुपकरोति । दशाङ्कोपेते प्रतीकनाटके शान्तरसस्याभिधेयता तस्य च मुक्तौ महत्त्वं कवेरभिप्रेतम् यथाह वेंटकनाथः - अथवा तादृशान् सभ्यान् मत्वा जगति दुर्लभान् । शमि शान्तिरसोल्लाससमाक्यमभिमेनिरे" इत्यादि चेटीवचनैः शान्तरसोपादेता उक्ता । अस्य नाटकस्य दशमोऽङ्को नाटकस्य फलस्वरूपप्रतिपादकत्वात् निःश्रेयसलाभनाम्नाऽभिधीयते । यथा नाटककारस्य वचनेषु निःश्रेयस सिद्धिः"[3] - "आदिष्टोऽस्मि अधिजिगमिषत-
-मुक्तिकण्टापथैरपि निषद्रहस्योपदेशादेशिकैरसमीचीनपराङ्मुखैराचार्यमिश्रैः"
इति । पुनश्च-[4] "अपदिश्चय किमप्यशेषगुप्त्यै निगमान्तेषुनिरूढगौरवेन । प्रविभक्तहिताहिता प्रयोगः कविना कारुणिकेन कल्पतोऽसौ" इत्यादिभिः-प्रत्यक्षतयाप्रतीयते यदपवर्गोपयिकपराविद्याप्रतिपादकानामध्यात्मशास्त्रसंबद्धाना

---

1. प्रबोधचन्द्रोदयः, 6·30-31
2. मोहराजपराजयः, 3·34
3. संकल्पसूर्योदयः, पृ·13
4. तत्रैव, 1·11

ग्रन्थानामेवोपादेयत्वं मन्यमानेन कविना लोकानुजिघृक्षया प्रणीतं नाटकमिदम् ।

वादिचन्द्रसूरेरपरं जैनमतसंबद्धं नाटकं चतुरङ्कोपेतं ज्ञानसूर्योदयनामानमस्ति । नाटकस्यास्यापि प्रबोधावाप्तिरूपफल पर्यवसानात् मुक्तिरूपफलसाध्यं स्वीकर्तुं शक्यते ।

षोडशशताब्द्यां प्रणीतं धर्मविजयाख्यं भूदेवशुक्लस्य नाटकं शिवभक्तिपरकमस्ति यत्र शिवाराधनामुक्तिप्रदायिका प्रोक्ता । शिवभक्तेर्महत्त्वं भक्तोरियं च मोक्षसाधिकेति नाटकोद्देश्यमस्ति ।

कृष्णदत्तमैथिलस्य पुरञ्जनचरिताख्यं प्रतीक नाटकं श्रीमद्भागवतपुरञ्जनोपाख्यानसंबद्धमस्ति यत्र नवधा भक्तिः मोक्षप्रदायिका, नवधा भक्तिकृतालम्बनो जीवः परमं पदं प्राप्नोति इति नाट्यशैल्या सम्यक्रूपेण निरूपितम् ।
"नित्यं मदनुध्यानेन मद्रूपता"[1] इत्यादृष्ट्या मे तत्त्वमसि परतत्त्वावगमतो... विपर्यासमन्यासि स्फुरतु सहसा सोऽहमीति तत्"[2] इत्यादिभिः भक्तेर्मुक्तिप्रदायकत्वमुपपन्नम् ।

"विद्यापरिणयम्" नाटकमस्या श्रेण्यां प्रणीतं नाटकमन्यत्। आनन्दरायमहाभागेन शैवागमसमर्थितं मोक्षस्वरूपं शिवभक्तेर्महिमानं चात्र व्याकृतम् । नाटकोक्त शिवभक्तेर्महत्त्वं यथा[3] -

"भवविषसागरतरणे तरणे तमोविमोहस्य ।
भावति भावकमूर्ते शक्तकृत्वस्ते नमोऽस्तु शिवभक्ते:।"

मोक्षस्वरूपं यथा तत्रैव[4] -

"दुग्धार्णवे दुग्धलव: प्रविष्टो यथा तथाहं त्वमभूवमेव ।
भेदावभासेन तथापि किंचिदौपाधिकेन प्रणमाम्यहं त्वाम् ।।"

अनेन शिवभक्त्या शिवसायुज्यं प्राप्य जीवस्तद्रूपतामाप्नोति इति निर्दिष्टम् ।

---

1· पुरञ्जनचरितम्, 5·36

2· तत्रैव, 5·37

3· विद्यापरिणयम्, 7·10

4· तत्रैव, 7·37

एतदतिरिक्तमपि सन्ति कानिचित् "अमृतोदय:" "मिथ्याज्ञानविडम्बनम्" जीवानन्दादीनि नाटकानि प्रतीक शैल्यां तत्रापि तत्तत्सिद्धान्तानुरूपं मोक्ष-स्वरूपनिरूपणं विहितम् । परिणामत: स्पष्टरूपेण दृश्यते यत्प्रतीकनाटकानि प्रायशो दर्शनसिद्धान्ताश्रितानि सन्ति दर्शनानां च साध्यं मोक्षस्वरूपमेवास्ति अत: प्रतीकनाटकेष्वपि दर्शनपरम्परया सिद्धान्तविशेषमनुकृत्य तत्सिद्धान्तानुमता मुक्ति: नाट्यशैल्या स्पष्टीकृता । यत्रान्येषां नाटकानां साध्यं लोकानुरञ्जनं विशेषतो दृश्यते तत्र प्रतीकनाटकानां ध्येयं तत्तद्दर्शनसिद्धान्तप्रतिपादनेन तदनुमतं मोक्ष--स्वरूपप्रतिपादनमपि प्राधान्येन दरीदृश्यते । इति ।

§ग§ भक्ति -

§1§ भक्ते: स्वरूपं महत्त्वं च -

भारतीयमनीषिभि: प्रेय: श्रेयश्चेति मार्गद्वये मानवप्रवृत्तिरुक्ता । तयोरापातरमणीयदृष्टिपराणामर्थाल्लौकिकोन्नतिमिच्छतां प्रेयोमार्ग:, आभ्यन्तरदृष्टिपराणां त्वर्थाच्चिरकालीनपारलौकिकभूतिमिच्छतां श्रेयोमार्ग: । तावुभौ समन्वयं येन लब्धुं शक्येते स धर्म इति विनिर्णय आर्यमहर्षीणाम् । "यतोऽभ्युदयनि:श्रेयससिद्धि: स धर्म:" इति । क्रियाबुद्धिर्हृदयं चेति त्रयो मानवप्रवृत्तिहेतव इति विज्ञाय वेदप्रभृतिधर्मग्रन्थेषु 'कर्मज्ञानोपासना' इति धर्मस्य त्रय: स्कन्धा आम्नाता: एषु कर्मण: स्थानं हस्तपादादय: शरीरस्य बाह्यभागानि, ज्ञानस्य स्थानं बुद्धिरुपासनायाश्च स्थानं हृदयं मनो वा । मनसि बहवो भावास्तिष्ठन्ति येषां संख्या निर्धारयितुं न शक्यते । प्रेम हि मनसो भावो य: एकस्य हृदये सन्नपि विषयभेदेन नानात्वं भजते यथा बालेषु स्नेह:, समवयस्केषु मैत्री, स्त्रीपुरुषयो: रति:, वृद्धेषु च श्रद्धा इति नाम्ना व्यवह्रियते ।

मानवो यदा कस्यापि गुणानां महत्त्वमनुभवति शृणोति पश्यति वा तदा तं प्रति कोऽपि भावस्तस्य हृदये समुदेति सोऽयं मनोभाव: "श्रद्धा" इति कथ्यते । श्रद्धालु: श्रद्धास्पदस्य महत्त्वं स्वस्य च तस्माद् न्यूनतां वेत्तुं यतते ।

उपचितायां हि श्रद्धायां श्रद्धेयं चेत्वद्गौ तदा सेवितुमभिलाषो जायते । श्रद्धातिरेके च तस्या अभिव्यक्तिमीहते । कश्चित् कर्मणा तं सेवते, कश्चिद् वाचा स्तौति, कश्चिच्च मनसैव तद्गुणान्स्मरति । एवं श्रद्धालुः मनसा वाचा कर्मणा श्रद्धास्पदं परिचरति । अतः श्रद्धापूर्वकं सेवा सेवनेहा वा भक्तिरिति । "भज्" सेवायाम् इति धातोर्भावे "क्तिन्" प्रत्ययेन शब्दोऽयं निष्पद्यते । उक्तं यथा गरुडपुराणेऽपि-

"भज् इत्येष वै धातुः सेवायां परिकीर्तितः ।
तस्माद् सेवा बुधैः प्रोक्ता भक्तिसाधनभूयसी ।"

सेवा तु वेतनादिहेतुना राजस्वामिप्रभृतीनां सेवकैरपि क्रियते परं तत्र श्रद्धाभावात् न भक्तित्वम् । अतः श्रद्धापूर्विका सेवा उत वा भावना भक्तिरिति। सा चेयं मातृपितृगुरुदेवदेशादिषु तत्तन्नाम्ना व्यपदिश्यते यथा मातृभक्तिः, पितृभक्तिः, गुरुभक्तिः, देवभक्तिर्देशभक्तिश्चेत्यादिना । यदा च सा सर्वगुणागारे भगवति प्रयुज्यते तदा भगवद्भक्तिरित्याख्यायते । अभ्युदयनिःश्रेयसरूपसकलफलप्रदायिका भगवद्भक्तिरेव गरीयसी इति । तथा चोक्तं स्वयमेव भगवता श्रीकृष्णेन भगवद्गीतायाम् -[1]

"भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ।।"

अपि च श्रीमद्भागवतस्यैकादशेस्कन्धे उद्धवं प्रति श्रीकृष्णः[2] -

"भक्तियोगेन मन्निष्ठो मद्भावाय कल्पते ।
तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसम्भवम् ।।
गुणसंगविनिर्धूय मां भजन्तु विचक्षणः ।
भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते ।।"

लोके किमपि कर्म कामनामन्तरा न क्रियते । सा च कामना द्विविधा दृष्टा-आनुश्राविकी चेति । अर्थकामयशआदि विषया लौकिकी कामनादृष्टा, स्वर्गादिप्राप्तिविषया वैदिकी कामना त्वानुश्राविकी । इयमेव द्विविधा

---

1· गीता, 18·55

2· श्रीमद्भागवत्, 11·26, 30

कामना लोकैषणा वितैषणा पुत्रैषणा चेति एषणात्रयनाम्नाऽपि कथ्यते। तत्सिद्धये च धर्मार्थकामरूपस्त्रिवर्ग उपदिश्यते। एषणात्रयत्यागेन जन्ममृत्युचक्रान्मुक्तिर्मोक्ष नाम्ना अपवर्ग नाम्ना वा उच्यते। एवं धर्मार्थकाममोक्षा इत्येते चत्वारः पुरुषार्थाः प्रसिध्यन्ति। भक्तिस्तु परमपुरुषार्थः सर्वपुरुषार्थसारो वेति। यथोक्तम् -

यथा समस्तलोकानां जीवनं सलिलं स्मृतम्।
तथा समस्तसिद्धीनां जीवनं भक्तिरिष्यते॥

पद्मपुराणस्य श्रीमद्भागवतमाहात्म्यानुसारं भगवतः प्रसन्नतायै तत्प्राप्त्यै च प्रमुखं कारणं भक्तिरेव प्रोक्ताऽस्ति।[1] यथा -

"न तपोभिर्न वेदैश्च न ज्ञानेन नापि कर्मणा।
हरिर्हि साध्यते भक्त्या प्रमाणं तत्र गोपिका॥"

अनन्या भक्त्या सन्तुष्टो भगवान् भक्तस्य सर्वविधां बाधां परिहरति, मनोरथं च सर्वं पूरयति येन गोपदमिव संसारसागरं समुत्तीर्य भगवद्भक्तः परमं पदं प्राप्नोति। यथा श्रीमद्भागवते प्रोक्तम्[2] -

"समाश्रिता ये पदपल्लवप्लवं महत्पदं पुण्ययशोमुरारेः।
भवाम्बुधिर्वत्सपदं परं पदं पदं पदं यद्विपदो न तेषाम्॥"

भक्तेर्मूलं मन्त्रब्राह्मणात्मको वेदः। तत्र मन्त्रभागे या भक्ति सा प्रायः सकामैव दृश्यते। निष्काम भक्तेर्लक्षणं तूपनिषत्साहित्ये गोपालतापनीयादिष्वुपनित्सु प्राप्यते[3] -

"भक्तिरस्य भजनं तदिहामुत्रोपाधिनैरास्येनामुष्मिन्मनः कल्पनमेतदेव च नैष्कर्म्यम्।" तत्र प्रतिपादितायाः भक्तेः परिष्कृतं रूपं भक्तिरसायणे मधुसूदनसरस्वती महाभागेन इत्थं प्रदर्शितम्। यथा प्रथमे प्रकरणे तत्र[4] -

"द्रुतस्य भगवद्धर्माद्धारावाहिकतां गता
सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते॥"

---

1. पद्मपुराणम्, 2.28
2. श्रीमद्भागवत, 10.14.58
3. गोपालतापनीयोपनिषद्, 16
4. भक्तिरसायनम्, 1.3

द्वितीये प्रकरणे च तत्रैव यथा[1] -

"द्रुते चित्ते प्रविष्टा या गोविन्दाकारता स्थिरा ।

सा भक्तिरित्यभिहिता ..........इत्यादिना ।।"

नारदपाञ्चरात्रे[2] तु -

"सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम् ।

हृषीकेन हृषीकेशसेवनं भक्तिरुच्यते ।।"

श्री शङ्कराचार्येण विवेकचूडामणौ[3] "स्व-स्वरूपानुसन्धानं भक्तिरुच्यते बुधैः" इत्युक्तम् मोक्षसाधनेषु भक्तेश्रेष्ठत्वं च स्वीकृतम्- "मोक्षकारणसामग्र्यां[4] भक्तिरेव गरीयसी ।" शङ्कराचार्यमते मुक्तिप्राप्तौ वैराग्यात्मबोधौ भक्तिश्चेति साधनत्रयं वर्तते तेषां भक्तिर्गरीयः साधनम् । द्वैतसिद्धान्तप्रवर्तकस्य भगवतो मध्वाचार्यस्य मते तु" -मुक्तिर्निज सुखानुभूतिरमला भक्तिश्च तत्साधनम्" इत्यादिना मोक्षावाप्तौ भक्तेर्व्यतिरिक्तं साधनमेव नास्ति । तन्मते भक्तिर्हि- "माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः स्नेहो भक्तिरिति" एवमुभयोः शङ्कराचार्यमध्वयोर्मतं भिद्यते ।

वल्लभाचार्यस्तु[5] -"तया मुक्तिर्न चान्यथा" तथा च -

"तस्माद्धि भक्तियुक्तस्य योगिनो वै मदात्मनः ।

न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ।" इत्यादिना भक्तेर्मोक्षसाधकत्वं प्रोच्य पुष्टिमार्गे भक्तेर्महत्त्वमुक्तवान् । श्रुतिवाक्यमपि यथा[6] -

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।

तस्यैते कथिताह्यर्थाः प्रकाशन्ते महात्मनः ।।"

भक्तशिरोमणिना रूपगोस्वामिना स्वकीये हरिभक्तिरसामृतसिन्धावप्युत्तमाया भक्तेर्लक्षणमित्थं[7] कृतम्-

---

1. भक्तिरसायनम् 2.।
2. नारदपाञ्चरात्रतः उद्धृतं भक्तिरसामृतसिन्धुः ।.।.10
3-4. विवेकचूडामणि; 3।
5. वल्लभाचार्यपुष्टिमार्गः, पृ.237
6. श्वेताश्वतरोपनिषद्, 6.2.3
7. भक्तिरसामृतसिन्धुः, ।.।।

अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतम् ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुच्यते ।।[1]

किं च -

"अनन्यममता विष्णौ ममता प्रेमसङ्गता ।
भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः ।।"

एतादृशी भक्तिरेव भगवन्तं श्री कृष्णं समाकर्षति, अतएव भक्तेर्गुणान् वर्णयतापि तेन तत्रैव प्रोक्तं यत् -

"क्लेशघ्नी शुभदा मोक्षलघुताकृत् सुदुर्लभा ।
सान्द्रानन्दविशेषात्मा श्री कृष्णाकर्षणी च सा ।।"

महापातकिनोऽपि भगवद्भक्तिमाश्रित्य पापरहिताः सन्तः पुण्यमयेऽध्यात्मराज्येऽग्रेसरा भवन्तीत्येषोऽपूर्वोऽस्ति भक्तिमहिमा । यथाह सूतः श्रीमद्भागवदन्ते[2] -

"सङ्कीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसाम् ।
प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः ।।"

अपि च[3] -

"अविस्मृतिः कृष्णपदारविन्दयोः
क्षिणोत्यभद्राणि शमं तनोति च ।
सत्त्वस्य शुद्धिं परमात्मभक्तिं
ज्ञानं च विज्ञानविरागयुक्तम् ।।"

अतः भगवत्प्रतिमादिषु विधिपूर्वकं यथोचितोपचारैः परमेश्वरपूजया परमभक्तः आनन्देन परितृप्तः सन् परमं पदं प्रयाति - यथोक्तं भगवद्गीतायाम्[4] -

"भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ।।"

---

1. भक्तिरसामृतसिन्धुः, 1.1.13
2. श्रीमद्भागवत, 12.12.47
3. तत्रैव, 12.12.54
4. गीता, 11.54

अन्यत्रापि - "श्रीविष्णोरर्चनं ये तु प्रकुर्वन्ति नरा भुवि ।
ते यान्ति शाश्वतं विष्णोरानन्दं परमं पदम् ।।"

एवं भगवद्भक्त्याऽमृतत्वं लभ्यते इत्यत्र नास्ति कश्चित् संशयलेशोऽपि। पद्मपुराणस्य श्रीमद्भागवतमाहात्म्ये सततं भगवति समासक्तचेतसां सचेतसां भगवद्भक्तानां प्रशंसा अस्य एव द्योतिका । भक्तिर्हि सर्वसाधनमूलत्वात् समेषां धर्माङ्गानां साहायिका वर्तते । अतः सर्वसंप्रदायसाधकसापेक्षिता सा भक्तिः सर्वश्रेष्ठाऽवगन्तव्या । साधनामार्गेऽग्रेसरतां समेषां कृते भक्तिरावश्यकी भवति । कर्मासक्तेन अज्ञेन तत्त्वदर्शिना विज्ञेन प्रवृत्तिमार्गसेविना गृहस्थेन ज्ञानिना सन्यासिना वा साधनामार्गे अग्रेसर्तुं भक्तिराश्रणीया खलु । अतो भक्तेराश्रयणं समेषां साधकानां कृते अत्यावश्यकं कर्तव्यमिति "यथा समस्तलोकानामित्यादिना---" प्रागेवोक्तम् ।

श्रीमद्भागवतस्यैकादेशे स्कन्धे उद्धवं प्रति भगवता श्रीकृष्णेन ज्ञानसाधनस्य त्रयः उपाया निर्दिष्टाः - ज्ञानयोगः, कर्मयोगः, भक्तियोगश्चेति । तत्र निर्विण्णचित्तानां कृते ज्ञानयोगस्य विधानमस्ति, अनिर्विण्णचित्तानां कृते कर्मयोगस्य निर्देशः, परमुभयभिन्नानां कृते भक्तियोगस्योपदेशोऽस्ति -

"न निर्विण्णो नातिसक्तो भक्तियोगस्य सिद्धिदः" इति ।[1]

भक्तिमुपलभ्य जना दृष्टानुश्रविकभोगैश्वर्याणि तृणवन्मन्यन्त एव परं परमपुरुषार्थतया प्रसिद्धं प्राप्तमपि मोक्षं ते नाङ्गीकुर्वन्ति । ते तु स्वाभीप्सितस्य प्रेमानुरागे तथानन्दं लभन्ते यथा भुक्तयो मुक्तयश्च तेषां तत्रबाधकतयैव प्रतीयन्ते । पुराणानुसारं भगवद्भक्तिर्भक्तान् भवाम्बुनिधेः समुत्तीर्य आनन्दपूर्णपरिस्थितिं प्रापयतीति तदेव केवलं सुगमं साधनं निर्दिष्टमस्ति । तत्त्वस्यास्य प्रतिपादनं तु प्रतिपुराणं प्राप्यत एव परं पुराणमूर्धन्ये श्रीमद्भागवतमहापुराणे तु भक्तितत्त्वस्य सर्वाङ्गीविश्लेषणं प्रस्तुतमस्ति । तदनुसारेण प्रेमपयोधावखिलात्मनि सकलरसामृतसिन्धौ भगवति संसक्त्या भक्त्या समः क्षेमकरः कश्चिदन्यो मार्गो नास्ति।

---

1. श्रीमद्भागवत, 11.20.8

यथोक्तम्[1] -

"न युज्यमानया भक्त्या भगवत्यखिलात्मनि ।
सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये ।।"

अपि च[2] -

"आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थं भूतगुणो हरिः ।।"

एवं पुराणानुसारं भगवतः प्राप्त्यै कर्म-भक्ति-ज्ञानानि त्रीण्यपि साधनानि श्रेष्ठानि सन्ति परं तत्र भक्तिः सर्वसुलभा सुगमा च प्रोक्ताऽस्ति, अतो भक्तिः सर्वतो गरीयसी । उक्तं च यथा[3] -

"निखिल भुवनमध्ये निर्धनास्तेऽपिधन्या
निवसति हृदि येषां श्री हरेर्भक्तिरेका ।
हरिरपि निजलोकं सर्वथाऽतो विहाय
प्रविशति हृदि तेषां भक्तिसूत्रोपनद्धः ।।"

अपि च मानवानां कल्याणाय सत्युगादौ ज्ञानवैराग्ययोर्मोक्षसाधकत्वेऽपि कलियुगे भक्तेरेव प्राधान्यमस्ति । तदुक्तं पद्मपुराणे[4] -

"सत्यादि त्रियुगे बोधवैराग्यादौ मुक्तिसाधकौ ।
कलौ तु केवलं भक्तिर्ब्रह्मसायुज्यकारिणी ।।"

अपि च तत्रैव[5] -

"कलौ भक्तिः कलौ भक्तिर्भक्त्या कृष्णः पुरः स्थितः" ।

अनुरागमूला हि भक्तिः, न तत्रापेक्षते तपो न वा वेदाध्ययनं, नैव योगानुष्ठानमपेक्षितं, न वा ज्ञानस्यानिवार्यता । अतो व्रत-तीर्थ-योग-यागादीनामपेक्षया मुक्तौ भक्तेरेव प्रशस्यते । यथोक्तं तत्रैव[6] -

---

1. श्रीमद्भागवत, 3·25·19
2. तत्रैव, 1·7·10
3. तत्रैव, 3·73
4. पद्मपुराणीय श्रीमद्भागवतमाहात्म्यः, 2·4
5. तत्रैव, 2·19
6. तत्रैव, 2·21

"अलं व्रतैरलं तीर्थैरलं योगैरलं मखैः ।

अलं ज्ञान कलालापैर्भक्तिरेकैव मुक्तिदा ।।"

भगवद् भक्तौ रूपगुणविद्याचारबलादीनामुत्कर्षो नैवापेक्षते । अनन्यप्रेम्णैव परितुष्यते प्रेममयो भगवान् । अम्बरीषप्रभृतयो राजानो भगवन्तमनन्या भक्त्या अर्चयित्वा, सुदामा किल केवलैः पृथुक् तण्डुलैः, गजेन्द्रः केवलेन पुष्पेण, शबरी च बदरीफलैरेव तर्पयित्वा स्व-स्वमनोरथान् प्राप्य परमं पदं प्रापुः । अतएवोक्तम्-
"भक्त्या तुष्यति केवलं न च गुणैर्भक्तिप्रियो माधवः ।" गीतायां च यथा -

"पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।

तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ।।"[1]

अतो भगवान् भक्त्यैव प्रसीदति । भगवतो भक्तेन समः कोऽपि प्रियो नास्ति । ध्रुवप्रह्लादादीनां निदर्शनं तु सुविज्ञातमेव । महाभारते यशोदानन्दनः सभापर्वणि द्रौपद्या चीरहरणावसरे तदार्तनादं निशम्य तत्रोपगम्य तस्य लज्जां निवारयति ।[2]

"याज्ञसेन्या वचः श्रुत्वा कृष्णो गह्वरितोऽभवत् ।

त्यक्त्वा शय्यासनं पद्भ्यां कृपालुः कृपयाभ्यगात् ।

भक्तिर्हि भगवतः प्राणतोऽप्यधिका प्रियाऽस्ति । यथोक्तम्-
पद्मपुराणीयश्रीमद्भागवतमाहात्म्ये नारदेन भक्तिं प्रबोधयता -[3]

"त्वं तु भक्ते । प्रिया तस्य सततं प्राणतोऽधिका ।

त्वयाहूतस्तु भगवान् याति नीचगृहेष्वपि ।।"

भक्तिपरवशो भगवान् भक्तानां मनोरथानवश्यं पूरयति । भगवतः श्रीकृष्णस्य सन्देशमादाय वृन्दावनमुपगम्य तत्र च तद्वियोगविह्वलगोपीनामपूर्वं प्रेम पर्यालोच्य उद्धवस्य मनसि शङ्का अजायत, किं भक्तानपि परित्यजति भगवान्। सर्वज्ञः श्रीकृष्णः इमामुद्धवशङ्कामपनेतुमेव तेन सह कुब्जागृहे गत्वा प्रादर्शयद् यद् यदाऽहं भक्तिमतीं कुब्जामपि न परित्यजामि तदा भक्तिमतां गोपीनां त्यागः कथं सम्भवः ?[4]

---

1. गीता, 9.26
2. महाभारत, 6.45
3. पद्मपुराणम्, 2.3
4. गर्गसंहिता, 5.3

"सैरन्ध्रीमपि सन्त्यक्तुमहं शक्तोऽस्मि नोद्धव ।
किमुत व्रजलोकांस्तानिति व्यञ्जितिनामतात् ।।"[1]

एतादृश्या भक्त्या माहात्म्यं यथा -

योगेन साङ्ख्येन शुभेन कर्मणा
न्यायादिवैशेषिकतत्त्ववित्तमैः ।
यत्प्राप्यते तत्त्वपदं विदेहराट्
सम्प्राप्यते केवलभक्तिभावतः ।।"

"भक्त्यैव वश्यो हरिहरादिदेवः
सदाप्रमाणं किल चात्र गोप्यः ।
साङ्ख्यं च योगं न कृतं कदाऽऽभिः
प्रेम्णैव यस्य प्रकृतिं गताः स्युः ।।"

विष्णुपुराणेऽपि - यथा[2] -

"धर्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता ।
समस्तजगतां मूले यस्य भक्तिः स्थिरा त्वयि ।।"

श्रीमद्भागवतेऽपि सर्वकामनया भगवद् भजनमेव सिद्धान्तितं व्यासेन - यथा[3] -

"अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन भजेत् पुरुषं परम् ।।"

अतः सर्वतो भावेन प्राप्येयं मुक्तिः या च मानवजीवन एव सम्भवति नाऽन्यत्र । यो मानवजन्मलब्ध्वाऽपि मुक्त्यर्थं न प्रयतते स आत्महाऽस्ति । अतो मानवशरीरं सम्प्राप्य नूनं सम्पादनीयमात्मतत्त्वज्ञानम् । अयमेव परमः पुरुषार्थः, उत्कृष्टा सिद्धिः, श्रेष्ठा च सम्पदस्ति । अनेनैव मानवजन्मसाफल्यम्, एतेनैव कृतार्थोऽयं लोकः, अमुनैव वसुन्धरा वस्तुतो वसुन्धरा । प्राप्तमानवजीवनोऽपि यो आत्मज्ञानायनयतते तस्य महती हानिर्भवति । यथाह शङ्कराचार्यः[4] -

---

1. गर्गसंहिता, 5·3
2. विष्णुपुराणम्, 1·20·27
3. श्रीमद्भागवत, 2·3·10
4. विवेकचूडामणि, 4

लब्ध्वा कथञ्चिन्नरजन्मदुर्लभं तत्रापि पुंस्त्वं श्रुतिपारदर्शनम् ।
यस्त्वात्ममुक्तौ न यतते मूढधीः स आत्महा स्वं विनिहन्त्यसद्ग्रहात् ।[1]

एतदेवोक्तं श्रीमद्भागवते उद्धवं प्रति-यथा-

"नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम् ।
मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महा ॥"

तत्रैव भगवन्तं श्रीकृष्णं स्तुवन् नृपो मुचुकुन्दोऽपि -[2]

"लब्ध्वा जनो दुर्लभमत्र मानुषं कथञ्चिदव्यङ्गमयत्नतोऽनघ ।
पादारविन्दं न भजत्यसन्मतिर्गृहान्धकूपे पतितो यथा पशुः ॥"

अतः सर्वदा सर्वतोभावेनानायाससमोक्षप्रदेयं भक्तिः समाश्रणीया ।

पूर्वोक्तविभिन्नाचार्यकृतविभिन्न भक्तिलक्षणेषु सत्स्वपि समीक्षया इदमेव तात्पर्यमवसीयते यदखिलात्मनि भगवति परमात्मन्यनन्य प्रेमैवास्ति भक्तिः। यथा वृक्षस्य पूर्णता फलेन भवति तथैव भक्तेरपि पूर्णता परमप्रेमास्पदे पुरुषोत्तमे परमप्रेम्णैव निष्पद्यते । तस्माद् भगवति जगदीश्वरेऽनन्यानुराग एव भक्तिरिति निःसरति भक्तिलक्षण निष्कर्षः । इति ।

§2§ <u>भक्तेर्भेदाः -</u>

मानवगुणस्वभाव भेदाद् भक्तिरपि भिद्यमाना परिलक्ष्यते । तामस-राजसादि स्वभावानां जनानां हि भजनीया देवा अपि तादृशा भवन्ति । राजसा यक्षरक्षांसि सात्त्विकाः देवान् तामसा जनाश्च प्रेतान्भूतगणान् यथा यजन्ते तथैव साधनस्यादिकाले हि भगवद्भक्तानामपि भक्तिः दृश्यते, क्रोधिनोऽपि हिंसार्थं दम्भमात्सर्यादितामसिकभावैर्भक्तिमार्गे प्रवर्तन्ते तदा तेषु परिलक्षिता भक्तिस्तामसीति कथ्यते तथैव सांसारिक विषयैश्वर्यादि कामिना भक्तिः राजसी। परं ये जनाः साधका वा स्वपापादि कर्मनाशार्थं भक्तिसाधनानि कुर्वन्ति तेषां गुणानुरूपा भक्तिरपि सात्त्विकीत्यभिधीयते । शास्त्रकारैस्तमोगुणः कृष्णवर्णः

---

1. श्रीमद्भागवत, 11.20.17
2. तत्रैव, 10.51.47

रजोगुणः रक्तवर्णः सत्त्वगुणश्च दर्पण इव स्वच्छवर्णोऽभिहितः इति दृष्ट्या भक्तिरपि तत्तत्पात्रभेदैः तत्तद्वर्णा प्रतिभाति, यद्यपि भक्तिः स्वयं स्वभावतः सर्वथा निर्गुणा एवानेकधा च विद्यते भेदविषये च नास्ति मतैक्यम् विदुषाम् । शास्त्रीयदृष्ट्या भक्तेर्विभागस्य विवरणं विभिन्नग्रन्थेषु तत्तदाचार्यवर्यैः कृतमुपलभ्यते। तत्र मुक्ताफले वोपदेवेन कृतं विभाजनं वैज्ञानिकदृष्ट्या समीचीनमस्ति । तन्मते भक्तिस्तावद् द्विविधा, विहिताविहितभेदाभ्याम् ।[1]

"भावति मनोनिवेशो" विहिता भक्तिः कथ्यते ।अनवधानमर्यादं मनो यत्र वेदविहितमर्यादापालनपूर्वकमाभिनिविशति विहिता भक्तिः सा उच्यते । विहितायाः भक्तेः सर्वे प्रकाराः सगुणभक्तिनाम्नाभिधीयन्ते । केवलं ज्ञानमिश्रा अविहिता निर्गुणा वा भक्तिरुच्यते । रजोगुण तमोगुणरहितो यः कोऽपि भक्तः एनामवगन्तुं शक्नोति । अविहितायाः भक्तेश्चतुर्णां कामज-द्वेषज,भयज-स्नेहजानां भेदानां क्रमशश्चत्वारोऽधिकारिणः प्रोक्ताः सन्ति-गोप्यः-कंसः, चैद्यादयो राजानः, वृष्णिवंशीया यादवाश्च । तथा चोक्तं श्रीमद्-भागवते भक्तशिरोमणिना देवर्षिणा नारदेन धर्मराजं युधिष्ठिरं प्रति -[2]

कामाद्द्वेष्याद्भयाद् स्नेहात् यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ।।
गोप्यः कामाद् भयात् कंसो द्वेष्याच्चैद्यादयो नृपाः
सम्बन्धात् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो ।।"

भक्तिमीमांसायामपि प्राय एतादृशमेव भक्तियोगस्य वर्गीकरणं कृतमस्ति । नारद-भक्तिसूत्रानुसारं तु भक्तिस्त्रिधा विभक्ता, गौणी भक्तिः, पराभक्तिः, प्रेमभक्तिश्चेति भेदात् । एतासु प्रेमभक्तिः पुनः एकादशधा विभक्ता ।

शाण्डिल्य-भक्तिसूत्रे च "मुख्या" "इतरा" चेति भेदाद् द्विधाविभक्ता भक्तिः । तत्र मुख्यापराभक्तिरभिप्रेता, इतरा च गौणी भक्तिः या मुख्य- -भक्तिप्राप्त्यै साधकस्य सोपानरूपाउक्ता ।

-----------------------------

1. मुक्ताफलम्, पृ॰8।

2. श्रीमद्भागवत, 7.1,29, 30

भक्तिरसामृतसिन्धौ पूर्वविभागे रूपगोस्वामिना भक्तेः भेदत्रयङ्गीकृतम्। साधनाभक्तिः, भावभक्तिः, प्रेमभक्तिश्च । तत्र साधना भक्तिरपि द्विधा वैधी रागानुगा चेति भेदात् । रागानुगाऽपि पुनः द्विविधा कामानुगा-सम्बन्धानुग-भेदाभ्याम् । कामानुगा भक्तिर्हि गोपिकासु प्रसिद्धा । सम्बन्धानुगा च नन्द-यशोदा-देवकी-वसुदेवादिषु दृश्यते । सम्बन्धरूपा भक्तिः भगवतो भक्तस्य च सम्बन्धदृष्ट्या चतुर्धा दास्य-सख्य-वात्सल्य-दाम्पत्यभेदेभ्यः । कामानुगापि सम्भोगेच्छामयी तदभावेच्छामयी रूपेण द्विधादृश्यते । साधना भक्तेः वैधी भेदरूपाभक्तिः शास्त्रानुमोदिता । अस्या आलम्बनं विभुः भगवान् विष्णुः । इयं कूलद्वयावरुद्धा नदीव मर्यादामयी, किन्तु अनुरागप्रधाना रागानुगा भक्तिः कूलद्वयप्रभेदिनी स्वेच्छया प्रवहन्ती आपगा इव मर्यादाविहीना । मधुरभावस्य मूलाधारः रागानुगा भक्तिरेव । रागशब्दविवरणे रूपगोस्वामिरवोचत् यत् यथा विषयिणां पुंसां स्वभावत एव विषयान् प्रति आकर्षणमुत्पद्यते तथैव यदा भक्तानां भगवन्तं प्रति यदाकर्षणमुत्पद्यते तदेव राग उच्यते । यदाऽयं रागः प्रबलो जायते सैव रागानुगा रागात्मिका भक्तिः कथ्यते । तत्रहि भक्तिरियं सर्वोत्तमाप्रोक्ता - यथा -

"अन्याभिलाषिता शून्यं ज्ञानकर्माधनावृतम् ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ।।"[1]

हरिभक्तिरसामृतसिन्धोः परिशिष्टरूपे उज्ज्वलनीलमणिनामके भक्ति-ग्रन्थे एका हार्दरूपा भक्तिरपि स्वीकृताऽस्ति । यस्यां भावरूपा प्रेमरूपा चेति भक्तिद्वयमपि अन्तर्भवति । सेयं हार्दरूपा भक्तिरष्टधाविभक्ताऽस्ति भाव-प्रेम-प्रणय-स्नेह-राग-अनुराग-महाभाव भेदात् ।

एवं सनातनधर्मकल्पद्रुमे श्री ज्ञानानन्दस्वामिनातु सरलतमोऽप्येको भक्ति-भेदप्रकारः प्रदर्शितः । तद्यथा - भक्तिस्तावद् द्विविधा गौणी परा भेदात् ।

------------------------------

1. हरिभक्तिरसामृतसिन्धुः, 1.11

गौणी पुनर्द्विधा वैधी रागात्मिका च । तत्र वैधी श्रवणादि भेदान्नवधा रागात्मिका चासक्तिभेदात् सप्तधा । परं ज्ञानस्वरूपापराभक्तिस्तु एकलैवास्ति ।

पद्मपुराणस्य पातालखण्डे भक्तिविवरणप्रसङ्गे

भक्तिस्तावद्त्रिविधा प्रोक्ता मानसी, वाचिकी-कायिका च । तत्र ध्यानधारणादिभिः वेदार्थ स्मरणपूर्वकं भगवतो विष्णोः प्रीत्यै या भक्तिः क्रियते सा मानसी यथा[1] -

"ध्यानधारणया बुद्ध्या वेदानां स्मरणेन च ।
विष्णु प्रीतिकरी चैषा मानसी भक्तिरुच्यते ।।"

वेदमन्त्रसमुच्चारणपूर्वकमहर्निशं जपादिद्वारा या भक्तिर्विधीयते सा वाचिकी यथा[2] -

"वेदमन्त्रसमुच्चारैरविश्रान्तं दिवा निशम् ।
जपैश्चारण्यकैश्चैव वाचिकी भक्तिरिष्यते ।।"

इन्द्रियनिरोधपुरःसरं व्रतोपवासनियमादिभिर्याऽनुष्ठीयते सा सकलक्षेमकरी भक्तिः कायिकी भक्तिर्निगद्यते यथा[3] -

व्रतोपवासनियमैः पञ्चेन्द्रिय जयेन च ।
कायिकी भक्तिराद्दिष्टा सर्वसिद्धि विधायिनी ।।"

एवमेवाग्रे तत्रैव लौकिक-वैदिकाध्यात्मिकभेदेभ्योऽपि भक्तेस्त्रैविध्यं प्रपञ्चितमस्ति । पद्मपुराणस्य आनन्दाश्रमनामसंस्करणे प्रथमं भक्तिः 'आध्यात्मिक लौकिक-वैदिक भेदेभ्यः' त्रिधा उक्ता । पुनः सा वैदिकी वाचिकी कायिकी भेदात् त्रिधा प्रोक्ता । पुनश्चैषा सांख्या-योगजा इति भेदाभ्यां द्विविधा विभज्यते । यथोक्तम्[4] -

---

1. पद्मपुराणपातालखण्डः, 85.5
2. तत्रैव, 85.6
3. तत्रैव, 85.7
4. पद्मपुराणम्, 5.15.164

"त्रिविधा भक्तिरुद्दिष्टा मनोवाक्कायसम्भवा ।
लौकिकी वैदिकी चापि भवेदाध्यात्मिकी तथा ।।"[1]

स्कन्दपुराणस्य प्रभासखण्डे त्रिविधभक्तेर्विवरणं प्राप्यते । श्रीमद्भागवते च नवधा भक्तिः प्रोक्ताऽस्ति । यथा -

"श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्
इति पुंसार्पिता विष्णौ भक्ति चेन्नवलक्षणा ।"

भक्तिरसामृतसिन्धौ नवधा भक्तेः फलमुक्तं यथा-[2]

"श्रीविष्णोः श्रवणे परीक्षिदभवत् वैयासिकिः कीर्तने ।
प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुःपूजने ।।
अक्रूरस्त्वभिवन्दने कपिपतिर्दास्येऽथ सख्येऽर्जुनः ।
सर्वस्वात्मनिवेदने बलिरभूत् कृष्णाप्तिरेषां परम् ।।"

एवमेकैकस्यापि भक्तिभेदनिषेवणं मोक्षत्वाय परम् किम्पुनः नवधा भक्तिसेवनेन । भगवानस्ति प्रेमस्वरूपः भक्तिश्च साधनसाध्यरूपा सिध्यति । "साध्यावस्थायां ज्ञानकर्मयोगादीनि भक्तेः साधनानि साधनरूपेण च भक्तेः साध्यं परमानन्दस्वरूपं परमात्मैव । भक्ताचार्यैः भक्तिं साध्यां मत्वैव प्रेमसाधनस्य प्राधान्यमनुशासितम् । देवर्षिणा नारदेन परमप्रेमस्वरूपा भक्तिः स्वीकृता शाण्डिल्येन महर्षिणा तु ईश्वरे पराकाष्ठाया अनुरक्तिरेव भक्तिः प्रोक्ता । यथा समुद्रजलं वाष्पमेघादिरूपेण परिणतं सत् पुनः वृष्टिनद-नदीद्वारा समुन्द्रमेवोपगच्छति तथैव प्रेमभवस्य भगवतः प्रेमधारा निःसृत्य भक्तहृदयं सिञ्चती पुनः प्रेमस्त्रोतःस्वरूपं परमात्माभिमुखं च व्रजन्ती तत्रैव निलीयते । इति दिक् ।

§3§ <u>भक्तिदर्शनयोः समन्वयः -</u>

यथा पदार्थादीनि न्यायवैशेषिकदर्शनपदार्थज्ञानेन निःश्रेयसाधिगमोऽभ्युपगम्यते । योगदर्शने च जीवेश्वरयोरेकत्वप्रतिपादनपूर्वकं समाधिना कैवल्यपथं

---

1. श्रीमद्भागवत, 7.5.22, 23
2. भक्तिरसामृतसिन्धौ, 1.2.129

निर्दिशति, साङ्ख्यश्च प्रकृति पुरुषयोर्विवेकज्ञानेनमुक्तिमार्गमुपदिशति, पूर्वमीमांसा च वैदिकैः कर्मभिः संस्कारशुद्ध्या निर्वाणोपलब्धिं प्रकटयति, वेदान्तं च ब्रह्मज्ञानेन मोक्षप्राप्तिमुद्भावयति तथैव भगवत्प्राप्तिनिश्चयोपलब्धिभूता भक्तिरपि भगवत्तत्त्वसाक्षात्कारद्वाराऽपवर्गद्वारमुद्घाटयतीत्यत्र नास्ति क्वचन् सन्देहः । स्थावरजङ्गमात्मके विशालेऽस्मिन् भूमण्डले संख्यातीतेषूद्भिज्जस्वेदजाण्डजजरायुजेषु योनिषु परिभ्रमन् प्रकृतिमातुरनुकम्पया अन्ते मानवदेहमाश्रयति प्राणी । उपलभ्य च मानवदेहं वासनाजालनिबद्धो जन्ममरणप्रवाहे प्रवहन् भगवद्भक्त्या आत्मसाक्षात्कारं कृत्वा परमानन्दस्वरूपं मुक्तिपदमधिगच्छति । भक्तशिरोमणिदेवर्षिनारदेन भक्तेर्मुक्तिप्रदत्वं स्पष्टमभिहितम् । लोककल्याणकामनया महर्षिभिरनेके मार्गा उपदिष्टा सन्ति श्रमसाध्या स्वर्गादिफलप्रदा वा, भगवत्प्राप्तिकरी भक्तिस्तु सर्वथा सुगमा । यथोक्तं नारदभक्तिसूत्रे[1] -

"श्रमसाध्याश्च ते सर्वे प्राप्य स्वर्गफलप्रदाः"

भगवद्भक्तिः साधकाय सर्वविधं फलं प्रयच्छति"। यतोऽसौ फलरूपा निखिलफलप्रदा । सर्वविधपुरुषार्थलक्ष्यभूतो मोक्ष एव अतस्तत्प्राप्तिरेवान्तिमः पुरुषार्थः । भारतीयदर्शनशास्त्राणामयमेव ध्येयः । भक्तिरपि परमपुरुषार्थरूपनिःश्रेयसफलप्रदत्वात् फलरूपा । धर्मार्थकाममोक्षाः पुरुषार्थाश्चतुर्धा विभक्ताः तेषु कामार्थौ धर्माधीनौ मोक्षश्च धर्मस्य फलरूपः अतः मोक्षप्रदायिनी भक्तिफलप्रदा । भगवद्भक्त्या भुक्ति-मुक्ति-सिद्धि-परमानन्दादि सर्वं सम्पद्यते । यथोक्तं भक्तिचन्द्रिकायामपि[2] -

सिद्धयः परमाश्चर्या भुक्तिर्मुक्तिश्च शाश्वती ।
नित्यं च परमानन्दो भवेद् गोविन्द भक्तितः ।।

तथा च श्रीमद्भागवतेऽपि महामुनिः भगवान् कपिलो निजजननीप्रति प्राह[3] -

"वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानं यद् ब्रह्मदर्शनम् ।।"

---

1. नारदभक्तिसूत्रम्, 1.56
2. भक्तिचन्द्रिका, 31
3. श्रीमद्भागवत, 3.29

अपि च -

"भक्तेस्तु या पराकाष्ठा सैव ज्ञानं प्रकीर्तितम् ।
यस्यां तदतिरिक्तं तु न किञ्चिदपि भाव्यते ।।"[1]

देवीभागवतस्यानया उक्त्या ज्ञायते यत् परमात्मनः स्वरूपज्ञानं पराभक्तिश्चैकमेव तत्त्वम् । स्वरूपज्ञानोदये द्वैतभावो विनश्यते साधकश्च ब्रह्मरूपे ब्रह्मभावमाप्नोति । एवं भक्तिज्ञानयोरैक्यमेव इत्यत्र नैव कस्यापि विपश्चितो विप्रतिपत्तिः ।

§4§ भक्तिज्ञानयोः समन्वयः -

भारतीयधार्मिकदार्शनिकक्षेत्रे त्रिपथगायाः गङ्गायाः धारावद् भक्तिः-ज्ञान-कर्मणां तिस्रश्चिन्तनधाराश्चिरकालतः प्रवहन्त्यो दरीदृश्यन्ते ।मानव-कल्याणकामनया दुःखमपनेतुं च भारतीयैर्मनीषिभिः त्रयमेतद् साधनरूपतयासमुपस्थापितम् । वैदिककाले भक्तेः, ब्राह्मणकाले कर्मकाण्डस्य, उपनिषत्काले च ज्ञानस्य प्राधान्यं दृश्यते । पुनः पुराणकाले च भक्तेरेव प्रामुख्यं जातम् । ज्ञानयोगिनः कर्मयोगिनो भक्तियोगिनश्च स्वस्वोपासनानुसारं कृतकृत्याः सन्तः ब्रह्म-सायुज्यं लभन्ते । अतो दर्शनशास्त्रेषु साधनविषये परस्परं मतभेदेऽपि लक्ष्यसिद्धौ नास्ति मतभेदः ।दण्डचक्रवीवरन्यायेन त्रयाणामेवान्योऽन्यसम्बन्धः प्रतीयते । अत एवापौरुषेयो वेदः कर्मोपासनाज्ञान काण्डैस्त्रिधा विभक्तो विद्यते ।

"ऋतेज्ञानान्नमुक्तिः" "ज्ञानादेवास्तु कैवल्यम्" "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते" इत्यादि सिद्धान्तानुसारं मोक्षोपलब्धिसाधनस्य ज्ञानस्यापि साधकोऽन्ते सर्वात्मनाऽऽत्मानं श्री भगवते समर्पयति । एवमिदं समर्पणमपि शरणागतिर्भक्तिः । एनामधिगन्तुमपिऽपि ज्ञानकर्मणीसाधने स्तः । भक्तिश्च भगवता महात्मनः साक्षात् सम्बन्धं स्थापयति । अतः ज्ञानकर्मणोर्द्वयोर्गरीयसी भक्तिरिति सिद्धम् । ज्ञानकर्मणोश्चपर्यवसानं भक्तावेवभवति । विकासक्रमे ज्ञान-कर्मणोरूर्ध्वं भक्तिः विराजते उभे अपि ज्ञानकर्मणी भक्त्युपलब्धये समाने साधने । परं परमपदप्राप्तये भक्तिः स्वयं साधनरूपाऽस्ति । यदा भक्तः साधने एव

---

1. देवीभागवतपुराणम्, 2·37·28

रसमनुभवति तदा तत्फलात् स उदासीनो भवति तदेव साधनं साध्यं भवति । भक्तिर्हि साधकेभ्यः परमेश्वरपदप्राप्त्यै मधुरं फलं प्रदत्ते । कर्मयोगः शास्त्रविहितो वर्णाश्रमधर्म एव कथ्यते यत्र भगवत्परिचर्याविषयकं कर्मापि सन्निवेश्यते । कर्मयोगस्यफलमस्ति अन्तःकरणशुद्धिः । अतोऽन्तःकरणशुद्ध्यै कर्मानुष्ठानं विधेयम् । अन्तःकरणे शुद्धे सति भगवत्कथादिश्रवणेन चित्तस्यद्रवत्वात् सहसैव भक्तिरुदेति । एवं ज्ञानयोगस्यापि परमं लक्ष्यं भक्तियोग एव अस्ति । भक्तियोगेन निरन्तरं भगवन्तं भजतां भक्तानां हृदयेषुप्रविश्य भगवान् तद्गताः सर्वावासना समूलमुन्मूलयति । एवं कर्मयोगस्य ज्ञानयोगस्यापि चान्तिमं लक्ष्यं भक्तियोग एव । कर्मज्ञानवैराग्यादिभिर्यत् फलमवाप्यते तत्सर्वं भगवद्भक्त्या भगवत्भक्तः प्राप्नोति । स्वीकुर्वन्ति केचनाचार्याः यज्ज्ञानवैराग्यादयः भक्तेरङ्गानि भक्तिश्चाङ्गी, अङ्गानि ह्यङ्गाश्रिता कार्याणि सम्पादयन्ति । भक्तेरुत्कर्षं द्योतयितुमेव गीतायामपि कर्मज्ञानयोर्मध्ये भक्तेः स्थापना कृताऽस्ति । अष्टादशाध्यायेषु आद्याः षडाध्यायाः कर्मयोगमुपदिशन्ति। ततः परं मध्यवर्तिषु षड्सु च भक्तियोगमाहात्म्यमाम्नातम्, अवशिष्टेषु चान्ते ज्ञानयोगरहस्यमुद्घाटितम् । आशयममुं व्यनक्तिमधुसूदनसरस्वती महाभागः । यथा -

"भगवद्भक्तिनिष्ठा तु मध्यमेपरिकीर्तिता ।
उभयानुगता सा हि सर्वविघ्नापनोदिनी ।।"

कलिकाले तु ज्ञानवैराग्याद्यो श्रमसाध्यत्वात् कलिकालिकमानवानां च रजसतमसगुणयोः प्राधान्यत्वाद् भक्तिरेव गरीयसी मुक्तिदा च । यथोक्तम्-[1]

"योगसिद्धिफलोनास्ति ज्ञानं भूरिश्रमैर्नृणाम् ।
मुक्तिदैकैव यद् भक्तिः स मुकुंदोऽस्तुमदाश्रयः ।।"

अतो भक्तिरेव मुक्तेः सुगमोपायोऽस्ति । यथोक्तं केनापि अन्येनापि -

"भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येन केनचित् ।
प्रीयतेऽमलया भक्त्याहरिरन्यद्विडम्बनम् ।।"

---

1. वासुदेवसानन्दम्, पृ. 118

अपि च[1] -

"एतावानेव लोकेऽस्मिन् पुंसां निःश्रेयसोदयः ।
तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरम् ।।"

एवं पूर्वविवेचनेन ज्ञायते यद्दर्शनेषु मीमांसादर्शनं कर्मकाण्डं समर्थयति, वेदान्तदर्शने ज्ञानमार्गः प्रशस्यते । मीमांसकाः कर्मसाक्षाद्मुक्तिसाधकमत्वा ज्ञानं तदङ्गत्वेन मन्यन्ते, वेदान्तिनश्च ज्ञानमेव मोक्षस्य मुख्यसाधनं मत्वा कर्म केवलं बुद्धिशुद्धिप्रयोजकं गौणसाधनं स्वीकुर्वन्ति । एवं कुमारिलभट्टः कर्ममार्गस्य प्रमुख आचार्यः श्रीशंकराचार्यश्च ज्ञानमार्गस्यप्रवर्तकः पुनश्च देवर्षिशाण्डिल्यादयश्च भक्तेः प्रतिष्ठापका आचार्याः बभूवुः । त्रिष्वेषु ज्ञान-कर्म-भक्तिमार्गेषु असिधारावत्तीक्ष्णोदुर्गमाच न सर्वैः सहसा गन्तुं शक्यते, कर्म तु ऐहिकजीवनस्य सुखसाधनमात्र न तत्र त्यागवैराग्ययोः सम्भवति संस्पर्शः, कुतस्तत्र सामर्थ्यमात्यन्तिकस्य सुखस्येति भक्तिरेव सुलभतमं साधनम् । यत्र भक्तवत्सलस्य भगवतोऽनुकम्पया शरणागतो भक्तोऽनायासेन संसारसागरादुत्तर्तुं समर्थो भवति । "सा तु कर्मज्ञानेभ्योऽप्यधिकतरा"[2] "तस्मात् सैव ग्राह्यामुमुक्षुभिः"[3] "अन्यस्मात् सौलभ्यं भक्तौ"[4] शान्तिरूपात् परमानन्दरूपाच्च"[5] इत्यादिभिर्नारदभक्तिसूत्रैर्भक्तेर्महत्ता श्रेष्ठत्वं च सिध्यति । भक्तिर्मानवस्य नैसर्गिकी मनोभावना । लोकेऽपिदृश्यते यदा मानवस्यात्यन्तापत्तिकाल उपस्थितो भवति स लौकिकं कमपि सहायकं तदापत्तिनिवारणे समर्थं न पश्यति तदा तस्य "लोकोत्तरः कोऽपि सर्वसमर्थोऽस्ति यो मम दुःखमपहरिष्यति" इति भावना जागर्ति । न केवलमीश्वरविश्वासिनो अपितु संकटावस्थायां नास्तिकेष्वपि भावनेयमुदेति । नैव तदा ज्ञानकर्मणोः प्रवृत्तिर्जायते परं भक्तावेव । अनेनापि ज्ञानकर्मणोर्भक्तेः श्रेष्ठत्वमेव सिध्यति अतः ज्ञानकर्मणोः भक्तिर्गरीयसीति निश्चप्रचम् । नैव अत्र काप्यतिशयोक्तिः ।

---

1. श्रीमद्भागवत, 3.25.44
2. नारदभक्तिसूत्रम्, 25
3. तत्रैव, 33
4. तत्रैव, 58
5. तत्रैव, 60

§5§ काव्येषु भक्तिः -

"नारदीय-भक्तिसूत्रम्" शाण्डिल्यभक्तिसूत्रं च भक्तेः प्रतिष्ठापकत्वेन स्वीक्रियेते । पश्चाच्च भक्तिरसपरम्परा इव प्रचलिताऽभूत् । भक्तिरसाचार्यैर्भक्ति-विषये "भक्तिरसामृतसिन्धु" "भक्तिरसायनम्" भक्तिरसतरङ्गिणी चेत्यादिनाम-भिर्भक्तिरसपोषकाग्रन्थाः निर्मिताः । भक्तेः रसत्व बीजं वेदेषु वर्तताम् संहिता-ग्रन्थेषु चापि तदंकुरितं भवतु परं भक्तेः रसत्वस्थापना तु स्पष्टरूपेण पुराणेष्वेव वर्तते । वेदेवैदिकदेवेषु "इन्द्रः" शौर्यस्य प्रतीकः प्रोक्तः । दस्यूनां दमने मानवा तस्य साहाय्यं कामयन्ते स हि न केवलमुपासकानां सखा, माता, पिता वा स्वीकृतोऽस्ति, अपितु पितॄणामपि श्रेष्ठतमो वर्णितोऽस्ति । यथा -

"त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ, आधा ते सुम्नमी-महे" अपि च-[2]

"सखा पिता पितृतमः कर्तेमु लोकमुशते योधाः" इत्यादौ देवानां स्तवन-काले स्तोतॄणां हृदयेष्वनुरागविशेषस्य सत्तायाः पूज्येष्वनुरक्तिसूचकभक्तेरपि स्फुट आभासः प्रतीयते । एवमेव श्वेताश्वतरोपनिषदि भक्तिशब्दप्रयोगो यथा -[3]

"यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ ।

तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ।।"

भक्तिप्रतिष्ठापकशाण्डिल्येन स्वकीये भक्तिसूत्रे स्पष्टरूपेणोक्तं यद् भक्तिः श्रुतितो ज्ञातुं शक्या "भक्तिप्रमेया श्रुतिभ्यः"[4] इत्यादौ । इत्थं यथा वेदो ज्ञानकर्मणोरुद्गमभूमिरस्ति तथैव स भक्तेरप्युद्गमस्थली इत्यत्र नास्ति काचित् संशीतिः ।

लौकिक संस्कृत भाषायाः आदि महाकाव्यं रामायणं श्लोकोऽभूत् क्रौञ्च-द्वन्दवियोगी तथाऽर्क सकलगुणनिलयस्यपुरुषस्य जिज्ञासया समुद्भूतमस्ति । तद्रामायणं

---

1. ऋग्वेदः, 8.98.11
2. तत्रैव, 4.17.17
3. श्वेताश्वतरोपनिषद्, 6.23
4. शाण्डिल्यभक्तिसूत्रम्, 1.1.2.9

सर्वैरेव भक्तिग्रन्थत्वेन स्वीक्रियते । तत्र हि हनुमच्छबरीप्रभृतीनां भक्तिनिदर्शनं विदितत्रमेव समेषाम् । एवं महाभारतेऽपि भक्तितत्त्वबाहुल्यात् तस्य भक्तिग्रन्थसिद्धिः सुस्पष्टैव । तदितरसंस्कृतकाव्यानि भागद्वये विभक्तुं शक्यन्ते । रामकृष्णशिवादिभावचरितात्मकानि नलदुष्यन्तादि प्राकृतनायकचरितात्मकानि चेति । तत्र भावचरितात्मकानि काव्यानि प्रायः कविभिर्भक्तिभावनया निर्मीयन्ते । परं प्राकृतकाव्यारम्भेष्वपि प्रायः कवयः स्वभक्तिं प्रदर्शयन्ति एव। इत्थं संस्कृतकाव्येषु भक्तेरनिवार्यत्वं न स्यात् बाहुल्यं तु वर्तत एव । रामायण-महाभारतानन्तरं लौकिकसंस्कृतकविष्वश्वघोषः प्रसिद्धिमुपागच्छत् । यस्य "बुद्धचरितम्" सौन्दरनन्दं चेति महाकाव्यद्वये आस्ताम् । ते द्वे अपि काव्ये बुद्धभक्त्याऽनुप्राणिते-स्तः । अश्वघोषानन्तरं दृश्यकाव्यपरम्परादरीदृश्यते । तत्रादौ भासः । यस्य प्राकृतनायकात्मकानि रामकृष्णचरितात्मकानि च द्विविधानि नाटकानि सन्ति। श्रीकृष्णस्य जन्मतः कंसवधान्तं "बालचरितम्" श्रीकृष्णस्य च पाण्डवानां दूतत्वेन दुर्योधनसमीपे सन्ध्यर्थं गमनकथात्मकं "दूतवाक्यम्" इति द्वे नाटके कृष्णचरिते "प्रतिमाभिषेकनाटकम्" चेति द्वे रामचरिते विरचितानि ।

कालिदासस्य कुमारसम्भवस्तु तदिष्टदेवस्य चरित्रात्मकं महाकाव्यमस्ति इति स्पष्टमेव । रघुवंशविक्रमोर्वशीयाभिज्ञानशाकुन्तलादिषु नैव भक्ति-तत्त्वचित्रणं परमेतेषां वन्दनायां शिववन्दनैवास्ति । इत्थं बहुधा संस्कृत-काव्यजगति सर्वत्र रामकृष्णविष्णुशिवप्रभृतयः परमेश्वररूपेण वर्णिताः सन्ति। प्राकृतनायकप्रधानकाव्येष्वपि मङ्गलाचरणादिषु पद्येषु तत्तत्कवीनां भक्तिपरत्वमेव-व्यज्यते । पुनर्येषां काव्यनाटकादीनां नायकरूपेण ते रामादयः प्रतिपद्यन्ते तत्रापि कवेर्भक्ति सुस्पष्टैव । दृश्यकाव्यपरम्परायां भासस्य दूतवाक्यं बालचरितम्, प्रतिमानाटकम्, अभिषेकनाटकम्, भवभूतेः "उत्तररामचरितं, महावीरचरितं, भट्टनारायणस्य वेणीसंहारं, राजशेखरस्य बालरामायणं, जयदेवस्य प्रसन्नराघवः रामभद्रस्य जानकीपरिणयः कविकर्णपूरस्य चैतन्यचन्द्रोदयश्चेत्यादीनि नाटकानि भक्तिरसयुतान्येव सन्ति ।

प्रतीकनाटकेषु बहुधा दर्शनसिद्धान्तमप्याकलम्बनं दृश्यते । दर्शनसिद्धान्त-

-विशेषमङ्गीकृत्य विरचितानि नाटकानि इमानि प्रकारान्तरेण भक्तिं प्रतिपादयन्त्येव समानफले हि भक्तिदर्शनयोः । मोक्षावाप्तिरूपपर्यवसानं प्रायशः समेषां प्रतीकनाटकानां भक्तिश्चापि मुक्तिसाधिका एव । अतः काव्यक्षेत्रे भक्तेः साम्राज्यमस्तीति कथनं नैवातिशयोक्तिमुपगच्छति । इति ।

= = = = = = =

# अष्टमोऽध्याय:

## ब्रह्मानन्द: काव्यानन्दश्च

क) आनन्द स्वरूपं, रसस्य मनोवैज्ञानिकता च

ख) रसस्योद्गम:

1) रससिद्धान्त:

2) रससम्प्रदाय:

3) रससूत्रस्यव्याख्या अथवा रसनिष्पत्ति:

ग) प्रबोधचन्द्रोदयस्य रसविवेचनम् ।

= = = = = =

"यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचनेति ।"[1]

अपि च[2] - "स एष रसानां रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः" इत्यादिश्रुतिवचनैर्ब्रह्मानन्दस्यात्मनः स्वरूपत्वं ज्ञायते । यस्यानुभूतिश्च तुरीयावस्थायां भवति, यस्यां चावस्थायां "कोऽहम्" किमपि च तत् "कोऽयमत्रप्रपञ्चः" इत्यादिकं सर्वमपि विलीयते । तत्समो नैवास्ति कोऽप्यानन्दः ।

काव्यस्याध्ययनश्रवणाभ्यां नाटकस्य च दर्शनादुद्भूतोऽऽनन्दः काव्यानन्दाख्यां लभते । काव्यानन्दस्य स्थितिरेकतो लौकिकभावनागता वर्तते, अपरतश्चाध्यात्मिकक्षेत्रगता । लौकिकभावनास्थितो स्थितिरियं सुखं दुःखं च उत्पादयति । परिमितः रसो यद्यपि लौकिकसाधनसमुद्भूतः परं सः सुखस्वरूपः सुखात्मको भवति, इदं सुखमसामान्यत्वाल्लोकोत्तरमुच्यते । आनन्दो हि ब्रह्मानन्दसहोदर आनन्दस्याभिव्यञ्जकश्चैतन्यचमत्कारो वा "रसः" इत्युच्यते ।

कः आनन्दस्वरूपं रसस्य मनोवैज्ञानिकता च -

कमनीयकाव्यकल्पनाकवेः कर्म, कमनीयकल्पनयासकलानन्ददायककाव्यसर्जनेनोपकरोति स समाजं साहित्यं चापि । पौराणिक दार्शनिकप्रभृत्यो कुर्वन्ति यस्य तत्त्वस्याभिव्यक्तिं विदधति तस्यैव तत्त्वस्य स्वकीयया काव्यकलया कविरपि करोति । स हि काव्यकलाभिधापद्धत्या परमार्थं सौन्दर्यमयं विदधत् समुपस्थापयति । तत्प्रस्तुतीकृतं सत्यं नैव पुराणवत् विस्तृतं

---

1. तैत्तिरीयोपनिषद्, 1.5
2. छान्दोग्योपनिषद्, 3.13.7

क्लिष्टं वा नैवदर्शनवन्नीरसं प्रत्युत मधुरं सुन्दरमानन्दमयं चावतरति । इदं सुन्दरमधुरानन्दमयसत्त्वमेव "रस" इत्युच्यते । "रस" इत्येतत्पदं "आस्वादस्नेहनयोरित्येतस्माद्धातोरपि व्याक्रियते निष्पद्यते वा "रस्यते साक्षात्कर्तृभिः" किमप्यसामान्यं निसर्गसुन्दरं वस्तुविलोक्य हृदये मनसि वा या आस्वादसम्बन्धिनी भावनोत्पद्यते सैव 'रस' इति नाम्ना व्यपदिश्यते । स्वादवान् स्वाद्यः पदार्थो रसनायां जलं जनयति अत एव जिह्वा "रसना" इति नाम्ना अप्यभिधीयते । कृतास्वादक्रियया सुखं संतुष्टिर्विश्रान्तिर्वा अनुभूते । रसपदमिदं व्यापकार्थेन सशोभते शब्दसंसारे । स लौकिकान् पदार्थानिकतोऽभिव्याप्योद्दीप्यते एकतश्च लोकोत्तरानपि पदार्थानाच्छाद्य आध्यात्मिके लोके तस्य तत्त्वस्य श्रीचरणयोर्विलुण्ठमपि दृश्यते । यत्तत्त्वं "सत्" वा "परब्रह्म" इति कथ्यते । सारतः 'परब्रह्म' रस इत्यनेन नामान्तरेण प्रोच्यते "स एव रसानां रसतमः परतमः" इति छान्दोग्योपनिषद्वचनमपि द्रष्टव्यम् । अपि च विश्वनाथोऽपि साहित्यदर्पणे "सत्त्वोद्रेकाखण्डस्वप्रकाशानन्दचिन्मयः" इत्यादिभिः समर्थनं विदधाति सत्यस्यास्य। ? आनन्दावस्थायां जीवः प्रतीतिमनुभवति । जीवानां सकलोऽपि व्यापारो रसाभिलाषमूलः यतो हि रसः नैवानन्दाद् व्यतिरिक्तः । भावोऽयं यद्रसः काव्यास्वादः स वा स्वादः खलु आनन्दमयः । पण्डितराजेन जगन्नाथेन त्रिविध-आनन्दः प्रोक्तः - विषयानन्दः-लौकिकसुखमपि कथ्यते । आनन्दाभासः-चैतन्याभासेनाभासितानामन्तःकरणवृत्तीनां विषयसामञ्जस्येन जायमानोऽन्तः-करणवृत्तिविशेषरूपः । ब्रह्मानन्दो विशुद्धात्मानन्दो वा-निरुपाधिकचैतन्य-स्वरूपानन्दः । काव्यानन्दो रसो वा सोपाधिक-आत्मानन्दः-विशुद्धरत्याद्युपाधिनोपहितचैतन्याकारश्चित्तिविशेषानन्दः । एवं गुणमात्रेणैव काव्यानन्दो ब्रह्मानन्दाद् विभिद्यते । काव्यानन्दब्रह्मानन्दौ किलैकस्यात्मानन्दस्य द्वौ भेदौ । काव्यानन्दे विशुद्धः साधारणीकृतो वा रत्यादिभूमिकां वहति । अत एव स अस्थायी सोपाधिकश्च । ब्रह्मानन्दे तु नैतादृशः कश्चिदपि विषयो भूमिकावहः, अत एव स स्थायी निरुपाधिकश्च । अभिनवगुप्त-जगन्नाथाद्यः संस्कृत साहित्य-मनीषिणः काव्यानन्दमात्मिकानन्दस्यैवैकं रूपं मन्यन्ते । आनन्दमयत्वात् स

ब्रह्मानन्द सहोदरत्वाय कल्पते । निजशरीरमिवैकत्वेनानुभूयमान: स लोकोत्तर-चमत्कारचारु: । यथा देहात्मानौ वस्तुतो भिन्नावपि "अहं यामि"-इत्यभिन्न-त्वेन प्रतीयते तथैवात्राप्यभिधेयम् ।

पूर्वोक्तेषु त्रिष्वानन्देष्वादिमो विषयानन्दो लौकिकानन्दो वा सांसारिक-पदार्थपरको वर्तते । द्वितीयश्च ब्रह्मनिष्ठो भवति योगिभिरनुभूयमान:। एष ब्रह्मानन्द एव वस्तुत आनन्दो भवति लौकिकानन्दस्य मनागपि स्पर्शाभावात्। काव्यानन्दस्तु काव्याध्ययन श्रवणाभ्यां नाटकदर्शनाच्च प्राप्यते । अत्र लौकिका-नन्दे मानवस्य रजोगुणस्तमोगुणश्च संपृक्तो भवति सत्त्वगुणश्च तिरोहित इवावति-ष्ठते । काव्यानन्दे च रजस्तमश्च तिरोहिते सत्त्वगुणश्चोद्दीप्त इव प्रतिभाति । परमाध्यात्मिके ब्रह्मानन्दे अनन्य: सत्त्वगुण एव उद्दीप्ते । एवं ब्रह्मानन्दो द्वावप्यानन्दो पराभूताभिद्योतते । अत अयं ब्रह्मानन्दो द्वाभ्यामपि ताभ्यामानन्दा-भ्यां गरिष्ठ: ।काव्यानन्दश्च लौकिकानन्दप्रतिकूल्याद् आनन्दमयाल्लोकोत्तर-चमत्कारचारुत्वाच्च ब्रह्मानन्दाभिमुख एव ।

रसानुमिति या आड्.गल भाषायां ( Aesthetic experience or Poetic Pleasure ) इति संज्ञया अभिधीयते तत्स्वरूपमधिकृत्य प्रतीच्यानां विदुषां विविधानि मतानि यत्र तत्र बहुधा विवेचितानि दृश्यन्ते । दिड्.मात्रेण प्रस्तूयन्ते तान्यपि - यथा -

रसानुभूतिरिन्द्रियलभ्येत्युक्त्वा प्लेटोमहोदय आध्यात्मिकी-अनुभूति-रिन्द्रियगोचरानुभूतिश्चेति रूपेण द्विविधा अनुभूतिरिति स्वीकरोति ।

अरस्तुमहोदयोऽपि काव्यानन्दमाध्यात्मिकमस्वीकृत्येन्द्रियमेवावगच्छति । एवं काव्यानन्दं प्रत्येन्द्रियज्ञानात् सूक्ष्मतरं ज्ञानमिति दार्शनिकस्यास्य मतम् ।

"काव्यानन्दमाध्यात्मिकम्" इति मतस्य प्रतिष्ठात्मकस्तु "प्लोटिनस्" महाभाग आसीत् तेन हि "कलाप्रकृतिमनुसरति" इति "प्लेटो" मतं निराकृत्योक्तं यत् प्रकृतिरात्मनो ज्ञानस्य वा अनुकृति: । प्रकृते: कलायाश्चोद्भवो ज्ञानाद् भवति। ज्ञानं हि आत्मस्वरूपम् । अत: कला उत वा काव्यजनितानन्दोऽप्याध्यात्मिको वर्तते । विरोधेऽस्मिन् मार्क्सफ्रायडादिभि: स्वसिद्धान्ता: प्रतिपादिता: । फ्रायडमते कलानुभूति: कामप्रेरितेन्द्रियास्वादो मार्क्समते च कलानुभूतिरार्थिक-हितानुशासित-भौतिकानुभूतिरस्ति ।

पाश्चात्यमनीषी एडिसन्महोदय: कल्पनापरक: काव्यानन्द इति स्वीकरोति अतस्तमैन्द्रियाध्यात्मिकानन्दाभ्यां भिन्नमवगच्छति ।

कला काव्यं वा कल्पनाजनितज्ञानं तज्ज्ञानं च सहजानुभूतिरत: काव्यानन्द: सहजानुभूतेरानन्द इति क्रोचे महोदयस्य मतम् । मतमिदम् एडिसनस्यैव कल्पनानन्दस्य मनोवैज्ञानिका प्रस्तुतिरिति प्रतिभाति ।

एतदतिरिक्तं ब्रेडले-क्लाइव-वेलादय: पाश्चात्या-काव्यानन्दमनिर्वचनीयं विलक्षणं सर्वविधलौकिकाध्यात्मिकानुभवभिन्नं चोररीकुर्वन्ति ।

इत्थं पाश्चात्यविचारकैरानन्द ऐन्द्रियानुभूतिराध्यात्मिकानुभूति: सहजानुभूति:कल्पनाविषयो, विलक्षणो, अनिर्वचनीयश्चेति रूपेण प्रतिपादित: । तत्र प्रथममैन्द्रियानुभूति: स्वीक्रियते चेत्तर्हि शोकाद्यनुभूत्यां शोकोद्बोधेन भवितव्यम् परं काव्यानुभूत्यान्तु तत्राप्यानन्दमयीस्थितिरवलोक्यते । अत आनन्द-इन्द्रियानुभूतिरिति कथं नैव समीचीनम् ।

एवमेव काव्यानन्द: सहजानुभूति: कल्पनानन्दोऽपि वा नैव सम्भवति । कल्पनाया नैव स्वतन्त्रसत्ता तस्या मनोबुद्ध्यधीनत्वात् । कल्पना हि मनसो बुद्धेर्वा क्रिया । परमानन्दो हि स्वतन्त्रानुभूति: ।

आनन्दस्य निर्वचनीयत्वस्य विलक्षत्वस्य च प्रतिपादनं नानन्दस्वरूपप्रतिपादन-मस्ति । कथमेऽस्मिन् स्वरूप-प्रतिपादने पराङ्मुखता द्योत्यते । अपि चानिर्वचनीयेन विलक्षणेन च ज्ञायते यदयं नैवेहलौकिक: सामान्यजीवनगतोऽनुभवोवा अत एवा-निर्वचनीयो विलक्षणश्च । परमेतत्तु नैव युक्तियुक्तं प्रतिभाति ।

अपरेणोक्त-आनन्द: किलात्मानन्दरूपम् अथवा आध्यात्मिकं इत्यत्रापि दु:शकं प्रतीयते । प्रथमं तु आत्मनोऽस्तित्वं स्वरूपं चाद्यत्वे वैज्ञानिककाले विवादास्पदम् । अपरमाध्यात्मिकानुभूत्यां तत्र नितरां शुद्धत्वाद् विकाराभाव एव परमत्र तु वीरभयानककरूणादीनामनुभूत्यां विकार-स्थिति: स्वत एव जायते एवं मतमिदमपि निरस्तमेव ।

काव्यानन्दो लौकिक: परं लौकिकानन्दस्यापि नैयत्ता, नैव सर्वेऽपि लौकिका आनन्दा एकरूपा एव । भिद्यन्ते ह्यानन्दानुभूति: यथा सुस्वादुभोजनानन्दस्य

गणितप्रश्नसमाधानजन्यानन्दस्य च भेद: सुतरामनुभूयते । समेषामेव भौतिकानन्दानां नैजं वैशिष्ट्यम् । काव्यानन्दश्च सर्वेभ्यो भौतिकेभ्य आनन्देभ्योऽतिरिच्यते । परमाध्यात्मिकानन्दोऽपि नैव वाचो विषयस्तस्य हि स्वस्यवैशिष्ट्यविशेषाधानात् । न चायमैन्द्रियानन्दस्तेषामतिगम्यत्वात् । नैव च ब्रह्मानन्दोऽपि सोपाधिमत्त्वात् । अत एव काव्यशास्त्रिभिर्ब्रह्मानन्दसहोदर इति कथितम् । ब्रह्मानन्दसहोदरेणैव ब्रह्मानन्दो रसमर्मज्ञै: स लोकोत्तरानन्द इति कथित: । "लोकोत्तर" इत्यत्र लौकिकानन्दस्यातिशायित्वमवगन्तव्यम्, नैवालौकिकत्वम् । अतो लोकोत्तर ब्रह्मानन्दसहोदरपदवाच्य आनन्द: इति ।

ख) रसस्योद्गम: -

"पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिता ।
वेदा: स्थानानि विद्यानां धर्मस्य च ते चतुर्दश ।।"

अनेन न्येन वेदा एव सर्वविद्याधिष्ठानत्वेन स्वीक्रियन्ते । अत: रसस्य उद्गमोऽपि वेदमूलक एव । श्रूयते हि तत्र रसशब्दस्य प्रयोगोऽर्थान्तरेषु यथा ऋग्वेदे[1] - "मध्वो रसभृग्भमस्ति ..." इत्यत्र सोमरसवाचक: शब्दोऽयम्, "यो व: शिवतमो रसस्तस्य भाजयेह न:"[2] इत्यत्र जलार्थद्योतक: रसशब्द:, " अञ्जन त्येन मध्वो..."[3] इत्यादौ दुग्धवाचक: "नमो व: पितरो नमो व: पितर: शोषाय नम: पितरो जीवाय"[4] इत्यादि यजुर्वेदीयश्वासु शब्दोऽयमेव वसन्तर्तुवाचक:, "यस्ते रस: सम्भृत औषधीषु"[5] इत्यत्र सुरासम्वद: रसशब्द:, "हे अरस । रसो रेत::..."[6] इत्यादिषु चाथर्ववेदमन्त्रेषु वीर्यार्थको रसशब्द:प्रयुक्तोऽस्ति । एवमन्यत्रापि औषधिवाचक:,[7] वृष्टिजलार्थे[8] गोरसदुग्धदधिघृतादि वाचकत्वेन[9] सोमरसार्थेऽपि[10]

---

1. ऋग्वेद:, 5.43.4
2. तत्रैव, 9.27
3. तत्रैव, 9.109.20
4. यजुर्वेद:, 2.32
5. तत्रैव, 9.27
6. अथर्ववेद, 6.138.3
7. तत्रैव, 2.4.5, 31
8. तत्रैव, 3.13.5
9. तत्रैव, 3.28.4; 19.31.4
10. तत्रैव, 9.4.5

चाथर्ववेदे रसशब्दप्रयोगोऽवलोक्यते ।

काव्यशास्त्रिभिरूपनिषद्प्रमाणैरसस्यानन्दस्वरूपत्वं साधितम् । अथर्ववेदीय-मन्त्रेणापि पुष्टिरस्य भवति । यथा -

"अकामो धीरो अमृत: स्वयंभू: रसेन तृप्तो न कुतश्चनोन: ।
तमेव विद्वान् न बिभाय मृत्योरात्मानं धीरमजरं युवानम् ।।"[1]

इत्यत्र "रसेन तृप्तो" इत्यनेनाऽऽत्मना तृप्त:, आनन्देन तृप्तो वा स्पष्टरूपेणावगम्यते । अत: काव्यशास्त्रे प्रसिद्धो "रसात्मवादो वेदमूलक एवेति सिद्ध्यति । वेदवद् ब्राह्मणारण्येष्वपि रसस्य प्रयोगो बाहुल्येन बह्वर्थेषु च दृश्यते । उपनिषत्सु च रसशब्दोऽनेकार्थकोऽपि सन्नात्मार्थे परमात्मार्थे वा प्रयुक्त: । यो हि लौकिक काव्य-शास्त्रे रसशब्देन काव्यात्मभूतस्य रसस्य प्रतीतौ प्रेरणा प्रदायको जात: ।

लौकिकसंस्कृतस्यादिमसंस्कृतमहाकाव्यस्य रामायणस्य रचना शोकस्य-स्थायिभावमूलत्वेन करुणरसेन परिप्लुता वर्तते । शोकार्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा[2] इत्यादिभिर्महर्षिणा श्लोकस्य कारणत्वेन करुणस्थायिभाव: शोक: प्रकाशित: स्वकीयं काव्यमङ्गीभूतै: श्रृङ्गारकरुणहास्यरौद्रभयानकवीरादिभि: रसैरपि समन्वयं तस्य निरूपितम् । पञ्चमवेदरूपं महाभारतं यद्यपि कुरुपाण्डवानां युद्धं प्राधान्येन वर्णयन् वीररसप्रधानम्, तथापि निर्वेदपर्यवसायित्वेन शान्तरसप्रधानं ग्रन्थमुद्घोषितं मनीषिभि: काव्यमर्मज्ञै: यत्राङ्गतया सर्वेऽप्यन्या रसा: समावेशिता: । एवं वेदादारभ्य नानार्थद्योतकोऽयं रस शब्द आत्मानन्द-रूपार्थे पर्यवसतीति सुनिश्चितम् ।

1· <u>रससिद्धान्त:</u> -

रसशब्दोऽयं "रस्यते-आस्वाद्यते" इति व्युत्पत्त्या निष्पद्यते ।[3] व्याकरणमयेयथा-"रस्यते आस्वाद्यते इति रस:, रस्यते अनेन इति रस: रसति रसयति वा रस:, रसनं

---

1· अथर्ववेद, 10·8·44

2· वाल्मीकि रामायणम्, 1·2·18

3· काव्यात्ममीमांसा, पृ· 12-13

रस आस्वाद:"। इत्यत्र प्रथमव्युत्पत्त्या रसशब्द: परमात्मरूपरस, मधु, सोम, गन्ध, मधुरादींश्च द्योतयति । अपरया च गुणवीर्यरागदेहादिद्योतकोऽस्ति। अन्यथा च धातुसारद्रवजलपदार्थान् बोधयति । "रसनं रस: आस्वाद:" इति इतरया च रसशब्द: श्रृंगारादिरसान् व्यनक्ति। भावोऽयमेव यद् येन भावा आस्वाद्यन्ते स रसपदवाची"ति । आस्वाद्यत्वात् रस: ।

"काव्यसन्दर्भे रस: काव्यास्वादस्यानुभूतिपर्यायत्वं व्यनक्ति; कलासन्दर्भे तु कलास्वादानुभूति उत वा कलानुभूतिरितिकथ्यते । सौन्दर्यशास्त्रस्य मनोविज्ञानस्य च शब्देषु कलानुभूतिरेव सौन्दर्यानुभूति: कथ्यते । अनेन रसस्य व्यापकोऽर्थ: सौन्दर्यानुभूति: {Aesthetic Experience} सिध्यति ।[1]

भावानां परिपक्वावस्थैव "रस:" इति कथ्यते । यथाह भरतमुनि:-[2] "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति:" इति । अस्य व्याख्यानं यथा-[3] "यथा हि नानाव्यंजनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिर्भवति तथा नानाभावोपगमाद्रसनिष्पत्ति: । यथा हि गुडादिभिर्द्रव्यैर्व्यंजनैरौषधिभिश्च षाडवाद्यो रसा निर्वर्त्यन्ते तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्ति" इति । अत्राह- रस इति क: पदार्थ: ? उच्यते आस्वाद्यत्वात् । कथमास्वाद्यते रस: ? यथा हि नानाव्यंजनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनस: पुरुषा हर्षादींश्चाधिगच्छन्तितथा नाना भावाभिनय व्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावानास्वादयति सुमनस: प्रेक्षका: हर्षादींश्चाधिगच्छन्ति ।

एवं भरतो रसानुभूतिं सुखमयीं रसास्वादं चानन्दमयं प्रतिपादयति ।

भरतानन्तरं वाग्देवतावतारेण मम्मटेन काव्यप्रकाशे रसलक्षणं प्रसंगे इत्थमुक्तम्[4] -

---

1· रससिद्धान्त का पुनर्विवेचन, पृ·388

2· नाट्यशास्त्रम्, 6·2

3· तत्रैव, 6·2

4· काव्यप्रकाश:, 4·27-28

"कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ।।
विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः ।
व्यक्तस्तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः ।।"

अस्य कथनस्याभिप्रायोऽयं यत् रत्यादि स्थायीभावा वासनारूपेण सहृदयेषु सदैव भवन्ति अव्यक्ततया । आलम्बनोद्दीपनादि विभावैराविर्भूता उद्दीपिताश्चानुभावैः प्रतीतिमागच्छन्ति । व्यभिचारिभावाश्च तान् पुष्टिं नयन्ति । एवं सर्वभावसंयुतः स्थायीभावः व्यञ्जनावृत्त्या व्यक्त आस्वाद्योग्यतामाप्नोति रसश्च कथ्यते ।

आचार्यविश्वनाथमते विभावानुभावव्यभिचारिभावैः सहृदय हृदये वासना रूपेणास्थितस्य स्थायीभावानां परिपक्वावस्थैव रससंज्ञां लभते । यथा-[1]

"विभावानुभावेन व्यक्तः सञ्चारिणः तथा ।
रसतामेति रत्यादि स्थायीभावः सचेतसाम् ।।"

"लोके सकलविघ्नविनिर्मुक्ता संवित्तिरेव चमत्कारनिर्वेशरसनास्वादन-भोगसमापत्तिविश्रान्त्यादिशब्दैरभिधीयते ।"[2] इत्यादिभिरभिनवभारत्यानुसारं रसस्य वैशिष्ट्यं व्यज्यते । आचार्यविश्वनाथोक्तदिशा रसस्य विशेषता यथा -[3]

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः ।
वेद्यान्तरं स्पर्शशून्यो ब्रह्मास्वाद सहोदरः ।।
लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ।।

आभिरेव विशेषताभिः रसः काव्यशास्त्रजगति यथा समादृतो न तथा कश्चिदन्यः सिद्धान्तः । अत एव रसतत्त्व प्रवर्तको भरतमुनिः रसं रूपकस्यानिवार्य-धर्मत्वेनाभ्युपगच्छति । यथोक्तं नाट्यशास्त्रे[4] -

---

1. साहित्यदर्पण, 3.1
2. अभिनवभारती, भाग-1, पृ.280
3. साहित्यदर्पण;, 3.2.3
4. नाट्यशास्त्रम्, 1.110

"एतद्रसेषु भावेषु सर्वकर्मक्रियासु च ।
सर्वोपदेशजननं नाट्यमेतद् भविष्यति ॥"[1]

तथा च -

"बहुरसकृतमार्गसन्धिसन्ध्यानुयुक्तम् ।
भवति जगति योग्यं नाटकं प्रेक्षकाणाम् ॥"

एवमन्येऽपि न केवलं रसवादिन आचार्या रसस्य वैशिष्ट्यं महत्त्वं वाऽङ्गीकुर्वन्ति अपित्वलंकारध्वन्यौचित्यादिवादिनोऽपि रसं काव्यार्थमावश्यकतत्त्वत्वेनाम्नन्ति । यथाह्यलंकारवादी भामहः काव्यालंकारे-[2]

"युक्तलोकस्वभावेन रसैश्च सकलैः पृथक्" काव्यादर्शे च दण्डी यथा[3] -

"अलङ्कारकृतमसंक्षिप्तं रस भाव-निरन्तरम्"

ध्वनिकारः आनन्दवर्धनोऽपि ध्वनिं काव्यात्मत्वेन मन्यमानोऽपि रसवैशिष्ट्यं स्वीकरोति-यथा-[4]

"अवस्थादिविभिन्नानां वाच्यानां विनिबन्धनम् ।
भूम्नैव दृश्यते लक्ष्ये तत्तु भाति रसाश्रयात् ॥"

ध्वनेः भेदेषु रस भावादि भेदा मुख्या भवन्ति । रसभावादि-निस्यूत-वाच्यवाचकयोरौचित्येन योजनं कवेः प्रधानकर्म । यथोक्तम्-[5]

"वाच्यानां वाचकानां च यदौचित्येन योजनम् ।
रसादिविषयेणैतत् कर्ममुख्यं महाकवेः ॥"

वक्रोक्तिं काव्यस्यात्मत्वेन प्रतिपादयन् कुन्तकोऽपि रसं काव्यस्य सर्वप्रमुखप्रयोजनत्वेन व्याजहार । यथा[6] -

"चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम् ।
काव्यामृतरसेनान्तश्चमत्कारो वितन्यते ॥"

---

1. नाट्यशास्त्रम्, 17.126
2. काव्यालंकारः - भामहः, 1.21
3. काव्यादर्शः - दण्डी, 1.18
4. ध्वन्यालोकः, 4.8
5. तत्रैव, 3.32
6. वक्रोक्तिजीवितम्, 2.33

औचित्य सम्प्रदायस्य प्रवर्तक: क्षेमेन्द्र:[1] - "रसजीवितभूतस्य विचारं कुरुतेऽधुना अपि च "औचित्योपनिबन्धस्तु रसस्योपनिषत्परा" इत्यादिभि: औचित्येऽपि रसमहत्त्वं स्वीकरोति । अग्निपुराणेऽपि-[2] "लक्ष्मीरिव विना त्यागान्न वाणी भाति नीरसा" इत्यनेन रसस्योपादेयत्वं प्रतिपादितम् । अतो "वाग्वैदग्ध्य प्राधान्येऽपि रस एवात्र जीवितम्" इति सिद्धान्त एव समीचीनं प्रतिभाति रसस्यैव सर्वत्र महत्त्वप्रतिपादनात् ।

2. रससम्प्रदाय: -

पूर्वविवेचनेन स्पष्टतया प्रतीयते यद्रसशब्दो वेदादिषु प्रयुक्तो दृश्यते । पुनश्च रामायणमहाभारतसूत्रग्रन्थेषु च स नैकार्थपर: । वात्स्यायन कामसूत्रे च रतिभावं व्यनक्ति ।[3] यथोक्तं तत्र - "रसो रति: प्रीतिर्भावो रागो वेग: समाप्तिरिति रते: पर्याय:, तदिष्ट भावलीलानुवर्तनम् ।" एवं मूर्तामूर्तार्थत्वं प्राप्य रसशब्दो भरतनाट्यशास्त्रे शास्त्रीयार्थवाचकोऽभवत् । अत्र हि रससम्प्रदायस्य संक्षिप्तपरिचय: प्रस्तूयते ।

(1) भरत: -

रसविषयमधिकृत्य रचितं भरतस्य नाट्यशास्त्रमादिमं स्थानं भजते । तत्रोल्लिखिता यद्यप्यन्येप्याचार्या नैव तेषां काऽपि रचना अद्यत्वे उपलभ्यते । अत: भरत एव प्रथमं स्थानं भजते इति निश्चप्रचम् । नाट्यशास्त्रे शाण्डिल्य-वात्स्यदोत्तलभरतापत्यास्च रसस्याचार्यत्वेन स्वीकृता: सन्ति । एवमा जनश्रुत्यानुसारं नन्दिकेश्वरो रसस्याचार्यत्वेन भरतश्च नाट्यस्याचार्यत्वेन श्रूयते । राजशेखरोऽपि काव्यमीमांसायां प्रतिपादयति यथा[4] - "रूपकनिरूपणीयं भरत:, रसाधिकारिकं नन्दिकेश्वर:"। इति ।

---

1. औचित्यविचारचर्चा-कारिका, 3, 8
2. अग्निपुराणम्, 339.9
3. कामसूत्रम्, 2.1.65, 6.2.35
4. काव्यमीमांसा, अ.1, पृ.4

तत्र रसानेव तावदादावभिव्याख्यास्याम: ।

न हि रसादृते कश्चिदर्थ: प्रवर्तते [1]।।" इत्यनुमन्य भरतेन नाट्यशास्त्रस्य षष्ठाध्याये रसस्य स्वरूपं स्थायिसंचारिसात्त्विकानुभाव विभावा: रसतत्त्वं शृङ्गारादि रसभेदाश्च वर्णिता: । भरतस्य "विभावानुभावव्यभिचारी संयोगाद्रसनिष्पत्ति:" इति रससूत्रस्य व्याख्यायां आरोपवादो, अनुमितिवादो, भोगवाद:, अभिव्यक्तिवादश्चेत्यादिविभिन्न सिद्धान्ता: स्थापिता अभवन् । भरतमुनिमते यथा गुडादिविभिन्न पदार्थसंमिश्रणैर्निर्मितं व्यञ्जनमास्वाद्यं भवति तथैव विभावादिसंयोगेन व्यक्त: स्थायीरसरूपेणास्वाद्यते - "यथा हि नाना-व्यञ्जनसंस्कृतमन्नं भुंजाना, रसानास्वादयन्ति सुमनस: पुरुषा हर्षादींश्चाधिगच्छन्ति तथा नाना भावाभिनयव्यञ्जितान् स्थायिभावानास्वादयन्ति सुमनस: प्रेक्षका: हर्षादींश्चाधिगच्छन्ति ।"

§2§ भामह: -

भरतानन्तरं यद्यपि मेधाविराजमित्रादीनामपि नामोल्लेखो यत्र तत्र प्राप्यते परं नैव तेषां काऽपि कृतिरुपलभ्यते अत: काव्यालङ्कारस्य कर्ता आलंकारिको भामह एवभरतानन्तरं दृश्यते । "वनिता मुखमिव कवितालंकारहीना न शोभते" इति प्रतिपादकन् भामह: अलंकारसम्प्रदायप्रवर्तकत्वेन स्वीक्रियते । आलंकारिकोऽपि भामह: रसस्य प्राधान्यं स्वीकरोति - "युक्तं लोक स्वभावेन रसैश्च सकलै: पृथक्"[2] इत्यादिना । रसवद् अलंकारस्योदाहरणे भामहो विभावमेव रसत्वेन स्वीकरोति ।

§3§ दण्डी -

काव्यादर्शस्य लेखको दण्डी गुणान् काव्यात्मत्वेन स्वीकरोति । माधुर्यादि गुणानां विस्तृतं विवेचनं प्रस्तुतं कृतवान् । स अलंकारान् काव्यशोभाकरधर्मत्वेन रीति

---

1. नाट्यशास्त्रम्, 6.31

2. काव्यालङ्कार:, 1.121

रसादींश्च अलंकारसाधकत्वेन स्वीकरोति । रसो वस्तूनि मधुरतां सञ्चारयतीति दण्डिनः मतम् । यथा -[1]

"मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः ।
येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः ।।"

वस्तुगतमाधुर्यं अग्राम्यतेति नाम्ना व्यवह्रियते । स माधुर्यं गुणो रसवदेवेति दण्डी स्वीचकार -[2]

"कामं सर्वोऽप्यलङ्कारो रसमर्थे निषिञ्चतु ।
तथाप्यग्राम्यतैवेनं भारं वहति भूयसा ।।"

एतदतिरिक्तं दण्डिना भरतोक्ताष्टौ रसानां सुन्दराण्युदाहरणानि प्रस्तुतानि । रसवत्-मीमांसायामुक्तं दण्डिना यद् विभावादि प्राचुर्यात् स्थायिभावाः रसस्थितिं प्राप्नुवन्ति । यथा -[3]

"प्राक्प्रीतिर्दर्शिता सेयं रतिः शृङ्गारतां गता ।
रूपबाहुल्ययोगेन तदिदं रसवद् वचः ।।"

एवं दण्डीकाले रसविकासो भामहापेक्षया स्पष्टं परिलक्ष्यते ।

§4§ उद्भटः -

दण्डिनः पश्चादुद्भटाचार्यः संस्कृतकाव्यशास्त्रे प्रसिद्धिं गतः । भामह-विवरणं काव्यालङ्कारसारसंग्रहश्चास्य काव्यशास्त्रीयौ ग्रन्थौ । भामहविवरणं साम्प्रतं नोपलभ्यते । अलंकारवादिनानेनापि भामहदण्डिवद् रसोऽलङ्कारमध्येऽन्त-र्भावितः तत्परम्परैव च स्वीकृता । अस्मात्पूर्वं रसालंकाराणां रसवत्प्रेय-उर्जस्व नाम्ना संख्यात्रयमासीत् परमनेन समाहित नाम्ना चतुर्थो रसालंकारोवर्धितः । समाहिते रसालंकारे च भाव रसाभासभावाभासानां शान्तेरुल्लेखो जायते तु रसानुभावानाम् यथोक्तवान् उद्भटः -[4]

---

1. काव्यादर्शः, 1.51
2. तत्रैव, 1.62
3. काव्यादर्शः, 2.281
4. काव्यालंकारसारसंग्रहः, 4.7

"रसाभावतदाभासवृत्तेः प्रशमबन्धनम् ।
अन्यानुभावनिःशून्यरूपं यत्ततसमाहितम् ।।"

"नवनाट्ये रसाः स्मृताः" इत्युक्त्वा उद्भटेन शान्तरसरूपेण नवमोरसः परिवर्धितः । वस्तुतः उद्भटोऽपि नैव रसवादी तेन रसवदाद्यालंकारमध्ये रसानां गौणत्वेन स्वीकृता तस्मादुद्भटाचार्योऽलंकारवादीवेति निश्चीयते ।

§5§ वामनः -

रीतिसम्प्रदायप्रवर्तकस्य वामनस्य काव्यालंकारसूत्रवृत्तिर्नाम ग्रन्थ उपलभ्यते। अलंकारापेक्षया गुणानां महत्वं सर्वप्रथमनेनैव प्रतिपादितम् । दण्डिमतेन काव्यशोभाकारकोधर्मोऽलंकार आसीत् परं वामनेन "काव्यशोभायाः कर्तारः धर्मागुणाः"[1] इत्यनेन स धर्मो गुणेषु प्रतिपादितः । रसतत्त्वस्यानेन महत्त्वं न प्रतिपादितम् । रीति गुणालंकारा एवास्यमते महनीयतां प्राप्ताः । अनेन स्वीकृतेषु दशगुणेषु कान्तिनाम्नोगुणस्य धर्मो रस इति स्वीकृतम् । यथा[2] - "दीप्तरसत्वं कान्तिः। दीप्ता रसाः श्रृङ्गारादयो यत्र स दीप्तरसस्तस्य भावो दीप्तरसत्वं कान्तिः" एवं वामन दृष्ट्या काव्येऽङ्गीभूतारीतिस्तस्य धर्मागुणास्तत्सम्बन्धेन च रसोऽपि काव्याङ्गतां प्राप्नोति । अपि च तेन काव्य भेदेषु नाटकं श्रेष्ठतमं परिगणितम्- "सन्दर्भेषु दशरूपकंश्रेयः"[3] इत्यादिना । अनेनापि प्रकारान्तरेण रसमहत्ता प्रतिष्ठितैव ।

§6§ रुद्रटः -

आभामहद्वामनपर्यन्तं रसविषयिकी लुप्तप्राया एव दृष्टिः रुद्रटकाले पुनः प्राप्तजीवा इवावलोक्यते । अस्य"काव्यालंकार" ग्रन्थे पूर्वाचार्यापेक्षया कतिपया नवाविष्कृता अलंकारा अपि प्राप्यन्ते अनेन भामहदण्डीउद्भटादीभ्यः परवर्तित्वमस्य सिद्ध्यति । रससम्बन्धे रुद्रटस्य नूत्नोद्भावनाः प्राप्यन्ते । रुद्रटपर्यन्तं रसानां संख्या नव एव आसीत् परमनेन प्रेयोनाम्ना दशमो रसभेदः प्रतिपादितः । "श्रृङ्गारवीरकरूणबीभत्सभयानकाद्भुतहास्यः, रौद्रः, शान्तः

---

1. काव्यालङ्कारसूत्रवृत्तिः, 3.1.1
2. तत्रैव, 3.2.15
3. तत्रैव, 1.2.30

प्रेयानिति मन्तव्या रसाः सर्वे" इत्यादिना ।[1] एवं न केवलं दशैव रसा भवन्ति अपितु यावन्तोऽपि स्थायिव्यभिचारिसात्त्विका भावाः सन्ति ते सर्वे रसरूपे परिणमितुं शक्नुवन्ति । अद्यावधि भरतमुनि-प्रतिपादितो रसो दृश्यकाव्ये एव सीमित आसीत् श्रव्यकाव्ये तस्योपयोगिता पूर्णरूपेणाचार्या न स्वीकुर्वन्ति स्म परं रुद्रटेन तस्य महत्ता श्रव्य काव्येऽपि स्वीकृता ।" तस्मात् तत्कर्तव्यं यत्नेन महीयसा रसैर्युक्तम्"[2] अनेन काव्ये रसतत्त्वस्य महत्त्वं प्रतिपादितम् । इत्थं रसस्य विकासे पुनरुद्धारे वा अस्य महान्प्रयोगः स्वीकार्यः ।

§7§ रुद्रभट्टः -

श्रृङ्गारतिलकाभिधाने ग्रन्थे रुद्रभट्टेन रसनिरूपणं विहितम् । रसविहीना वाणी नैव शोभते काव्यस्य सार्थकताऽपि च विनश्यते इत्यनुमन्यमानः स- "तस्माद्यत्नेन कर्तव्यं काव्यं रसनिरन्तरम्" इत्यवोचत् ।[3] ग्रन्थस्य तृतीयपरिच्छेदे श्रृङ्गारातिरिक्तमन्येषामपि रसानां विवरणं प्राप्यते । भरतेन नाट्यरसः प्रोक्तः परं रुद्रभट्टः काव्यरसं निरूपयति यथा[4] -

"प्रायो नाट्यं प्रति प्रोक्ता भरताद्यै रसस्थितिः ।
यथामतिः मयाप्येषा काव्यं प्रति निगद्यते ।।" इति ।

§8§ आनन्दवर्धनः -

ध्वन्यालोकरित्यनन्यरचनायाः कर्तुरानन्दवर्धनस्य ध्वनिसिद्धान्तप्रवर्तकत्वेन ख्यातिस्तु संस्कृतसाहित्यक्षेत्रे सुविदितैव । ध्वनिं काव्यस्यात्मतत्त्वं मन्यमानोऽपि रससिद्धान्तस्य मान्यतां साधयति आचार्यः । रसध्वनिं ध्वनेः प्राणभूतमङ्गीकृत्य प्रकारान्तरेण रसं पोषयति । वस्त्वलंकाररसध्वनिषु रसध्वनिरेव काव्यस्योत्कृष्टं रूपमिति स्वीकरोति आनन्दवर्धनः । व्यङ्ग्यार्थध्वनिभेदेषु रसभावादि भेदाः

---

1. काव्यालंकारः - रुद्रट, 12.3
2. रुद्रटकाव्यालंकारः, 12.2
3. श्रृङ्गारतिलकम्, 1.8
4. तत्रैव, 1.5

प्रधानतरा भवन्तीति तस्यमतम् यथा[1] -

"प्रतीयमानस्य चान्यभेददर्शनेऽपि रसभावमुखेनैवोपलक्षणं प्राधान्यात्"।

तन्मतेरससान्निध्यात् प्रचलिता अर्थास्तथैवावभासन्ते यथा वसन्तसम्पर्कमवाप्य तरव :। यथा[2] -

"दृष्टपूर्वा अप्यर्थाः काव्ये रसपरिग्रहात् ।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः ।।"

यद्यपि ध्वन्यालोके रसस्य पृथगुल्लेखो न प्राप्यते परं असंलक्ष्यक्रमव्यङ्ग्य-ध्वनेः भेदे रसनिरूपणं कृतमस्ति । गुणालंकाररीतिवृत्तयश्च रससहायकत्वेन स्वीकृताः। दृश्ये श्रव्ये उभयोरेव काव्ययोः रसनिबन्धनमभीप्सितमस्ति ।[3] काव्ये व्यङ्ग्यव्यञ्जक-ध्वनितत्त्वानां सत्स्वपि कविस्तत्र रसादिमयध्वनिकाव्यनिबन्धनत्वादेव ख्याति-मर्जयति ।[4]

व्यङ्ग्यव्यञ्जकभावेऽस्मिन् विविधे सम्भवत्यपि
रसादिमय एकस्मिन् कविः स्यादवधानवान् ।।

अपि च[5] -

"रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत् ।
अपृथग्यत्ननिर्वर्त्यः सोऽलंकारो ध्वनौ मतः ।।"

एवं ध्वनिवादी अप्याचार्य-आनन्दवर्धनो रसस्य महत्तां नैव निराकरोति। समादरेण च रससिद्धान्तमङ्गीकरोति ।

§9§ <u>अभिनवगुप्तः -</u>

कवेरस्याभिव्यक्तिवादः काव्यशास्त्रे सर्वाधिकां ख्यातिमगमत् ।
"विभावानुभावव्यभिचारीसंयोगाद्रसनिष्पत्तिः" इति भरतसूत्रं लोल्लटशङ्कुकादि-

---

1. ध्वन्यालोकः, 1.5
2. तत्रैव, 4.4
3. तत्रैव, 2.3, 3.21
4. तत्रैव, 4.5
5. तत्रैव, 2.16

पूर्वरसाचार्यैर्बहुधा व्याख्यातम् परमभिनवगुप्तस्य व्याख्या तस्य निष्कर्षमुपसंहरति। काव्यनाट्ययो: श्रोतृदर्शकाणां हृदये निहितावासना: काव्यनाट्यगतविभावादि-सम्पर्केण रसरूपेणाभिव्यज्यन्ते तथा विभावनाम्नो लोकोत्तरव्यापारस्य साहाय्येन विभावादीनां साधारण्यं सहृदयानां स्वत एव जायते। अभिनवगुप्तस्य मनोवैज्ञानिकसिद्धान्तोऽयं रसनिष्पत्तौ सर्वमान्यत्वमुपगतम्। अभिनवगुप्तेनैव नाट्यकाव्ययो: रसस्यैकरूपता प्रतिपादिता काव्यमात्रेरसतत्त्वं प्रधानं गुणालंकारौ-चित्याद्य: सर्वे रसस्य सहायका: अलंकार्ये सत्यलंकारस्योपयोगिता, एवमौचित्य-स्यापि मूलाश्रयोरस इति प्रतिपादित:। मूलं विना पल्लवकल्पनमेव व्यर्थम्। रसानुपस्थितौ औचित्यनिर्देशो व्यर्थ एव भवति। ध्वन्यालोकलोचने रसध्वनि-गुणालंकारौचित्यादि काव्यतत्त्वानां परस्परं सामंजस्यं प्रतिपादितम्। गुणास्तमुन्मीलयन्ति, औचित्येन वासो चाव स्थाप्यते।

रससंख्याविषयेऽपि विविधोहापोहानन्तरं नवसंख्यानिर्धारिता नवम: शान्तस्तु सर्वोत्कृष्टरूपेण प्रतिपादित:। आचार्यस्यास्य रसविवेचनं शैवाद्वैत प्रतिपादितानन्दवादमनुकरोति।

## §10§ कुन्तक: -

वक्रोक्तिसम्प्रदायप्रवर्तकस्याचार्यस्यास्य वक्रोक्तिजीविताख्या कृति: साहित्यक्षेत्रे स्वकीयमन्यतमं महत्त्वं ख्यापयति। कुन्तककालं यावत् रससिद्धान्तस्तथा-विकासं प्राप्नवानासीत् यत्तदा केनापि तस्य प्रभावो निहनोतुं न शक्यते स्म। यद्यपि नैवात्मतत्त्वत्वमप्राप्यत रसो वक्रोक्तिजीविते तत्र हि वक्रोक्तिप्राधान्य-त्वात् परं रस महत्ता तु तत्रापि प्रतिपादितैव। "काव्यामृतरसेनान्तश्चमत्कारो वितन्यते"[1] इत्यादिना। एवमेव प्रकरणवक्रताया: प्रबन्धवक्रताया उद्देश्येन रसस्यानिवार्यतानेकधा निर्दिष्टा कुन्तकेन[2]। यथा -

---

1. वक्रोक्तिजीवितम्, 1.5
2. तत्रैव, 4.11

"निरन्तर रसोद्गारगर्भसन्दर्भनिर्भराः ।
गिरः कवीनां जीवितं न कथामात्रमाश्रिता ।।"

इत्यादिषु काव्यस्य वर्ण्यविषयो रसाश्रितः स्वीकृतः ।

(11) धनिक-धनञ्जयौ -

दशरूपककारो धनञ्जयस्तट्टीकाकर्ता धनिकश्चोभावेव ध्वनिविरोधिनौ रससिद्धान्तसमर्थकौ च । भट्टनायकस्य रसमतमनुमोदयन्तौ काव्यरसयोः भाव्यभावकसम्बन्धं स्वीकृतवन्तौ । यथोक्तं दशरूपके-[1]

"अतो न रसादीनां काव्येन सह व्यङ्ग्यव्यञ्जकभावसम्बन्धस्तर्हि भाव्यभावकसम्बन्धः, काव्यं हि भावकं, भाव्याः रसादयः" इति । रसलक्षणप्रसङ्गे दशरूपके वर्णितं यद् विभावानुभावसात्त्विकव्यभिचारिभिश्च आस्वाद्यतां प्राप्तो स्थायिभावो रसपदेनाभिधीयते[2] -

"विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः
आनीयमानः स्वाद्यत्वं स्थायी भावो रसः स्मृतः ।।"

भट्टनायकस्य साधारणीकरणसिद्धान्तं स्वीकृत्य वर्णितं यद् यदा काव्यगता रामादयः स्वकीयं वैयक्तिकं वैशिष्ट्यं त्यक्त्वा सामान्यपुरुषरूपेणोपस्थाप्यन्ते तदैव सहृदयेषु रसप्रतीतिमुत्पादयन्ति[3] "तस्य च परित्यक्तविशेषा रसहेतवः" इति । रसस्य स्थितिः सहृदयेषु भवति नैवानुकार्यरामादिषु । यथोक्तं तत्रैव[4] -

रसः स एव स्वाद्यत्वाद्रसिकस्यैव वर्तनात् ।
नानुकार्यस्य वृत्तत्वात्काव्यस्यातत्परत्वतः ।।

रसस्यात्मता काव्ये निराकृता दशरूपके यथा[5] -

---

1. दशरूपकम्, 4.36; पृ. 340
2. तत्रैव, 4.1
3. तत्रैव, 4.41
4. तत्रैव, 4.37
5. तत्रैव, 3.32

"न चातिरसतो वस्तु दूरं विच्छिन्नतां नयेत् ।
रसं वा न तिरोदध्याद्वस्त्वलंकारलक्षणैः ॥"

§1२§ महिमभट्टः -

व्यक्तिविवेककारेणानेन अनुमेयो रसः काव्यप्राणस्वरूपत्वेनस्वीकृतः । काव्यस्यात्मनि संज्ञिनि रसादिरूपे न कस्यचिद् विमतिः इत्यादिना । रस-
-स्थितिं सहृदये स्वीकरोतीति महिमभट्टो विभावानुभावस्थायिभावेषु च कार्यकारण-
-सम्बन्धः स्वीकृतः ।

§1३§ भोजराजः -

सरस्वतीवरदपुत्रस्य भोजस्य विद्वत्प्रियता संस्कृतसाहित्ये प्रसिद्धा-ऽस्ति । अस्य सरस्वतीकण्ठाभरणं श्रृङ्गारप्रकाशश्चेति विशालग्रन्थद्वयं काव्यशास्त्रे प्राप्यते । रसविषयेऽसौ मनोवैज्ञानिकं दार्शनिकं च विश्लेषणं प्रस्तौति । "रसोऽभिमानाहङ्कारः श्रृङ्गार इति गीयते" इति वाक्येन रसोऽभिमानोऽहंकार-श्रृङ्गारश्चेति चत्वारः शब्दाः पर्यायत्वेन प्रतिपादिताः । वस्तुतो भोजेन श्रृङ्गारे एव समेषां रसानामन्तर्भावो विहितः। विषयेऽस्मिन्नग्निपुराणस्य भोजमतेन सह किमपि साम्यं दृश्यते । "काव्यं रसवत्" इत्यत्रोक्तरसवच्छब्दः भामहादि प्रतिपादित्वाद् रसवच्छब्दात् सर्वथा भिन्नः । अलंकारवादिनां रसवच्छब्दः काव्यात्मभूते रसे अलंकारमध्ये च गौणतामाप्नोति, इति कथ्यते परं भोजस्य रसवच्छब्दः रसपूर्णे काव्येवर्तते । "रसवतो रामादेर्वस्तद्रसमूलत्वाद्रसवत्। रसवत् प्रतिपादयितुं यदर्हति तद्रसवत् ।" रससंख्या प्रसंगे भरतोक्ता अष्टौ रसाः स्वीकृताः पुनः रसस्य द्वादशभिदा अपि विहितास्तथा सर्वेषां भावानामपि रसत्वं जायते इत्यपि प्रतिपादितम् । अनेन रससिद्धान्तविकासे भोजराजस्यपूर्णयोगो दृश्यते ।

---

1· सरस्वतीकण्ठाभरणम्, 5·6

§14§ क्षेमेन्द्रः -

क्षेमेन्द्रप्रवर्तितः सम्प्रदायः काव्यशास्त्रे औचित्यनाम्नाप्रसिद्धः, रचना चास्य "औचित्यविचारचर्चा" इति । औचित्यतत्त्वं नैवासीत् काव्यशास्त्रे नूतनमपितु "अनौचित्यादृते नाऽन्यद्रसभङ्गस्यकारणम्" इत्यादिना ध्वनिकारेणानन्दवर्धनेनानेकधाव्याकृतमौचित्यौल्लक्षणं च रसभङ्गस्य कारणत्वेनोक्तम् । परं काव्यात्मतत्त्वेनौचित्यस्वीकरणं नूतनैव विधाऽऽसीत् । क्षेमेन्द्रेणौचित्यं रसपोषकत्वेनमत्वा औचित्यात्मा च रसः स्वीकृतः रसाभावे औचित्यमकल्पनीयमेवोक्तम् । यथा[1] -

"औचित्यस्य चमत्कारकारिणश्चारुचर्वणे ।
रसजीवितभूतस्य विचारं कुरुते अधुना ।।
औचित्यं रससिद्धस्य स्थिरं काव्यस्यजीवितम् ।।" इति ।

§15§ मम्मटः -

वाग्देवतावतारस्य मम्मटस्य रचना "काव्यप्रकाशः" साहित्यशास्त्रगगनाङ्गणे चन्द्रइवाभाति । मम्मटात्प्राक् काव्यशास्त्रीयाणां सर्वेषां तत्त्वानां सिद्धान्तदृष्ट्या समालोचनाजाता आसीत् । नूतनसम्प्रदायस्यावकाशो नासीत् । काव्ये रसस्य प्राधान्यं तस्य च ध्वन्यमानताऽपि प्रायो विनिर्णीतैवासीत् । एवं विभिन्नाचार्यप्रतिपादितसूत्रमणिभिर्मम्मटेन सम्यक्संयोजनपुरःसरं काव्यप्रकाशमणिमालागुम्फिता । काव्ये रसस्यप्राधान्यं स्वीकृत्य रसविघातकतत्त्वं काव्यदोषं मन्वानेन तेन गुणा उत्कर्षहेतुत्वादनिवार्यत्वेन स्वीकृताः । यथा[2] -

"मुख्यार्थ हतिर्दोषो रसश्चमुख्यतस्तदाश्रयाद्वाच्यः"
"ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ।।"

---

1· औचित्यविचारचर्चा, 3·5

2· काव्यप्रकाशः, 7·49; 8·66

तथा च - "सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलित-
वेद्यान्तर आनन्दम्" - इत्यादिना रसं काव्यस्योत्कृष्टप्रयोजनत्वेनाभ्युपगतम्।

मम्मटानन्तरं हेमचन्द्ररामचन्द्रगुणचन्द्रजयदेवपीयूषवर्षप्रभृतयः काव्यलक्षण-ग्रन्थान् व्यरचयन् परं ते काव्यप्रकाशोच्छिष्टभोजिन इव प्रतीयन्ते। तेषु रामचन्द्रगुणचन्द्रयोर्नाट्यदर्पण नाट्यशास्त्रीया कृतिः किञ्चिद्वैशिष्ट्यं भजते यत्र "पन्थाः नाट्यस्य रसकल्लोलसंकुलः" इत्यादिना नाटकाधारत्वेन रसः स्वीकृतः।

§16§ विश्वनाथः - काव्यशास्त्रक्षेत्रे साहित्यदर्पणो विश्वनाथस्य प्रसिद्धा कृतिरस्ति। काव्यात्मदृष्ट्यायमात्मानं रसवादिनमुद्घोषयति। काव्यलक्षण-प्रसङ्गे मम्मटानन्दवर्धनादीनामपि मतमालोच्य "वाक्यं रसात्मकं काव्यम्" इति काव्यलक्षणं विधाय रसवादित्वेनास्य प्रतिज्ञा ज्ञायते। पञ्चमपरिच्छेदे तत्र ध्वनिविरोधिनां मतानि निरस्य व्यञ्जनाया स्थापना विहिता। संख्यादृष्ट्यानेन वात्सल्यनामदशमो रसोऽपि स्वीकृतः। रसस्यवैशिष्ट्यं च इत्थं प्रतिपादितम्[1] -

"सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः।
लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥"

विभावादीनां साधारणीकरणं स्वीकृत्य विश्वनाथेन काव्यस्यव्यङ्ग्य-व्यञ्जक सम्बन्धः स्वीकृतः साधारणीकरणं च व्यञ्जनाव्यापारेण प्रतिपादितः। एवं रससिद्धान्तविकासे अस्य महत्त्वपूर्णं योगोऽवलोक्यते।

§17§ शारदातनयः -

शारदातनयस्य "भावप्रकाशनम्" नाट्यशास्त्रीय ग्रन्थोऽस्ति यत्र भावरसशब्दार्थ-सम्बन्धरूपकाद्य विषयाः प्रतिपादिताः सन्ति। नाटकं काव्यस्य प्रतीकत्वेना-ङ्गीकृत्य तस्य सर्वाश्रयत्वं च स्वीकृतं प्रेक्षकनटकविभ्यश्च मुक्तिभुक्तिप्रदं मन्यते। यथोक्तम्[2] -

---

1. साहित्यदर्पणः, 3.2,3
2. भावप्रकाशन, पृ.313

"इत्थमुक्तक्रमोपेतं नाट्यं सर्वरसाश्रयम् ।
प्रेक्षकस्य प्रयोक्तुश्च कवेः स्याद् भुक्तिमुक्तिप्रदम् ।।"

§18§ भानुदत्तः -

भानुदत्तेन रसतरङ्गिण्यां रसमञ्जर्यां च रसस्य नायक-नायिका-भेदानां च विशदं विवेचनं प्रस्तुतम् । रसश्चालौकिक-लौकिकरूपेण द्विविधः स्वीकृतः । लौकसन्निकर्षजन्यो रसः लौकिकः, अलौकिकसन्निकर्षजन्यरसश्चालौकिको रसः । श्रृङ्गारस्य रसराजतां स्वीकृत्योभयोर्ग्रन्थयोस्तस्य सविस्तरं प्रतिपादनं कृतम् । रसतरङ्गिण्यां रसोपकरणभूतानां स्थायिभावविभावानुभाव-व्यभिचारिभावानां च सभेदोपभेदं सोदाहरणं च निरूपणं विहितम् । रसमञ्जर्यां च केवलं रसराजस्य श्रृङ्गारस्यालम्बन-विभावौ नायकनायिकालक्षणं सभेदोपभेदं निरूपितम् ।

§19§ रूपगोस्वामी -

रूपगोस्वामिना रसविषयकं "हरिभक्तिरसामृतसिन्धुः" उज्ज्वल-नीलमणिश्चेति ग्रन्थद्वयं प्रणीतं यत्र चैतन्यमहाप्रभोः "अचिंत्यभेदाभेदाख्यदार्शनिक सिद्धान्तानुरूपं रसविवेचनं प्रस्तुतमस्ति । अस्य रसनिष्पत्तिर्भरतानुमोदितैव यथा-

यथादध्यादिकं द्रव्यं शर्करामरिचादिभिः ।
संयोजनविशेषेण रसालाख्यो रसो भवेत् ।।
तदत्र सर्वथा साक्षात् कृष्णाद्यनुभवाद्भुतः ।
प्रौढानन्द चमत्कारो भाक्तैः कोऽप्यनुरस्यते ।।[1]

कविना भक्तिरसः परमत्वेन स्वीकृत्य वीरकरुणरौद्रभयानकवीभत्सरसानां गौणत्वमुपकल्पितम् ।

§20§ अग्निपुराणम् -

रसतत्त्वनिरूपणेऽग्निपुराणस्यापि महत्त्वपूर्णं स्थानमस्ति । तत्र

---

1. हरिभक्तिरसामृतसिन्धुः, 2.5.64, 65

रस: काव्यस्य महत्त्वपूर्णतत्त्वेन काव्यप्राणस्वरूपत्वेनच निरूपितम्[1] - "वाग्वैदग्ध्य-प्राधान्येऽपि रस एवात्र जीवितम्" इत्यादिना । अपि च रसभावे कवेर्वाणी त्यागाभावलक्ष्मीवदशोभा भाति - यथोक्तम्[2] -

"लक्ष्मीरिव विना त्यागान्न वाणी भाति नीरसा" ।

अग्निपुराणानुसारं भावेन रसो भाव्यते भावा एव रसं प्रतीतियोग्यतां नयन्ति । यथोक्तम् -

"न भावहीनोऽस्ति रसो न भावो रसवर्जित: ।
भावयन्ति रसानेभिर्भाव्यन्ते च रसा इति ।।"

पुनश्च नवरससाङ्गोपाङ्गविवेचनादपि अग्निपुराणस्य महत्त्वमस्ति ।

§21§ पण्डितराजजगन्नाथ: -

पण्डितराजजगन्नाथ: काव्यशास्त्रस्यान्तिम: प्रतिभाशाली चाचार्योऽभूत्। "रसगङ्गाधर:" पण्डितराजस्य काव्यक्षेत्रेऽमरा कृतिरस्ति यत्रविशिष्टस्वाभिमान-धनेनाचार्येणानेन स्वरचितान्येवोदाहरणानि प्रयुक्तानि । यथाह ग्रन्थारम्भे कविवर: -

निर्माय नूतनमुदाहरणानुरूपं काव्यं मयाऽत्र निहितं न परस्य किञ्चित् ।
किं सेव्यते सुमनसा मनसापि गन्ध: कस्तूरिकाजननशक्तिभृता मृगेण ।।"

रसगङ्गाधरे कविना काव्यस्य लक्षण हेतुभेदरसगुणदोषादीनि सर्वाणि तत्त्वानि विवेचितानि । सिद्धान्तदृष्ट्याऽयं ध्वनिमतानुयायी । अनेन विश्वनाथस्य "वाक्यं रसात्मकं काव्यम्" इति काव्यलक्षणं निरस्य "रमणीयार्थ-प्रतिपादक: शब्द: काव्यम्" इतिकाव्यलक्षणं प्रस्तुतम् । ध्वनिपरम्परानुसारेण रसोध्वन्यात्मत्वेन स्वीकृत्य रसस्य सर्वोत्कृष्टत्वं चानुमतम् । रसमीमांसा चास्य वेदान्ताश्रिता अस्ति । रसमीमांसायामेकादशमतान्युल्लिख्य विवेचितानि । नवैव रससंख्या रसगङ्गाधरे निरूपिताऽस्ति । इति ।

---

1. अग्निपुराणम्, 337-338
2. तत्रैव, 339.9

एवमाभरतात् पण्डितराजजगन्नाथपर्यन्तं रससिद्धान्तविवेचने संस्कृत काव्यशास्त्रे सोपानत्रयमवलोक्यते ।

§1§ प्राक्भारतीया वस्तुपरक व्याख्या ।

§2§ नाट्यशास्त्र व्याख्यातृभि: शैवाद्वैताश्रितात्मपरकव्याख्या वेदान्तनव्यन्यायालोके च तस्या: पुनराख्यानम् ।

§3§ वैष्णवाचार्याणां वैष्णवपरक व्याख्या संवलित मधुररसप्रकल्पना चेति ।

एषु शैवाद्वैताश्रितात्मपरक व्याख्या एव साहित्यक्षेत्रेमान्यतामलभत् । वस्तुपरकव्याख्या तु लुप्तप्राया एव । वैष्णवानां मधुररसस्तु भक्तिसम्प्रदाये एव परिसीमितामगमत् ।

अद्यत्वे रससिद्धान्तस्य मान्यता न केवलं संस्कृत भाषायामेव अपितु हिन्दीवंगाङ्गलादि भारतीय भाषास्वपि रससिद्धान्तस्य महता परिलक्ष्यते । हिन्दी भाषायां रामचन्द्रशुक्लस्य रसमीमांसा डा॰ नगेन्द्रमहाभागस्य च "रस-सिद्धान्त:" हिन्दीरसविवेचनस्य प्रकाशस्तम्भो स्त: । अनेकै: विद्वद्भिश्च रसशोधविषयत्वेनाङ्गीकृत्य अनेकान्यनुसंधानपूर्णग्रन्थरत्नानि प्रस्तुतानि ।

## 3॰ रससूत्रव्याख्या अथवा रसनिष्पत्ति: -

नाट्यशास्त्रकर्त्रा भरतमुनिना "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति:" इति सूत्रं नाट्यशास्त्रस्य षष्ठाध्याये रसोत्पत्तिविषयकं निर्दिष्टम् । तन्मते विभावानुभावव्यभिचारि भावानां च संयोगात् रसस्य निष्पत्तिरुत्पत्तिर्वा भवति । सूत्रस्यास्य भट्टलोल्लट:, श्रीशंकुक:, भट्टनायक:, अभिनवगुप्तश्चेति चत्वार: व्याख्याकार: सन्ति । एतेषु भट्टलोल्लटस्य उत्पत्तिवाद आरोपवादो वा श्रीशंकुकस्यानुमितिवाद:, भट्टनायकस्य च भुक्तिवादो भोगवादो वा अभिनवगुप्तस्य च अभिव्यक्तिवाद इति वादचतुष्टयं प्रसिद्धिं गतम् । उपलब्धसाहित्ये अभिनवगुप्तस्य अभिनवभारती नामधेया कृतिरेव प्राप्यते । अभिनवभारत्यामपि च ध्वन्यालोकलोचने अन्येषां मतानामुल्लेखोऽस्ति । संक्षिप्त: सूत्रमिदं परीक्षितुं चत्वार: रत्नतत्त्वपरीक्षका इव प्रवृत्ता: स्व-स्वं मतं च प्रतिष्ठापितवन्त: । रत्नपरीक्षाकाणां तु स्वभावोऽयं यद्यो यथा रत्नस्य मूल्यं

गरिमानं च निश्चिनोति नैवान्यस्तथा निश्चिनोतीति । निर्णये तत्र वैमत्यं नूनं भवत्येव । अत्र निर्णय प्रकार भेद एव न्यूनाधिक भावं प्रतिप्रयोजकः न वस्तुतत्त्वं प्रयोजकम् । वस्तुतत्त्वन्तु सर्वदा एकमेवास्ते । प्रकाराणां भेदेनान्योऽन्यभेदस्तु नैसर्गिक एव परं तेन वस्तुनः कोऽपि विरोधो नास्ति । आम्रफलास्वादन क्रियायां कश्चित् चूषणक्रियया त्वचं बीजं च निरस्यति अपरं च कर्तन क्रियया सत्वचं फलमास्वाद्य बीजं निराकरोति । इतरस्तु कर्तनेन त्वचमाकृत्य फलमास्वाद्य बीजं प्रक्षिपति एवमास्वादनप्रक्रिया भेदेऽपि आस्वाद्यफलस्य न कोऽपि भेदः । कामं फलेषु भिन्नजातीया भवेयुः, चूषणीयोग्यम्, त्वक्सहितभक्ष्ययोग्यम्, त्वग्रहितभक्ष्ययोग्यमितिपरं तद्रसास्वादस्तु न भिन्नरूपः । काव्येषु च तत्र त्रयः रसास्वाद कर्तारः - अनुकार्यैरामादि, अनुकर्तारो नटाः, सामाजिका वा देवदत्ताद्यः । तत्र केचन अनुकार्यैरामादौ, अन्ये नटेषु, अपरे च सामाजिकेषु रसस्य स्थितिमामनन्ति येन विभिन्न वादाः प्रचलिताः ।

## §1§ भट्टलोल्लटस्योत्पत्तिवादः -

भट्टलोल्लटस्य जीवनपरिचयादिकं नैव सम्यक् रूपेण ज्ञायते । डा॰ कान्ति चन्द्र पाण्डेय मतानुसारं भट्टलोल्लटः काश्मीरीयो दार्शनिकः कल्लट समकालिकश्चासीत् ।[1] अयमेव नाट्यशास्त्रस्यादिव्याख्याकाररूपेण स्वीक्रियते । अनेनास्य मतं भरतमतस्य साम्यतां भजते । अभिनवभारत्यामभिनवगुप्तेनास्य मतं इत्थं प्रतिपादितम्[2] -

"अत्र भट्टलोल्लटप्रभृतयस्तावदेवं व्याचख्युः-विभावादिभिः संयोगोऽर्थात् स्थायिनस्ततो रसनिष्पत्तिर्न तत्र विभावश्चित्तवृत्तेः स्थाय्यात्मिकाया उत्पत्तौ कारणम् । अनुभावाश्चात्र न रसजन्या अत्रविवक्षिताः, तेषां रस कारणत्वेन गणनानर्हत्वात्। अपितु भावानामेव येऽनुभावाः । व्यभिचारिणश्च चित्तवृत्त्यात्मकत्वात् यद्यपि न सहभाविनः स्थायिना, तथापि वासनात्मनेह तत्र विवक्षिताः । दृष्टान्तेऽपि व्यञ्जनादिमध्ये कस्यचिद्वासनात्मकता स्थायिवत् अन्यस्योद्भूतता व्यभिचारिवत् ।

---

1· स्वतन्त्रकलाशास्त्र, पृ॰68

2· अभिनवभारती - प्रथम भाग, पृ॰272·

तेन स्थाय्येव विभावानुभावादिभिरुपचितो रसः । स्थायी त्वनुपचितः । स चोभयोरपि । मुख्यया वृत्त्या रामादावनुकार्ये, अनुकर्तरि च नटे रामादिरूपतानुसन्धानबलादिति ।"[1]

ध्वन्यालोकलोचने च यथा -

"तथाहि पूर्वावस्थायां यः स्थायी स एव व्यभिचारिसम्पातादिना प्राप्तपरिपोषोऽनुकार्यगत एव रसः । नाट्ये तु प्रयुज्यमानत्वान्नाट्यरस इति केचित्"।

मम्मटोद्धृत लोल्लटमतं यथा -[2]

"विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः रत्यादिको भावो जनितः, अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः, व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो, मुख्यया वृत्त्या रामादावनुकार्ये, तद्रूपतानुसन्धानान्नर्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लट प्रभृतयः ।"

उद्धृतमतैरेतत् ज्ञायते यल्लोलटेन संयोगपदार्थो यथाभिमतं भरतेन तथाऽभ्युपगतः, स्थायिभावेन सह संयोग इत्यर्थः स्थायिभावाश्रयोऽनुकार्यो रामादि इति । एवं भट्टलोल्लटस्य मतसाराशि इत्थं निश्चीयते -

"विभावानुभावादिसंयोगादनुकार्ये रामादौ रस उत्पद्यते । अनुभावास्तमुत्पन्नरसं बोधयन्ति व्यभिचारि भावाश्च तं परिपोषयन्ति । अतः स्थायिभावेन सह विभावानामुत्पाद्योत्पादकभाव-सम्बन्धः, अनुभावानां तैः सह गम्यगमकभावसम्बन्धो व्यभिचारिणां तैः सह पोष्यपोषक-भाव-सम्बन्धो भवति । संयोग इत्यस्य शब्दस्येत्थमिमे त्रयोऽर्थाः - उत्पाद्योत्पादकभाव-सम्बन्धः - गम्यगमकभाव-सम्बन्धः-पोष्यपोषक भाव सम्बन्धश्चेति ।"

लोल्लटानुसारेणोपचितिरेव निष्पत्तिपदार्थः, स्थायिनो ह्युपचितावस्थैव रसः । इयमुपचितिरेका मिश्र प्रक्रियाऽस्ति, तत्र हि विभावानुभाव-व्यभिचारिणामपि योगो भवति । अपि च विभावैः स्थायिभावा उद्बुध्यन्ते इयमुद्बुद्धिरुत्पत्तिपदवाच्या अपि भवति । अनुभावैस्तस्य स्थायिभावस्य

---

1. ध्वन्यालोकलोचन, पृ॰148
2. काव्यप्रकाशः, चतुर्थउल्लासः, पृ॰96

प्रतीतिर्भवति व्यभिचारिभिश्च स पोष्यते । एवं विभावोद्भूतः स्थायिभावो-ऽनुभावैर्व्यभिचारिभिर्भाविश्च पोषितः सन् नाट्यरसो भवति । भट्टलोल्लटस्य व्याख्येयं मीमांसासिद्धान्तमूलकेति ज्ञायते ।

§2§ श्री शङ्कुकः -

भरतसूत्रस्यापरो व्याख्याता श्रीशङ्कुकोऽपि भट्टलोल्लटवत्केवलं नाममात्रशेषः । अस्य मतोद्धरणानि अभिनवभारत्याम्, ध्वन्यालोके लोचने,[2] एकमुद्धरणञ्चकाव्यप्रकाशेऽप्युपलभ्यते ।[3] श्री शङ्कुकमते अनुमानेन तटस्थो रसोऽनुमेयो भवति । चित्रतुरगन्यायेन नटे रामादिविषयिणी धीरुत्पद्यते । यथा चित्रा-ङ्कितं तुरगमवलोक्य "तुरगोऽयम्" इत्येष व्यवहारो भवति परं न सा प्रतीतिः सम्यक न मिथ्या न सन्देहरूपा नैव न सादृश्यरूपा एव, एवं सा चतुर्विध प्रतीति-विलक्षणा । अनेनैव प्रकारेण समुत्पन्ना रामादिसम्बन्धिनी बुद्धिः सम्यङ्मिथ्या-संशयसादृश्य प्रतीतिभ्यो विलक्षणैव । चित्रतुरगन्यायेन विभावभूतानां रामादीनां प्रतीतिरनुमिता भवति ततो रसोऽनुमेयतामुपैति । किं च यैरनुभाव-व्यभिचारि-भावरूप-लिङ्गैस्तत्र "शकुन्तलेयं दुष्यन्तविषयकरतिमती तत्र विलक्षणस्मितकटाक्षादि-मत्वात्" इत्येतद्विधमनुमानमुदेति, परं तानि लिङ्गान्यपि न सन्ति यथार्थानि। यथार्थास्मितकटाक्षाद्यनुभावास्तु शकुन्तलादावेव सम्भवा, परं नटे स्मितकटाक्षादिकं वीक्ष्य "इयमभिनेत्री शकुन्तला दुष्यन्तविषयकरतिमती" अथवा दुष्यन्ते "अयमभिनेता शकुन्तलाविषयकरतिमांस्तत्रस्तम्भस्वेदाद्यनुभावदर्शनात्" इत्येतादृशस्या-नुमानिकस्य प्रतीतिर्नटे स जायते अत्रानुमेयस्य रसस्याप्याधारः न सामाजिकोऽपितु कृत्रिमदुष्यन्तादिवर्तिरसः सामाजिकेनानुमीयते । एतेन भरतसूत्रस्थस्य संयोगस्यार्थो अनुमाप्य-अनुमापक-भाव इति "निष्पत्तिः" शब्दस्य च अर्थः "अनुमितिः" इति सिद्ध्यति । अर्थात् विभावानुभाव-व्यभिचारिसंयोगात् §अनुमाप्य-अनुमापक भावसम्बन्धात् । रसस्य निष्पत्तिः §अनुमितिः§ इति रससूत्रार्थः शङ्कुकमते ।

-----------------------------

1. अभिनवभारती, भाग-1, पृ.272-73

2. ध्वन्यालोकलोचन, पृ.186

3. काव्यप्रकाशः, चतुर्थ उल्लासः, पृ.102

§3§ भट्टनायक: -

भरतसूत्रस्य तृतीय: प्रमुखो व्याख्याकारो भट्टनायको भुक्तिवादी। अभिनवगुप्तेनाभिनवभारत्यां[1] ध्वन्यालोकलोचने[2] चोभयत्रतन्मतं सविस्तरं विवेचितं निराकृतं च। काव्यप्रकाशकारेणास्यमतं चतुर्थोल्लासे सादरेणोद्धृतं स्वीकृतं च। अस्य मतस्याशयोऽयं यद्रसस्य निष्पत्तिर्नानुकार्ये रामादौ भवति न चानुकर्तरि नटे। तौ तु द्वावपि तटस्थौ न च तौ रसमनुभवत:, वस्तुत: सामाजिको रसमनुभवति। मम्मटशब्देषु सिद्धान्तोऽयं यथा[3] - "न ताटस्थ्येन नात्मगतत्वेन रस: प्रतीयते, नोत्पद्यते, नाभिव्यज्यते अपितु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमान: स्थायि-सत्त्वोद्रेक प्रकाशानन्दमयसंविद्विश्रान्तिरूपेण भोगेन भुज्यते।"

एवं भट्टनायकेन संयोगस्यार्थो भोज्य-भोजक-भाव-सम्बन्ध: "निष्पत्ति:" शब्दस्य च अर्थ: भोगो भुक्तिर्वा विहित:। भुक्तिवादोऽयं सांख्यदर्शनसिद्धान्ताश्रित:। सुखदु:खादिका वस्तुतोऽन्त:करणधर्मा: न चात्मन: परं पुरुषान्त:करणसम्बद्धत्वात् तेषां पुरुषे प्रतीतिरौपाधिकी भवति, एवमेव रसस्य सामाजिकगता भवति सोपभोक्त:। सांख्यदर्शने सत्त्वोद्रेकेन कैवल्यावाप्तिर्वर्णिता। कैवल्यावस्था सत्त्वरजस्तमसादिभ्य: परावस्थाऽस्ति। भट्टनायकस्य भोजकत्वेऽपि सत्त्वोद्रेके सति रसानुभूतिर्जायते यत्र स्वपरभेदोऽस्तिरोहितो भवति। अवस्थेयं परमानन्दस्य तत्र सत्त्वगुणोदयाद्ध्रसानन्दं जायते। एवं मतमिदं सांख्यदर्शनाश्रितमित्यत्र न संशय:।

रससिद्धान्तस्य विकासे भट्टनायकस्य योगोऽतिशयं महत्त्वं भजते। तात्त्विक्या व्याख्यया यश: सर्वप्रथमं भट्टनायकमेव श्रयते। तत:पूर्वं काव्यास्वादप्रसंगे "हर्ष" इति भरत: "प्रीति"रिति भामह वामनौ "आह्लाद्" इत्यानन्दवर्धन: "चमत्कार" इति लोल्लट: "आनन्द" इति धनञ्जय: इत्यादय: शब्दा एव सामान्येन प्रायुज्यन्त रसास्वादे रसभोगे वा। परं रसास्वादस्वरूपं

---

1. अभिनवभारती - भाग एक, पृ.273-74
2. ध्वन्यालोकलोचनम्, पृ.207
3. काव्यप्रकाश - चतुर्थोल्लास:, पृ.104

केनापि न विश्लेषितम् । भट्टनायकेनेदं प्रथमतया अस्यां दिशि सफलं प्रयतितम् । रसास्वाद: काव्यानन्दो वा नाम चित्तस्यात्मविश्रान्ति: । इयं च विश्रान्ति: सत्त्वोद्रेके भवति । साधारणीकरणं हि भट्टनायकस्य सर्वोत्कृष्टोपलब्धि: । काव्यास्वादनस्य ह्ययं मौलिक: प्रश्नो यत्काव्येऽभिव्यक्ता व्यक्तिभावा: कवे: कविनिबद्धस्य वा पात्रस्य-सहृदयस्य कथमास्वाद्या भवन्ति । नैकस्यैव सहृदयस्य, अपितु कृत्स्नस्य सहृदयसमाजस्य । साधारणीकरणोद्भावनया भट्टनायकेनैतदेव साधितम् । इत:पूर्वमेतादृशं प्रामाणिकं समाधानं केनाप्याचार्येण नोपस्थापितमासीत् । एवं भट्टनायकस्य नूतनोद्भावनेयं साधारणीकरणरूपासर्वैरेव साहित्यक्षेत्रे श्लाघिता ।

§4§ अभिनवगुप्त: -

स्वपूर्ववर्तिनामाचार्याणां व्याख्यातृणां वा मतानि परीक्ष्याभिनवगुप्तेन स्वमतं प्रतिष्ठापितम् । अभिव्यक्तिवादिना आचार्येणानेन स्वकीयं मतमभिनवभारत्यां[1] ध्वन्यालोकलोचने[2] च सुष्ठु प्रतिपादितम् । काव्यप्रकाशेऽपि मतमस्य समादरेणोद्धृतमवलोक्यते । तदीयाखिलविवेचनस्य केन्द्रबिन्दुरस्ति सामाजिकस्य रसानुभूति: । अस्मिन्नेव निकषे स: परमतानि परीक्ष्यमाणो दृश्यते । मतं चास्य शैवाद्वैतोक्तानन्दास्वादमनुकरोति । तमधिकृत्यैवानेनाभिव्यक्तिवादस्य स्थापना कृता । अनेन "संयोगात्" इति पदस्यार्थ: "व्यङ्ग्यव्यञ्जकभावसम्बन्धात्" उत वा "प्रकाश्य-प्रकाशक-भाव-सम्बन्धात्" निष्पत्तेरर्थश्च "अभिव्यक्ति:" इति विहित:। मतेऽस्मिन् रसो नैव भावनाव्यापारोऽपितु व्यञ्जनापरिणामोऽस्ति । काव्यानुभूतिर्नैव अभिधाविषय:, न च लक्षणाविषयोऽस्ति प्रत्युत् व्यञ्जनाया एव । रत्यादय भावा वासनारूपेण सामाजिकेषु पूर्वमेव विद्यमाना भवन्ति सुषुप्तावस्थायाम्। ते च काव्यपठनेन नाट्यदर्शनेन वा विभावादीनां संयोगमवाप्य व्यञ्जनावृत्ते: भावनाव्यापारद्वाराभिव्यक्ता: सन्त: रसरूपे परिणता भवन्ति । अर्थात्

---

1. अभिनवभारती, पृ.470-473

2. ध्वन्यालोकलोचन, 187-190

साम्यावस्थायां सुप्ता इव स्थायीभावा लब्धानुकूलावसरं उद्बुध्यन्ते रसरूपे च परिणमन्ते। उदाहरणतया घटे गन्धः पूर्वमेव भवति परं जलसंयोगेनैव गन्धस्याभावो जायते, तथैव सहृदयहृदयस्थित स्थायीभावा अपि काव्यादिपठनेन नाटकादि-दर्शनेन वा अभिव्यक्ता रसास्वादयोग्यतां प्राप्नुवन्ति। अभिनवो रसं "व्यङ्ग्यम्" मत्वा तस्य ब्रह्मसहोदरत्वं सहृदयप्रतिष्ठितत्वं च स्वीकरोति। साहित्यक्षेत्रेऽस्य व्याख्या सर्वोत्कृष्टा सर्वमान्या च मन्यते।

अभिनवगुप्तस्य परवर्तिन आचार्याः प्रायशअभिनवमतमेव स्वीकुर्वन्त दृश्यन्ते। केनचिद् द्वि-त्रिस्थलेषु न्यूनाधिकः शास्त्रीय भेदः प्रकटितः। यथा धनिकधनञ्जयौ रसस्थितौ "सहृदयगतत्वं प्रतिपन्नम्-सहृदयगत एव स्थायिभावो रसतामेति" इत्यादिना। अभिनवगुप्तस्य व्यंग्यव्यञ्जकभावमप्यस्वीकृत्य तत्स्थाने भट्टनायकस्य भाव्य-भावकसम्बन्धमभिमन्येते। महिमभट्टो रसं काव्यात्मानं मन्यते- "काव्यस्यात्मनि संज्ञिनि रसादिरूपे न कस्यचिद् विमतिः" इत्यनेन रसस्थितिश्च सहृदयगतैव स्वीकृता स्वरूपविषयेऽस्य मतमभिनवमतमनुसरति परं प्रक्रिया विषयेऽनुमिति स्वीकरणात् श्री शंकुकमनुकरोति।

आचार्यमम्मटस्तु पूर्णतयाभिनवगुप्तमेव समर्थयति। अनेन संयोगस्य "व्यङ्ग्य व्यञ्जक-भावः" इत्यर्थः निष्पत्तेश्चाभिव्यक्तिरित्यर्थः अभिनवगुप्तवदेव स्वीकृतः। अभिनवापेक्षया अनेन भट्टलोल्लटादीनां मतान्यपि सहृदयपरकतयैव प्रस्तुतानि।

विश्वनाथोऽपि साहित्यदर्पणे स्वल्पपरिवर्तनेन पूर्वोक्तरीतिमेव रसास्वादे स्वीकरोति। प्रसङ्गेऽस्मिन् सुविश्रुतमन्तिमं नाम जगन्नाथस्य श्रूयते। अस्य मतं यथा -

"इत्थं चाभिनवगुप्त मम्मटभट्टादिग्रन्थ स्वारस्येन भग्नावरणचिद्विशिष्टो रत्यादि स्थायीभावो रस इति स्थितम्। वस्तुतस्तु वक्ष्यमाणश्रुति स्वारस्येन रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः।" इति।

अनेन प्रतीयते यद्रसस्वरूपसम्बन्धे नैवोभयोर्भेदः। उभयत्र नित्यत्वं स्वप्रकाशत्वं च रसस्य सिद्धम्। परं अभिनवमते चैतन्यं विशेषणं स्थायिभावश्च विशेष्यम्, पण्डितराजमते स्थायिभावो विशेषणं चैतन्यं च विशेष्यम् इति उभयोर्भेदः।

इदमेव शैवाद्वैतशाङ्कराद्वैतयोरन्तरम् । अर्थात् अभिनवेन रसनिष्पत्तिः शैवाद्वैतमते जगन्नाथेन च शाङ्कराद्वैत मते साधिता ।

पण्डितराजानन्तरं संस्कृत साहित्ये मौलिकं चिन्तनमस्तंगतमिव दृश्यते। सा खलु पुनरुपचिता पश्चाच्च संवर्धिता हिन्दीसाहित्ये विशेषतस्तु रीतिपरम्परायाम्।

ग§ प्रबोधचन्द्रोदयस्य रसविवेचनम् -

रसनिरूपणदृष्ट्या प्रबोधचन्द्रोदयस्य भावपक्षः पूर्णतया लब्धसाफल्यमवलोक्यते । यथा पूर्वमेवोक्तं यन्नाटकस्य कथावस्तु धर्मदर्शनसमन्वितमस्ति । अतएव नाटकमिदमाध्यात्मिक नाटककोट्यां गण्यते । आध्यात्मिकतत्त्वनिरूपणार्थं कविना तदनुकूलशान्तरसयोजना प्रामुख्येनाङ्गीत्वेन च कृता । आद्योपान्तं शान्तरसपरिपाको नाटके दृश्यते । यद्यपि काव्यशास्त्रमर्मज्ञैः "एक एव भवेदङ्गी शृङ्गारो वीर एव वा" इत्यादिना नाटकस्याङ्गीरसत्वेनशृङ्गारवीरयोरेव स्थापना विहिता । तत्र कैश्चन् शान्तरससत्तैवा स्वीकृता, अपरैश्चान्यरसेषु तदन्तर्भावं विधाय गौणरूपेण तस्य स्थितिः स्वीकृता । नाट्यशास्त्रकारेण भरतमुनिना अष्टौ रसाः प्रतिपादिता । परं सर्वप्रथमं तट्टीकाकारेण उद्भट्टेन "शृङ्गारहास्यकरुणरौद्रवीरभयानकाः वीभत्साद्भुतशान्ताश्च नवनाट्ये रसाः स्मृताः"[1] इत्युक्त्वा शान्तरस सत्ता नाट्ये स्वीकृता । परवर्तिभिराचार्यैरपि शान्तरसो नाट्यरसत्वेन स्वीकृतः । यथाह काव्यप्रकाशकारः-[2]

"निर्वेदस्थायि भावोऽस्ति शान्तोऽपि नवमो रसः"

विश्वनाथश्च -[3]

शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः ।
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः ।।
अनित्यत्वादिना शेषवस्तुनिःसारता तु या ।
परमात्मनः स्वरूपं वा तस्यालम्बनमिष्यते ।।

---

1. काव्यालङ्कारसारसंग्रहः, 4.4
2. काव्यप्रकाशः, 4.35
3. साहित्यदर्पणम्, 3.245-248

पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः ।
महापुरुष संगाद्यास्तस्योद्दीपनरूपिणः ।।
रोमाञ्चाद्या अनुभावास्तथा स्युर्व्यभिचारिणः ।
निर्वेदहर्षस्मरण मति भूतदयादयः ।।"

इत्यत्र शान्तरसस्य स्थायि-आलम्बन-व्यभिचारिणश्च अप्युल्लिखिताः ।
काव्यानुशासने च यथा -

"वैराग्यादि विभावो यमाद्यनुभावो धृत्यादिव्यभिचारी शमः शान्तः। वैराग्य संसारभीरुता तत्त्वज्ञानवीतरागपरिशीलनपरमेश्वरानुग्रहादिविभावो यमनियमाध्यात्मशास्त्रचिन्तनाद्यनुभावोधृतिस्मृतिनिर्वेदमत्यादिव्यभिचारी तृष्णाक्षयरूपः शमः स्थायिभाव प्राप्तः शान्तो रसः ।"[1]

संस्कृतनाटकानामुद्देश्यं न केवलं लोकानुरञ्जनमेवापितु जनसामान्ये सच्चरित्राधानमपि । लोकानुरञ्जनन्तु शृङ्गारवीरादिभिरनायासेन सम्भाव्यते परं मानवस्यान्तःकरणोद्देश्यं चरमं लक्ष्यमुत्थापयितुमाध्यात्मिक तत्त्वाववोधन-मावश्यकम् । कश्चिन्नाटककारस्तच्चिकीर्षति चेत्तर्हि शान्तरसालम्बनमेवोपयुक्तम् । शमस्थायिभावाश्रितेषु नाट्यकृतिषु आध्यात्मिकता शान्तरसं विहाय कुतोऽन्यत्र सम्भवा ? अतः आध्यात्मिकतत्त्वनिरूपणे शम निर्वेदोवा स्थायि-भावः शान्त एव समर्थः । परवर्तिना प्रतीक नाटककारेण वेदान्त देशिकेनापि स्वकीय-सङ्कल्पसूर्योदयस्य प्रस्तावनायां यथोक्तम्[2] -

"शान्त रस एव चित्तरवेदापनेता पारमार्थिकानन्ददातास्त्यतः स शान्त एव वस्तुतो रसः .....शान्तस्य एव निःसंदिग्धो याथार्थ्येण रसः.... शमस्तु परिशिष्यते शमितचित्तरवेदो रसः ।"

अभिनवगुप्तेनापि शान्तरसविषयकनाट्यशास्त्रांशः {प्रक्षिप्तांशः} इत्थं व्याख्यातः[3]- "क्वचिद्धर्मः, क्वचित्क्रीडा क्वचिदर्थः क्वचित् शमः । अथ शान्तो नाम शमस्थायिभावात्मको मोक्षप्रवर्तकः । स तु तत्त्वज्ञानवैराग्याशय-शुद्ध्यादिभिर्विभावैः समुत्पद्यते । तस्य यमनियमाध्यात्मध्यानधारणोपासनसर्व-

---

1. काव्यानुशासन, 2.17
2. संकल्पसूर्योदयम्, प्रस्तावना, पृ.4
3. नाट्यशास्त्रम्, 6.1.5 अभिनव व्याख्या प्रक्षिप्तांशः ।

भूतादयलिङ्गग्रहणादिभिरनुभावैरभिनय: प्रयोक्तव्य: । व्यभिचारिणश्चास्य निर्वेदस्मृतिधृतिसर्वाश्रमशौचस्तम्भरोमाञ्चादय: ।" अनेन शान्तरसस्याभिनेयत्वं नाट्यरसाङ्गत्वं चापि सिद्ध्यति । अत एव श्री कृष्णमिश्रेण प्रबोधचन्द्रोदयाख्ये आध्यात्मिकनाटके शान्तरस एवाङ्गीरसरूपेण स्वीकृत: । शमस्थायिभावो- नाटकस्यास्य प्रस्तावनायां- "मध्याह्नार्कमरीचिकास्विव····इत्यादौ प्रथमेनैव पद्येन व्यज्यते । पुनश्च नटस्योक्तिर्नाटकस्य शान्तरसाङ्गीत्वंव्यनक्तियथा- "आदिष्टोऽस्मि सकलसामन्त···श्रीमतागोपालेन···यद्वयं शान्तरसप्रयोगाभिनयेना- त्मानं विनोदयितुमिच्छाम: । ततो यत्पूर्वमस्मद्गुरुभिस्तत्रभवद्भि: श्रीकृष्णमिश्रै: प्रबोधचन्द्रोदयं नाम नाटकं निर्माय भवत: समर्पितमासीत् तदद्य राज्ञ: श्रीकीर्तिवर्मण: पुरस्तादभिनेतव्यं भवता इति"।

प्रबोधचन्द्रोदयस्य उपर्युक्तदिशासमीक्षणं क्रियते तदापि नाटकस्य अङ्गीरस: शान्त: स्थीयते शान्तरसप्रधानं नाटकमिदं सिध्यति । यस्मिन् परमात्मन: स्वरूपमेवास्यरसस्यालम्बनमथवा संसारस्यानित्यता दु:खमयता असारता वा आलम्बनं यथा विवेचनायोक्तदिशा पूर्वमेवोक्तम् । नाटकेऽस्मिन् "प्रबोधोदय:" शान्तरसस्यालम्बनविभावोऽस्ति । अपि च नाटकस्य पञ्चमाङ्के शोकाकुलमन: प्रति सरस्वत्या: वैराग्योपदेशा:[1] द्वितीयतृतीयाङ्कयोश्च बौद्धजैनादीनां पात्राणां सैद्धान्तिका आलोचनात्मका: संवादा:[2] काशीय ब्रह्मणादीनामाश्रमवर्णनम्[3] कुरुक्षेत्र-मन्दार चक्रतीर्थादीनां च वर्णनं[4] षष्ठाङ्के च दार्शनिकं विश्लेषणं शान्तरसोद्दीपकत्वाद् तस्योद्दीपनविभावा: सन्ति । शमावस्थायां च हर्षस्मरणदयादयो[5] भावा: । यैर्विभावै {आलम्बनोद्दीपनै:} अनुभावसञ्चारिभिश्च परिपुष्ट: शमस्थायीभाव: अन्ते शान्तरसरूपे परिणमते । ब्रह्मांशभूतात्मा एव शान्तरसस्याश्रयस्थानमस्ति । प्रबोधोदये सति ब्रह्मानन्दा- स्वादरूपशान्तं रसमयमात्मैव भुञ्जते[6] इत्थं शान्तरसस्यपरिपाको नाटके आद्योपान्तमवलोक्यते ।

प्रबोधचन्द्रोदये अङ्गीरसस्तु शान्त एव इति सुनिश्चितम् । परमन्येऽपि

---

1· प्रबोधचन्द्रोदय:, 5·14-18, 21-25, 31
2· तत्रैव, 2·5, 3·3
3· तत्रैव, 4·29, 30
4· तत्रैव, पृ·196
5· तत्रैव, 5·26, 32
6· तत्रैव, 6·30-32

रसाः कविना परिपाकतां नीताः । संक्षिप्तेऽपि घटनाक्रमे समेषामेव रसानां न्यूनाधिक्येन नाटके परिपाकः कवेः प्रतिभापरिचयं ददाति ।

शृङ्गाररसः - प्रबोधचन्द्रोदये अङ्गभूतेषु रसेषु शृङ्गाररसस्य परिपाको विशेषेण दृश्यते । नाटकस्य प्रारम्भ एव शृङ्गारेण[1] भवति । प्रथमे एवाङ्के सूत्रधारः रतिकामयोः शृङ्गारं वर्णयति । यथा -

उत्तुङ्गपीवरकुचद्वयपीडिताङ्गमालिङ्गितः पुलकितेन भुजेन रत्या ।
श्रीमाञ्जगन्ति मदयन्नयनाभिरामः कामोऽयमेति मदघूर्णितनेत्रपद्मः ।।

अत्र कामस्य रतिनामकभावः स्थायिभावस्तत्पत्नीरतिश्चालम्बनं, उत्तुङ्गपीवरकुचद्वयपीडनमालिङ्गनं चोद्दीपनम्, नयनाभिरामं मदश्चानुभावाः, पुलकित रोमाञ्चादयश्च सञ्चारिणः । एभिः परिपुष्टः कामस्य रतिरूपस्थायिभावः शृङ्गाररसरूपेण परिणतिमुपगतः । अपि च-[2]

"स्फुरद्रोमोद्भेदस्तरलतरताराकुलदृशो
भयोत्कम्पोत्तुङ्गस्तनयुगभरासङ्गसुभगः ।
अधीराक्ष्या गुञ्जन्मणिवलयदोर्वल्लिरचितः
परीरम्भो मोदं जनयति च संमोहयति च ।।"

अत्रापि रतिरूप स्थायिभावः कामपत्नी च आलम्बनं, भयोत्कम्पोत्तुङ्गस्तननयुगभरासङ्ग सुभगः इत्यादयः उद्दीपनविभावाः परिरम्भो मोदं संमोहनादयश्च सञ्चारिणः । एभिरपि परिपुष्टः शृङ्गाररसोऽभिव्यज्यते ।

अन्यत्रापि नाटकस्य द्वितीयाङ्के महामोहस्य मिथ्यादृष्ट्या सह वार्तालापे[3] शृङ्गाररसः पूर्णपरिपाकतां प्राप्तो दृश्यते । अपि च तृतीयाङ्के क्षपणकस्य कापालिकी सेवनप्रसङ्गे[4] "अयिपीनघनस्तनशोभिनि परित्रस्तकुरङ्गविलोचने ....।" इत्यादावपि ।

---

1. प्रबोधचन्द्रोदयः, 1.10
2. तत्रैव, 1.20
3. तत्रैव, 2.35, 36
4. तत्रैव, 3.19

हास्यरस: - "अथ हास्यो नाम हासस्थायिभावात्मक: । स च विकृत-
"परिवेषालंकारधार्ष्ट्यलौल्यकुहुकासत्प्रलापव्यंग्यदर्शनदोषोदाहरणादिभि:
विभावैरुत्पद्यते । तस्योष्ठनासा कपोलस्पन्दनदृष्टिव्याकोशा कुञ्चनस्वेदास्य-
रागपार्श्वग्रहणादिभिरनुभावैरभिनय: प्रयोक्तव्य: । व्यभिचारिणश्चास्यावहित्था-
लस्यतन्द्रानिद्रास्वप्न प्रबोधासूयादय: ।"[1]

उपर्युक्तलक्षणादिशापर्यवेक्षणेन नाटकस्य द्वितीयाङ्‌के दम्भवर्णने अस्य रसस्य परिपाकोऽवलोक्यते । यथा -

"मृद्बिन्दुलाञ्छितललाटभुजोदरोर:
कण्ठोष्ठपृष्ठचिबुकोरुकपोलजानु: ।
चूडाग्रकर्णकटिपाणि विराजमान-
दर्भाङ्‌कुर: स्फुरति मूर्त इवैष दम्भ: ।।"

अत्र "बालचन्द्राकार चन्दनचिह्नितललाटभुजोदरोर: कण्ठोष्ठपृष्ठ-चिबुकोरुकपोलजानु: समाग्रण्यपि वपुरङ्‌गानि यस्यतादृशं पात्रविशेषं चित्रितम् । एतादृशस्य विभिन्नचिह्नचिह्नितपात्रस्य दर्शनसमकालमेव हास्योद्गमो नैसर्गिक एव न केवलं चिह्नचिह्णताण्येवाङ्‌गानि परं शिरसि कर्णयो: कटिप्रदेशे हस्तयो: दर्भाङ्‌कुरधारी अपि । विचित्र वेषधारी अयं "सर्कस" स्थित "जोकर" इति पात्रविशेषवत् निजदर्शनैव दर्शकेषु हास्यं जनयति । अत्र हास: स्थायिभावोऽस्ति तदालम्बनं च दाम्भिक: । "बालचन्द्राकारचन्दचिह्नताङ्‌गानि चूडाग्रकर्ण कटिपाणिधृतदर्भाङ्‌कुरं चोद्दीपनविभावा:, हास्यानुभाव:, वैचित्र्यं हर्षादयश्च सञ्चारिण: आश्रयश्चास्य दर्शक: सामाजिक: । एभिर्विभावानुभाव--व्यभिचारिभि: हासाख्य: स्थायिभावो हास्यरसं पोषयति । अपि च तृतीयाङ्‌के कापालिक क्षपणकयोर्वार्तालापमपि[2] हास्यरसपुष्टिं नयति ।

रौद्ररस: - "अथ रौद्रो नाम क्रोधस्थायिभावात्मको रक्षोदानवोद्धतमनुष्यप्रकृति:

---

1. नाट्यशास्त्रम्, 6.48

2. प्रबोधचन्द्रोदय:, तृतीय अंक:, पृ. 141.

संग्रामहेतुकः स च क्रोधाधर्षणाधिक्षेपेनानृतवचनोपघातवाक्यारुष्याभिद्रोहमात्सर्यादिभिर्विभावैरुत्पद्यते । तस्य च ताडनपाटनपीडन छेदनभेदेन प्रहरणहरणशस्त्रसंपातसंप्रहाररुधिराकर्षणाद्यानि कर्माणि । पुनश्च रक्तनयन भ्रुकुटीकरगदंतौष्ठपीडनगण्डस्फुरणहस्ताग्रनिष्पेषादिभिरनुभावैरभिनयः प्रयोक्तव्यः ।[1]

नाट्यशास्त्रोक्तलक्षणेनानेन स्फुटं भवति यत्क्रोधस्य पूर्णपरिस्फुटनमेव रौद्ररसः । प्रबोधचन्द्रोदयस्य द्वितीयाङ्के यथा-[2]

"अन्धीकरोमि भुवनं बधिरीकरोमि
धीरं सचेतनमचेतनतां नयामि ।
कृत्यं न पश्यति न येन हितं शृणोति
धीमानधीतमपि न प्रतिसंदधाति ।।"

इत्यत्र क्रोधः स्थायिभावः । शान्तिश्रद्धादिविवेकपक्षिभिराचेष्टितं चोद्दीपनम् "अन्धीकरोमि बधिरीकरोमि" इत्याद्यः उक्तय एवानुभावा, आवेगाद्यश्च सञ्चारिणश्च क्रोधस्थायिभावं रौद्ररसरूपेण परिणमन्ते ।

वीर-रसः - "वीरो नामोत्तमप्रकृतिरुत्साहात्मकः । स चासम्मोहाध्यवसायनय-विनय-बलपराक्रम-शक्ति-प्रताप-प्रभावादिभिर्विभावैरुत्पद्यते[3] उपर्युक्त लक्षणादिशा प्रबोधचन्द्रोदये क्षमावचने[4] वस्तुविचारोक्तिषु[5] सन्तोषादीनां वचनेष्वपि[6] वीररसस्य परिपाकमभवत् । तत्रचतुर्थाङ्के वस्तुविचारविवेकयोर्वार्तालापे वीररसस्योद्रेको विशिष्टरूपेणाभवत् - यथा -[7]

"सोऽहं प्रकीर्णैः परितो विचारैः शरैरिवोन्मथ्य बलं परेषाम् ।
सैन्यं कुरूणामिव सिन्धुराजं गाण्डीवधन्वेव निहन्मि कामम् ।।"

अत्र वस्तुविचारस्य उत्साहः स्थायिभावः, कामश्चालम्बनम्, कामस्य विषयभोग-

---

1. नाट्यशास्त्रम्, 6·6·4
2. प्रबोधचन्द्रोदयः, 2·29
3. नाट्यशास्त्रम्, 6·51
4. प्रबोधचन्द्रोदयः, 4·17
5. तत्रैव, 4·14
6. तत्रैव, 4·18
7. तत्रैव, 4·14

-चेष्टानि विवेकोच्छन्नप्रवृत्तिश्चोद्दीपनम्, सनिदर्शनपुरःसरं वचनोच्चारणमनुभावः, धैर्यगर्वतर्कादयश्च व्यभिचारिण आश्रयश्चास्य वस्तुविचार एव ।

वीररसस्यान्यं निदर्शनं यथा-पुरुषः-भोः भोः सैनिकाः

सज्जयतां कुम्भभित्तिच्युतमदमदिरामत्तभृङ्गाः करीन्द्रा

युज्यतां स्यन्दनेषु प्रसभजितमरुच्चण्डवेगास्तुरङ्गाः ।

कुन्तैर्नीलोत्पलानां वनमिव ककुभामन्तराले सृजन्तः

पादाताः संचरन्तु प्रसभमसिलसत्पाणयोऽप्यश्ववाराः ।।[1]

<u>बीभत्सरसः</u> - "बीभत्सो नाम जुगुप्सास्थायिभावात्मकः । स चाहृद्याप्रियाचोक्ष्यानिष्टश्रवणदर्शनकीर्तनादिभिर्विभावैरुत्पद्यते । तस्य सर्वाङ्गसंहारमुखविकूणनोल्लेखननिष्ठीवनोद्वेजनादिभिरनुभावैरभिनयः प्रयोक्तव्यः । भावाश्चास्यापस्मारोद्वेगावेगमोहव्याधिमरणादयः ।"[2] नाट्यशास्त्रोक्त बीभत्सरसलक्षणदिशा समीक्षणेन प्रबोधचन्द्रोदये द्वित्रिषु स्थलेषु बीभत्स रसो दृश्यते । निदर्शनं यथैकम्[3] -

"बहुलरुधिरतोयास्तत्र सस्रुः स्रवन्त्यो, निबिडपिशितपङ्का कङ्कराजावकीर्णाः ।

शरदलितविदीर्णोत्तुङ्गमातङ्गशैल स्खलिततरयविशीर्णच्छत्रहंसावतीर्णाः ।।"

इत्यत्र श्रद्धा विष्णुभक्तिं प्रति युद्धवर्णनं वक्ति । तस्या वर्णनार्थे जुगुप्सा अत्र स्थायिभावः । अवकीर्णरुधिरमांसकङ्कादय उद्दीपनविभावाः, निष्ठीवनादयश्चानुभावा आवेशः सैनिकमरणादयश्च सञ्चारिणः । एभिः संयुक्तो बीभत्सरसो निष्पद्यते ।

<u>करुण-रसः</u> - "करुणो नाम शोकस्थायिभावः । स च शापक्लेशविनिपतितेष्टजनविप्रयोगविभवनाश-वध-बन्ध-विद्रव-उपघात व्यसनसंयोगादिभिर्विभावैः समुपजायते।"[4] इति भरतोक्तं करुणरसलक्षणम् । प्रबोधचन्द्रोदये करुणरसो यथा[5]- नाटकस्य तृतीयाङ्के-

---

1. प्रबोधचन्द्रोदयः, 4.25
2. नाट्यशास्त्रम्, 7.73
3. प्रबोधचन्द्रोदयः, 5.10
4. नाट्यशास्त्रम्, 6.51
5. प्रबोधचन्द्रोदयः, 3.2

श्रद्धा विप्रयुक्ताशान्ति: - मात:, मात:, क्वासि, देहि मे प्रियदर्शनम् ।
अथवाऽलं जीवितसंभावनया-यत: -

"मामनालोक्य न स्नाति न भुङ्क्ते न पिबत्यप: ।
न मया रहिता श्रद्धा मुहूर्तमपि जीवति ।।"

अत्र शान्त्या: शोक: स्थायिभाव:, विप्रयुक्ता श्रद्धा चालम्बनं विभाव: । अन्वेषणेनापि अप्राप्यत्वं करुणायाश्च श्रद्धासम्बन्धवार्तालापमुद्दीपनविभावा:, तच्चेष्टादिकमनुभाव: स्मृतिविषादचिन्तादयश्च व्यभिचारीभावा: । यैभि:परिपुष्ट: शोक: करुण रसं पोषयति । अपरं च निजापत्यादि मरणानन्तरं मनस उक्तिषु शोको अभिव्यज्यते । यथा -

"हा प्रिये, क्वासि, देहि मे प्रतिवचनम् ।
स्वप्नेऽपि देवि रमसे न विना मयात्वं
स्वापे त्वया विरहितो मृतवद्भवामि ।
दूरीकृतासि विधिदुर्ललितैस्तथापि
जीवत्यवेहि मन इत्यसवो दुरन्ता: ।।"

अत्र मनस: शोकं स्थायिभाव: विनष्टाप्रवृत्तिरूपपत्नी चालम्बनविभाव:, संकल्पस्य तद्विषयिकी वार्ता आश्वासनादयश्च उद्दीपनविभावा:, मन एवाश्रय:, स्मरणे तद्गुणकथनं प्रलापादयश्चानुभावा:, मूर्च्छा-मोह-स्मृति:-चिन्ता-विषादयश्च सञ्चारिण: । एभि: संयोगेन करुणरसस्य परिपाको भवति । इति ।

अद्भुतरस: - अथाद्भुतो नाम विस्मयस्थायिभावात्मक: । स च दिव्यजन-दर्शनेप्सितमनोरथावाप्त्युपवनदेवकुलादिगमनसभाविमान मायेन्द्रजालसंभावनादिर्वि-भावैरुत्पद्यते ।

नाटकस्य षष्ठाङ्के ऐन्द्रजालिक वर्णने अद्भुतरस दृश्यते । यथा -

शब्दानेष शृणोति योजनशतादाविर्भवन्ति स्वत-
स्तास्तावेदपुराणभारतकथास्तर्कादयो वाङ्मया: ।

---

1. प्रबोधचन्द्रोदय:, 5.13
2. नाट्यशास्त्रम्, 7.75

ग्रथ्नाति स्वयमिच्छयाशुचिपदैः शास्त्राणि काव्यानि वा
लोकान्भ्रामयति पश्यति स्फुटरुचो रत्नस्थलीर्भैरवी ।।"

अपि च -

"कनकसिकतितलस्थलाः स्रवन्तीः पृथुजघनाः कमलानना वरोरुः ।
मरकतदल कोमला वनालीर्भज निजपुण्यचिताश्च सर्व भोगान् ।।"

उपर्युक्तश्लोक पठनसमकालमेव मनो विस्मयान्वितो जायते । विस्मयमेवात्र स्थायिभाव मधुमतीभूमिकालम्बनम् । तत्प्रभावेन कनकसिकततलनदी-दर्शनं पृथुजघनकमलनयनस्त्र्यादिदर्शनं चोद्दीपनविभावा मनश्चाश्चो आवेशभ्रम हर्षादयश्च सञ्चारिणः । एभिर्विभावानुभावव्यभिचारीभिःसंयोगेन विस्मयाख्यो स्थायिभावोऽत्र अद्भुतरसरूपे परिणमते ।

उपर्युक्तविश्लेषणेन स्पष्टमेतद् विभिन्नरसानां परिपाकस्तावत् कविना नाटकेऽस्मिन् प्रसङ्गानुरूपं यथोक्तदशा विहितः । श्रृङ्गाररसः काव्यमनीषिभिः रसराजः प्रोक्तः । स च श्रीकृष्णमिश्रेण प्रायुर्वसमायोजनेन समादृतः रसराजः । श्रृङ्गाररस एव बीभत्सावस्थां प्राप्य शोकस्थायिना करुणं जनयन्शान्तस्यामृतोपमैरुपदेशैः शान्तावस्थामेवाधिगच्छति । इत्थं कवेः मनोवैज्ञानिकरससंयोजना अपि नितरां श्लाघ्या । इति ।

= = = = = =

# नवमोऽध्याय:

## उपसंहार:

श्रीकृष्णमिश्रस्यान्यतमं नाटकं प्रबोधचन्द्रोदयमधीत्य सूक्ष्मेक्षिकया च निरीक्ष्य एतदेव निश्चीयते यत् कविप्रवरोऽयं विविधशास्त्रज्ञः प्रकाण्डपण्डितो बहुश्रुतः कविश्चासीत् । तस्य प्रणीतं प्रबोधचन्द्रोदयनाटकं रूपकात्मक शैल्यां निबद्धं संस्कृतसाहित्यस्य विख्यातं लाक्षणिकं नाटकं खलु । शैलीयं नाट्यरूपेण सर्वप्रथमं श्रीकृष्णमिश्रेणैवाङ्गीकृता तथाप्यस्याः शैल्या बीजं वेदेषु सुतरामुप-लभ्यते । तत्र हि केषुचित् संवादसूक्तेषु रूपकात्मकशैल्या अलंकारिकः प्रयोगोऽवलोक्यते । पश्चाच्च ब्राह्मणग्रन्थेषु आरण्यकेषु, उपनिषत्सु च शैलीयमेव परिष्कृतरूपेणोपचीयते । तत्र रूपकात्मिका शैलीयं दृष्टान्त-कथारूपेण परिणता बभूव । दृष्टान्तकथारूपकेषु आध्यात्मिकतत्त्वानां व्याख्या बहुधा प्राप्यते । श्रीमद्भागवतस्य पुरञ्जनोपाख्यानं तु प्रसिद्धमेव । बौद्ध-जैन-साहित्येऽपि रूपककथानां प्रचुरं साहित्यमुपलभ्यते । तत्र सिद्धर्षिसूरेः "उपमितिभवप्रपञ्चकथा" जयरामस्य च प्राकृतकृतिः "धम्मपरिक्खा" उल्लेखनीये । एवं रूपकात्मकशैल्याः साहित्यं वेदादारभ्येदानीं यावत् प्रचलितम् । परं नाट्यरूपेणास्याः शैल्याः प्रवर्तनं प्रथमं श्रीकृष्णमिश्रस्यैव रचनायामवलोक्यते । कविना तथात्र साफल्यमधिगतं यथानुकृतेयं परवर्तिभिः काव्यकृद्भिः । तैरस्यां शैल्यामनेकानि नाटकानि रचितानि न केवलं संस्कृतभाषायामेवापितु हिन्दी-भाषायामपि शैलीयं बहुधा प्रचलिता । केषुचिच्च परवर्तिषु नाट्यकृतिषु प्रबोधचन्द्रोदयस्याक्षरश अनुकरणमपिदृश्यते । लोकप्रियनाटकमिदं भाषान्तरेष्वनूद्यते । अनेन नाटकस्यास्य महत्त्वं स्वत एव द्योत्यते ।

प्रबोधचन्द्रोदयनाटकं न केवलं रूपकात्मकत्वेन विशिष्यते नाट्यशास्त्रीय-दृशाऽपि महत्त्वपूर्णं स्थानं श्रयते । भाषा शैली चास्य नाटकस्य नितरां श्लाघ्या । शमस्थायिभावे शान्तरसमधिकृत्य इतः प्राक् नैव काऽपि नाट्यकृतिः लिखिता। पुनश्च शान्तरसस्याभिनेयत्वं भरतमुनि-प्रभृतिभिरपि निषिद्धम् । दुरभिनेयोऽपि शान्तरसः कविना अतीव नैपुण्येन नाटके अङ्गीरसरूपेणाङ्गीकृतः,

आद्योपान्तं च रसस्य परिपाको विहित: । शान्तरसस्याङ्गत्वेऽप्यन्येरसा अपि कविना यथाक्रमं निवेशिता: । "काव्ये रस: जीवितम्" इत्युपपत्तिभि: तत्प्रतिपादनक्षमाणां काव्यतत्त्वमर्मज्ञानां मनीषिणां सिद्धान्त: । नाटके शान्तरसेन सहैव वीर-श्रृङ्गार-करुण-हास्य बीभत्स-भयानकादय: रसा अपि सन्निविष्टा: सन्ति । भरतोक्त वस्तुनेतारसादयो गुणा अपि नाटके प्रसंगानुरोधेन मिलन्ति । पात्राणां चरित्र चित्रणे तेषां कथनोपकथने, घटनानां संयोजने, कविप्रवर: सिद्धहस्त: । नैव नाटके कुत्रापि रसभङ्ग: प्रक्रमभङ्गो वा जात: । नूनमिदं नाट्यनियमानपि यथोचितं निर्वाहयति ।

अपरं वैशिष्ट्यं नाटकस्यास्य दार्शनिककथावस्तु । भवति हि दर्शनं निश्चयेन दुर्ग्राह्यम् । नैव लोकसामान्यो दर्शनरहस्यं वेत्तुं क्षमते । दुर्ग्राह्य: क्लिष्टश्च विषयोऽयं नाट्यरूपेण पात्रपरिकल्पनया घटना संघटनेन पुरतोऽवस्थाप्यते तदानायासेनैवाल्पधियोऽपि अस्य रहस्यं बोद्धुं सक्षमा भवन्ति । कविना प्रबोधचन्द्रोदये अद्वैतवेदान्तविष्णुभक्त्यो: समन्वयमतीव नैपुण्येन समुपस्थापितम् । अद्वैतवेदान्तस्य सिद्धान्तानामुपकल्पनया सहैव लोकायत-सौगतआर्हत-मीमांसादीनां दर्शनसिद्धान्तानामपि समावेशो नितरां श्लाघनीय: । विभिन्नपात्रै: पुरतोऽवस्थाप्यमाना इमे सिद्धान्ता दुर्बोधा अपि सरलतया हृदयङ्गमा जायन्ते । माधुर्यप्रसादगुणोपेता भाषा शैली अस्य महत्त्वं नूनमेव वर्धयति ।

लौकिक संस्कृतसाहित्ये भासस्य गणना प्रथमनाटककाररूपेण क्रियते यस्य त्रयोदशनाटकानि प्राप्यन्ते । तेषु बालचरिते प्रतीकप्रयोगस्य अंशत: सङ्केतोऽवाप्यते । भासानन्तरं कविवराश्वघोषस्य शारिपुत्रप्रकरणेऽपि प्रतीकप्रयोग अंशत एवाभवत् । पुनश्च श्रीकृष्णमिश्रं यावदनेके कालिदासभवभूतिप्रभृतयो नाटकारा अभवन् येषां नाटकानि संस्कृतसाहित्यस्य गौरवं वर्धयन्ति अद्यापि । परं नैव कुत्रापि प्रतीकात्मकशैल्या: स्वच्छन्द प्रयोगस्तत्र दृश्यते । कथनस्याभिसन्धिरियं यन्नाट्यरचनायां श्रीकृष्णमिश्राश्रिता प्रतीकात्मका शैलीयं संस्कृतनाट्यसाहित्ये अभिनवा एवासीत् । तत्र च दुर्ज्ञेयं विषयजातं नाट्यकौशलेन सुविज्ञत्वमुपपद्यते ।

नाटकस्यमनोविज्ञानपक्षोऽपि नितरां प्रशंसनीय: । मनोवृत्तीनां पात्रत्वेनपरिकल्पना तासां च यथार्थं स्वरूपप्रतिपादनं कवे: प्रज्ञाकौशलं परिचाययति । निसर्गविरुद्धा अपि मनोवृत्तयो यौगपद्येन चित्रिता नैव नाट्य नियमानुल्लङ्घयन्ति । तासां घटनासंयोजने कथनोपकथनेषु च मनोज्ञता कृतेर्महत्त्वं वर्धयति । एतादृशेषु नाटकेषु प्रायशो नाट्यगुणानामभाव एव दृश्यते परं प्रबोधचन्द्रोदय विषयेऽस्मिन् अपवाद एव । दार्शनिका-ध्यात्मिकविषयाणां समावेशो यादृशोऽत्र दृश्यते नैव तादृगन्यत्र कुत्रापि । परवर्ति साहित्ये प्रतीकशैल्यां बहूनि नाटकानि रचितानि परं तानि कथमप्यभिनवं तत्त्वमुन्मिषन्तीति दृश्यन्ते । अस्यां शैल्यां प्रणीतेषु नाटकेषु यशपालस्य "मोहराजपराजय:" वेंकटनाथस्य "संकल्पसूर्योदय:" कर्णपूरस्य "चैतन्यचन्द्रोदय:" वादिचन्द्रसूरे: "ज्ञानसूर्योदय:" भूदेवशुक्लस्य "धर्मविजयनाटकम्" कृष्णदत्तमैथिलस्य "पुरञ्जनचरितम्" आनन्दरायमखीमहोदयस्य "विद्यापरिणयम्" रविदासस्य च "मिथ्याज्ञानविडम्बनम्" इत्यादय मुख्या: रचना: सन्ति । पश्चाच्च चौअशताब्द्यां परम्परेयं हिन्दीसाहित्येऽप्यवतारिता संलक्ष्यते । हिन्दीसाहित्यक्षेत्रेऽपि प्रतीकशैल्या विस्तृतं साहित्यं जातम् ।

अनेन श्रीकृष्णमिश्रस्य साहित्यक्षेत्राय योगदानं स्वत एव ज्ञायते । अद्वितीयेयं प्रबोधचन्द्रोदयाख्या कृतिर्महदुपकरोति साहित्यरसिकानाम्, विस्तारयति च कीर्तिमेतादृशीनां कृतीनाम्, इत्यत्र नैव कस्यापि विप्रति-पत्तिरिति विनिश्चय: ।

"इत्यलमतिपल्लवितेनेति शम्"

"श्रीशारदार्पणमस्तु"

= = = = = =

# सन्दर्भ-ग्रन्थ-सूचीपत्रम्

1. अग्निपुराणम् – सम्पा॰ बलदेव उपाध्यायः, काशीसंस्कृतग्रन्थमाला, वाराणसी, 1966.
2. अभिनवभारती – अभिनवगुप्तः, गायकवाड-ओरियन्टलसीरीज़, बड़ौदा-1926.
3. अभिनवभारती – सम्पा॰ डॉ॰ नगेन्द्रः, दिल्ली वि॰वि॰ दिल्ली, 1964.
4. अभिनवदर्पणम् – सम्पा॰ मनीमोहनघोषः, कलकत्ता-संस्कृत सीरीज़, कलकत्ता।
5. अभिधर्मकोशः – सम्पा॰ द्वारकादासः, व्या॰ यशोमित्र एवं वसुबन्धुकृतभाष्यः, वाराणसी, बौद्धभारती, 1973.
6. अथर्ववेदः – सम्पा॰ विश्वबन्धुः सायणाचार्यकृतभाष्यः विश्वेश्वरानन्द वैदिकशोधसंस्थानम्, होशियारपुरम् पंजाबः, 1961.
7. उपनिषद्भाष्यम् – सानुवादशांकरभाष्यः, गीताप्रेस-गोरखपुरम्
8. उपमितिभवप्रपंचकथा – श्रीसिद्धर्षिः, आगरा-कालेज पुस्तकालयःआगरा, 1904.
9. उपनिषत्संग्रहः – मोतीलाल बनारसीदासः, वाराणसी, 1971.
10. उपनिषद्-दर्शन का रचनात्मक सर्वेक्षण – रामचन्द्र रानाडे हिन्दी ग्रन्थ अकादमी, जयपुर, 1971.
11. ऋग्वेदः – सम्पा॰ विश्वबन्धुः, विश्वेश्वरानन्द संस्थानम् होशियारपुरम्, 1965.
12. ऋग्वेदः – सम्पा॰ विश्वबन्धुः विश्वेश्वरानन्दसंस्थानम् होशियारपुरम्, 1965.
12. एकादशोपनिषद् – व्या॰ सत्यव्रतः, देहरादून विद्या विहार, देहरादूनम्.
13. ऐतरेय-आरण्यकः – गंगाधरः वापूराव काले, आनन्दाश्रमं, पूणे
14. एतरेय-ब्राह्मणः – सम्पा॰ गणेशशास्त्री, सायण भाष्यः, पूणे, 1931.
15. औचित्यविचारचर्चा – क्षेमेन्द्रः, गीताप्रेस-गोरखपुरम्-1971, श्री नारायणसिंहकृतहिन्दी-अनुवादसहितं रामनगर, वाराणसी, सम्वत्, 2017

16. काव्यप्रकाश: - मम्मट:, सम्पा. आचार्य विश्वेश्वर:, ज्ञानमण्डल-प्रकाशनम्, वाराणसी, 1968.

17. काव्यानुशासनम् - हेमचन्द्र:, निर्णयसागरप्रेस:, बम्बई, 1938.

18. काव्यालंकार: - भामह:, चौखम्बा-संस्कृतसीरीज्, वाराणसी, 1928.

19. काव्यालंकार: - रुद्रट:, चौ.सं.सी., वाराणसी, 1966.

20. काव्यादर्श: - दण्डी, रङ्गाचार्यरेड्डीशास्त्रीकृतप्रभाव्याख्या, भण्डारकरप्राच्यविद्यामन्दिर, पूना-1970.

21. काव्यात्ममीमांसा - जयन्तमिश्र:, चौ. विद्याभवन, वाराणसी, 1964

22. कामसूत्रम् - वात्स्यायन:, यशोधरकृतजयमंगलटीकोपेतम्, निर्णय सागरप्रेस, बम्बई, 1900.

23. गर्गसंहिता - सम्पा. विभूतिभूषण भट्टाचार्य:, संस्कृत वि.वि., वाराणसी, शक सम्वत-1880.

24. चैतन्यचन्द्रोदय:, कविकर्णपूर:, हिन्दीविद्यापीठम् आगरा वि.वि., आगरा-1913.

25. छान्दोग्योपनिषद: (हिन्दी) नवल-किशोर-प्रेस:, लखनऊ, हिन्दी विद्यापीठ आगरा वि.वि. आगरा-1913.

26. ज्ञानसूर्योदय: - वादिचन्द्रसूरि: अनु. नाथूराम जैन: साहित्यसदन, चांदनी चौक, दिल्ली

27. जीवानन्दम् - आनन्दरायमखी, आगरा विश्वविद्यालय पुस्तकालय: आगरा ।

28. तत्त्वार्थवृत्ति: - उमास्वातिवाचक:, भारतीय-ज्ञानपीठम् काशी, 1949.

29. तत्त्वार्थसंग्रह: - शान्तरक्षित:, सम्पा. एम्बर-कृष्णमाचार्य:, ओरिएण्टल लाइब्रेरी, बड़ौदा ।

30. तर्कसंग्रह: - आ. विश्वेश्वरकृतहिन्दीव्याख्योपेत:, चौ.सं.सी., वाराणसी, 1963.

31. त्रिपुररहस्यतन्त्रम् - हरितायन:, सम्पा. मुकुन्दलालशास्त्री, चौ.सं.सी., वाराणसी, 1988 वि.सं.

32. दशरूपकम् - धनिकधनञ्जयौ - भोलाशंकरव्यासकृत "चन्द्रकला" व्याख्योपेतम्, चौ० विद्याभवन वाराणसी, 1982.

33. देवीभागवतपुराणम् - श्रीरामशर्माकृतहिन्दी अनुवादसहितम्, संस्कृतिसंस्थानम्, बरेली, 1968.

34. दर्शनसंग्रह: - दीवानचन्द-प्रकाशनं शाखा-सूचना-विभाग:, लखनऊ, 1958

35. ध्वन्यालोक: - सम्पा० डॉ० नगेन्द्र: व्या० आचार्य विश्वेश्वर:, चौ० सं०सी०-वाराणसी, 1975.

36. धम्मपदम् - सत्यप्रकाशशर्मकृतहिन्दीअनुवादसहितम्, साहित्य-भण्डार:, मेरठ:, 1974.

37. धर्मविजयनाटकम् - भूदेवशुक्ल:, विद्याविलासप्रेस, वाराणसी, 1930.

38. नाट्यशास्त्रम् - भरतमुनि:, सम्पा० मनोमोहनघोष:, कलकत्ता, प्रथमो भाग: {1-27} 1967 द्वि०भा० {28-36} 1956.

39. नाट्यशास्त्रम् - अभिनव-भारतीसहितम्, सम्पा० डॉ० रघुवंश:, लीडरप्रेस, इलाहाबाद, 1968.

40. नाट्यदर्पणम् - रामचन्द्रगुणचन्द्रौ, सम्पा० आ० विश्वेश्वर:, दिल्ली, वि०वि० दिल्ली, 1961.

41. निरुक्तम् - यास्क:, सम्पा० शिवनारायण शास्त्री, इण्डोलॉजिकल बुक, दिल्ली, 1972.

42. न्यायदर्शनम् - वात्स्यायन-भाष्योपेतम्, उदयनारायणकृत हिन्दी अनुवादसहितम्, मधुरापुरम् मुज्जफरनगरम् 1906.

43. न्यायमञ्जरी - जयन्तभट्ट: - सम्पा० गौरीनाथशास्त्री, सम्पूर्णानन्द-संस्कृत वि०वि० वाराणसी, 1982.

44. नारदभक्तिसूत्रम् - हनुमानप्रसादपोद्दारकृतहिन्दी व्याख्यासमेतम्, गीताप्रेस:, गोरखपुरम् सम्वत् 2001.

45. नेमिनिर्वाणम् - वाग्भट्ट:, सम्पा० शिवदत्तशर्मा एवं काशीनाथशर्मा, निर्णयसागर-प्रेस:, बम्बई, 1936.

46. परीक्षामुखसूत्रम् - माणिक्यनन्दी, सम्पा. महेन्द्रकुमारः, निर्णय-सागर प्रेस, बम्बई, 1941.

47. पंचदशी - विद्यारण्यः, रामावतारकृत हिन्दी-अनुवादः, बिजनौर (उ.प्र.) वि.सं. 1991.

48. पातंजलदर्शनम् - सिद्धेश्वरयन्त्र, कलकत्ता, 1897.

49. पातञ्जलयोगप्रदीपः - ओमानन्द-प्रदीप प्रेस, मुरादाबाद, 1942.

50. पुरञ्जनचरितम् - कृष्णदत्तमैथिलः आगरा- वि.वि.- आगरा, 1955.

51. पूर्वमीमांसा - ओरिएण्टल लाईब्रेरीपब्लिकेशन, मैसूर, 1808.ई.

52. प्रबोधचन्द्रोदयः, श्रीकृष्णमिश्रः, व्या. पं. रामनाथ त्रिपाठी शास्त्री, चौ. अमर भारती-प्रकाशनम्, वाराणसी, 1977.

53. प्रबोधचन्द्रोदयः - टीका पं. रामचन्द्रमिश्रः चौ. विद्याभवन वाराणसी, सं. 2012.

54. प्रबोधचन्द्रोदयः (चन्द्रिका-प्रकाशव्याख्याभ्याम्) निर्णयसागर-प्रेस, बम्बई, 1935.

55. प्रबोधचन्द्रोदयः - श्रीगोविन्दामृत भगवत्कृतया नाटकाभरणव्याख्या-सहितम्, त्रिवेन्द्रम् सं.सी. 1936.

56. प्रतीकदर्शनम् - वीरेन्द्रसिंहः, मंगलप्रकाशनम्, जयपुरः, 1977.

57. प्रतीकवादः - पद्मा-अग्रवाल - मनोविज्ञानप्रकाशन वाराणसी, 1963.

58. प्रकरणपंजिका - शालिकानाथ मिश्र, सम्पा. मुकुन्दशास्त्री, संस्कृत-पुस्तकालय, वाराणसी, 1904.

59. प्रमेयरत्नमाला - माणिक्यनन्दी, हीरालाल-जैनकृत-हिन्दी-अनु. सहिता, चौ.सं.सी.-वाराणसी, वि.सं. 2020.

60. प्राचीनभारतीयमनोविद्या - दिनेशचन्द्रभट्टाचार्यः, नगेन्द्रपर्जन्य-मन्दिर सी-27, कलकत्ता-32, 1972.

61. बाल्मीकि रामायणम् - सम्पा. श्री निवासशास्त्री, गुजराती प्रिंटिंग प्रेस, बम्बई, 1920.

62. बुद्धचरितम् - अश्वघोषः, रामचन्द्रदासशास्त्रीकृतप्रकाशव्या. चौ. विद्याभवनम्, वाराणसी ।

63• बौद्धदर्शन और वेदान्त - चक्रधरशर्मा, स्टूडेन्टस फ्रेण्डस, वाराणसी, 1949•
64• बौद्धदर्शन का विवेचन - बलदेवदास बिरला, माधव विष्णु पराडकर, काशी
65• ब्रह्मज्ञानम् - मदनगोपालशास्त्री, चौ• विद्याभवन, वाराणसी, 1986
66• ब्रह्मसूत्र भाष्यम्, बादरायण, मोतीलाल बनारसीदास, दिल्ली-1964•
67• भरत और भारतीय नाट्यकला - सुरेन्द्रदीक्षित, राजकमलप्रकाशन, दिल्ली, 1970•
68• भक्तिचन्द्रिका - विश्वेश्वरनाथपाण्डेय, सम्पा• अनन्तशास्त्री फडके, राजकीय संस्कृत पुस्तकालय, वाराणसी, 1938•
69• भक्तिमीमांसा - विश्वनाथशुक्लकृत संस्कृतहिन्दीव्याख्या, विवेक पब्लि•, अलीगढ़, 1980•
70• भक्तिरसामृतसिन्धु: - रूपगोस्वामी, सम्पा• डॉ• नगेन्द्र:, अनु• आ• विश्वेश्वर:, वि•वि• प्रकाशन, दिल्ली, 1963•
71• भावप्रकाशनम् - शारदातनय:, सम्पा• अनु• मदनमोहन अग्रवाल, राधाकृष्ण जनरलस्टोर, चौक बाजार, सादाबाद {मथुरा}-1978•
72• भक्तिकालीन कवियों के काव्य सिद्धान्त - सुरेश चन्द्र गुप्त, आर्य बुक डिपो, नई दिल्ली, 1971•
73• भारतीयदर्शन - बलदेव उपाध्याय, चौ• ओरिएण्टलिया, वाराणसी, 1979•
74• भारतीय दर्शन - वाचस्पतिगैरोला - लोक भारती प्रकाशन, इलाहाबाद, 1962•
75• भारतीय दर्शन - उमेशमिश्र, हिन्दी समिति सूचना विभाग, लखनऊ, 1964•
76• भारतीयदर्शन के सम्प्रदाय - सुधीर कुमार, एम• हिरियन्ना, सम्पा• एवं अनु• मधुकर, इलाहाबाद सेन्ट्रलबुकडिपो, इलाहाबाद, 1954•
77• भारतीयदर्शन और मुक्तिमीमांसा - डॉ• किशोरदास स्वामी, महालक्ष्मी लास वर्क्स प्रा•लि• 1980•
78• भारतीयदर्शन में मोक्षचिन्तन - अशोक कुमार लाट, हिन्दी ग्रन्थ अकादमी, भोपाल, {म•प्र•} 1973•

79· भारतीयकाव्यशास्त्र के प्रतिनिधि सिद्धान्त - डॉ· राजवंश सहाय "हीरा", चौ· विद्याभवन, वाराणसी, 1967·
80· मनोविज्ञान - जगदानन्द पाण्डेय, तारा पब्लि· वाराणसी, 1961·
81· मनोविज्ञान - वुडवर्थ रावर्ट एस· एवं डोनाल्ड जी मार्विक्स, उमापतिराय कृत हिन्दी अनुवाद, अपर इण्डिया पब्लि· लखनऊ।
82· मनोविज्ञान - यदुनाथसिन्हा, लक्ष्मीनारायण, आगरा, 1957·
83· मनोविज्ञानमीमांसा - विश्वेश्वरः, आत्माराम पब्लि· दिल्ली, 1956·
84· मनोविश्लेषण और फ्रायडवाद की रूपरेखा, मसीह या; मोतीलाल बनारसीदास, पटना, 1954·
85· मानमेयोदयः, नारायण, कुनहन-राज-एवं एस·एस· सूर्यनारायण-शास्त्री-द्वारा-अनूदितः,अड्यार, मद्रास ।
86· मिलिन्द-प्रश्न §मिलिन्दपज्हो§ जगदीश काश्यपकृतहिन्दी अनुवादः सारनाथ; वाराणसी, 1937·
87· मीमांसा-दर्शन - जैमिनी, अनु· श्रीराम, संस्कृति संस्थान, बरेली,1964·
88· मिथ्याज्ञानविडम्बनम् - रविदास, विद्यारत्न यन्त्रालय; कलकत्ता,1894·
89· मोहराजपराजयम् - "यशपाल" सम्पा· मुनिचतुरविजयः, सेन्ट्रल लाइब्रेरी, बड़ौदा, 1918·
90· यजुर्वेदः - अनु· श्रीराम, संस्कृतिसंस्थानम् बरेली, 1965·
91· यतीन्द्र मतदीपिका - श्रीनिवासदास, वासुदेव शास्त्री, अभ्यंकरकृत "प्रकाश" व्या· सहित, आनन्द आश्रम, पूना,1977·
92· योगसूत्रम्, पतंजलिः, आर्य-भूषण-प्रकाशनम् पूणे ।
93· रसगङ्गाधरः - पण्डितराजजगन्नाथः सम्पा· बदरीनाथ झा एवं मदनमोहन झा, वाराणसी, 1982·
94· रसतरङ्गिणी - भानुदत्तः, सम्पा· देवदत्त कौशिकः, मुन्शीराम मनोहरलाल पब्लि·, दिल्ली, 1974·
95· रसार्णवसुधाकरः, शिंगभूपालः, सम्पा· गणपतिशास्त्री, महाराज-शासन राजकीय यन्त्रालय, त्रिवेन्द्रम्, 1916·

96• रसचन्द्रिका - विश्वेश्वरपाण्डेय:, सम्पा• विष्णुप्रसाद भण्डारी,
चौ• विद्याभवन, वाराणसी ।

97• रसमीमांसा - रामचन्द्रशुक्ल:, सम्पा• विश्वनाथप्रसादमिश्र:, नागरी
प्रचारिणीसभा, काशी, वि•सं• 2017•

98• रसरत्नप्रदीपिका - अल्लराज, सम्पा• आर•एन• दाण्डेकर, भारतीय
विद्याभवन, बम्बई, 1945•

99• रसरत्नसमुच्चय:, वाग्भट्ट:, श्रीधर्मानन्दशर्मकृत हिन्दी अनुवाद सहित :,
मोतीलाल बनारसीदास, दिल्ली, 1956

100• रससिद्धान्त: - डा• नगेन्द्र, सम्पा• एवं अनु• अमीरचन्द्रशास्त्री,
श्री लालबहादुरकेन्द्रीयसंस्कृत विद्यापीठ, दिल्ली, 1973•

101• रससिद्धान्त और नाटक, सुन्दरलाल कथूरिया, देववाणी परिषद्,
दिल्ली, 1965•

102• रससिद्धान्त की दार्शनिक और नैतिक व्याख्या, तारकानाथ बाली,
वि•वि• प्रकाशन, आगरा, 1964•

103• रसदर्शनम् - आ• रमेशचन्द्रशुक्ल:, देववाणीपरिषद्, दिल्ली

104• लघुसिद्धान्तकौमुदी - मैत्री प्रकाशनम् 537, लाजपतरायमार्किट, दिल्ली-6•

105• विवेकचूडामणि: - शंकराचार्य:, हिन्दी-व्या•-मुनिलाल:, गीताप्रेस-
गोरखपुरम्, वि•सं• 2018•

106• वेदान्तसार: - श्रीसदानन्द: व्या• राममूर्तिशर्मा, चौ• अमरभारती
प्रकाशनम्, वाराणसी

107• वेदान्तपरिभाषा - गजानन, चौ• सुरभारती प्रकाशन, वाराणसी, 1977•

108• वेदान्त का आत्मविचार - बलदेवदास बिरला, माधवविष्णु पडारकर,
काशी ।

109• वैदिकदर्शन - फतहसिंह, भारती भण्डार, इलाहाबाद, 1959•

110• वैदिक धर्म एवं दर्शन - ए•बी• कीथ, मोतीलाल बनारसीदास,
वाराणसी, 1963•

111• वैदिक सिद्धान्त मीमांसा - युधिष्ठिरमीमांसक, रामलालकपूर ट्रस्ट,
बहालगढ़ {सोनीपत} सं• 2033•

112• वैयाकरणसिद्धान्तकौमुदी - भट्टोजिदीक्षित:- अमर भारती प्रकाशन, वाराणसी

113· वैशेषिकदर्शनम् - चौखम्बा संस्कृत सीरीज़, वाराणसी, 1966·

114· शब्दकल्पद्रुम: - चौ·सं·सी·वाराणसी, 1967·

115· शाण्डिल्यभक्तिसूत्रम् - शाण्डिल्य:, हिन्दी व्या· श्री कृष्णमणि-त्रिपाठी, भारतमनीषा, वाराणसी, 1973·

116· श्रीमद्भगवद्गीता - हिन्दी व्या· श्री राधाकृष्ण शास्त्री, दण्डीस्वामी निगमबोध तीर्थ, निगम-बोध आश्रम, लुधियाना {पंजाब}

117· श्रीमद्भागवत्पुराणम् - सम्पा· श्री कृष्णशंकर शास्त्री, भागवतविद्यापीठ, अहमदाबाद

118· सरस्वतीकण्ठाभरणम् - भोजराज:, रामेश्वरमिश्र-कृतरत्नदर्पण-व्याख्या सहितम्, चौ· ओरिएण्टलिया, वाराणसी, 1976·

119· सर्वदर्शनसंग्रह: - सायणमाधवाचार्य:, हिन्दी व्याख्या, उमाशंकर "ऋषि" चौ· विद्याभवन, वाराणसी, 1969·

120· समयसार: - कुन्दकुन्द:, अनु· एवं व्या· जे·एल· जैनी, एवं शीतलप्रसाद, सेण्ट्रल जैन पब्लि· हाउस, लखनऊ, 1930·

121· सौन्दरानन्द-महाकाव्यम् - अश्वघोष:, सम्पा· सूर्यनारायण चौधरी, मोतीलाल बनारसीदास, दिल्ली ।

122· संस्कृत-ड्रामा - ए·बी· कीथ, अनु· उदयभानु सिंह, मोतीलाल बनारसी-दास, दिल्ली ।

123· संस्कृतनाट्यकला - रामलाल शुक्ल; मोतीलाल बनारसीदास, दिल्ली,1968

124· संकल्पसूर्योदयनाटकम् - वेंकटनाथ; श्रीमद्वेदान्तदेशिक ग्रन्थमाला, कांजीवरम्, 1941·

125· संस्कृतसाहित्य का इतिहास - ए·बी· कीथ, मोतीलालबनारसीदास, दिल्ली, 1968·

126· संस्कृतसाहित्य का इतिहास - बलदेव उपाध्याय, शारदा मन्दिर, काशी, 1968·

127· संस्कृत साहित्य का इतिहास - कन्हैयालाल पोद्दार, नागरी प्रचारिणी सभा, काशी, वि·सं· 2011·

128• संस्कृत साहित्य का इतिहास - वाचस्पति गैरोला, चौ• विद्याभवन प्रकाशन, वाराणसी

129• संस्कृत साहित्य का आलोचनात्मक इतिहास - रामजी उपाध्याय, रामनारायण लाल, इलाहाबाद, 1968•

130• साहित्यदर्पणम् - विश्वनाथ:, व्या• "विमला" शालिग्राम शास्त्री, मोतीलाल बनारसीदास, दिल्ली, 1966•

131• सांख्यकारिका - ईश्वरकृष्ण:, गौडपादभाष्यम्, जगन्नाथ शास्त्री, मोतीलाल बनारसीदास, दिल्ली, 1966•

132• सांख्यतत्त्वकौमुदी - वाचस्पतिमिश्र; मेट्रोपोलियन प्रकाशन मन्दिर, कलकत्ता

133• सांख्यसूत्रम् - विज्ञानभिक्षु:0 सम्पा• डॉ• रामशंकर, भारतीविद्या प्रकाशन, वाराणसी

134• सायकालाजी फार लिविंग हर्वर्ट - सानसन, मेग्राहिल बुक कम्पनी, न्यूयार्क, 1969•

135• हिन्दी नाटक का उद्भव और विकास - डॉ• दशरथ ओझा, मोतीलाल बनारसीदास दिल्ली, द्वि•सं• 2013 वि•सं•

136• हिन्दु सायकालाजी - स्वामी अखिलानन्द, रूटलेज एण्ड किगलपाल लिमिटेड, लन्दन 1960•

137• हिस्ट्री आफ वेस्टर्न फिलासफी, वी• रिसैल, जार्ज अलेन अलविन, लन्दन, 1947•

## कोशग्रन्था: -

1• अमरकोश: - सम्पा• कार्तिकाप्रसाद; चौ•सं•सी• वाराणसी, 1957•

2• आदर्श-हिन्दी-संस्कृत-कोश: सम्पा• रामस्वरूप-शास्त्री, चौ•सं•सी• वाराणसी

3• वृहत्-हिन्दी-कोश - सम्पा• कार्तिकाप्रसाद;, नागरी प्रचारिणी सभा, वाराणसी ।

4. संस्कृत-शब्दार्थ-कौस्तुभः - सम्पा॰ तरणीश झा, चौ॰ विद्याभवन, वाराणसी, दिल्ली

5. संस्कृत-इंगलिश डिक्शनरी - एम॰एम॰ विलियम्, सेण्ट्रल लाइब्रेरी, बम्बई ।

6. हिन्दी-विश्वकोशः- श्री नगेन्द्रनाथ-वसु, विश्वकोश प्रेस, कलकत्ता, आगरा वि॰वि॰ आगरा - 1965॰

७ भारतीय-साहित्य-शास्त्र-कोश: डॉ॰राजवंश सहाय, 'हीरा' बिहार हिन्दी ग्रन्थ अकादमी - पटना ।

English Books:

1. A History of Sanskrit Literature: A. Macdonell, Munshiram Manoharlal, Nai Sarak, Delhi, Agra Uni. Agra.

2. Advanced History of India - R.C. Majumdar, Delhi Uni. Library, 1953.

3. An Historical Introduction of Modern Psychology - Murphy, Asha Pub. Bombay.

4. An Introduction to Logic: H.W.B. Joseph, At the Clerondon Press, Oxford, London, 1906.

5. Concept of Mind in Indian Philosophy: Chennakeswan Sarswati, Asha Publication, Bombay.

6. Comparative Philosophy: Archie J. Bhan, Vikas Publishing House Pvt. Ltd., Delhi, 1977.

7. History of Indian Philosophy, Vol.I, Jadunath Sinha Pub. House, 89-S.R. Road, Calcutta-26, India, 1956.

8. History of Indian Philosophy, Vol.II: -do-

9. History of Ancient Philosophy: W. Wind, elband tr. into English From German by Herbert Ennest, Devar Pub. New York, 1956.

10. Indian Psychology Emotion & Will: Jadunath Sinah, Sinah Publishing House 396, S.R. Das Road, Calcutta.

11. Methods of Psychology: T.G. Andrews, John Willy & Sons, New York, London, Sydney, 1948-64.

12. Modern Indian Thoughts a Philosophical Survey - V.S. Narvane, Asia Publication House, Bombay, 1964.

13. Memoirs of the Archaeological Survey of India - R.D. Banerji, Government of India, Central Publication Branch, Calcutta, 1931.

14. Prabodhchandrodaya: J. Taylor, Central Library, Bombay.

15. Principles of Psychology: W. James, Asha Pub. Bombay.

16. Principles of Philosophy, Hari Mohan Bhattacharya, University of Calcutta, 1959.

17. Philosophical Studies: G.R. More, Routledge & Kegan Paul, London, 1922.

18. Philosophy of Logical Construction: Hemant Kumar Ganguli, Sanskrit Pustak Bhandar, Calcutta-1962.

19. Psychological Development Through the life span: Sidney L. Pressey and Raymond G. Kehlen Harper & Row Pub. New York, 1957.

20. The History of Skt. Literature, A.B. Keith, Oxford Uni. Press London, Agra Uni. Agra.

21. The Sanskrit Drama: A.B. Keith, -do-

22. The Dynastic History of Nothern India: H.C. Roy, Vol.II, Uni. Press. Calcutta.

23. The Struggle for Empire: R.C. Majumdar, Hindi Vidyapeeth, Agra University, Agra.

24. The Oxford History of India: A Smith, Delhi Uni. Library, Delhi.

25. What is Living and What is dead in Indian Philosophy: Devi Prasad Chatopadhaya, People's Publishing House, New Delhi, 1976.

ENGLISH DICTIONARIES:

1. Chambers's Encyclopaedia: Delhi University, Delhi.

2. Encyclopaedia Britanica - William Batten Pub. London, 1963.

3. Encyclopaedia of American - American Corporation, New York, 1961.

4. Epigraphica Indica Vol.I, II.

5. Indian Antiquery. Vol. XVIII.

6. Oxford English Dictionary - Oxford University Press, London, Choukhamba Vidya Bhavan, Delhi.

7. Sanskrit-English Dictionary: Sir M.M. Williams, Hindu Vidyapeeth, Agra University, Agra, Delhi University Library, Delhi.

= = = = = =